UNIVERSITY OF TORONTO
3 1761 00094554 3

Digitized by the Internet Archive
in 2011 with funding from
University of Toronto

http://www.archive.org/details/skandopapuryaiva00mnav

80

P U R A N A S. S K A N D A P U R A N A.

S I V A B H A K T A V I L A S A

SKANDOPAPURANIYA SIVABHAKTA VILASAH



BL
1135
P778 A22



अथ स्कन्दोप पुराणो य शिवभक्त विलासः प्रारभ्यते

CHOWKHAMBA SANSKRIT SERIES OFFICE
P. O. Box No. 8,
Gopalmandir Lane, Varanasi-1

श्रीगणेशायनमः वन्देशम्भुंविरंचिप्रमुखसुरशिरोरत्नकोटीरकोटि प्रोद्यन्माणिक्यनीराजितचरणनखंवेदवेदाङ्गमूलम् सोमंसोमार्द्ध चूडंविमलसुरसरिद्वीचिरोचिःकपर्दं विद्यामूर्त्तिवरेण्यंवरदमभिमतप्राप्तयेविश्वनाथम् १ श्रीमातुरुज्वलसरोजरुचोभजामि पादौप टीरनत्रपल्लव तल्लजाभौ यत्पीठपूजनविधिर्भवतित्रयाणां सर्गस्थितिप्रलयकारिसुरोत्तमानाम् २ अन्तरायकरिकेसरीभवन्यो गजाननद्वितिप्रथामगात् तंविचित्रचरितंविनायकं नायकंसकलसंपदांभजे ३ नृत्यतिकलापिनिनिजे लम्बोदरपुष्करोत्थघननिन दैः रविनयनैस्तंपश्यन् शक्तिधरःषाणमुखोजयति ४ सुब्रह्मण्यंपितरं गिरिजाम्बांमातरंगुरुंगंगाम् भैरवमादित्यमथो विष्णुंव्या सादिकान्मुनीन्नत्वा ५ स्कन्दोपपुराणकथा मुनिवरहरशर्म्मनिर्मितापुण्या भक्तविलासाभिख्या भगवद्भजनोचितापिचान्वर्था ६ दिव्यामृतफलदात्री दितदुरितादेवदेवकमनीया साधुजनचित्तरंञ्जन संजीवनमूलिकासरसभावा ७ श्रीमद्गौतम गोत्राब्धि कौस्तुभेनविविच्यते मानवल्लीनृसिंहेन महेश्वरमुदेमया ८ कलापकम् मिथ्यावादरजोमलीमसतयादुष्टामशिष्टो चिते व्यालापेषपिचाशनेषुनिरतामेतांरसज्ञांमम श्रीमच्छंकरभक्तपावनकथाभागीरथीमज्जनैः शुद्धांकर्त्तुमहंयतेबुधवराः क्षाम्यन्तुमेसाहसम् ९ मातर्भारतिमहिते मयिकलयकटाक्षवीचिसंचारम् व्याख्यायेनभवित्री भक्तविलासप्रकाशिकाख्यामे १०॥ ॥ॐ द्रुहखलुनिखिलश्रुतिस्मृतीतिहासपुराणादिपर्यालोचनपरिणत स्वान्तेरशेषवर्णाश्रम धर्म्ममर्म्मपारगैरत्रामुत्रच भोगमोक्षाभिलाषुकैः पुरुषैरभिलषणीयेषु धर्म्मार्थकाममोक्षेषुमोक्षएवपरमपुरुषार्थः नसपुनरावर्त्तते तमेवविदित्वाति मृत्युमेति यंप्राप्यननिवर्त्तन्ते तद्धामपरंममेत्यादि श्रुतिस्मृतिभिः तस्य नित्यत्वोपगमात् इतरेषांच तद्यथेहकर्मचितोलो कःक्षीयतएव मेवामुत्र पुण्यचितोलोकःक्षीयतइतिश्रुत्या यज्जन्यं तदनित्यमिति न्यायवत्याभङ्गयवगमाच्च सच मोक्षप दार्थः तान्त्रिकमतभेदेन दुःखध्वंसाज्ञाननाश परमानन्द स्फूर्त्तिरूप नानाविकल्पजालजटिलोपि निरतिशयाद्वैतवाद सि

द्वपरमात्मैक्यरूपएवभाष्यकारादिभिरभिमतोयुक्तः प्रतिपादयितुं तत्रच साधनाकांक्षायाम् विधिवदधीतसाङ्गस्वाध्यायंश
मादिषट्कसपन्नमधिकारिणंप्रति प्रवर्त्तमानाः आत्मावा अरेद्रष्टव्यः श्रोतव्योमन्तव्यो निदिध्यासितव्यः श्रोतव्यः श्रुतिवा
क्येभ्योमन्तव्यश्चोपपत्तिभिरित्यादिविधयो विशिष्टाधिकारिणमपेक्षमाणानसर्वजनसौलभ्यसम्पादकाइतिसर्वजनोप
योगि साधनगवेषणे मन्दाधिकारिणामपि महर्षिप्रणीतस्मृतीतिहासपुराणादिविचारएवशरणीकरणीयः ननुश्रोत
व्यः श्रुतिवाक्येभ्यः यदीशृणोत्यलकःशृणोति नहिप्रवेदसुकृतस्यपन्थाम् तमेतंवेदानुवचनेन ब्राह्मणाविविदिषन्ति
इत्यादिश्रुतिभ्यः वेदवचसामेवश्रवणमननाद्युपयोगितया श्रवणाद्यधिकारस्यच विधिवदधीत साङ्गस्वाध्याय पुरुषवि
षयतयाचइतिहास पुराणादीनां कथंशरणीकरणमितिचेन्न तादृशाधिकारस्य वैदिकमात्रपरतया विधिवदध्ययनस्य
च दुष्करत्वेन तत्रसर्वेषां असामर्थ्यमालोच्यपरमकारुणिकै र्बादरायणादिभि र्महर्षिभिः प्रणीतानामितिहासपुराणानां
व्यर्थतापातात् नचेष्टापत्तिः अस्यमहतोभूतस्य निश्वसितमेवैतद्यद्ऋग्वेदो यजुर्वेदःसामवेदोथर्वाङ्गिरसइतिहासःपु
राणमित्युपक्रम्य अस्यैवैतानि सर्वाणि निश्वसितानि इतिउपसंहारस्य बृहदारण्यकोपनिषदिस्फुटमुपलभ्यमानतया
इतिहासपुराणानामपि वेदवदीश्वरनिश्वसितत्वा विशेषेणभारतंपञ्चमोवेदः पुराणंपञ्चमोवेदः वेदःप्राचेतसादासी
त्साक्षाद्रामायणात्मनेत्यादिवचनैश्च तत्वज्ञानोपयोगिश्रवणाद्यनुकूलताभावस्य स्वप्नेपि वक्तुमशक्यत्वात् नच इतिहास
पुराणादीनां वेदार्थोपबृंहकतायाइतिहासपुराणाभ्यां वेदंसमुपबृंहयेदित्यादिभिःप्रतिपादितत्वात्तदर्थोपबृंहकत्वेनगौ
णत्वात्प्रधानभूतां श्रुतिंपरित्यज्य गौणेकथमितिहास पुराणादौ प्रवृत्तिरितिवाच्यम् मुख्याधिकारिणामेव मुख्ये प्रवृत्तेर्व
क्तव्यतया सर्वानुजिघृक्षापरिकल्पित पुराणादिवचसां सर्ववर्णाधिकारसौलभ्ये नसम्भवति सुलभोपायेतस्य अनतिक्र

मणीयत्वात् अथसुकरत्वात्पुराणादिकमेवसर्वैरुपेयं दुर्लभेस्वाध्यायाध्ययनादोमाभूत्प्रवृत्तिरिति चेदुच्यते ब्राह्मणेननिष्कारणं षडंगोवेदोध्येतव्यः योनधीत्यद्विजोवेदमन्यत्रकुरुतेश्रमम् सजीवन्नेवशूद्रत्वमाशुगच्छतिसान्वयदृतिस्मरणेन स्वाध्यायाध्ययनस्यनित्यतयातदभावेप्रत्यवायश्रवणेनच पुराणप्रवृत्तिमात्रेणतस्यनिराकर्त्तुमशक्यत्वात् एवंच सतिविशिष्टाधिकारिणां वेदादिषु सर्वत्राधिकारो मंदाधिकारिणामितिहासपुराणादिष्वेवेतिव्यवस्थाऽऽदरणीया यदिचशैववैष्णवादि पुराणेषु परस्पर विरोधदर्शनादनुपादेयत्वमुच्यतेतदा अतिरात्रषोडशिग्रहणाग्रहणप्रतिपादकश्रुतिविरोधवदिदमपिसुपरिहार्यम् वस्तुतस्तु पुराणानामपि नपरस्परविरुद्धार्थ प्रतिपादकतासुप्रतिपादा यथाहंवसुधा सर्वंसत्यमेतद्ब्रौकसः अहंभवोभवंतश्चसर्वेनारायणात्मकाः विभूतयस्तुयास्तस्य तासामेवपरस्परम् आधिक्यंन्यूनताबाध्य बाधकत्वेनवर्तते भवानहंचविश्वात्मन्नेकमेवहिकारणम् जगतोस्यजगत्यर्थं भेदेनावांव्यवस्थितौ त्वयायदभयंदत्तं तदत्तमखिलंमया मत्तोविभिन्नमात्मानं द्रष्टुंनार्हसिशंकर योऽहंसत्वंजगच्चेदंसदेवासुरमानुषम् अविद्यामोहितात्मानःपुरुषाभिन्नदर्शिनइति विष्णुपुराणवचनानाम् विष्णोरन्यंतुपश्यंतियेमांब्राह्मणमेवच कुतर्कमतयोमूढाःपच्यंतेनरकेष्वधः इत्यादिभविष्यत्पुराणवचनानाम् सितनीलादिभेदेनयथैकंदृश्यतेनभः भ्रांतिदृष्टिभिरात्मापितथैकःसन्पृथक्पृथक् इत्यादियमवचनानाम् विष्णुरुद्रांतरंचैव श्रीगौर्योरंतरंतथा गङ्गागोर्यन्तरंचैवयोब्रूतेमूढधीस्तुसः इत्यादिस्कान्दवचनानामप्येकार्थप्रतिपादकत्वात् इत्थंचवेदवचसामिवतदर्थोपबृंहकपुराणवचसामप्यात्मैकप्रतिपत्तिप्रयोजकतायांनिर्विवादायां आयुर्वेदधनुर्वेदादीनामिव गणेशपुराणाद्युपपुराणानामपितत्त्वज्ञानोपयोगित्वेन प्रामाण्येनसिद्धमेवोपादेयत्वंतस्माद्यदौशृणोतीत्यादिवाक्यानां वेदवचनानिविहाय पुराणादीनि नग्राह्याणीत्यत्रतात्पर्यम् नतुसर्वथा पुराणादीनि त्याज्यानीत्यत्र तेषामधिकारिविशेषपरतयानिरूपितत्वात्पुराण प्रतिपादितानाम

पिन्नतोपवासतीर्थयात्रादीनां श्रुतिचोदितयागादीनामिव बहुवित्तव्ययायाससाध्यतया तत्फलस्य अनित्यतया बहिरङ्ग-
साधनतयाच परमेश्वरकथाश्रवणनामकीर्त्तनादिसुलभान्तरङ्ग-साधनभक्तिमार्गैकबद्धादराणां उपकारकमनेकभ
क्तसच्चरित्रपवित्रितं भक्तविलासाख्यं उपपुराणंपरमकारुणिको हरशर्म्मनामामुनिः सूतशौनकादि सम्वादमुखेनप्र
कटीचकार अत्रच तत्वज्ञानसाधनांतरापेक्षया भक्तेरन्तरङ्ग-साधनता मवलंब्य सुचरितनानाभक्तकथा विचित्राः प
वित्राश्चनिरूपिताः भक्तेरतरङ्ग-साधनत्वञ्च श्रीमद्भागवते दशमस्कन्धेवेदस्तुतौ दुरवगमात्म तत्वनिगमायेति श्लोक
व्याख्यावसरे भक्तिरल्पसाधनमितिवचनमनुचितं मन्वानोभक्तिंगुरुंकरोतीत्युपक्रम्य श्रुतिश्चमुक्तेरप्याधिक्यंभक्ते
र्दर्शयतियथाहयंसर्वेदेवानमन्तिमुमुक्षवोब्रह्मवादिनश्चेति व्याख्यातंचसर्वज्ञैर्भाष्यकृद्भिः नृसिंहतापिन्यांमुक्ताम्रपिली-
लाविग्रहंकृत्वा भजन्तइति त्वत्कथामृतपाथोधौविहरन्तोमहामुदः कुर्वन्तिकृतिनःकेचिच्चतुर्वर्गंतृणोपमम् आरामस्य
पश्यन्तिनतंकञ्चनपश्यति नतंविदाथयइमाजजानान्यद्युष्माकमन्तरंभवति नीहारेणप्रावृताजल्पाचासुतृपउक्थशासश्चरन्ती
त्याद्याःश्रुतयोनुक्रोशत्योजगदात्मनीश्वरेरतिमुपदिश्यन्तीत्यन्तेनश्रीधरस्वामिभिर्दृढीकृतमेव साचरतिर्भक्तिरेव अथातोभ
क्तिजिज्ञासा सापरानुरक्तिरीश्वरे इतिशाण्डिल्यसूत्रेपिअनुरक्तेर्भक्तित्वेनकथनात् तथाभक्तिःप्रसिद्धाभवमोक्षणायेतिब्रह्मा
ण्डपुराणे भक्त्यामामभिजानातियावान्यश्चास्मितत्वतः ततोमांतत्वतोज्ञात्वाविशतेतदनन्तरमितिभगवद्गीतासुचबहुतरमुक्त
त्वादेतादृशपरमपुरुषार्थान्तरङ्ग-साधनभक्तिसाधनमिदमुपपुराणंबहुशस्साधुजनोपकारकं तदेतद्यथामतिव्याख्यायते अ
थतत्रभवान्सुगृहीतनामाहरशर्म्मामुनिर्निखिलपुराणोपपुराणसारभूतंभक्तिप्रधानमन्वर्थंभक्तविलासाख्यमुपपुराणंप्रारभमा-
णःप्रारीप्सितविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वादाशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखमित्याचार्यप्रणी

तापीरायन्यतमस्यमङ्गलस्यप्रबन्धमुखलक्षणत्वात्प्रकृतोपपुराणप्रतिपाद्यपरमशिवाभेदंगजाननेप्रकटीकुर्वंस्तयोरभिन्नंमङ्गलमु
पनिबध्नाति॥ ॥ ॐ ॥ ७ ॥ ॥वामांकेति तत्रादौवामांकेतिगुरुत्रयात्मकस्यमगणस्य सुन्दरवाचकस्य वामशब्दस्य च
प्रयोगाद्गणेशगणशुद्धिःसूच्यते देवतावाचकाःशब्दायेचभद्रादिवाचकाः तेसर्वेनैवनिंद्याःस्युर्लिपितोगणतोपिवेत्यभियुक्तोक्तेःमगण
प्रयोगादेतत्प्रबंधाध्येतॄणांश्रोतॄणांचश्रीसंप्राप्तिःसूच्यतेमोभूमिस्त्रिगुरुः श्रियंवितनुतद्इतिछंदोग्रंथेषु तत्फलदर्शनात् वामःसुंदरोदक्षि
णेतरश्चयोंकउत्संगः वामोवल्गुप्रतीपोर्द्वौ वामंशरीरेसव्यंस्यात् उत्संगचिन्ह्योरंकद्वितिचामरः तमारूढायावामोरूः वामौसुन्दरौऊ
रूयस्यास्तागणेशीशक्तिः संहितशफलक्षणवामादेश्चेत्यूङ् तस्यायौवक्षोजौ पयोधरौतयोरानीतंपुष्करंशुंडाग्रंयेनपुष्करंकरिह

वामांकारूढवामोरूवक्षोजानीतपुष्करं विघ्नवारणहर्यक्षंविघ्नराजमुपास्महे १॥ ॥

स्तांग्रद्इत्यमरः अनेनविशेषणेन ध्येयोवल्लभयासपद्मकरयाश्लिष्टोज्वलद्दूषयेतिउक्तमहागणपतेर्ध्यानमुपनिबद्धं विघ्नाःप्र
त्यूहाएववारणागजामयूरध्वंसकादिः तेषांहर्यक्षंसिंहमितिरूपकालंकारः हर्यक्षःकेसरीहरिरित्यमरः एवंभूतंविघ्नराजं वि
घ्नानांराजाविघ्नराजःराजाहद्इतिटच् तमुपास्महेउपासनंचतद्विलक्षणप्रत्ययानंतरिततदेकतानता रूपंचित्तैकाग्र्यंतेनध्या
यामद्इत्यर्थः शिवपक्षेपिवामश्चासौ अंकःअंगंदेहार्द्धमित्यर्थः अंकोरूपकभेदांगचिन्हरेखाजिभूषणद्इतिमेदिनी तमारूढा=
यावामोरूःपार्वतीपूर्वंवत्समासः तस्यावक्षोजेकुचे आनीतंपुष्करंपद्मंराजीवपुष्करांभोरुहाणिचेत्यमरः पद्मत्वेनाध्यवसि
तःकरोवायेनएतादृशं विशेषेणहन्तिदतीयलोचनात्मना विश्वजातंहिनस्तीतिविघ्नोग्निः अग्निर्वैमृत्युरितिश्रुतेः अग्निमीळेपु
रोहितमिति अग्निशब्दस्य सकलवेदादौश्रूयमाणत्वादत्रद्वंद्वेपूर्वनिपातः वारिजलानिआपःस्त्रीभूम्निवार्वारीत्यमरः तेभ्यःअ

नितिप्रणितीतिवारणः चन्द्रअब्जोजैवात्रकः सोमइत्यभिधानात् चन्द्रमावा अपांपुष्पमितिश्रुतेश्च हरिः सूर्यः हरिश्चंद्रार्कवाता श्वेतिमेदिनी तेअक्षीणियस्यतंतेजस्त्रितयलोचनमित्यर्थः बहुव्रीहौसक्थ्यक्ष्णोरितिषच् विघ्नस्यअग्नेःतेजस्सामान्यस्योपलक्षणंतस्यरंजनाद्राजातस्यापिप्रकाशकइत्यर्थः तस्यभासासर्वमिदंविभातीतिश्रुतेः तंपरमशिवमुपासमहे अस्यार्थःपूर्ववत् अत्रस्तोतव्यत्वेनप्रकृतयोः शिवगणेशयोर्वर्णनंप्रकृतश्लेषः १ अस्यस्कान्दोपपुराणत्वात्स्कंदस्यमङ्गलाचरणमावश्यकं मन्वानस्तस्यमङ्गलमातनोति गौरीगिरीशयोरिति गौरीचगिरीशश्चतौपार्वतीपरमेश्वरौ तयोरंकादुत्संगादंकेऽसंगेकृतेगतागत

गौरीगिरीशयोरंकादंकेकृतगतागतं उद्यद्दशनषड्भ्रमुमासुतमहंभजे २ शिरसाः
शिवभक्तानांपादाब्जरजःकणान् वन्दामहेवयंनित्यंवासनाध्वांतभास्करान् ३ ॥

ते येनतंप्रलोभ्यवस्तु दर्शनसंजातप्रणयतया परस्परप्रेमाधिक्यं दर्शयितुमितिभावः उद्यंतःदशनादंतायेषु रदनादशनादंताद्त्यमरः एतादृशानिषट्संख्याकानिवक्त्राणि मुखानियस्यतं उमासुतं भजेसेवे अनेन मङ्गलद्वयेन अस्यग्रंथस्य उपासनाप्राधान्यंदर्शितम् २ भक्तेःप्रकृतत्वात्तस्याश्च साधुजनयोगजन्यत्वात्तांमंगलमाह शिरसेतिशिवभक्तानां अनन्यभावेन शिवैकतानानां पादाम्बुजरजःकणान् पादाअम्बुजानीवेत्युपमितिसमासः तेषांरजःकणान् परागलेशान् शिरसावयं नित्यंवंदामहे नमस्कुर्मः कथंभूतान् वासनाध्वांतभास्करान् अविद्यासंस्काराएवध्वान्तन्तस्यभास्करान्निवर्त्तकानित्यर्थः एतेनसत्सङ्गस्य आत्यंतिकानिद्यानिवृत्तिरूपं मोक्षरूपं फलंदर्शितम् ३ ॥

भेदस्यकल्पिततयापरमाद्वैतपदाभिषेकंपरमशिवस्य सब्रह्मसशिवस्सहरिस्सेन्द्रःसोक्षरःपरमःस्वराडितिश्रुत्या प्रतिपादितं
दर्शयितुंतत्तद्देवतांतरविषयकंमंगलमातनोति वंदामह इतिश्रीकांतंविस्मुंदुहिणंब्रह्माणंरविंसूर्यंस्कंदंकुमारंहरिमुखा
निन्द्रादीन्देवानुपमन्युमुखान्उपमन्युप्रभृतीन्दूर्वासःकुंभसंभवादीन्मुनीन्वंदामहे ४ प्रकृतोपयोगिकथामुपक्षिपति मुनय
इति नैमिशारण्ये नेमिःशीर्यतेऽस्मिन्नितिनेमिशं तदेवनैमिशं प्रज्ञाद्यण् तथाच वायुपुराणेश्रूयते एतन्मनोमयंचक्रंमयास्रष्टं
विसृज्यते यत्रास्यशीर्यतेनेमिःसदेशस्तपसःशुभः इत्युक्तासूर्यसंकाशंचक्रंस्रष्टामनोमयं प्रणिपत्यमहादेवंविससर्जपितामह

वंदामहेवयंनित्यं श्रीकान्तंद्रुहिणंरविं स्कन्दंहरिमुखानन्या नुपमन्युमुखान्मुनीन्४
मुनयोनैमिषारण्ये दीर्घसत्रेकृतश्रमाः श्रुतिस्मृतिपुराणज्ञमपृच्छन्सूतमागतम् ५

हःतेपिहृष्टतराविप्राःप्रणम्यजगतांप्रभुं प्रययुस्तस्यचक्रस्यनेमियत्रविशीर्यते तद्वनंतेनविख्यातंनैमिशंमुनिपूजितमिति नै
मिषइतिपाठे वराहपुराणोक्तंद्रष्टव्यं गौरमुखमृषिंप्रतिभगवद्वाक्यं एवंकृत्वाततोदेवोमुनिंगौरमुखंतदा उवाचनिमिषेणे
हनिहतंदानवंबलं अरण्येस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितमिति दीर्घसत्रे द्वादशवार्षिके यज्ञइत्यर्थः सत्रमाच्छादनेय
ज्ञइत्यमरः कृतश्रमा कृतःश्रमोयैःतादृशाः मुनयः मननशीलाः शौनकादयः श्रुतिस्मृतिपुराणज्ञं श्रुतयोऋग्वेदादयः स्मृत
यःमन्वादयः पुराणानि मत्स्यादीनि जानातीति तं अनेन विशेषणेन विवक्षितार्थबोधनसामर्थ्यं सूतस्य प्रकाशितं आ
गतं लोकानुजिघृक्षया स्वेनैव प्रासंसूतं पौराणिकं अपृच्छन् प्रश्नंचक्रुः ५ ॥ ७ ॥ ७ ॥ ७ ॥ ४

प्रश्नमेवाह अष्टादशेति मद्वयंभद्वयंचैव ब्रत्रयंवचतुष्टयं आपनालिंपुराणानि कूस्कंगारुडमेवच इतिपरिगणितान्यष्टाद
शजानातीतितत्संबुद्धिः व्यस्यतितेजोराशिरूपेणस्थितं वेदंविभजनइति व्यासोबादरायणः तच्छिष्यमहतीमतिर्यस्य वि
शिष्टज्ञानाश्रयेत्यर्थः अतएवमहत्तमअतिशयेनमहत् वयंसर्वेसंदिहानास्संशयाविष्टास्त्वांपृच्छामः ह उक्तसंशयंत्रि-
भिराह वेदानामित्यादिनावेदानांऋगादीनांआगमानांआगतं शिववक्त्रात्तुगतंतुगिरिजामुखेमतंसर्वमुनीनां यत्तस्मादाग

श्रीमुनयऊचुः अष्टादशपुराणज्ञ व्यासशिष्यमहामते संदिहानावयंसर्वे पृच्छामस्त्वांमहत्तम ह वेदानामागमानांचमंत्राणामपिकर्मणां प्रतिपादकवाक्यानां वाक्यानांमहतामपि ७ कुत्रपर्यवसन्नोर्थो जगतांकारणंचकिम् विचारितेपिवेदांते तदर्थेवगतेपिच ८ कर्म्म बंधानुवृत्तिश्च नमुंचतिकथंपुनः एतत्सर्वमशेषेण विस्तराद्वक्तुमर्हसि ९ ॥ ९ ॥

ममुच्यतेइत्युक्तलक्षणानांशैवादीनां मंत्राणांवैदिकतांत्रिकाणां कर्मणांयागादीनांप्रतिपादकवाक्यानांधर्मप्रतिपादकवा
क्यानामित्यर्थः महतांवाक्यानांतत्वमस्यादीनां कुत्रवस्तुनि पर्य्यवसन्नः तात्पर्यतया परिगतःअर्थःकिंजगतांकारणं वेदांतेअ
ध्यात्मशास्त्रे व्याससूत्रादौ विचारितेपिमीमांसितेपितदर्थे अवगतेपि ज्ञातेपि कर्मबंधानुवृत्तिःकर्मणाजातोयोबंधः तस्य अनुवृ
त्तिः अनुवर्त्तनंजननमितिशेषःकथंनमुंचति एतत्पूर्वोक्तं अशेषेण कात्स्न्येन विस्तरात् शब्दबाहुल्यात् सतुशब्दस्यविस्त
रइत्यमरः वक्तुमर्हसि एतदुत्तरज्ञानक्षमोसीत्यर्थः ७ ॥ ८॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥

इतीति अतिशयेनसर्वार्थान्वेत्तिजानातिसर्वदर्शीत्यर्थः इतिपूर्वोक्तप्रकारेणमुनिवरैःशौनकादिभिःदृष्टः महाभागः महान्भागोभाग्यंयस्यसःसूतः वक्तुंप्रचक्रमइतिउत्तरश्लोकेनान्वयः किंकृत्वेत्यतआह नमस्कृत्येति चतुर्थीप्रयोगआर्षः गुरुमूर्त्तयेगुरुस्वरूपायेत्यर्थः गुशब्दस्त्वंधकारस्यादुशब्दस्तन्निरोधकः अंधकारनिरोधित्वाद्गुरुरित्यभिधीयतइतिगुरुशब्दार्थः चैतन्यस्वरूपावरकाज्ञानाद्यविद्याध्वांतनिर्मूलनक्षमत्वंस्वप्रकाशचैतन्यरूपस्यशिवस्यैवेतिभावः तस्मैनमस्कृत्यविघ्नेशादींश्चपरयाभक्त्याप्रणम्यएवं वक्ष्यमाणप्रकारेण वक्तुंप्रचक्रमे आरेभे ११ शौनकादिकृतप्रश्नस्य सर्वोत्तमतांमत्वा तत्प्रशंसापूर्वकं मुनीन्संबोध्याह॥ ॥साध्विति

इतिदृष्टोमुनिवरैः सूतःसर्वार्थवित्तमः नमस्कृत्यमहाभागः शिवायगुरुमूर्त्तये १० विघ्नेशंभारतींदेवीं सम्प्रदायप्रवर्त्तकान्प्रणम्यपरयाभक्त्यावक्तुमेवंप्रचक्रमे ११ सूतउवाच साधुदृष्टंमुनिश्रेष्ठाः श्रोतव्यंयदिहेषतः श्रुतंयथागुरुमुखात् यथामतिवदामिवः १२ वेदागमपुराणेषु मंत्रेषुसकलेषुच एकएवमहादेवोविकारेषुयथार्णवः १३॥ ७ ॥

हेमुनिश्रेष्ठाःयदिहेषतःश्रोतव्यंतत्यथागुरुमुखात्श्रुतंतथायथा मतिवःवदामि १२ वेदेति वेदादिषुसर्वेषु एकएव महादेवःप्रतिपाद्यतयास्थितइतिशेषः सर्वेवेदायत्पदमामनंतीत्यादिश्रुतेः विकारेषुजलविकारेषु नदीनदसरःकूपतडागादिषु एकएवार्णवः प्रकृतितयास्थितःतथेत्यर्थः यथानद्यःस्यंदमानाःसमुद्रेअस्तंगच्छंति नामरूपेविहाय तथाविद्वान्नामरूपादिमुक्तः परात्परं पुरुषमुपैतिदिव्यं सयोहवै तत्परमं ब्रह्मवेद ब्रह्मैवभवति इतिमुंडकोपनिषदि १३॥ ७ ॥ ७ ॥ ७ ॥ ५

ननुशिवविष्णुगणेशार्कदेवीपुराणादिषुतत्तद्देवतापरत्वप्रतिपादकैर्नामभेदैरनेकेषांमुख्यत्वे कथंशिवएव सर्वाम्नायसमन्वयः श्रुत
आह नामांतरेति नामांतरपरेषुनामसंज्ञालक्षणयासंज्ञीवाच्योऽर्थः सचशिवादिशब्दवाच्यः अन्यतएतद्भिन्नंविष्ण्वाद्यर्थरूपं त
त्परेषु वाचकेषु हर्यादिषु संकोचंविनालक्षणादिकंविना तत्रैववाचकस्यस्वलद्वृत्तित्वसंभवात्साक्षादेवेत्यर्थः आम्नायेषुवेदे
षुअधिष्ठानतयाजगदधिष्ठानतयापरब्रह्मरूपतयेत्यर्थः शशिशेखरःचंद्रचूडःप्रशस्यतेस्तूयते अत्रच एकोदेवः सर्वभूतेषुगू
ढःसर्वव्यापीसर्वभूतांतरात्माकर्म्माध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्च एकोदेवोबहुधासन्निविष्टः एकःसन्बहु
धाविचचारत्वमेकोसिबहुष्वनुप्रविष्टःइत्याद्याःश्रुतयःपरमशिवस्यसर्वात्मकत्वमद्वितीयत्वं सूचयंत्यःसर्वपदवाच्यत्वप्रति

नामान्तरपरेष्वेवं शब्देषुशशिशेखरः विनासंकोचमाम्नायेष्वधिष्ठानंप्रशस्यते १४ ॥

पादिकादृश्यंते ननुएकोदेवःसर्वभूतेषुगूढइत्यादिभिःश्रुतिभिरद्वितीयमेकंवस्तुनिरूप्यते तच्चदेवतांतरमेव कुतोनस्यादिति
चेन्न गायत्र्याभर्गपदघटितत्वाद्वरस्मरहरोभर्गइत्यभिधानेन तद्वाच्येभर्गइत्यविद्यादिदोषभर्जनात्मकमितिभर्गशब्दार्थनि-
श्चित्यसर्वव्यापिसर्वव्यापकसर्वोत्कृष्टनित्यमुक्तमात्मस्वरूपंसच्चिदानंदात्मकं यदोंकारवाच्यं ब्रह्मतदहमस्मीतिगायत्रीमंत्र
स्यार्थइतिभाष्यकारवचनात् नन्वेतावतापिओंकारवाच्यंब्रह्मेतिसिद्धं तच्चदेवतान्तरमेव कुतोनेतिचेदुच्यते सर्ववेदा यत्प
दमामनंतीतिश्रुत्या प्रत्यगात्मनएवसकलवेदप्रतिपाद्यत्वं वेदमाताचगायत्री तस्याश्चभर्गशब्दघटितत्वेन तदर्थःसर्वोत्कृष्टस
दाशिव एवेतिनिर्विवादं किंचगायत्रीसारभूतस्यप्रणवस्य अकारोकारमकारनादबिंदात्मकस्यपंचभेदानांपरमशिवसंबंधि
सद्योजातादि पंचब्रह्मोद्धृतत्वस्यागमेषुस्फुटमुपलंभात् तथाहिशुद्धाख्येचातुलोत्तरेअथप्रणवभेदंतुप्रवक्ष्यामिसमासतःस

र्वपापहरंचैवमुक्तिदंप्रणवंपरं १ प्रणवंसर्वदेवाख्यंसर्वदेवमयंविदुः सर्वेषांचैवमंत्राणांप्रणवःप्राणउच्यते २ प्रणवःपंच
भेदःस्याच्छ्रृंदंशृणुषण्मुख साकल्यंशांभवंसौम्यंसावन्यंसंयुजंतथा ३ एतेवैपंचभेदास्तुपंचवक्त्रेषुचोद्धृताः अकारंचउकारंच
मकारंचत्रिधाभवेत् ४ त्रेतायांतर्गतंनादंचतुर्थंमुक्तिकारणं अकारंदक्षिणांगंस्याद्वामांगंस्यादुकारकं ५ मकारंमध्यदेहंतुत
स्मात्त्रिःप्रणवात्मकं हकारंतस्यमध्येतुसंक्षिप्तंसर्वकारणं ६ अकारंब्रह्मदैवत्यमुकारंविष्णुदैवतं मकारंरुद्रदैवत्यमोंकारंतुः
सदाशिवः ७ नादंशिवमयंविद्यात्संचदेवात्मकंविदुः अकारोकारसंयोगादोकारःस्वरमुच्यते ८ ओमित्येकाक्षरंब्रह्मवदंतिशि
वयोगिनः पंचमंप्रथमोपेतंतृतीयांतर्गतंपरं ९ साकल्यमितिविज्ञेयंपूर्ववक्त्रेतुजायते कलादिपंचमंचैवअनिलांतंसमुद्धरेत् १०
द्वादशस्वरसंयुक्तंशांभवंदक्षिणाननं वर्गादिपंचमंचैवषष्ठांतंजीवसंयुतं ११ तृतीयस्वरसंयुक्तंसौम्यंवै पश्चिमाननं अकारंपंच
मान्तंचबकारंतत्वबीजकं १२ एकादशकलोपेतंसावन्यंसौम्यवक्त्रके आदिप्रकृतिवर्णंचपंचमांतंषडंतकं १३ गुह्यंचतुर्दशोपेतं
सायुज्यंचोर्द्धवक्त्रके इत्यादिना अन्यदप्येषांछंदोऋष्यादिग्रंथगौरवभयान्नलिख्यते ननुपूर्वोदाहृतश्रुत्यादिभिःसर्वस्यशिवात्मक
त्वेसिद्धेशिवविष्णुविरिंच्यादिनामभिर्भिन्नतयानिर्देशःकृतःभेदंविनातन्नसंभवतीतिचेन्न एकस्मिन्धर्मिणिप्रकाशात्मकपरमशिवे
अनंतविविधधर्माश्रयेएकैकधर्मपुरस्कारेणएकैकंनामप्रवर्ततइतिसम्यक्प्रपंच्यतेयोविष्णुर्व्यापकःख्यातःश्रेयोरूपःशिवस्मृ
तः स्रष्टासर्गकलारूढोभास्करोभासकःपरः १ चंद्रःप्रह्लादकोज्ञेयःप्रकारत्वात्समीरणः बुधःप्रेरकःशांतःपरमात्मामहेश्वरः २ नारा
यणोजगन्नाथःसर्वात्मासर्वगोचरः नित्यःशुद्धोनिराधारःशंकातंकविवर्जितः ३ विक्रियाभिरनाघ्रातःपरिणामर्द्धिजन्मभिः अस्तीति
शक्यतेवक्तुंयस्समस्ताध्वदूरगः ४ परमानंदरूपोसौजगत्कर्त्तामहेश्वरः इति अत्रपरमशिवस्याचिंत्यानंतशक्तिमत्वेनविरुद्धानेक
कार्यकर्तृत्वादिरूपविरुद्धानेकधर्मवत्त्वमंगीकर्तव्यं अन्यथातासांशक्तीनांनिष्प्रयोजनत्वेननिर्विषयतास्यात् तथांगीकारेतुअचिं

स्यानंतशक्तिमत्वमेवनस्यात् प्रयोजनाभावात् अतोनिर्धर्मकत्वेननिश्शक्तिकएव शिवइत्यायातं तथैवेशपत्तौतुश्रुतिस्मृतिपुराणा दिविरोधः अनुभवविरोधश्चश्वेताश्वतरोपनिषदिश्रूयते नतस्यकार्यंकरणंचविद्यते नतत्समश्चाभ्यधिकश्चदृश्यते परास्यशक्तिर्वि विधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेति नतस्यविद्यतेकार्यंकरणंचनविद्यते नतत्समोधिकश्चापिकश्चिज्जगतिदृश्यते १ प रास्यविविधाशक्तिश्रुतौस्वाभाविकीस्मृता ज्ञानंबलंक्रियाचैवयेभ्योविश्वमिदंजगत् २ नतस्यास्तिपतिःकश्चिन्नैवंलिगंनचेशिता कारणंकरणानांचनतेषामधिपाधिपः ३ इतिप्रथमोक्तवाक्यवचनानिच तस्यपरमशिवस्यसंबंधियत्किंचित्कार्यजन्यंभिन्नंनास्तिसर्वस्यापिकार्यजातस्यशिवरूपत्वात् षष्ठ्याहिअभेदोबोध्यते तथातत्स्वरूपातिरिक्तंज्ञानक्रियात्मकंकरणंचनास्ति अपाणिपादोजवनोगृहीतेत्यादिश्रुतेः स्वरूपव्यतिरिक्तकर्मेंद्रियंच विनाशक्तिमत्वंचप्रतिपाद्यते चिदानंदमात्रसारत्वात् का र्यकारणकर्तृरूपंशिवातिरिक्तंकिमपिनास्तीति नतत्समश्चाभ्यधिकश्च दृश्यतइतिउक्तं शिवस्सर्वसामरस्यरूपइतितदपेक्ष याअधिकोनास्ति सर्वस्यापितदधीनप्रकाशत्वात् सर्वस्यवशीसर्वेस्येशानइतिश्रुतेः सर्वज्ञस्सर्वकर्त्ताचतथासर्वप्रकाशकः स र्वकर्त्तापिसर्वेशइतिवेदविदांमतं इतिस्कांदवचनंचतद्व्यतिरिक्ततया तत्समोपिनास्तितद्व्यतिरिक्तपदार्थस्यैवाभावात् एवच धर्म रहित्यमेवस्यादित्याशंक्य परिहाराय परास्यशक्तिरित्यादि तस्यपरमशिवस्यशक्तिः पराचिदानंदेच्छाज्ञानक्रिया सामरस्यरूपासर्वसा मर्थ्यात्मिकाविमर्शरूपिणीशक्तिः तथोक्तम् परिकर्त्तुनिजंतत्वं स्वात्मीकर्त्तुतथोभयं एकीकर्त्तुनकिंकर्त्तुविमर्शोजगतिक्षमः १ इत्ये कापिशक्तिरनेकप्रकारेत्याह विविधैवेति विविधामेवाह ज्ञानबलक्रियाचेति अत्रबलशब्देनइच्छैवोच्यते ज्ञानक्रियासंदर्शित त्वात् ज्ञानक्रियासामरस्यात्मकत्वेनबलभूतत्वाच्च तदुक्तं अर्थक्रियाभवति दक्षिणमन्यदूर्ध्वं ज्ञानंसमत्व मनयोरपिमध्यमिच्छाइति तथाच इच्छाज्ञानक्रियारूपेत्यर्थः स्वाभाविकीपरमशिवस्वरूपभूतानत्वागंतुकी विमर्शशक्तेः सर्वशक्तिसमष्टिरूपत्वात् तथोक्त

अनंतत्वावदाकारस्वीकारेकैवैकलक्षणमिति एतस्याआनंत्यंकथमितिचेत् उच्यते पृथिव्यादिशिवतत्वपर्यंतंयोयंशक्तिसमूहःविचार्यमाणेचतस्मिंस्तदानंत्येपर्यवस्यति तथाहि इच्छाज्ञानक्रियेति ज्ञानस्मृत्यपोहनमिति सृष्टिस्थितिसंहारानाख्याभासेति अन्यथाचततस्ततोंतरेषु पूज्यमानानां योगिनो योगिनश्चेति ॥ वेद्यविक्षोभोल्लासतन्मयीनांशक्तीनां तेनतेनप्रकारेण तत्रतत्रानुभूयमानानांमध्येएकैकशक्तिपर्यालोचनेप्यानंत्यंकिमुतत्कार्यानुसंधाने इच्छातावज्जिज्ञासाचिकीर्षादिभेदाद्बहुप्रकाराज्ञानंचस्मृत्यनुभवसंज्ञायोत्प्रेक्षादिभेदादनंतप्रकारं क्रियापि करचरणाद्यनुबंधिनी गमनभोजनाद्यनंतप्रकाराएवंशिवतत्वस्यपंचशक्तयःसर्वकर्तृत्वसर्वज्ञत्वनित्यत्वपूर्णत्वव्यापकत्वादयःएवंशक्तितत्वस्यपंचदशएवंसदाशिवत्वादिषुविचारेआनंत्यंपर्यवस्यतिएवंचसर्वाःशक्तिश्चेतनादर्शनाद्याःस्वस्वेवेद्ययोगविष्वक्क्षित्वामध्येहाटकस्तंभभूतस्तिष्ठन्चिच्चाकारएकोविभाति इतिनाथोक्तदिशासर्वशक्तिसामरस्यात्मकस्य परमशिवस्य अचिंत्यानंतशक्तिमत्वंसिद्धं तथाच परमशिवस्य अनंतधर्माःसंतीत्यंगीकर्त्तव्यं सर्वदा निर्धर्मकत्वेसत्यज्ञानादिस्वदानांसामानाधिकरण्यंनस्यात् धर्मभेदेनैवतत्तोपपत्तेः तस्मात्परमशिवस्य अचिंत्यानन्तशक्तिमत्वेन विरुद्धनिखिलधर्माश्रयत्वंसिद्धम् १४ ॥ ॥ ॥ ॥ ॥

उपक्रमोपसंहाराभ्यां सर्वाम्नायसमन्वयभाजनतया शिवस्यैवपरत्वंदर्शयति योवेदादौवेदांतेच प्रतिष्ठितः प्रतिष्ठांस्थितिंप्रापितः ब्रह्मणः प्रणवंकुर्यादादावन्तेच सर्वदा स्रवत्यनोंकृतं पूर्वंपरस्ताच्चविशीर्यते इतिमनुवचनादितिभावः प्रकृतौअव्यक्तेलीनस्य लयंप्राप्तस्य तस्यप्रणवस्य यःपरःसर्वोत्कृष्टतया वशिष्यमाणःसमहेश्वरः शिवइत्यर्थः इंद्रियेभ्यःपराह्यर्थाइत्यारभ्य पुरुषान्नपरं किंचित्साकाष्टासापरागतिरितिश्रुतेः किंचशिवतत्वादेवनिखिलजगदुत्पत्तिरितिलयोपि सर्वप्रपंचस्य तत्रैव वक्तुमुचितः तथाहि तत्त्वंयत्त्रिविधंज्ञेयंतद्वैदंशृणुषण्मुख शिवंसदाशिवंचैवमहेशंत्रिविधंस्मृतं शिवतत्वंमहासेननिष्कलंचेतिकीर्त्तितं सकलंनिष्कलंचैवसदाशिवमिहोच्यते महेशंसकलं

योवेदादौस्वरःप्रोक्तोवेदांतेचप्रतिष्ठितः तस्यप्रकृतिलीनस्ययःपरस्समहेश्वरः १५॥

विद्यात्रिविधंतद्भवस्यथ शिवमेकंविजानीयात्सादाख्यंपंचधाभवेत् महेशंतुमहासेनपंचविंशतिभेदकं एतेषांतत्वसंयुक्तमेकत्रिंशदितिस्मृतं शिवस्यलक्षणंवक्ष्ये समासात्शृणुषण्मुख शिवंपरात्परंसूक्ष्मंनित्यंसर्वगमव्ययं अनिंदितमनौपम्यमप्रमाणमनामयं शुद्धत्वाच्छिवमुद्दिष्टंपरादूर्ध्वंपरात्परं व्योमातीतंचसूक्ष्महिनित्यंकारणकारणं व्याप्तंसर्वगतंप्रोक्तंअक्षीणाद्व्ययंभवेत् अनिंद्यममलंज्ञेयमसादृश्यादनौपमं प्रमाणाद्व्यतिरिक्तत्वादप्रमाणमितिस्मृतं निर्गुणत्वादिशेषेणह्यनामयमितिस्मृतं इत्येतैर्लक्षणैर्युक्तंशिवरूपमितीरितं सृष्यर्थंसर्वतत्वानांलोकस्योत्पत्तिकारणं योगिनामुपकारायस्वेच्छयाचिंत्यतेशिवः तस्यचिंतापराशक्तिःसहस्रांशेनजायते तच्छक्तेस्तुसहस्रांशादादिशक्तिसमुद्भवः आदिशक्तिसहस्रांशादिच्छाशक्तिसमुद्भवः तच्छक्तेस्तुसह

स्त्रांशाद्ज्ञानशक्तिसमुद्भवः ज्ञानशक्तिसहस्त्रांशाक्रियाशक्तिसमुद्भवः एतावैशक्तयःपंचनिष्कलाश्चेतिकीर्त्तिताः शिवसृष्टिरियं=
प्रोक्ताशक्तीनांसृष्टिरुच्यते इत्यारभ्यअकारादिक्षकारांतमेकंपंचाशदक्षरं एतेवर्णाःप्रशस्यंतेकामितार्थप्रदायकाः स्त्रीरूपाश्चैव
पुंरूपास्तथाचोभयरूपकाः सर्वेवैदेवतारूपाःप्रत्येकंवर्णरूपथक् वर्णबीजंतथार्णंचलिंगमक्षरमात्मके एतानिषट्चनामानिवर्ण
पर्यायवाचकाः तेषांसमुद्भवंनामरूपभेदंतथांशकं तत्वमूर्त्यादिभेदंचअधिदैवंफलंयथा स्थूलसूक्ष्माकृतीचैवजीवोपाधिविभेद
कं एतद्वेदसमासेनसंक्षेपाच्छृणुषण्मुख शिवतत्वेपरेसूक्ष्मेबिंदुरूपंतुजायते बिंदोर्नादःसमुत्पन्नोनादाच्छक्तिरजायत शक्तेस्तु
जायतेशब्दःशब्दाज्जायेतवाग्भवं वाग्भवाच्चकलाजाताःकलाभ्योविकलास्मृताः तस्माद्वैवाचकोमंत्रोमंत्रस्तेरेवभिद्यते एतत्सृष्टि
क्रमःप्रोक्तस्तेषांलक्षणमुच्यते बिंदुरूपापराभक्तिर्नादश्चैवादिरुच्यते शक्तिरिच्छेतिविज्ञेयाशब्दोज्ञानमिहोच्यते वाग्भवंस्याक्रि
याशक्तिःकलावैषोडशस्वराः तेषांरूपंयथाप्रोक्तंप्रकृतिर्विकृतिस्तथा प्रकृतिस्सप्तवर्णानिविकृतिस्तुनवार्णका अकारश्चइकारश्चउ
कारश्चऋकारकः लकारश्चैवएकारोओकारश्चतथैवच एतेसप्तस्वराःप्रोक्ताःप्रकृतिस्तुसमीरिताः शेषाविकृतयःप्रोक्तास्तेषामुद्भव
उच्यते अकारजन्यश्चाकारोइकारादीसमुद्भवः उकारश्चैवऊकारोऋकारश्चऋसमुद्भवः लकारश्चैवल्लृकारोएकारश्चैसमुद्भवः ओका
रश्चौतथाज्ञेयःक्रमेणैवसमुद्भवः एषावैविकृतिःप्रोक्ताआकारादिनवार्णकाः अकारादिविसर्गांताश्चैतेवैषोडशस्वराः कलामात्रास्व
राजीवाःप्रकृतिर्विकृतिस्तथा प्राणश्चात्माचदेहीचकलापर्यायवाचकाः कलाभेदमिदंप्रोक्तंविकलाभेदकंशृणु ककारादिक्षका
रांतावर्णाश्चविकलाःस्मृताः देहोपाधिश्शरीरंचक्षेत्रादाशातनुस्तथा व्यंजनंविकलाशक्तिर्बिंदुपर्यायवाचकाः कलानांविकला
नांतुत्रीणिरूपाणिलक्ष्यते शिवाग्निभूतरुद्राश्चत्रयोदशतिथिस्तथा एतेवैदशवर्णानिपुल्लिंगश्चेतिकीर्त्तिताः ऋॠऌॡचच=
त्वारोनपुंसकमितिस्मृतं ककारश्चगकारश्चचकारश्चजकारकः टकारश्चडकारश्चतकारश्चदकारकः पकारश्चबकारश्चषकार

श्वक्षकारकः एतेद्वादशवर्णाश्चपुल्लिंगाश्चेतिकीर्त्तिताः खकारश्चघकारश्चङ्कारश्चङ्कारकः ठकारश्चढकारश्चथकारश्चध
कारकः फकारश्चभकारश्चशकारश्चनकारकः एतानिभानुबीजानिजायाश्चेतिप्रकीर्त्तिताः शेषानपुंसकाविंद्यात्रयोभेदाद्दति
स्मृताः अकारादित्रयोव्योमर्द्दकारादित्रयोनिलः ऋकारादित्रिवर्णोनिचाग्निरित्युच्यतेतथा लृकारादित्रयोह्यापओकारादित्रयो
मही ह्रकृतिस्तत्वभेदस्याद्विकृतिर्मूर्त्तिरुच्यते प्रभावंविकलाःप्रोक्तमित्येवंत्रिविधंस्मृतं ह्रकृतिर्द्रस्वमित्युक्तंविकृतिदीर्घमुच्य
ते एकमात्रोभवेद्रस्वोद्विमात्रंदीर्घमुच्यते व्यंजनंत्वर्द्धमात्रंस्यादित्येतल्लक्षणंस्मृतं अकारंसर्वदेवत्यंरक्तंसर्ववशीकरं आः
कारस्यासराशक्तिश्चेतमाकर्षणंभवेत् इकारोविष्णुदेवत्यंश्यामंरक्षाकरोभवेत् मायाशक्तिरितीकारःयीतंस्त्रीणांवशीकरं उका
रोवास्तुदैवत्यंकृष्णंराजवशीकरं ऊकारोभूमिदैवत्यंश्यामंलोकवशीकरं ऋकारोब्रह्मणाज्ञेयंपीतंग्रहविनाशनं शिखंडिरूपं
ॠकारमंजनज्वरनाशनं अश्विनीभ्यांलृलृचैवश्वेतरक्तेज्वरापहे एकारंवीरभद्रंस्यात्सीतंसर्वार्थसिद्धिदं ऐकारंवाग्भवंविद्या
स्फाटिकंज्ञानसिद्धिदं ओकारश्चस्वरंविद्याज्ज्योतिःसर्वफलप्रदं औकारमादिशक्तिस्याच्छुक्लंसर्वार्थसिद्धिदं अंकारंतुमहेशं
स्याद्रक्तवर्णंसुखप्रदं अःकारं कालरुद्रंस्याद्रक्तंपाशनिकृंतनं प्राजापत्यंककारंस्यात्सीतंपुष्टिकरंभवेत् खकारंजान्हवीबीजंक्षी
राभंपापनाशनं गकारंगणरूपंस्याद्रक्ताभंविघ्ननाशनं घकारंभैरवंज्ञेयंमुक्ताभंशत्रुनाशनं ङकारंकालबीजंस्यात्कालंसर्वजयंभ
वेत् चकारंचंडरुद्रंस्यादंजनंत्रिपुरापहं छकारंभद्रकालीस्याद्राजावर्तंजयप्रदं जकारंजंभहाज्ञेयंरक्ताभंचजयावहं झकारंचा
र्द्धनारीस्यात्श्यामारक्तंजयावहं ञकारंकोटिविज्ञेयंपीतंरोगविनाशनं भृंगीशंस्यादकारंतुरक्तंसर्वसुखावहं ठकारंचंद्रबीजं
स्यासीतंमृत्युविनाशनम् डकारंचैवनेत्रंस्यात्सीतंकालजयप्रदं ढकारंयमबीजंस्यान्नीलंमृत्युविनाशनं णकारंनंदिबीजंस्याद्र
क्ताभंचार्थसिद्धिदं तकारंवास्तुदैवत्यंश्वेतंसर्वजयंभवेत् थकारंधर्मणोज्ञेयंमंदाभंस्याज्जयप्रदं दुर्गाबीजंदकारंस्याच्छ्यामंस-

र्थसिद्धिदं धकारंधनदंज्ञेयंपीताभंचार्थसिद्धिदं नकारंचेवसावित्रीस्फाटिकंपापनाशनम् पर्जन्यंस्यात्मकारंतुशुक्लाभंपुष्टिसि
द्धिदं फकारंपाशुपत्यंस्याद्वानंपापनिकृंतनं वकारंतुत्रिमूर्तिस्यात्पीतंसर्वार्थसिद्धिदं भकारंभार्गवंविद्याद्रक्ताभंसर्वसिद्धिदं म
कारंमदनंविद्यात्श्यामंसर्वजयप्रदं यकारंपीयुषैवत्यंकृष्णमुच्चाटनंभवेत् रकारंवन्हिदैवत्यंरक्ताभंसंहृतिर्भवेत् लकारंष
ष्ठिवीतत्वंस्यात्सीतंस्तंभनंभवेत् वारुणंस्याद्वकारंतुशुक्लाभंरोगनाशनं लक्ष्मीबीजंशकारंस्याद्धेमाभंश्रीकरंभवेत् षकारंस्व
र्यबीजंस्याद्रक्ताभंसर्वसिद्धिदं सकारंशक्तिरूपंस्याद्रक्तंसिद्धिकरंभवेत् हकारंशिवबीजंस्याच्छुद्धस्फटिकसन्निभं अणिमा
द्यष्टसिद्धिंचभुक्तिमुक्तिफलप्रदं ळकारमात्मतत्वंस्याद्रक्ताभंसर्वसिद्धिदं विद्यातत्वंक्षकारंस्यात्क्षीराभंचसुखप्रदं इत्येते
अधिदेवाश्चफलवर्णक्रमेणतु अकारादिक्षकारांतंसमासात्परिकीर्त्तितं कलाजीवमितिख्यातंविकलादेहमुच्यते कलाश्चवि
कलाश्चैवदेहिदेहमितिस्मृतं देहिरूपंद्विधाप्रोक्तंस्थूलंसूक्ष्मंतथैवच देहमेकंविनिर्दिष्टंकेवलंसूक्ष्ममुच्यते अकारादिविस
र्गांतंकेवलंतुस्वराकृतिः तत्स्थूलमितिविज्ञेयंसूक्ष्ममध्यस्थितिर्भवेत् ककारादीनिवर्णानिविकलंचप्रकीर्त्तितं तद्रूपंचार्द्धमा
त्रंतुसूक्ष्मरूपमिहोच्यते एवंकलाचविकलास्थूलसूक्ष्माकृतिर्भवेत् कलानांह्रस्ववर्णानिजीवार्णइतिसंस्मृताः कलाहीनंतु
यद्वर्णंदेहंतस्यविनिर्दिशेत् संयोज्यदेहिनंदेहेजीवेजीवंनयोजयेत् सर्वेषांदेहभेदोस्तिआत्मभेदोनविद्यते आत्माचजीवद्
त्युक्तोजीवाज्जीवदितिस्मृतः तस्माज्जीवात्परंनास्तिपश्चान्नचविनिर्दिशेत् इत्युक्तरीत्याह्रस्वाकारस्य सृष्टिसंज्ञितस्य सर्ववे
र्णप्रकृतिभूतत्वेन सर्वेप्रपंचस्याक्रमेणप्रकृतौलये यःपरःकारणतयाऽवशिष्यमाणःपरःपरात्मासःमहेश्वरःपरमशिवइत्यर्थः

॥ ॥१५॥ ॥

ननुयथोक्तशिवतत्वस्यातिसूक्ष्मतमत्वेनदुर्विज्ञेयत्वात् कथंतत्रात्महितेच्छूनांप्रवृत्तिरतआह येब्रह्मेति हेविप्राःशौनकाद्यः ब्रह्मसृष्टयःब्रह्मणः सकाशात्सृष्टिःमानसीयेषांतादृशाः सनकाद्यःयेसंतिते तद्ब्रह्मशिवतत्वंविदुःजानंति यतःतेमुनयः ज्ञानविज्ञानयोगेनज्ञानंमोक्षोपयोगिनी धीः विज्ञानंशिल्पशास्त्राद्युपयोगिनी तयोर्योगेनसंबंधेनछिन्नसंशयाः निरस्तसंदेहाः एतेनगुरुमार्गेगम्यत्वं शिवतत्वस्यप्रदर्शितम् १६ गुरुदेवतयोरैक्यबुद्धिर्मोक्षदायिनी नोपायांतरमिति द्वाभ्यांदर्शयति जगन्नित्यमनित्यंवेति सत्कार्यवादिसांख्यमतेजगन्नित्यमिति वेदान्तमतेऽनित्यमितिदृष्ट्वा मध्यस्थस्यनित्यमनित्यंवेतिसंशयोजायते एवमग्रेपि शि

येब्रह्मसृष्टयोविप्राविदुस्तत्सनकादयः ज्ञानविज्ञानयोगेनयतस्तेछिन्नसंशयाः १६ ॥ जगन्नित्यमनित्यंवाशिवा जीवःपरोनवा मुक्तिरस्तिनवाज्ञानात्आत्मादेहोथवापरः १७ इत्याद्याःसंशयाःसर्वेतावन्नश्यंतिनकुत्रचित् ॥ ॥ नयावद्देवताबुद्धिर्गुरौविज्ञानदायिनी १८ शिवादपिगुरुःश्लाघ्यइतिवेदांतनिर्णयः तस्मिन्मानुषबुद्धिर्याप्रवाहः सास्यसंसृतेः १९ ॥ ७ ॥

वादीश्वरात्सर्वः ज्ञातजीवः किंचित्ज्ञेयःपरोन्यइतिद्वैतवादिनः अनन्यइत्यद्वैतवादिनः एवंज्ञानात् मुक्तिरित्योपनिषदाः नेत्यन्ये दृश्यमात्मादेहइतिचार्वाकाःपरइतिवेदान्तिनः इत्याद्याइतिवेदान्तशास्त्रारंभस्य वैय्यर्थ्यमाशंक्य न्यायसूत्राभावेकिंविवेकादिविशेषणवानधिकारीउतान्यः किंवेदांताःपूर्वतंत्रेणगतार्थाश्च गतार्थावाकिंब्रह्मप्रत्यगभिन्नंनवाकिंमुक्तिःस्वर्गादिवल्लोकान्तरमात्मस्वरूपोवेति संशयानिवृत्तेरिति भाष्यरत्नप्रभायांस्पष्टम् प्रतिपादिताःसंशयाअपिग्राह्याः १७ १८ शिवस्वरूपस्यापिगुरुत्वावगम्यत्वेनशिवादप्युत्तमत्वं गुरोर्दर्शयन्अज्ञानमूलिकां संसारप्रवृत्तिंदर्शयति शिवादितिशिवादपिगुरुःश्लाघ्यःउत्त

भ० वि० १०

मत्वेनप्रशंसनीयः इतिवेदान्तानांनिर्णयःसिद्धान्तः इदंचशिवेरुष्टेगुरुस्त्रातागुरौरुष्टेनकश्चन तस्माद्विज्ञानसम्पन्नोगुरोराज्ञांन लंघयेत् इत्यागमेषुस्फुटं तस्मिन्गुरौमानुषबुद्धिर्यामनुष्यत्वधीःसाअस्यजंतोः संसृतेःसंसारस्यप्रवाहःप्रवाहकारणमित्यर्थः॥ १९ तस्येति तस्यसंसारिणःजातिवर्णाश्रमादिषु जातिर्ब्राह्मणत्वादिः वर्णोब्राह्मणादिः आश्रमोब्रह्मचर्यादिः आदिपदाद्देहगेहा दिःयेषुअहंताअहंभावःब्राह्मणोहमित्यादिःअनुवर्त्ततेअनुसृत्यवर्त्ततेकिञ्चप्रकृतेर्मायायावशादायत्तत्वादनित्येषुदेहादिषु नित्यधीः नित्यबुद्धिरपि जायते॥ २० तत्रहेतुमाहभावनेति आत्मनिसंभावनासम्यक्त्वेनभावनानिश्चयात्मिकाधीरितियावत् साभावना

तस्यानुवर्त्ततेहंताजातिवर्णाश्रमादिषु नित्यधीरप्यनित्येषुजायतेप्रकृतेर्वशात् २०
भावनाविपरीताचेत्ससंसंभावनात्मनि वेदांतवाक्यशतकैरपियाननिवार्यते २१ त
न्निवृत्त्यर्थमेवात्रयतंतेब्राह्मणाश्चिरं कारणंबहुधातत्रकथयन्त्यविवेकिनः २२॥

सत्यं सामान्येनपुंसकं साविपरीताअनित्यत्वरूपाचेद्भवतितदावेदान्तवाक्यशतकैरपि अनेकैरपितत्त्वमस्यादिमहावाक्यैरपि याविपरीतभावनाननिवार्यतेनिवारयितुंनशक्यते २१ एवंतर्हि साविपरीतभावनादुर्निवारेत्याशंक्य तन्निवृत्तिसाधनानि ब हिरंगानि बहूनि साधनानि विहाय अन्तरङ्गसाधनंभक्तिरेकैवादरणीयेति वक्तुमुपक्रमते तदिति तस्याविपरीतभावनायानि वृत्त्यर्थमेवात्रजगतिब्राह्मणाः ब्रह्मवादिनः चिरंचिरकालात्यतंते यत्नंकुर्वन्ति तत्रनिवृत्तौ अविवेकिनःसदसद्विवेक

शून्याः बहुधाकारणंकथयन्ति २२

तदेवकारणंप्रपञ्चयति कर्मेति त्रिभिःमुक्तौकर्मयागादिकारणंप्राहुः जैमिनीयादृतिशेषःकर्मणएवततउपपत्तेरिति चित्तैकाग्र्य
संपादकतया नित्यनैमित्तिकैरेव कुर्वाणोदुरितक्षयंदृत्यादिना पापनाशकत्वेनचकर्मैवमोक्षनिदानमितितेषांमतं अपरेकृच्छ्र
चान्द्रायणादितपःकारणंप्राहुःपौरुशिष्यादयः अन्येपूर्त्तेवापि कूपादिखननंकारणमभिदधतेअन्येदानंवदन्ति तस्माद्दानंपरमं
वदन्तीत्युपनिषद्परेपौराणिकाःव्रतंएकादश्युपवासादिकारणंवदन्ति २३ अपरेतैर्थिकाः तीर्थेषुगंगाप्रभृतिषुस्नानंकारणमि
तिवदन्ति अपरेवानप्रस्थादयःस्थलवासंस्थंडिलशयनादिकं अपरेयोगिनःयमाद्यष्टांगयोगंचित्तवृत्तिनिरोधंपरेवेदान्तिनः

कर्मोहुःकारणंमुक्तौतपःप्राहुरथापरे पूर्त्तमन्येभिदधतेदानमन्येव्रतंपरे २३ तीर्थेषुस्ना
नमपरेस्थलवासमथापरे ॥ अष्टांगयोगमपरे वेदान्तश्रवणंपरे २४ श्रुतार्थमननः
केचिन्मूर्त्युपास्तिमथापरे अन्येसत्संगतिंप्राहुरितिनैकमुखंजगत् २५ ॥ ७ ॥

वेदान्तश्रवणंश्रोतव्यःश्रुतिवाक्येभ्यःदृत्यादिना तत्वमस्यादिमहावाक्यश्रवणंवदन्तीतिसर्वत्रयोज्यं २४केचित्नैयायिकाः श्रुतार्थ
स्यमननंयुक्तिभिरनुचिन्तनंकारणंवदन्ति न्यायचर्चेयमीशस्यमननव्यपदेशभाक् उपासनैवक्रियतेश्रवणानंतरागतेस्यभियु
क्तेः अपरेस्मार्त्ताःमूर्त्तीनांरविविष्णुगणेशशिवशक्तीनाम् उपास्तिंपूजाजपादिभिरुपासनंपंचायतनप्रकरणेशंभौ मध्यगतेइ
त्युपक्रम्यपूज्याःशंकरभागतोतिस्मृतेःएतत्तोमस्यसूर्यस्यसर्वलिंगंस्थापयति पाणिमंत्रंपवित्रमितिश्रुतेश्च अस्याश्रु
तेर्निरुक्तिःशंकरसंहितायांस्फुटा अन्येसाधवःसत्संगतिंसंगःसत्सुविधीयतामित्याचार्यवचनप्रामाण्यात् सकलश्रेयस्साधनंः

सत्संगतिरेवेतिजगत्नैकमुखंभिन्नरुचित्वाल्लोकस्येतिभावः २५ भक्तेरन्तरङ्गसाधनत्वप्रतिपादनाय प्राक्प्रतिपादितसाधनानांअन्वयव्यतिरेकंव्यभिचारेणाक्रांतत्वंचदर्शयति कृत्वेतिकश्चित्साधकःसर्वमिदंकर्माद्युपायंकृत्वापिपुनर्गर्भेनिमज्जतिजन्मलभतइत्यर्थःकर्मफलभोगानंतरं क्षीणेपुण्येमर्त्यलोकंविशन्तीतिस्मरणात्इतिभावःअनेनअन्वयव्यभिचारोदर्शितः कश्चिन्मुनिर्मननशीलःत्यक्तसर्वक्रियः त्यक्ताःउज्झिताःसर्वाःक्रियाःनित्यनैमित्तिकानिकर्म्माणियेनतादृशः अथैतदप्यशक्तोसिकर्त्तुमद्योगमाश्रितःसर्वकर्मफलत्यागंततःकुरुयतात्मवानितिभगवद्वचनादितिभावः अयत्नात्यत्नंविनामुच्यतेमुक्तोभवति

॥ ७॥ कृत्वासर्वमिदंकश्चित्पुनर्गर्भेनिमज्जति त्यक्तसर्वक्रियःकश्चित्
दयत्नान्मुच्यतेमुनिः २६ तदुक्तेभ्योह्युपायेभ्यःसर्वबन्धविमोचकः॥ अन्वयव्यतिरेकाभ्यांसानाम्नाभक्तिरुच्यते २७ ॥ ७ ॥

एतेनकर्माद्यभावेपिमोक्षदर्शनात्व्यतिरेकव्यभिचारदित्यर्थः २६ एवमनेकेषुउपायेषुविफलेषुमुमुक्षोर्मुक्तिःकथंसिध्यतीत्याशंक्यमुमुक्षोपायमाह तदिति तत्तस्मात्उक्तेभ्यः प्रतिपादितेभ्यःकर्मादिभ्यः सर्वस्यबन्धस्यसंसारस्य विमोचकःनिवर्त्तकःय उपायइतिशेषः साविधेयप्राधान्यात् स्त्रीलिंगता अन्वयव्यतिरेकाभ्यांनाम्ना भक्तिरुच्यते भक्तिनामकएवोपायः मुक्तिसाधकोनान्यइतिभावः भक्त्यामामभिजानातियावान्यश्चास्मितत्त्वतः इतिभगवदुक्तेः २७ ॥

मूषकग्रहणवेलायामेवमनोनिश्चलंकुरुते नान्यद्वासाभक्तिरधमेतिभावः उत्तमामाह आक्रामन्तीमिति नगात्पर्वतात् वृक्षाद्वा शैलवृक्षौनगावगावित्यमरः अन्यंनगंआक्रामन्ती गच्छंतीं आत्मनःस्वस्यमातरंजननीं मर्कटात्मजः वानरशिशुः यथेतिशेषः संश्लिष्यन्आलिंग्यन् संकटेपिनत्यजति तथैव आपत्तिसहस्रेपियःपुमान्शिवंशरणंरक्षकंशरणंगृहरक्षित्रोरित्यमरः व्रजेत् गच्छेत् २८ २९ साउत्तमाभक्तिर्ज्ञेया उत्तमत्वेहेतुमाह सर्वबन्धविमोचनीति अर्द्धेनभक्तिंविभजते मन्देति ३० मन्दांभक्तिंलक्ष

॥क्वचित्कृताकृताक्वापिमार्जारीभक्तिरुच्यते आक्रामंतींनगादन्यंनगंमातरमात्मनः २८ नसंकटेपित्यजति संश्लिष्यन्मर्कटात्मजः तथैवापत्सहस्रेपियःशिवंशरणंव्रजेत् २९ साभक्तिरुत्तमाज्ञेयासर्वबंधविमोचनी मन्दाचमध्यमाभक्तिरुत्तमेतित्रिधामता ३०कथायाःश्रवणेशंभोर्नाम संकीर्त्तनेस्मृतौ क्वचिद्वेचित्तरतिः सामन्दापरिकीर्त्तिता ३१गुरुपादेन्वहंपूजालिङ्गेचनियमार्चनं वंदनंशिववेरस्यायाकारयतिवासना ३२ ॥

यति कथायाद्इतिशंभोःशिवस्यकथायाः श्रवणेतथानामसंकीर्त्तनेनाम्नः शिवशंकरादेःसम्यक्चित्तैकाग्र्येण कीर्त्तनेउच्चारणेतथास्मृतौ स्मरणेक्वचित्समयविशेषेनसर्वदेतिभावः चित्तरतिःचेतःशक्तिः याभवेत्सामन्देत्यर्थः ३१ सार्द्धेनमध्यमांलक्षयति गुरुपादेइति गुरुचरणेअन्वहं दिनेदिने पूजालिंगे शिवलिंगेच नियमार्चनं नित्यपूजनंशिववेरंशिवलिंगंतस्यवंदनं अभिवादनंचयावासनाकारयति एषामध्यमातस्याःफलमाह सालोक्यादीति आदिनासामीप्यादिपरिग्रहः ३२ ॥ ४ ॥

साङ्गेनउत्तमांलक्षयतियदेति यदामहेश्वरे परमशिवेसर्वविषयजातं त्यक्त्वाअत्यर्थंभृशं कैंकर्यं किंकरत्वरूपं सततमविनाभावल
क्षणं तादात्म्यरूपंसख्यं शरण्येशे शरणेसाधुःशरण्यःसचासावीशश्चेतिसमासः तस्मिन् आत्मार्पणं आत्मनोमनसः अर्पणंल=
योयस्मिन्इतिसख्यविशेषणंकरोति सा भक्तिरुत्तमेत्यर्थः ३३ ॥ ३४ ननुउत्तमभक्तेर्दुर्लभत्वात्मोक्षोपिदुर्लभइत्याशंक्य
मन्दाधिकारिणामपिभक्तिरेवसुलभोपायःइत्याहजन्तोरितिजन्तोःशरीरिणः नवविधाश्रवणंकीर्त्तनं विष्णोःस्मरणंपादसेवनं
अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनम् इतिभागवतादिप्रतिपादिताश्रवणाद्यात्मनिवेदनांता उत्तरोत्तरमुत्तमा उत्कृष्टातत्रयांकां

**मध्यमाभक्तिरेषास्यात्सालोक्यादिप्रदायिनी यदाकैंकर्यमत्यर्थंसर्वंत्यक्त्वामहेश्वरे ३३ सख्यंकरोतिसततम
विनाभावलक्षणं आत्मार्पणंशरण्येशेसोत्तमाभक्तिरुच्यते ३४ जंतोर्नवविधाभक्तिरुत्तरोत्तरमुत्तमा या
कांचिदपिसंप्राप्यपशुःपाशाद्विमुच्यते ३५ भोगायमन्दाकथितासालोक्याद्येचमध्यमा अपुनर्भवदाभ
क्तिरुत्तमादुर्लभान्नृणाम् ३६ आब्रह्मस्तंबपर्यंतयत्रानन्दःप्रतीयते शिवभक्तिंविनानान्यत्तत्रकारणमि
॥ ष्यते ३७॥**

चिदपिभक्तिंसंप्राप्यपशुर्जीवःपाशात्जन्मादितःविमुच्यतेविशेषेणमुक्तोभवति ३५ त्रिविधायाअपिभक्तेःपृथक्फलतारतम्यमाह
भोगायेति ३६ भक्तिगम्यस्यपरमपुरुषार्थस्यमोक्षस्यसाधनांतरराहित्यंदर्शयति आब्रह्मेति ब्रह्मासर्वेसमष्टिरूपःप्रजापतिःतमारभ्यस्त
म्बः तृणादिगुच्छः तत्पर्यंतंब्रह्माविप्रःप्रजापतिः स्तंबोगुच्छस्तृणादिनइतिचामरः यत्रमोक्षेआनंदःप्रतीयते आनंदोब्रह्मेतिव्यजानात
यत्रत्वस्यसर्वमात्मैवाभूत्आनंदंब्रह्मणोविद्वान्इत्यादिश्रुतिभ्यः आनंदएवप्रतीयतेनान्यइत्यर्थः तत्रपरमपुरुषार्थेशिवभक्तिंविना अ

त्यक्त्वाकैंकर्यमत्यर्थंसर्वंत्यक्त्वामहेश्वरे ३३॥ ३७॥

इतीति इत्युक्तप्रकारेणयःतत्त्वेनवेत्तिसःपुरुषःछिन्नपाशइत्युच्यतेअन्यभक्त्यासानश्यतीत्यर्थः ३८ एवमुत्तरोत्तरयापूर्वपूर्वोपमर्दमाह मंदेति उपसंहरति तस्मादितिप्रधानसाधनतयामुमुक्षुभिःमोक्षेच्छुभिःशंकरेउत्तमाभक्तिःसेव्या संपादनीयेत्यर्थः ३९ उत्तमभक्तिभाजःसाधकान्दर्शयतिमार्कंडेयेतिमार्कंडेयःशिवोपासनया अल्पायुष्यमपास्य चिरंजीवितांप्राप्तोमुनिः उपमन्युःपंचवार्षिकेदुग्धपानायतपश्यन्लब्धक्षीरसागरःश्रीकांतोविष्णुःसहस्रकमलार्चनादिनासमासादितसुदर्शनः नंदीशिलादतनयोगणराट्घंटोदुवोअगस्त्यः चतुःसमुद्रपीताःएतेश्वरमे अन्तिमेजन्मनिस्थितैःउत्तमाभक्तिःसेव्यते उत्तमभक्तिलाभानं

इतियोवेत्तितत्त्वेनच्छिन्नपाशःसउच्यते स्यादन्यविषयाभक्तिर्यावन्मन्दानजायते ३८ मंदामध्यमया नश्येन्मध्योत्तमयातथा तस्मान्मुमुक्षुभिःसेव्याशंकरेभक्तिरुत्तमा ३९ मार्कंडेयोपमन्युश्रीकांतनंदिघंटोदुवैः उत्तमासेव्यतेभक्तिश्वरमेजन्मनिस्थितैः ४० जातिक्रियागुणकृताभिदातावत्सवर्त्तते नयस्य चोत्तमाभक्तिःशिवेजन्तोःप्रजायते ४१ यथासिद्धरसाविष्टमयःप्रकृतिमात्मनः ॥ नमुञ्चति ॥ ॥ थाजन्तुर्जात्यादिंनजहात्यसौ ४२ ॥ ॥

तंजन्मान्तरासंभवादितिभावः ४० जातीतिजातिश्चक्रियाश्चगुणाश्चएतेकृताभिदाभेदःत्रयोशब्दानांप्रवृत्तिरितिन्यायेन तावत्सवर्त्तते यावत्जन्तोःजन्मिनःशिवेउत्तमाभक्तिर्नजायते ४१ जात्यादेःस्वाभाविकतयादुस्त्यजत्वंदर्शयति यथेति सिद्धरसेनलोहस्यसुवर्णतापादकेन आविष्टम् स्पृष्टंअयोलोहः आत्मनःप्रकृतिं लोहस्वभावंयथा नमुंचति अतएवमिताक्षरायां सुवर्णस्तेयप्रायश्चित्तनिरूपणावसरे यस्तुताम्रादिकस्यरसवेधाद्यापादितसुवर्णरूपस्यापहारे नतत्रेदंप्रायश्चित्तंमुख्यजातिसमवायाभावादित्यभि-

हितम् तथा जन्तुःशिवभक्तिहीनइतिभावः जात्यादिनजहाति नत्यजति ४२ भक्तौसत्यांकिंभविष्यतितदाह कांचनेति कांचना
द्रेःसुमेरोःप्रभयाकान्त्यामिश्रः काकोपितिर्यक्जातौ अधमोपीत्यर्थः यथा कनकायतेकनकमिवआचरति तथादेहीजीवः उत्त
मयाभक्त्याशिवोभवेत् ४३ उक्तार्थंदृढीकर्त्तुं श्रोतॄन् अभिमुखीकरोति भक्त्येति भोद्विजाःशौनकादयः उत्तमयाभक्त्याअंतःकर
णोपाधिंमनोबुद्धिचित्ताहंकारलक्षणंसंशयनिश्चयगर्वस्मरणविषयंचतुर्विधंबंध हेतुंनिरस्य दूरीकृत्य यथाशिवःतत्स्वरूपःसन्दे

काञ्चनाद्रिप्रभामिश्रःकाकोपिकनकायते यथादेहीतथाभक्त्याभवेदुत्तमयाशिवः ४३
भक्त्यांतःकरणोपाधिंनिरस्योत्तमयाशिवः यथानित्यत्वमाप्नोतितथाशृणुतभोद्विजाः ४४
प्रतिबिंबाप्सुनष्टासुबिंबमात्रंयथाभवेत् प्रतिबिंबेषुनष्टेषुतथादेहीपरःशिवः ४५ संश=
योयदियुष्माकंशौनकाद्यामहर्षयः अस्मिन्नर्थेनिवृत्यर्थमेतस्येदमुदीर्यते ४६ ॥ ७ ॥

हीनित्यत्वमाप्नोति तथा शृणुतअवहिताभवतेत्यर्थः ४४ तदेवप्रतिपादयति प्रतिबिंबेति प्रतिबिंबाश्रयभूतास्वप्सुजलेषुनष्टासु
नाशंगतासुयथाबिम्बमात्रंभवेत्तथाप्रतिबिंबेषुअन्तःकरणोपाधिषुनष्टेषुदेहीपरःशिवःपरमशिवःनित्यमुक्तस्वरूपोभवेत् ४५ सं
प्रतिश्रोतॄणां संशयं संभाव्यतन्निवृत्तये प्रस्तुतपुराणश्रवणेप्रवर्त्तयन्उपसंहरति द्वाभ्यांसंशयेति भोमहर्षयः अस्मिन्मदुक्ते
र्थे युष्माकंयदिसंशयःअस्यनिवृत्यर्थं इदंवक्ष्यमाणंहरशर्म्ममुनिना प्रोक्तमुत्तमंभक्तिमाहात्म्यंनामपुराणंउदीर्यतेकथ्य
ते मयेतिशेषः तच्छ्रुत्वाभवन्तः सर्वेछिन्नसंशयाःगतसंदेहाःभवतपरमानंदलक्षणंमोक्षंप्राप्नुतेत्यर्थः ४६

४७ इतिश्रीमानवल्युपनामकन्सिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांमोक्षोपायनिरूपणंनामप्रथमोऽध्यायः १॥
प्रथमाध्यायान्ते श्रवणायसावधानीकृताःसोत्कंठामुनयःसूतंपृच्छन्ति हरशर्म्मेति यत्पुराणंश्रुत्वा जात्यादिकंत्रादिपदेनगुणक्रि
य वाद्येमिथ्यात्रपरमार्थाभवेत् १ सूतस्तान्उत्तरयति कलाविति आगमेषुशैवपांचरात्रादिषुयोगेषुहठलंबिकाराजयोगादि
षुगुरुशिष्ययोःक्रमेपरस्परमद्रोहरूपेगतेनष्टेसतिदृत्यन्वयः २ ३ यस्येतियस्यपुराणस्यश्रवणमात्रेणमननादौसतिकिंवक्तव्य

हरशर्म्ममुनिप्रोक्तंभक्तमाहात्म्यमुत्तमम् श्रुत्वापुराणंभवतसर्वेसंछिन्नसंशयाः ४७ इतिश्रीस्कन्दोपपु
राणेप्रथमोऽध्यायः १॥ ॥श्रीऋषयऊचुः हरशर्म्ममुनिप्रोक्तंभक्तमाहात्म्यनामकम् पुराणंब्रूहियच्छ्रुत्वा
मिथ्याजात्यादिकंभवेत् १ श्रीसूतउवाच कलौवेदेषुलुप्तेषुआगमेषुगतेषुच योगेषुदूरापास्तेषुगुरुशिष्यक्र
मेगते २ दयालुःसर्वभूतेषुहरशर्म्मामुनीश्वरः व्यासप्रसादात्कृतवान्भक्तमाहात्म्यमुत्तमम् ३ यस्यश्रवणमात्रे
णभक्तिःस्यादुत्तमाहरे तथाहिमृत्युंतरतिपुनरावर्त्ततेनच ४ स्वानुबिंबंशिवोजीवंकृत्वाजात्यादितस्यच प्रवर्त्तय
तिभक्त्याचनिवर्त्तयतितस्यतत् ५ भक्तानामुत्तमाःशंभोयेभक्त्यात्यक्तकिल्बिषाः तानहंवःप्रवक्ष्यामिशृणुतब्रू

मितिभावः हरेशिवेउत्तमाभक्तिःप्राग्वर्णितास्यात् तदेवप्रतिपादयति तथाहीत्यादिनामृत्युंसंसारंतरति शोकमात्मवित् नसपुन
रावर्त्ततइतिश्रुतेः ४ स्वेतिशिवःसर्वसाक्षीपरमेश्वरः जीवंअविद्याप्रतिफलितमात्मचैतन्यं स्वस्यअनुबिंबंप्रतिबिंबंकृत्वा त
त्सृष्ट्वातदेवानुप्राविशत् इतिश्रुतेःतस्यजीवस्यजात्यादिप्रवर्त्तयतिच पुनः तस्यजीवस्यतज्जात्यादिकंभक्त्यानिवर्त्तयति एते
नअविद्यानिवर्त्तिकाभक्तिरेवनिश्रेयससाधनमितिभावः ५ अथआख्यायिकांवक्तुंश्रोतॄन्सावधानयति भक्तानामिति शंभो

परमशिवेभक्त्यात्यक्तंकिल्बिषंपापंयैस्तादृशाःयेभक्तानांमध्येउत्तमाःश्रेष्ठाःतानहंवोयुष्मभ्यंप्रकर्षेणवक्ष्यामिहेब्रह्मवित्तमाः
अतिशयेनब्रह्मविदःमुनयःयूयंशृणुतेतिसंबंधः द्द आख्यायिकामुपक्रमतेअस्तीति दक्षिणदिग्भागएवदुग्धसागरइतिरूपक
समासः विमलत्वविविधरत्नप्रभत्वविशालत्वादिनासादृश्यंबोध्यम् तत्रकौस्तुभमणिरिवपयस्विन्यानद्याःतीरे देवलोकस्यस्व
र्गस्य अनुबिंबेनतुल्यं अनुबिंबवत्प्रतिबिंबसदृशःदेशोस्तीत्यन्वयः ७ तत्रेति तत्रदेशेशिवस्यतुरीयस्य शिवमद्वैंतंतुरीयंमन्यंत
इतिश्रुतेःममतायाःममत्वस्यआस्पदंस्थानंप्रतिष्ठाकृत्यमास्पदमित्यमरः ब्रह्मादीनांतपःसिद्धिविदधातितच्छीलाकाचीनामन

अस्तिदक्षिणदिग्भागेदुग्धसागरकौस्तुभः देशस्तीरेपयस्विन्यादेवलोकानुबिंबवत् ७
तत्रकांचीतिनगरीशिवस्यममतास्पद ब्रह्मविष्णुमुनीन्द्राणांतपःसिद्धिविधायिनी ८
यत्रसापरमाभक्तिःकामाक्षीतिजगत्प्रसूः विद्योततेमहाविद्यापराकाशबिलाश्रया ९
यत्रचैकाग्ररूपेणकुर्वतस्तपउत्तमं मूलेदेवःसभगवान्सन्निधत्तेसदाशिवः १० ॥

गरीअस्तीत्यनुषंगः ८ तामेवनगरींविशिनष्टि यत्रेति द्वाभ्यांयत्रनगर्यांसाप्रसिद्धापरमाभक्तिःउत्तमभक्तिरूपाजगत्प्रसूःलोक
जननीपराकाशबिलाश्रयाहृत्पुंडरीककर्णिकासूक्ष्मविवरवर्त्तिनीकामाक्षीतिकश्चअश्चमश्चकामाः ब्रह्मविष्णुरुद्राः तेअक्ष्णोः
यस्याः ॥ यत्कटाक्षमात्रेणत्रिमूर्त्तयःप्रादुर्भवंतीत्यर्थः महाविद्याचिच्छक्तिः विद्योततेविशेषेणद्योततेप्रकाशते ९ यत्रच स
भगवान् उत्पत्तिंचविपत्तिंचभूतानामागतिंगतिं वेत्तिविद्यामविद्यांचसवाच्योभगवानितिउक्तलक्षणःसदाशिवःएकाग्ररू
पेणउत्तमंतपःकुर्वतःसाधकस्येत्यर्थः मूलेतरुमूले सन्निधत्तेसमीपस्थोभवति ईप्सितं दातुमितिशेषः १० ॥ ७ ॥ ७ ॥

तपइति क्षिप्रंशीघ्रंतपःसिद्धिप्रदेतपःफलदातरितत्रदेशेसर्वेमुनीश्वराःमननशीलाग्रेसराःऋषयःतपसाब्रह्मचर्यादिना कामाक्षी नाथं ईश्वरंपरमशिवंआराधयामासुःतोषयामासुः ११ अवान्तरकथामुपक्षिपति अथेति अथानंतरंएकदामलयाचलमंदिरः तदे काश्रयःलोपामुद्रायाःपतिःअगस्त्यःमहायोगीयमाद्यष्टांगयोगसिद्धः श्रीमान्ऋचः सामानि यजूंषिसाहिश्रीरमृतासतामित्यु क्तलक्षणयाब्राह्म्यालक्ष्म्यायुक्तःशिवक्षेत्रंकांचीदेशंआविशत्विवेश १२ मुनयइति अनूचानाःसाङ्गाध्ययनशीलाःअनूचानः

तपःसिद्धिप्रदेक्षिप्रंतत्रसर्वेमुनीश्वराःतपसाधारयामासुःकामाक्षीनाथमीश्वरं ११ अथैकदामहायोगीम लयाचलमंदिरः लोपामुद्रापतिःश्रीमान्शिवक्षेत्रमथाविशत् १२ मुनयस्तंप्रणम्याग्रेसमभ्यर्च्ययथाविधि इदमूचुरनूचानाःस्वासीनंकुंभसंभवं १३ श्रीमुनयऊचुःभगवन्कुंभसंभूत सर्वज्ञकरुणानिधे इच्छामोय त्समेत्यहवयंतदिहकथ्यतां १४ तपश्चसुचिरंतसंविहिताःक्रतवःशतं अर्चितश्चमहादेवःतथाप्यंतर्न शुद्धति १५ विषयाशारजोध्वस्तंमनश्चंचलमेवनः कथंभवित्रीमुक्तिश्चतदेतन्मुनिपुंगव १६ ॥

प्रवचनेसाङ्गेधीतीगुरोस्तुयदध्यमरः मुनयः अग्रेतंअगस्त्यंप्रणम्ययथाविधिसमभ्यर्च्यच स्वासीनंसुखोपविष्टं कुंभसंभवंअ गस्त्यं अगस्त्यःकुंभसंभवइत्यमरः इदंवक्ष्यमाणंवचनंऊचुः १३ प्रश्नप्रकारमेवाह भगवन्निति हेसर्वज्ञकरुणानिधेभगवन् इतिविशेषणत्रयेणगूढार्थज्ञानभक्तानुकंपाशिवावतारत्वंचव्यज्यते हेकुंभसंभूतअगस्त्यवयंसमेत्यमिलित्वा यद्दस्तुइच्छा मःतत्तद्दहाद्यकथ्यतांत्वयेतिशेषः १४ तपइति तथापितपोयज्ञार्चनादिसत्वेपिअन्तःअन्तःकरणंनशुद्धति विषयपरित्यागेन परमार्थेवस्तुनि स्थिरंनभवतीत्यर्थः १५ विषयेति विषयाःशब्दादयःतत्संबंधिनी आशातृष्णा सैवरजोधूलिःआवरकत्वसाम्यात्

तेनध्वस्तंनष्टविवेकंनोअस्माकंमनःचंचलमेवएवकारेणस्थैर्यसामान्याभावोदर्शितःएवंचमुक्तिःकथंभवित्री हेमुनिपुंगवएत
त्वस्तुवदेत्यन्वयः १६ इतीतिस्पष्टं १७ मुनिस्तानुत्तरयतिविनेति सर्वांतस्थे अंतर्यामिरूपेण सर्वप्राणिहृदयाश्रये महेश्वरे शि
वेईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठतीतिस्मरणात् उत्तमयाभक्त्याविनापृथक्विनेत्यादिनातृतीयामानवोमनुजःकल्पशतेनापि
किमुतअल्पकालेनेत्यर्थः मुक्तिंनविन्दतिनलभते १८ भक्त्यतिरिक्तसाधनस्यमिथ्यात्वंदर्शयति यदेतिजनाः इमंपरममहत्परि
माणमाकाशंगगनंयदाचर्म्मवत् त्वगिन्द्रियमिववेष्टयेयुः व्याप्नुयुः यथासर्वशरीरव्यापित्वगिन्द्रियंतथा सर्वमाकाशंयदिव्याप्नु

इत्याकर्ण्यवचस्तेषामगस्त्यःप्राहतानिदं ध्यायन्हृदिमहेशानमंबिकापतिमव्ययम् १७ श्रीअ
गस्त्यउवाच विनाचोत्तमयाभक्त्यासर्वांतस्थेमहेश्वरे नहिकल्पशतेनापिमुक्तिंविंदतिमानवः १८
यदाचर्मवदाकाशंवेष्टयेयुरिमंजनाः तदाभक्त्याविनाशंभोःशोकस्यांतोभविष्यति १९ भ
क्तिश्चतादृशीज्ञेयासर्वत्यागपुरःसरं तदेकदास्यसंप्राप्तिःचरमेसाभवेभवेत् २० ॥

युरित्यर्थः तदाशंभोःभक्त्याविनाशोकस्यसंसारस्यअन्तोनाशोभविष्यतिनान्यथेत्यर्थःएतेनयावदाकाशवेष्टनंयथामिथ्यातथाभ
क्तिंविनामुक्तिरपीतिभक्तिभिन्नोपायस्यमिथ्यात्ववर्णनात् मिथ्याध्यवसितिरलंकारः १९ उत्तमभक्तिस्वरूपमाह भक्तिश्चेति
सर्वत्यागपुरःसरंसमस्तविषयत्यागपूर्वकं तदेकदास्यसंप्राप्तिः तस्यशिवस्ययत्एकंदास्यंकिंकरत्वं तस्यसम्यक्प्राप्तिः
तादृशीभक्तिः उत्तमाज्ञेया साचभक्तिः चरमेभवे अन्तिमजन्मनिभवेत् २० ॥ ॥ ॥ ॥ ॥

संप्रतिमुनिःस्वाभिमानपरिहारायगुरुपरंपराप्राप्तंशिवतत्वं वक्तुंप्रतिजानीते सर्वज्ञेनेति कुमारेणस्कन्देनसर्वबन्धैःसकलसं
सारिकविषयैः २१ इतिहासंप्रवर्त्तयति पुरेति श्रीमच्चतत् भोगपुरंभोगःसुखंतदनुकूलंपुरंनगरमित्यर्थः शिखरविशेषणमेतत् दि
व्योतनशीले अंगंचरूपंचतेअवयवसौन्दर्ययस्याः तयादेव्यागौर्यासःविजहारविहारंकृतवान् २२ विहारमेवाह चतुरंगेति
चतुरंगस्यराजादिप्रसिद्धक्रीडाविशेषस्यविनोदेन पार्वतींमोदयामास तोषयामास तत्रक्रीडने देवीलीलया विलासेन ईशंजि
गायजितवतीतत्रहेतुमाह यदृशमितिजगत्भुवनंयस्याःमूलप्रकृतिरूपायाःवशं अधीनं त्रिगुणात्मकत्वाज्जगतइतिभावः २३

सर्वज्ञेनकुमारेणप्रोक्तमद्यवदामिवः यस्यश्रवणमात्रेणसर्वबन्धैःप्रमुच्यते २१ पुराकैलासशिखरेश्रीम
द्भोगपुरेवसन् विजहारमहादेवोदेव्यादिव्यांगरूपया २२ चतुरंगविनोदेनमोदयामासपार्वतीं जिगाय
देवीतत्रेशंलीलयायदृशंजगत् २३ इदमाहपराशक्तिर्भगवन्निर्जितोस्यलं अजितोस्मीतितांशम्भु
रेवमासीन्मिथःकलिः २४ प्रवृत्तेकलहेतत्रप्रहस्योवाचशंकरः मायासित्वंयतोलोकाविजिताः प्राकृ
तास्त्वया २५ अहंचनिर्मलोजय्यःसत्यंमिथ्यानबाधते श्रीदेव्युवाच निर्मलोमलिनोवात्वमास्तामाका

तत्किंकृतमित्यतआह इदमितिपराशक्तिःचिद्रूपापार्वती इदंवचनमाह हेभगवन् त्वं अलमत्यंतं निर्जितोसि मयेतिशेषःततः
शंभुःअजितोस्मि अपराजितोसि एवंमिथःपरस्परंकलिःकलहःआसीत् २४ प्रवृत्तेइति त्वंमायासि अघटितघटनापटीयसीत्य
र्थः यतःकारणात् प्राकृताःप्रकृतिजन्यालोकाः त्वयाविजिताः २५ अहंचनिर्मलः निर्विकारःअतएवअजय्यः जेतुमशक्यः अ
तःमिथ्यावस्तुसत्यंत्रिकालाबाध्यंचैतन्यंनबाधतेतिमिरंतेजइवेतिभावःतदाकर्ण्यदेव्याकिमुत्तरं दत्तंतदाह त्वंनिर्मलोमलि

नोवातद्वास्तांआकाशवत् आकाशस्येवप्रथाप्रसिद्धिःनीरूपस्यगगनस्यनिर्मलत्वंमलिनत्वंवायथा दुरुपपादंतथानिर्गुणस्यप
रमशिवस्यइतिभावः २६ जितइति त्वंजितोसि अथइदानीं अजितोस्मि इतिवदसीतिशेषः अतःसत्यंकर्ममिथ्येवबाधते शिवो
स्यप्रत्युत्तरमाह देवीति तव माययाव्यवहारःलोकयात्रारूपश्च मयि स्वप्रकाशचैतन्यरूपेवस्तुतःअनन्वितःअसंबद्धःअध्यास-
स्य अतात्त्विकत्वादितिभावः २७ सर्वेति सर्वस्यवस्तुजातस्यप्रकाशकेस्फूर्त्तिजनकेतस्यभासासर्वमिदंविभातीतिश्रुतेः तादृ
शेमयिअयंलोकव्यवहारःसत्यवत्नप्रतिभासते देवीपुनरुत्तरयति हेशंकरव्यवहारेणतवप्रकाशः विज्ञेयोज्ञातव्यः व्यवहा

॥जितोस्यथाजितोस्मीतिसत्यंमिथ्येवबाधते श्रीशिवउवाच देवित्वद्व्यवहारश्चवस्तुतोनन्वितोम
यि २७ सर्वप्रकाशकेनायंसत्यवत्प्रतिभासते श्रीदेविउवाच व्यवहारेणविज्ञेयःप्रकाशस्तवशंक
र २८ समयाचान्वितस्यैववन्हेःकाष्ठयुजोयथा श्रीशिवउवाच॥ अप्रकाशंजगत्सर्वंस्वयंज्योः
॥ तिरहंशिवे २९ ॥

रंविना तद्ज्ञानस्य असंभवइतिभावः २८ सइति सचप्रकाशः मयाशक्त्याअन्वितस्यैव संबद्धस्यैव शिवः शक्त्यायुक्तो य
दिभवतिशक्तः प्रभवितुं इत्यादिदर्शनात् तत्रदृष्टांतमाह वन्हेरिति काष्ठसम्बंधं विना वन्हिस्वरूपं यथा नप्रकाशते त
थेतिभावः शिवोस्योत्तरमाह अप्रकाशमिति हे शिवे सर्वंजगत् दृश्यजातं अप्राकाशं जडत्वादित्यर्थः अहंतु स्वयंज्योतिः
स्वप्रकाशरूपः प्रदीपवत् अत्रायं पुरुषःस्वयंज्योतिरितिश्रुतेः २९

आकाशेति आकाशवत् अरूपोस्मिनिर्गुणत्वादितिभावः इच्छयासंकल्पेन रूपवांश्च अस्मिसोकामयतबहुस्याप्रजायेयेतिश्रुतेः देवीपुनस्तत्तथयति इच्छेति हेमहेश्वर इच्छासाध्यंसंकल्पजन्यं इदंपरिदृश्यमानंरूपं मुंडमालादियुक्तंयद्दिभर्षि तत्तवैव रमणीयमितिपरिहासउक्तिः ३० मालेतिस्पष्टम् ३१ लोचनमिति आतता आसमंतात् विस्तृताप्रलंबाश्चकर्षेणलम्बमाना अस्थ्नां कीकसानां कीकसंकुत्यमस्थिचेत्यमरः तेषांस्रक् माला ३२ आलेपनमिति करभाजनं करपात्रम् पात्रामत्रेच भाजने

॥॥॥आकाशवदरूपोस्मिरूपवानस्मिचेच्छया श्रीदेव्युवाच इच्छासाध्यमिदंरूपंयद्दिभर्षिमहेश्वर ३० त वैवरमणीयंचतरुणेन्दुकलाधर मालामुंडमयीमौलौजटाभारेत्रपन्नगाः ३१ लोचनंज्वलनंवन्हिःकुंड लंकुंडलीश्वरः भोज्यंचगरलंघोरंप्रलम्बास्थिस्रगातता ३२ आलेपनंचिताभस्मकपालःकरभाजनं भूष णान्यहिरूपाणिवसनंचगजाजिनं ३३महाश्मशानेसंचारोवृद्धोक्षश्चापिवाहनम् भूतसंघाःपरिजनाबांध वास्तेयकिंचनाः ३४ लब्धंत्वयापरंरूपंवदमूलंतपस्विना पश्यमदृष्टिसंसृष्टंसर्वसौभाग्यशालिनः ३५ साध्यान्महद्भिःऋतुभिःलोकान्ब्रह्मादिसेवितान् नयनानंदजनकंयदिरूपम्भवेत्तव ३६ तथाभिरू प्यादिजयीभविष्यसिनसंशयः उक्तमेतन्मयासर्वंक्षम्यतांविजयीभवान् ३७ ॥ ७ ॥ ७ ॥

इत्यमरः॥ गजस्य अजिनंचर्म्म अजिनं चर्म्मेत्यमरः ३३॥ महाश्मशानेइतिवृद्धोक्षः वृद्धवृषभःअचतुरेत्यादिना निपातः अकिंचनाः दरिद्राः ३४ लब्धमिति तपस्विनादीनेनमुनिदीनोतपस्विनोइतिविश्वः संप्रतिदेवीस्वमहत्त्वंदर्शयतिप श्येतिममदृष्ट्याकटाक्षेणसंसृष्टान् सम्यक्निर्मितान् इदंलोकानित्यस्यविशेषणं ३५ साध्यानिति स्पष्टपूर्वार्द्धदेवीपुनःशि बमाक्षिपति नयनेति ३६ तथेति तथातर्हि आभिरूप्यात् मनोज्ञरूपत्वात्उपसंहरति उक्तमिति ३७ ॥ ७ ॥ ७ ॥

इतीति साचीकृतः तिर्यक्कृतः आस्येन्दुः मुखचंद्रो ययापरस्परक्षिक्षेपण पराङ्मुखीभूतेत्यर्थः तथाआलापितः संभाषितः शुकार्भकः शुकशावकः ययाद्दमपि पराङ्मुख्याः चिन्हं ३८ अथेति स्वाभिन्नांस्वः तादात्म्यमापन्नां चन्द्रचन्द्रिकयोरिवशिव शक्त्योरभेदात् ३९ देवीसांमुख्यसम्पादनायशिवः प्राह यदितियस्मात्कारणात् अहंनवधूः पुमान्वाभवामि स्त्रीत्वपुंस्त्वयोः कल्पितत्वात् नचस्त्रीन षण्डः पुमान्नैवचत्वंदृतिदर्शनात् अतः लज्जाभिमानो स्त्रीपुंसधर्मौ नस्तइतिभावः ४० स्वमाहात्म्यंदर्शयितुंपुनः शिवोवदति न

इत्युक्तामौनमगमज्जगतांजननीशिवा॥ तस्योसाचीकृतास्येन्दुरालापितशुकार्भका ३८ अथमन्दस्मितं कृत्वाभूतानांपतिरीश्वरः पराङ्मुखीमिदंप्राहस्वाभिन्नांशक्तिमंबिकां ३९ शिवउवाच यदहंनवधूर्देविनपुमान्वाभवामिच नमेलज्जाभिमानश्चव्योमवत्सर्वतःस्थितः ४० नयनानंदनंरूपंयदितेप्रीतिसाधनम्॥ पश्याद्भुतमिदंरूपंआकर्णपूर्णलोचने ४१ इत्युक्तासर्वलोकानामीशानःशैलकन्यकां यथाचतेजःकाठिन्यंदधौरूपमनुत्तमम् ४२ सहस्रकोटिकंदर्पसारसौंदर्यकोमलं कोटिसूर्यप्रतीकाशंकोटिशीतांशुशीतलम् ४३ मंदस्मितमुखांभोजंप्रसन्नायतलोचनं दिव्याभरणमालाढ्यंदिव्यगंधानुलेपनम् ४४ उदारहारकेयूरकटकांगदकुंडलंमहार्हवसनोपेतंमणिकांचीगुणान्वितं ४५ रत्ननूपुरसंयुक्तमुल्लसत्तिलकालिकं चक्षुःप्रक्षाल्यदेवानाम

यनेतियद्येवं इदंमया दर्शयिष्यमाणं अद्भुतंरूपंपश्येत्यन्वयः आकर्णमित्यादि संबोधनेन तवनेत्रयोः साफल्यंभविष्यतीतिभावः ४१ इतीति तेजः सोरचान्द्रादि यथा काठिन्यं दधौतथापिंडीभूतदिव्यतेजोमयंरूपंदधावित्यन्वयः ४२ तदेवरूपं पंचभिर्वर्णयतिसहस्रेत्यादिना ४३ ४४ ४५ ४६ गौरीति रूपंनिर्माय अद्रिराजं अलमकरोत् अलंचकारेत्यर्थः ४७

४७ इतिश्रीमानवल्युपनामकस्कन्दसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांशिवपार्वतीसंवादोनामद्वि
तीयोऽध्यायः २॥ ॥श्री॥ ॥सम्प्रतिदिव्यरूपदर्शनविस्मितादेवीपरमशिवंनवभिश्लोकैस्तुष्टावेत्याह सूतः तदेति १ देवीस्तौति
नमइत्यादि २ मनसइतियतोवाचोनिवर्त्तन्तेअप्राप्यमनसासहेतिश्रुतेः विश्वाधिकायनतत्समश्चाभ्यधिकश्चविद्यतइतिश्रुतेः

गौरीविलोचनचकोरकिशोरलेह्यंसौंदर्यसारसमुदायसमुज्वलांगं निर्मायरूपमथनिर्मलसेव्यपादः॥
शीतांशुमौलिरकरोदलमद्रिराजम् ४७ इतिश्रीस्कन्दोपपुराणेद्वितीयोऽध्यायः २॥ ॥श्रीसूतउवाच तदा
हैमवतीदृष्ट्वारूपमत्यद्भुतंविभोः विस्मिताप्रणतादेवंतुष्टावपरमेश्वरम् १ श्रीदेव्युवाच नमःशिवायदेवाय
शंभवेसर्वसाक्षिणे इच्छाधीनस्वरूपायविरूपाक्षायतेनमः २ मनसोवचसोवापिनमस्तेदूरवर्त्तिने॥वि
श्वाधिकायरुद्रायवीतरागकृधेनमः ३ सृष्टयेब्रह्मरूपाय रक्षायैविष्णवेनमः संहारायप्रपंचस्यनमस्तरु
द्रमन्यवे ४ यत्सत्ताजगतःसत्तायद्भासाभासतेजगत् दृङ्मात्रोपभिन्नायशिवायज्योतिषेनमः ५ कालकर्म्मवि=
द्रायनमःकैवल्यरूपिणे कारुण्यनिधयेतुभ्यंकालकंठायतेनमः ६ योन्तःप्रविश्यसर्वाणिभूतानिभुवनेश्वरः
संजीवयतिसर्वात्मानमस्तस्मैशिवायते ७ भक्तिगम्यायभव्यायभवपाशच्छिदेसतां भानुमंडलवासायभर्गो=
यभवतेनमः ८ चतुर्भुजायमहतेदेवायदहनात्मने दशात्रयविहीनायदक्षाध्वरभिदेनमः ९॥ ४७ ॥

३सृष्टयेद्वैतंतुरीयंमन्यन्तेइतिश्रुतेः ४ यत्सत्येतितस्यभासासर्वमिदंविभातीतिश्रुतेः५ कालेतिस्पष्टम् ६ योन्तइतिअन्तः
प्रविष्टःशास्ताजनानामितिश्रुतेः ७ भक्तिगम्यायेतिभर्गोयत्रविद्यादोषभर्जनायत्रनेनगायत्रीप्रतिपाद्यत्वंशिवस्यैवेतिध्येयम् ८
चतुर्भुजायेति दशात्रयं बाल्यकौमारवा र्धकंतेनविहीनायनित्यतारुण्यायेत्यर्थः ९

स्तुतिमुपसंहरति इतीति आहेतिशेषः १० स्तुत्याप्रसन्नेनशिवेन वरंवृणीष्वेति कथितादेवी शिवंप्रार्थयते अत्यद्भुतमिति भक्तेरेव मुक्तिसाधनत्वात् तत्प्रार्थनंयुक्तमेवेतिभावः ११ प्रागुक्ताक्षेपवचनैर्भीता देवी शिवंक्षमापयति क्षमस्वेति १२ एवंदेव्याप्रार्थितः शिवः किमकरोदित्यत आह इतीति यवनिकां तिरस्करिणीं प्रति सीरायवनिकास्यात्तिरस्करिणीचसा इत्यमरः १३ अनंतरवृत्तमाह अथेति भित्यंतरे भित्तिमध्ये स्वांस्वीयांप्रतिमां प्रतिबिंबं प्रतिमानंप्रतिबिंबंप्रतिमेत्यमरः १४ स्वयंदृष्ट्वा देव्यै दर्शयामास इत्याह

इतिस्तुतोमहादेवःप्रसन्नःपार्वतीपतिः वरंवृणीष्वकल्याणिमनोयत्रप्रवर्त्तते १० श्रीदेविउवाच अत्यद्भुतमिदं दृष्टंतवरूपंजगत्पते अनेनपूर्णःकामोमेभक्तिरस्तुस्थिरात्वयि ११ क्षमस्वकरुणासिंधोवाङ्मनःकायसंभवं अपराधंममस्वामिन्क्षमित्वाकरुणांकुरु १२ इतिदेव्यांब्रुवाणायांनंदिनंप्राहशंकरः कुरुदूरेयवनिकांमरुतोव्यवधायिनीम् १३ अथतेनापनीतायांयवन्यांरत्ननिर्मिते भित्यंतरेस्वांप्रतिमांददर्शभगवान्हरः १४ दर्शयामासपार्वत्यैपश्यपश्येतिचांतिके गौरीतंप्रार्थयामासप्रतिबिंबंतवेश्वर १५ अत्रागच्छतुतेशक्त्यावरएषममोत्तमः श्रीअगस्त्यउ॰ तत्क्षणेभगवान् शंभुरपरिच्छेद्यवैभवः १६ भोसुंदरममाभ्याशेचरत्वमितिचाहूयत् कर्त्तुंचापितथाकर्त्तुमन्यथाकर्त्तुमीशितुः १७ प्रतिबिंबोनुमत्याभूत्सुंदराख्योगणाग्रणीः मनसापिविधेःकर्त्तुमशक्यंरूपमुज्वलम् १८॥ ॥ ॥ ॥ ॥ ॥

दर्शयामासेति तत्प्रतिबिंबदर्शनेन विस्मितादेवी शिवंप्रार्थयते गौरीति १५ तामेवाह अत्रेत्यर्द्धेन अगस्त्योमुनीनाह तत्क्षणे इति १६ शिवःप्रभावंदर्शयितुंतदाज्ञाप्रकारमाह भोइति अभ्याशे समीपे सदेशाभ्याशसविधेत्यमरः तथाअकर्त्तुमितिच्छेदः १७ प्रतिबिंबेति मनसापि किमुतहस्तव्यापारेणेत्यर्थः १८ ॥ ॥ ॥ ॥ ॥ ॥

पश्यंत्यामितिस्पष्टम् १९ तवेति इदंमदीयंजन्मसाफल्यं सफलतां अश्नुतां प्राप्नोतु अमूव्यासौ २० शशासेति इदंभस्मपात्रं २१ सुंदरा येति भस्माधारधरइत्यादि त्रीणिनामानि दधावित्युत्तरेणान्वयः २२ दधाविति भस्माधारभृता भस्मपात्रधरेण तेनेतिशेषः २३ आलिं

पश्यंत्यांसुंदरोदेव्यांप्रणम्योवाचशंकरं अनुजानीहिमांदेव दासोस्मिकरवाणिकिम् १९ तवाज्ञापालनाज्ज न्मसाफल्यमिदमश्नुतां इतितद्वाक्यमाकर्ण्यसस्मितश्चंद्रशेखरः २० शशासेदंगृह्यतामिति सचासीद्भस्मपात्र मृत स्वयंगृहीत्वातद्भस्मदधारपरमेश्वरः २१ सुंदरायददौसर्वांस्वशक्तिंसुंदरेश्वर भस्माधारधरःशंभोःप्रति बिंबःससुंदरः २२ दधावेतानिनामानिशिवेनैवकृतानिसः भस्माधारभृतादत्तमादायभसितंहरः २३ आलिं पनसर्वगात्राणिदधौप्रीतिमनुत्तमां संध्यातांडवलीलासुप्रवृत्तासुदिनेदिने २४ विप्रकीर्णजटःश्रांत्यातदं से भुजमर्पयत् नंद्यादिगणनाथानांकृचिदाह्वानकर्म्मणि २५ तन्नामाम्रेडयामासहासयन्गिरिजांहरः शि वोऽहमितियंधन्यःक्षणंसंचिंत्यमुच्यते २६ सप्रवर्तविलोक्येशःसुंदरोऽस्मीत्यचिंतयत् धारयन्फणिमंजी रंपादेतस्यकटीतटे २७ गजाजिनंमृगंपाणौसर्वांगेभस्मनिर्मलं कंठेस्थिमालांविन्यस्यश्रवणेफणिकुंडलं २८ मौलौजटाभरंतत्रकलाधरकलामपि हरोदृष्ट्वोक्षमारोप्यचालयन्त्रमथैःसह २९ स्वतंत्रंसुंदरोप्रीत्याकैलासशि खरांगणे सेवार्थमागतान्देवान्तत्सादेसन्यपातयत् ३० चुचुंबचकपोलेतंकपालीवृषभस्थितं सुंदरत्वंशिवोसी

पन्नितिस्पष्टम् २४ विप्रकीर्णेति तदंशेतस्यसुंदरस्यअंसेभुजशिरसिभुजंस्वीयं २५ तदिति आम्रेडयामास असकृदुच्चारयामास आम्रेः डितं द्विरुक्तमित्यमरः २६ सम्प्रतिपरमानुग्रहेणप्रतिबिंबस्वरूपेसुंदरेस्वकीयमैश्वर्यसमर्पयामासेतिवर्णयति धारयन्नित्यादिप

ततः सुंदरवाच २६ ॥ ॥ ॥ ॥ ॥

द्वारीति एतान्देवान् बिरुदावलीः क्षुद्रप्रबंधविशेषान् वर्ण्यमानांकविरुदवर्णनप्रचुरोज्वला वाक्याडंबरसंयुक्ता सामता बिरुदावलीतिलक्षणात् ३२ सृष्टिमिति पंचकृत्यानीत्यर्थः ३३ क्वचिदिति वादयामास सुंदरद्वारासंदेहं निवर्त्तयामासेत्यर्थः पशूनांजीवानांपाशे

द्वारिवेत्रभृतोनेतान्वेदांतानामगोचरः सुंदरेशानुबिंबेतिबिरुदालीरपाठयत् ३२ सृष्टिंस्थितिंचसंहारं जगतांजगदीश्वरः तिरोधानानुग्रहौचसुंदरंसमशिक्षयत् ३३ क्वचिच्चसनकादीनांसंदेहंपरिपृच्छतां सुंदरंवादयामासपशुपाशेषुनिर्णयम् ३४ किमत्रबहुनोक्तेनविहायगिरिजामुमां सर्वासांसंपदांशंभोस्वतंत्रःसुंदरोभवत् ३५ अथदेवाश्चदैतेयाःसंभूयकृतनिश्चयाः प्रार्थयंतोमृतंसर्वेममंथुःक्षीरसागरम् ३६ मंथानंमंदरंकृत्वायोक्त्रंकृत्वातुवासुकिं सर्वौषधीश्चनिष्पीड्यप्रक्षिप्यपयसांनिधौ ३७ मथ्यमानेमहांभोधौप्रयत्नाद्देवदानवैः तेषामशक्नुवन्सोढुंभुजनिष्पीडनंहरेः ३८ निशिताश्मक्षितिक्षुण्णोवासुकिर्व्यथितःश्वसन् उद्ववामविषंघोरंतत्तुपाथोधिसंगतम् ३९ हालाहलमितिख्यातंप्रलयानलसन्निभं संबभूवघनीभूतंयेनप्लुष्टंजगत्त्रयम् ४० तदानींपर्वतान्सिंधून्निर्दहत्सैंधवंगरं यूथंसुरासुराणांतदाववारानिवारितम् ४१ हालाहलोष्मवेगेनव्यशीर्यंतसुरासुराः प्रधानेष्वपिलोकानांनकश्चित्प्रत्यदृश्यत ४२ दुद्रावद्रुहिणोभीत्याप्लुष्टःकार्ष्ण्यंययौहरिः ननाशससुनासीरःशशामशमनोयमः ४३ अचेतनःप्रचेताश्चनिश्क्रांतोनिधिनायकः अन्येसुरा

पुबंधनेषु ३४ उपसंहरति किमत्रेति गिरिजांविहाय पार्वतीं विनातस्याःशिवैकपतिव्रतात्वात्इतिभावःमहादेवंहित्वातवसतिसतीनामचरमेकुचाभ्यामालिङ्गः कुरवकतरोरप्यसुलभः इतिश्रीमच्छंकरभगवत्पादाः ३५ अथेत्यादियावदध्यायसमाप्तिहालाहलपानप्र

युक्तंसुंदरस्यमाहात्म्यंदर्शयति ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ॥

४५ ४६ ४७ ४८ ४९ इतिमानवस्युपनामकनृसिंहविरचितायां स्कन्दोपपुराणव्याख्यायांभक्तिविलासप्रकाशिकायांसुंदरेश माहात्म्यवर्णनंनामतृतीयोऽध्यायः ३॥❀॥ ॥संप्रतिप्राप्तैश्वर्यःसुन्दरःगर्वितोऽभूदितितंनिवृत्तिपूर्वकंपूर्णानुग्रहंमुनीन्प्रति अ गस्त्योवर्णयति यदाज्ञयेतियद्यस्मात् पश्यतामिति षष्ठीचानादरेद्रष्टिसत्त्रेणअनादरेषष्ठी १ तस्येति सर्वात्मत्वात् तदवलेपज्ञानं यु

सिद्धचारणगंधर्वाःमुनयोन्येचसेवकाः शरणंजग्मुरीशानंकैलासेवृषभध्वजम् ४५ आकर्ण्यहालाहलवेगमारादुमाप तिस्सुंदरमादिदेश निर्गत्यतूर्णंसचघोरमेतत्जग्राहजंबूफलवत्कराग्रे ४६ आनीलहालाहलशोभमानमालोक्य सुंदरहस्तमीशः संदर्शयामासगिरेःसुतायैसभृंगमंभोजमिवप्रबुद्धम् ४७ हालाहलंसोपिचसुंदराख्योददौतदादा यतदीयहस्तात् हरोऽपिवत्सोपितदाज्ञयाचतदीयकंठाभरणंबभूव ४८ त्रैलोक्यस्थानिभूतानिलीलाकृष्टमहाविषं आलोक्यसुंदरंसाक्षादमन्यंतमहेश्वरम् ४९ इतिश्रीस्कंदोपपुराणेतृतीयोऽध्यायः ३॥ ॥श्रीअगस्त्यऊ·यदाज्ञयाम हेशस्यनिजग्राहमहाविषं तदासीत्सुंदरोदृष्टोगणेंद्राणांचपश्यतां १ तस्यावलेपंविज्ञायसर्वात्मांचंद्रशेखरः शिक्षां समुचितांकर्त्तुंसंकल्पमकरोत्तदा २एतस्मिन्समयेदेव्याःप्रसिद्धपरिचारिके विख्यातेनिंदितेत्येकाकमलिन्यपराख्य या ३उभेगत्वांबिकोद्यानंपुष्पाण्याहृत्यतिष्ठतः सुंदरोपितदाशंभुंमृडाणीसहितंमिथः ४विज्ञायविचचारादूरुपांतेपुष्पि तद्रुमे नगरेमल्लिकोद्यानेनीलाद्यौर्विद्युताविव ५ निष्टप्तकांचनच्छायेकिंशुकप्रतिमांशुके स्थलारविंदसश्रीकचरणो

रूमितिभावः २एतस्मिन्निति अनिंदिताकमलिनीतिद्वेपरिचारिके ३उभेद्वितीयाष्टम् ४ विज्ञायेतिनीलाद्यौर्विद्युताविवेतिपूर्णोपमा ५ निष्टप्तेत्यादित्रयोदशभिःतयोःपादादिकेशांतंवर्णयतिनिष्टप्तेतिकिंशुकस्यपलाशपुष्पस्यपुष्पेलुक् प्रतिमंसदृशं अंशुकंवस्त्रंययोस्ते

पादौवर्णयति स्थलारविंदेति दृढंचस्त्रीणांशुभलक्षणंतथाचोक्तंस्त्रीणांपादतलंस्निग्धंमांसलंमृदुलंसममिति द्रमनोभवेति रोम
हीनेसमेस्निग्धेयज्जंघेक्रमवर्त्तुले साराजपत्नीभवतिविशिरेसुमनोहरे जानुनीवर्णयति कूर्मेति वृत्तं पिशितसंलग्नंजानुयुग्मंप्रश
स्यते इतिचदर्शनात् शुभलक्षणंवर्णितंभवति ७ जघनंवर्णयति निर्मृष्टेति भगस्थमालंजघनंविस्तीर्णंतुंगमांसलं इतिलक्षणात् नि
तंबंवर्णयतिकंदर्पेतिकपित्थफलवत्वर्त्तौमृदुलौमांसलौघनौस्निग्धौबलिविनिर्मुक्तौरतिसौख्यनिवर्द्धनौ इतिच ८ किंचिदिति गंभीरद-
क्षिणावर्त्तनाभीस्यात्सुखसंपदे रोमराजीवर्णयतिआलक्ष्येति ऋज्वी तन्वी चरोमालीयस्याःसाशर्मनर्मभूः मध्यंवर्णयति करांतेति

मनोभवनिषङ्गभजङ्घयुगविराजते कूर्मराजवरांगश्रीजानुपीनोरुमंथरे ७ निर्मृष्टहेमफलकसमानजघ
नोन्नते कंदर्पस्थचक्राभनितंबालंबिमेखले ८ किंचित्समुच्छ्वसन्नीवीदृश्यनाभिमनोहरे आलक्ष्यरोमल
तिकेकरांतमितमध्यमे ९ वलित्रयविरोचिष्णुवटपत्रोदरोज्ज्वले आपीनोपचितस्निग्धसंप्रवल्गुपयोधरे १०
हारप्रालंबगुच्छांतर्गतगोस्तनचूचुके रत्नांगुलीयमालांभ्रमंजरीपुंजकर्बुरे ११ कुटिलारक्तनखरौविभ्राणेक
रपल्लवौ ॥ स्थूलविद्रुमबंधाढ्यस्फुरत्कटककंकणौ १२ ॥ ७ ॥ ७ ॥ ७ ॥

मध्यक्षामाचसुभगादृतिलक्षणात् ९ वलित्रयमुदरंचवर्णयति बलित्रयेति भोगाढ्यासवलित्रया उदरेणातितुच्छेनविशिरेणमृ
दुत्वचा योषिद्भवतिभोगाढ्यानित्यमिष्टान्नसेविनीति लक्षणात् कुचौवर्णयति आपीनेति घनौवृत्तौदृढौपीनौसमौशस्तौपयो
धराविति लक्षणात् चूचुकेवर्णयति १० हारेतिसदृशं चूचुकयुग्मंशस्तंस्यामंसुवर्त्तुलं इतिलक्षणात् ११ करौवर्णयति कुटि
लेति अंभोजमुकुलाकारमंगुष्ठांगुलिसंमुखम् हस्तद्वयंमृगाक्षीणांबहुभोगायजायते इतिलक्षणात् १२ ॥ ७ ॥

भुजोवर्णयति केयूरेति केयूरांगदयोःपर्यायत्वेपिसामान्यविशेषभावाद्पौनरुक्त्यंशोभनोशुभलक्षणो अदीर्घोवकृशोभुजाविति
लक्षणात् कर्णौवर्णयति स्फुरदिति लंबौकर्णौशुभावत्तौसुखदौचशुभप्रदावितिलक्षणात् भुजशिरस्स्पृष्टत्वेनकर्णयोःशुभ=
लक्षणमुक्तम् १३ कपोलेति दर्पणवत् अतिस्वच्छत्वेनप्रतिबिंबयोग्यत्वंशुभलक्षणंसूचयति शस्तौकपोलौवामाक्ष्याःपीनौ
वृत्तौसमुन्नतावितिलक्षणात् अधरंवर्णयति मंदेतिपाटलोवर्त्तुलःस्निग्धोरेखाभूषितमध्यभूःसीमंतिनीनामधरोधराजानिघ्नियो
भवेत् मसृणोमत्तकाशिन्याश्चोत्तरोष्ठःसुशोभनइतिलक्षणात् १४ नेत्रेवर्णयति श्वशितेति ललनालोचनेशस्ते रक्तांतेकृष्णतार

केयूरांगदसंस्पृक्तोदधानेशोभनोभुजौ स्फुरद्भुजशिरस्स्पृष्टकुंडलश्रुतिमंडिते १३ कपोलस्थलसंक्रांतस
शैलवनविष्टपे मंदस्मितमयज्योत्स्नापरभागोज्वलाधरे १४श्वसितामोदसंभ्रांतभृंगसंत्रस्तलोचनेमौ
क्तिकाभरणोदारनासादंडविराजिते १५ अपांगलीलायमुनातरंगाक्रांतदिक्तटे भ्रूविभ्रमसमाहृतरति=
कांतशरासने १६ अर्द्धेन्दुललितालीककस्तूरीतिलकोज्वले आनीलवेणिकोटिस्पृक्पश्चाद्भागपदाब्जे १७

के गोक्षीरवर्णविशदेसुस्निग्धेकृष्णपक्ष्मणीतिलक्षणात् नासांवर्णयति मौक्तिकेति समवृत्तपुटानासालघुच्छिद्राशुभावहा इ
तिलक्षणात् १५ नेत्रान्तौवर्णयति अपाङ्गेतिभ्रुवौवर्णयति भ्रूविभ्रमेति भ्रुवोसुवर्त्तुलेतन्व्याःस्निग्धेकृष्णेअसंहते प्रशस्तेमृदुरो
माणौसुभ्रुवःकार्मुकाकृतीतिलक्षणात् १६ भालंवर्णयति अर्द्धेंदुरिति भालःशिराविरहितोनिर्लोमार्द्धेन्दुसन्निभःइतिलक्षणात्
केशान्वर्णयति आनीलेति केशाअलिकुलच्छायाःसूक्ष्माःस्निग्धाःसुकोमलाःकिंचिदाकुंचिताग्राश्चकुटिलाश्चातिशोभनाः इ

तिलक्षणात् १७

मुखंवर्णयति लावण्येति मुक्ताफलेषुछायायास्तरलत्वमिवान्तरा प्रतिभातियदङ्गेषुतल्लावण्यमिहोच्यतेइतिभूपालः चन्द्रबि
म्बसाम्यवर्णनेनवर्त्तुलत्वनैर्मल्यादियोगात् शुभलक्षणमुक्तंसमंसमांशं सुस्निग्धंस्वामोदंवर्त्तुलंमुखमितिलक्षणात् सौन्दर्याति
शयंवर्णयति पादेति १८ तद्दर्शनेनसुन्दरस्यचक्षुःप्रीतिमाह सुन्दरइति तत्रोत्प्रेक्षतेवैरादिति १९ सार्द्धत्रयेणमनः सङ्गमाह नि

लावण्यरसनिष्यन्दचन्द्रबिंबसमानने पादांबुजपरागश्रीपराजिततिलोत्तमे १८ सुन्दरस्तेतुदृष्ट्वासीत्सद्यःस
भ्रांतलोचनः वैरादिवनिजारातौप्रतिबिंबंपुरद्रुहः १९ निर्विभेदतदाबाणैःसुंदरंकुसुमायुधः अहोनिर्माणचातु
र्यमहोतारुण्यजृंभणं २० अहोसौंदर्यसन्नाहोनिस्तुलाकल्पचातुरी आपादकेशमंगेषु ॥ स्निग्धयोर्मुग्धयो
र्मम २१ ❀ निमग्नंमानसंभूयोनोत्थातुंशक्तिमिच्छति किमस्याःप्रतिबिंबंस्यादियमस्याभवेदियम् २२ इमेकु
तःकिमुस्वप्नोमायावामान्मथीपुरः श्रीअगस्त्यउ॰ आपीनौकठिनावेतौनिस्तुलौनिर्मलावुभौ २३ संहतौसंप्रवल्ला
तौअन्योन्यस्पर्द्धिलक्षणौ स्तनौवीक्ष्यानयोर्मन्येनकस्यापिभवेद्धृतिः २४ जन्मकोटितपश्चर्य्याफलमालिंगनंसकृत्
योन्वहंस्वादतेकोपमनयोरधरामृतम् २५ प्रार्थयामिस्वयंदास्यमदसीयमहंत्विति सुंदरःस्वंदुराचारमनुरागंनिगू
हितुं २६ नशशाकतदाकृष्टःसमीपमनयोरगात् तेचतंमदनाकारंपश्यंत्यौपक्ष्मलेक्षणे २७ मनोभवरसावेशात्
अवशेसंबभूवतुः कथंनुपंचभिर्बाणैःसममेवमनोभवः २८ त्रीन्निर्विभेदबलवान्समग्राद्भुतविक्रमः सव्रीडविभ्र

र्विभेदेत्यादिना २० २१ २२ गुणवर्णनमाह सार्द्धद्वयेन आपीनावित्यादिना २३ २४ २५ चिन्तामाह प्रार्थयामीति लज्जात्यागमा
ह सार्द्धद्वयेनआपीनावित्यादिनासुन्दरइत्यादिसार्द्धेन २६ सुन्दरेतयोःचक्षुःप्रीतिमाह तेचेत्यादित्रिभिः २७ २८ सुंदरस्य भू

तथोश्चापलमाह तेचेति ३० त्रयाणांग्लानिंवर्णयति अन्योन्येति ३१ व्याधिमाह सद्यइति ३२ तेषांस्वस्वस्थानगमनमाह अथेति सुं
दरस्यविकारदर्शनेननिवकृतान्तमाह म्लायमानेति स्मयमानमुखइत्यनेनसापराधेष्वपिभक्तेषु भगवतःकृपासूचितानंद्यादीनांश्च
णवतामित्यनेनसुन्दरस्यलज्जाकारणंदर्शितम् ३४ ३५ शिवःसुंदरमुपदिशति कामेति सार्द्धेन ३६ प्रारब्धकर्मणांभोगादेवक्षय

अंतर्निमग्नैरामज्जंविद्धोमूर्छामवापह तेचापितक्षणादेवतत्कटाक्षासिधारया ३० भिद्यमानमिवस्वान्तंदध
तुःसंभ्रमाशये अन्योन्यदर्शनादेवंतेऽभेसचसुंदरः ३१ सहजंधैर्य्यमुत्सृज्यम्लानिमंगेषुभेजिरे सद्योविस्रं
तकृत्यानांदीर्घनिश्वसतांमुहुः ३२ दूयमानंवपुस्तेषामाचचक्षेस्मरव्यथां अथगौरीसमीपंतेययतुःसुंदर
श्चसः ३३ यथापूर्वंभगवतःपार्श्वंप्रापस्मरार्दितः म्लायमानतनुंवीक्ष्यसर्वज्ञःसुंदरंहरः ३४ स्मयमानमु
खःप्राहनंद्यादीनांचशृण्वतां श्रीमहेश्वरउवाच कामक्रोधविहीनानांमुनीनामूर्द्धरेतसां ३५ अप्राप्यंमत्सदं
प्राप्यकिमिदानींत्वयाकृतं करस्थंयत्रकैवल्यंकैलासेतत्रसुंदर ३६ मनसाचिंतितःकामोभोज्यःसहिनसंश
यः तस्माज्जन्मभुविप्राप्यतत्रताभ्यांसमन्वितः ३७ भुंक्ष्वसांसारिकान्भोगान्अनात्मज्ञोयथानरः श्रीअगस्त्य
उ॰यथासुंदरमीशानःशशापेवंभवेद्भुवि ३८ तथैवगिरिजातेचतदाहपरिचारिके अथवज्रमिवोत्सृष्टंशापमा
कर्ण्यशंभवम् ३९ सुंदरःप्रणिपत्येशंरुदन्नेवमभाषत देवदेवदयासिंधोभक्तानामभयंकर ४०॥ ९ ॥

इति तत्संकल्पितार्थभोगायसुन्दरस्यमानुषंजन्मादिशति मनसेति सार्द्धेन ३७ शिवाभिप्रायंबुध्वापार्वत्याअपिनिजपरि
चारिकेप्रतिशापरूपामाज्ञामाह यथेति सार्द्धेन ३८ शापश्रवणानन्तरं सुंदरस्यदैन्यपूर्वकंक्षमापनमाह अथेत्यादिद्वाभ्यां ३९ ४०

शिवशापस्यान्यथाकर्तुमशक्यत्वात्तमंगीकृत्यमानुषेपिजन्मनिशिवस्मरणंप्रार्थयते भूतलेइत्यादित्रिभिः ४१ ४२ ४३ ४४ इ
तिश्रीमानवल्युपनामकस्कंदसंहिताविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायां अनिंदिताकमलिनीसुंदरशापदानं
नामचतुर्थोऽध्यायः ४॥ ॥ॐ॥सुंदरप्रार्थनयाप्रसन्नोभगवान्परमशिवःसुंदरायतद्भिलषितंजन्मनिजनामाविस्मरणपूर्वकंव
रमपराधमिमंसोढुाप्रसीदपरमेश्वर भूतलेयदिजन्मस्यात्कलिनादूषितेमम ४१ त्वद्विस्मरणमेवस्यात्पशोरिवबने
स्मृतिः वाङ्मनःकायजातानामेनसांमहतामपि ४२ त्वन्नामस्मरणंसद्यःप्रायश्चित्तमितिश्रुतिःकरोमिनैवंपुनरिन्दुमौ
लेदीनेत्वदीयेकरुणांकुरुष्वसएवमुक्ताशतशःप्रणम्यरुदन्पदांभोरुहमालालंबे ४४ इतिश्रीस्कन्दोपपुराणेचतुर्थोऽ
ध्यायः ४॥ ॥श्रीअगस्त्यउ·अथप्रसन्नोभगवान्घृणातीर्त्तिहरोहरः उत्थाप्यसुंदरंप्राहकरुणाशिशिरंगिरम् १ शृणुसुंदर
मद्वाक्यंमारोदीर्माचितेभयम् नगिरामन्यथाभावोममनित्यगिरामिव २ अविवेककृतंकर्मपरिणामेमहद्भवेत् यथा
न्नविषसंसृष्टमज्ञानादुदरंगतम् ३ ब्रह्मादयोपिमुह्यंतिकामकल्मषदूषिताः संकल्पाद्बध्यतेजन्तुरसंकल्पाद्विमुच्य
से ४ तस्मात्यजंतिसंकल्पंमदेकशरणाजनाः ॥ संकल्पदासाःसर्वेपिसंकल्पेशोनकश्चन ५ हित्वामांचमदीयांश्च
मदनुग्रहभागिनः॥ महतीविश्वमायामेकामिनीकांचनात्मिका ६ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

कुमुपक्रमतेअथेति १ भीतंसमास्वाशयतिश्रृण्वितिनित्यगिरांवेदानामिव २ अज्ञानकृतकर्मणांपरिणामेदुःखहेतुत्वमाह अवि
वेकेतिअन्नंयथाअन्नमिव ३ संकल्पस्यैवबंधहेतुत्वंवर्णयति ब्रह्मादयोपीति ॥ संकल्पत्यागएवमुक्तिकारणमित्याह तस्मा
दिति ५ शिवस्यापिसर्वांतर्गतत्वमत्वातस्यापिबंधप्राप्तौ शिवंशिवभक्तांश्चवर्जयित्वाइतरेषामेवसंकल्पोबंधहेतुः इत्याह

हित्वेति अदैवीमायायादुस्तरत्वं भगवदुक्तानांचमायातरणसामर्थ्यमाह महतीति तमेवविदित्वातिमृत्युमेतीतिश्रुतेः मामेव येप्रपद्यंतेमायामेतांतरंतितेइतिस्मृतेश्च ६ कामहेतुमाह स्त्रीणामिति संगात्संजायतेकामइतिस्मृतेः ७ मुक्तिकारणमाह सतामिति संगःसत्सुविधीयतामितिभगवत्पादैः सत्संगस्यमुक्तिनिदानोपदिष्टत्वादितिभावःसंगस्यकामहेतुत्वेसुंदर

मामेवयेप्रपद्यंतेमुक्तास्तेमायया तया स्त्रीणांस्त्रीसंगिनांचैवसंगत्याकामवान्भवेत् ७ सतांसंगाद्संकल्पोमयिभक्त्याचमुच्यते प्रत्यक्षंदृष्टमेवैततत्तवसुंदरसांप्रतम् ८ यतोमत्सन्निधिंत्यक्त्वास्त्रीसमक्षंगतोभवान् अनर्थोयमभूत्तस्मादधःपातोयतोभवत् ९ एवमेवपुराविष्णुःसंकल्पेनमुहुर्मुहुः अवतीर्यभुवपश्चात्संकल्पजितवानथ १० स्मृतिभ्रंशोनभवितातवजातस्यभूतले भक्तिश्चमयिपूर्णास्तुस्तुहिपुण्यस्थलेषु च ११ तत्रोहाहेप्रहसेतेसोहमागत्यसुंदर स्वयंदासंविधायत्वांगमिष्यामिनसंशयः १२ यथात्वच्चिंतितंतत्रतथाकर्त्तास्मिसुंदररमापुरस्यनिकटेजन्ममद्भक्तितोस्तुते १३ भूषयिष्यतिवाणीत्वांप्राप्यसेपरमंयशः गच्छेत्यादिश्यभगवानंतःपुरमगाहत १४ सुंदरोपिविषादार्त्तोनमस्कृत्यमहेश्वरं कैलासादपतद्भूमौस्वर्लोकान्निरयेयथा १५ श्रीअगस्त्यउवाच जन्मादिचरितंतस्यसुंदरस्यमहात्मनः वक्ष्यामिवोमुनिश्रेष्ठाःश्रवणानंदकारकम् १६ ॥

मेवसाक्षादृष्टान्तयति प्रत्यक्षमिति ८ तत्रहेतुमाहयतइति उपसंहरतिअनर्थइति ९ स्वोक्तार्थेविष्णुंदृष्टान्तयति एवमिति १० सुंदरप्रार्थनामनुमनुतेस्मृतीति ११ विशेषानुग्रहमाह तत्रेत्यादित्रिभिः १२ १३ १४ तदुत्तरकालिकंसुंदरवृत्तमाहसुंदरइति १५ शापानुरूपंसुंदरस्यजन्मादिश्रावयितुं मुनीनगस्त्योऽभिमुखीकरोति जन्मादीति १६ ॥ ॥

श्री अगा.

कथांप्रस्तौतीति अस्तीति हरेसकाशादीशंत्यागेश्वराख्यं १७ सोमइति उमाचस्कन्दश्चताभ्यांसहितः १८ नेतिब्राह्मणावसथेब्राह्मणग
हे १९ तमेवविशिनष्टिवेदेति २० भार्येति २१ भार्येति भार्यापतीदंपतीकमलालयनायकं शिवंविष्णुर्योनिंकल्पयदितिश्रु तेः नारायणयो
रेक रूपताशिवस्यअर्द्धनारीश्वरात्मकत्वहरिहरात्मकत्वाभ्यांप्रतीयतेतदुक्तंनीलकंठदीक्षितैः यदेतद्धामाङ्गं घनजघनकेशस्तनभरं

अस्तिदक्षिणदिग्भागेश्रीपुराख्यमहाद्भुतं मुचुकुंदोहरेर्लब्धंयत्रेशंप्रत्यतिष्ठत १७ सोमास्कंदःस्वभक्तानांयत्रत्या
गेश्वराख्यया ख्यातोददातिसर्वार्थान्जन्मयत्रसुदुर्लभम् १८ नातिदूरेस्थलस्यास्यब्राह्मणावसथेक्वचित् द्वि=
जःशिवव्रतोनामकश्चिदस्तिशिवप्रियः १९ वेदागमपुराणानांपारदृग्वैकृतक्रतुः पितेवशिवभक्तानांभक्तस्या
गेश्वरप्रियः २० भार्यासीत्सुमतिर्नामतस्यश्रद्धानुसारिणी तयोरनुपमंतत्रगार्हस्थ्यंसद्विराद्दतम् २१ भार्यापत्य
नपत्योस्तौकमलालयनायकं प्रदक्षिणार्चानतिभिस्तोषयामासतुश्चिरम् २२ अनुजग्राहभगवान्दत्वापत्यंत
योर्हरः अथगर्भवतीतस्यभार्याभाग्यवतीसती २३ राजकृतसंस्काराप्रणिरुत्तेजितोयथा दशमेमासिसालग्ने
शुभग्रहनिरीक्षिते २४ असूतसुमतिःपुत्रंबालेन्दुमपरेवदिक् जातकर्माकरोत्तस्यमुदितःसशिवव्रतः २५॥
ब्राह्मणेभ्योददौवित्तं प्रभूतंब्राह्मणोत्तमः॥ द्वादशेदिवसेप्राप्ते संमंत्र्यसहभार्यया २६ कमलालयनाथाख्यं=
चक्रेगौरीपतेर्मुदे ॥ दृष्ट्वारूपंजनास्तस्य सर्वेसुन्दरमूचिरे २७ ॥ ७ ॥ ७ ॥ ७ ॥

कदाचित्तच्छंभोर्भवतिकमलाकोस्तुभधरमिति २२ अन्विति अथअनुग्रहानंतरं २३ राजेति कृतसंस्काराकृतोविरचितःसंस्कारोपुंसव
नाख्यःयस्याःदशमेमासीतिदशमेमासि सूतइतिश्रुतेः २४ असतेतिअपरापश्चिमादिक्बालेन्दुमिवेत्यनेनशिशोर्वर्धिष्णुत्वंद्योत्यते २५

२६ कमलेति गौरीपतेःशिवस्यमुदेनामैवपुत्रनामचकारेत्यर्थः २७

ततइति ततःनामकरणानंतरंकमलिन्यनिंदितयोःजन्मवर्णयतिअथेति २८ २९ दधाविति सकृदेवेत्यनेनशिवानुग्रहलब्धनिर्मलप्रज्ञ
त्वंदर्शितं ३० ३१ ३२ शिवव्रतइतिगायत्रीव्रतंउपनयनं ३३ ३४ सुंदरेति पित्रावारितइति राज्याधिकारस्यक्षत्रियाधीनत्वादिति

ततोऽयंववृधेबालःपूर्वपक्षइवोडुराट् अथवेदनिधेःपुत्रीकमलिन्यप्यनिंदिता २८ जातविप्रगुरोःपत्न्यां
सानित्यंवह्निमाययौ चूडाकर्मण्यथकृतेपूर्ववासनयास्वयम् २९ दधौमहेश्वरेभक्तिंसुंदरःसुरदुर्लभां सकृ
देवोपदेशेनलिपिभेदानबुध्यत ३० वीथीषुश्रवणादेवकलाःसर्वाविवेदसः सुंदरस्त्वेकदावीथ्यांबालकैस्तु
ल्यवार्षिकैः ३१ धूलिकेलिपरोराज्ञादृष्टोनीतश्चवैगृहं अनपत्यस्यराज्ञोभूदमुष्मिन्प्रीतिरुत्तमा ३२ शिव
व्रतःप्रियोराज्ञोगायत्रीव्रतमादिशत् वेदानध्यापयामाससांगानपिसहागमैः ३३ अधिगम्यचशास्त्राणिगुरु
भ्योदक्षिणामदात् युवराजोभवत्वेषइतिराजप्रचोदितः ३४ सुंदरोवारितःपित्रानह्विजानांविधिस्त्विति युव
राजसमंलेभेपदंविद्वद्विरावृतम् ३५ अथवेदनिधिःकन्यांसुंदरायमहात्मने प्रदातुभार्य्ययासार्द्धंविमृश्यस-
कुतूहली ३६ शिवव्रतानुमत्याचकल्याणोद्योगमातनोत् वैशाखोत्तरफाल्गुन्यामभूदुद्वाहनिश्चयः ३७ वः
धूवराजबंधूनांसमाजःसुमहानभूत् आययौजयभद्रोपिचतुरंगबलान्वितः ३८ उत्सर्जनंव्रतानांचविधिपूर्वक
मातनोत् स्नानकर्मविधिंचक्रेसुंदरोलोकसुंदरः ३९ भेरीमृदंगसुमुखशंखगोमुखकाहलान् वादयामासुरत्युच्चैः
वीणावेणून्जनाःपरे ४० राजवाहनमारुह्यसुंदरोब्राह्मणोत्तमैः कृताशीर्भार्ययासार्द्धंसर्वैर्वेदनिधेर्गृहम् ४१॥ ७ ॥

भावः ३५ अथेति अथयौवराज्यसमपदप्राप्त्यनंतरं ३६ शिवव्रतइति शिवव्रतस्यसुंदरपितुःअनुमत्याकल्याणोद्योगंविवाहयत्नं ३७

தூதுராஜஸ்ரீயபயனாலயாத்ய०

प्रत्युज्जगामपुत्रीभ्यांसहवेदनिधिर्वरं कृतोपचारस्तेनायंयथावत्समलंकृतः ४२ उद्वाहवेदिकामापकन्यालंकृतपार्श्वभूः निषसादासनेपश्चान्नवहेमपरिष्कृते ४३ ब्राह्मणैर्दीक्षितैर्वृद्धैःशिवभक्तैश्चभूषिता छत्रकेतुवितानाढ्यास्वर्णस्तंभपरिष्कृता ४४ सवयोभिर्वयस्यापिसर्वाभरणभूषितैः पतिव्रतासहस्रेणकिरतालाजजालकान् ४५ समग्राकन्यकाभिश्चगायंतीभिर्विभूषिता ज्योत्स्नाप्रदीपमालाभिरभियोतितदिङ्मुखा ४६ नानाविधमहावाद्यनादपूर्णनभस्थला शक्रेणेवमहीभाजाजयभद्रेणशोभिता ४७ दिव्यागरुवधूपेनसमंतादधिवासिता सासभारुरुचे तत्रसुधर्मेवभुवंगता ४८ सुंदरश्चसभामध्येवरवेषविभूषितः बध्वाचसहितोरेजेरमयाचयथाहरिः ४९ विद्यावयोरूपधनान्वयाद्यैःनसुंदरस्यास्तिसमःक्षितिव्यां आभ्यांवधूभ्यांसहितस्यदीर्घमस्त्वायुरस्येत्यवदन्द्विजेन्द्राः ५० इतिश्रीस्कंदोपपुराणेपंचमोऽध्यायः५॥ ॥श्रीअगस्त्यउवाचसौवर्णपालिकाकुंभलाजपुष्पसमित्कुशैः दूर्वाङ्कुरप्रवालैश्चहृषदाशोभितासभा १ अथांकुरार्पणंकृत्वाकृतकौतुकबन्धनः पुरोहितैर्गणाधीशंपूजयित्वामहाजनैः २ दत्तानुमतिरारेभेसुंदरोद्वाहमंगलं प्रस्तुतोद्वाहसंकल्पेसुंदरेथसभांतरे ३ अदृश्यतमहावृद्धस्तत्रकश्चिज्जराधिकः वेणुदंडमवष्टभ्यस्खलद्भिःपदेपदे ४ विभ्रत्भ्रूपक्ष्मरोमाणिपलितेनसितानिच कुंडलालंकृतःप्रांशुश्च॥

सुंदरवृत्तांतवर्णनोनामपंचमोऽध्यायः ५॥ ॥❀॥ पुनःसभांवर्णयति सौवर्णेति १ अथेति सभाप्रवेशानंतरंकृतंकौतुकबन्धनं कंकणबंधनंयेन २३ पूर्वंदत्तवरस्यशिवस्यसभाप्रवेशंसार्द्धत्रयेण वर्णयति अदृश्यते त्यादिना ४ ५

ह समालोक्येति तमितिशेषः ७ ८ ददाविति सहस्ततालंकरतालिकासहितं ९ १० सर्वथेति शिवोवाशिवभक्तोवासर्वप्रकारेणपूज्यएवेतिभावः ११ १२ द्विजरूपधारीशिवः शिवव्रतंप्रत्याह कमलानगरेइति त्वामहंजानामिसर्वज्ञत्वादितिभावः त्वमस्मान्कदाचन नवे

भसितैरनुलिप्तांगोरुद्राक्षस्रग्विभूषितः विगलद्बुद्बुदवसनोनिःशेषंगलितद्विजः ६ शिराभिर्दतुरग्रीवःश्रीकंठपदलांछनः समालोक्यसभामध्येसमवेतामहीसुराः ७ केचिदुत्थायदत्वार्घ्यंप्रणेमुस्तस्यपादयोः हस्तालंबनमन्येतुभक्त्याप्रददुरादरात् ८ ददौवेदनिधिश्चापिपुरस्तादासनंमहत् सहस्ततालमहसन्संघीभूयचबालकाः ९ सुंदरस्तुतमालोक्यभस्मरुद्राक्षधारिणं शैलादिसदृशःकश्चिद्रुक्तोवाशिवएववा १० सर्वथापूज्यएवायमित्यमन्यतमानसे अथोपविष्टंवटुमिदमाहशिवव्रतः ११ महाब्राह्मणकोसित्वंकुतःकिंनामतावकं त्वद्दर्शनात्कृतार्थास्मोवयमातिथ्यमत्रते १२ श्रीद्विजउवाच कमलानगरेनित्यंवासोमेहेशिवव्रत जानामित्वामहंनित्यमस्मान्चेत्सिकदाचन १३ आस्तांतावत्समंगोयंसमाजःकोत्रकर्मकिं संघीभूतास्त्रियोबालावाद्यानामत्रकोध्वनिः १४ श्रीशिवव्रतउवाच कमलालयनाथाख्यःसुंदरोयंजनैःकृतः परगःसर्वविद्यानांप्रासोमत्तपसासुतः १५ प्रस्तुतोत्रः विवाहोस्यआशीर्वादात्समृध्यतां शिवव्रतंनिवार्यैवंवदंतंवटुसत्तमः १६ शिथिलाक्षरयावाचानिजगादसभासदः श्रूयतामुच्यतेकिंचित्समवेत्तामहाजनाः १७ ब्रूतावधार्य्यसर्वेपिसत्यमेवास्तुमामृषा दासमेनंक्रयक्रीतंसुदंमेशिवव्रतः १८ प्रलोभयित्वामूढात्मापुत्रीकृत्यबलादिह वृद्धंश्चगणयित्वामांविवाहमपिकारयत् १९ ॥

प्रस्तुतइति त्रयोविवाहः आशीर्वादात् समृध्यतांवर्धतां १६ १७ १८ १९

सिकिंचित्तत्त्वात् शिवतत्वस्यदुर्ज्ञेयत्वादितिभावः १३ अजानन्निवप्रच्छति आस्तामिति १५ शिवव्रतस्योत्तरमाह कमलालयेति १५

२० २१ २२ २३ शिववचनंश्रुत्वासभासदोविस्मयोऽभूदित्याह एवमिति २४ जानेति व्यवहारेषुउचिताचारपरिज्ञानेषु विशेषेण चस्त
तइतिविचक्षणाःजयभद्रेणराज्ञा २५ वृद्धइतिसमर्थइवइवशब्दश्लीकवाची वस्तुतोनसमर्थइतिभावःशास्त्रार्थेषुधर्मशास्त्रार्थेषु २६ अथ

स्वपुत्रत्वंस्थिरीकर्त्तुंयततेसत्यमुच्यते श्रियामेनकुबेरोपिसदृशोन्यस्तुकिंपुनः २० सोहमस्यापिदास
स्यविधेयंसकलंजगत् एतत्कारयितालोकेयदिच्छामेभविष्यति २१ कोदिशःसंतिमेदासाःदिशामंतेषु
भुज्यते श्रियंयथोचितंदत्तामयमप्यस्तुतादृशः २२ दाससुंदररेकिंत्वंमांहित्वास्यगृहंगतः उत्तिष्ठ
याहिगच्छावोयदिष्टंतद्दामिते २३ श्रीअगस्त्यउवाच एवंवदतिवृद्धेस्मिन्संभ्रांतासासभाभव
त् वधूवरासबन्धूनामासीन्मनसिविस्मयः २४ जनकोलाहलस्यांतेव्यवहारविचक्षणाः विद्वांसोदिक्षु
विख्याताजयभद्रेणचोदिताः २५ श्रीब्राह्मणाऊचुः वृद्धोसिव्यवहारेषुसमर्थइवजल्पसि शास्त्रार्थेषुनहिका
पिदृष्टोविक्रेतुमर्हति २६ अथश्रमेणवाभ्रांत्यावृद्धभावेनवोदितं वचस्तवेदंक्षांतंचत्सीमेहिप्रभुःपरः २७
जयभद्रोमहाराजःसुंदरेक्षांतिरुत्तमा गुरुर्यःसर्वविद्यासुरुष्टस्त्वांनैवकुप्यति २८ श्रीवृद्धउ-नकामोनास्तिको
पोवादासानांममविद्यते इदमेवहिविख्यातमस्मद्दास्यैकलक्षणम २९ श्रीशिवव्रतउ-किंभ्रांतस्यचतद्वाक्यमि
दंक्षांतंमयाद्विजाःविवास्यैनंबहिर्लिंगनेकर्मारब्धंप्रवर्त्यताम ३० श्रीवृद्धउ-अराजकोयंकिंदेशःसंतःसंतिनवापुरे

तिप्रभुःपरःउत्कृष्टःपुनरप्येवंकथनेत्वांदंडयिष्यतीतिभावः २७ जयभद्रेतिक्षान्तिस्तत्तमाक्षमैवकर्त्तुमुचितेत्यर्थः यतःराजासर्वविद्या
सुगुरुःअतःनकुप्यतीतिसंबन्धः २८ नेतिइदमेवकामक्रोधाद्यभावाद्व २९ द्विजान्प्रतिशिवव्रतस्यवचनमाह किमिति इदंअसंग

तत्वचनंपुनर्वृद्धविवास्यदूरीकृत्य ३० अराजकेतिअयंदेशः
अराजकःराजरहितः किंसन्तोवानसंति ३१

एवंसभ्यानुक्त्वावृद्धब्राह्मणरूपीशिवः सुंदरंप्रत्याह वदेति उदीरितंपूर्वमुक्तं ३२ असंगतमिति सत्यवत् सत्येनतुल्यंवयंशंभोर्दा
साः नवृद्धब्राह्मणस्य तवेतिभावः ३३ हरेति तस्यहरदासस्यदासायते दासइवआचरति दासंनिजदासंसःशिवस्यद्रोहीत्यर्थः ३४ स
हेयमितित्वदागः तवापराधं आगोपराधोमन्तुश्चेत्यमरः भस्मेतिशिवचिन्हधारणात् त्वांनमामीत्यर्थः ३५ एवंपरुषवादिनः सुंदरंशिवो

वदसुंदरसत्यंत्वंचरधर्ममुदीरितं किंनदासोसिमेब्रूहिसर्वेषामिहसन्निधौ ३२ श्रीसुंदरउवाच असंगतंभ
वानाहसत्यवद्ब्राह्मणोत्तम शंभोर्दासावयंतुस्मः कमलालयवासिनः ३३ श्रीसुंदरउवाच हरदासोनान्यः
दासःतस्यदासायतेजगत् हरस्यदासंयोब्रूतेदासंद्रोहीशिवस्यसः ३४ सहेयंचत्वदागोहंशंकरोनसहिष्यते
भस्मरुद्राक्षभासंत्वांनमाम्यद्यानुगृह्यताम् ३५ श्रीवृद्धउवाच किमेवंसुंदरब्रूषेकिंतेन्यूनंमदन्तिके पुत्राभ्या
मविशेषंत्वामहंपश्यामिसुंदर ३६ श्रीसुंदरउवाच नाहंत्वामभिजानामिनास्मिन्जन्मनिसंगतिः महान्तोपिय
दिब्रूयुरनृतंकोनिवारकः ३७ श्रीवृद्धउवाच जनाःशृणुतुमेहस्तेपत्रमस्तिससाक्षिकं स्वहस्तलिखितंत्वस्यक्रि
यतेनिन्हवःकथम् ३८ ब्राह्मणाऊचुः पत्रंदर्शयभोवृद्धयत्रानेनकृतांलिपिः युवयोव्यवहारेचयःसाक्षीसो
पिवार्ण्यताम् ३९ श्रीवृद्धउ॰ सतीनामुत्तमादेवीकमलालयनायिका क्रयक्रीतोयदामेत्वंतदासाक्ष्येव्यवस्थिता ४०

वदति किमेवमिति मदन्तिकेममसमीपेपुत्राभ्यांस्कंदगणेशाभ्यांअविशेषंतुल्यमित्यर्थः ३६ नाहमिति महान्तोपिभवादृशाइत्यर्थः ३७
सभासदःसंबोध्यशिवोवदतिजनाइति निन्हवः अपलापः अपलापस्तुनिन्हवइत्यमरः ३८ पत्रमिति यत्रयस्मिन्पत्रे अनेनसुंदरेण
लिपिः अक्षरविन्यासः लिखिताक्षरविन्यासेलिपिर्लिवि रुभे स्त्रियामित्यमरः ३९ सतीनामिति कमलालयस्यस्थानविशेषस्यसाक्षे

शास्त्रानुसारेणस्त्रीसाक्ष्यस्यअप्रामाण्यमाशंक्यप्रकारांतरेणसमर्थयतेस्त्रीसाक्ष्यमितिपुत्रौस्कन्दगणेशौ ४१ इतीतिस्पष्टं ४२ वृद्धमितिगव्यू
तिद्वयसंमितंकोशचतुयपरिमितंगव्यूतिस्त्रीकोशयुगमित्यमरः ४३ ४४ ४५ तस्थाविति साश्चर्यंअपूर्वस्थानदर्शनेनसविस्मयंयथातथा अथानतरं
४६ आरूढइति सुरर्षिभिः नारदादिभिः नारदाद्याःसुरर्षयइत्यमरः ४७ स्थितमिति सार्द्धश्लोकएकान्वयीगिरेः कन्यकायैगौर्यै ४८

स्त्रीसाक्ष्यंनप्रमाणंचेत्पुत्रौ तस्याश्चसाक्षिणौ आगच्छतत्रतांपृच्छपश्यतत्रैवपत्रिकाम् ४१ श्रीअगस्त्यउ॰ इत्या
हूतोभगवतावृद्धवेषेणशंभुना भ्रांतश्चिरमसीत्युक्त्वासहसोत्थायसुंदरः ४२ वृद्धमग्रेविनिर्गत्यगच्छंतंपृष्ठतोन्व
गात् सुंदरानुगतोवृद्धोगव्यूतिद्वयसंमितम् ४३ पन्थानंसमतिक्रम्यकमलानगरांतरे आलयंप्रविवेशान्तर्मणिः
गोपुरमंडितम् ४४ कोत्रसाक्षीवदाद्यत्वंवृद्धदर्शयपत्रिकां इत्यनादृत्यनिःशंकमालयद्वारिसुंदरः ४५ तस्थौमु
हूर्त्तंसाश्चर्यंवृद्धनिर्गमनाशया अथाविरासीदुमयासहसर्वगणैर्वृतः ४६ आरूढोवृषभंदिव्यंस्कन्दविघ्नेश्वरा
न्वितः द्वारदेशमनुप्राप्यस्तूयमानःसुरर्षिभिः ४७ स्थितंसुंदरमालोक्यस्मयमानमुखाम्बुजः सुंदरोममदासोयमिति
सन्दर्शयन्गिरेः ४८ कन्यकायैकटाक्षेणपुनःप्रोवाचसुंदरम् ४९ इतिश्रीस्कन्दोपपुराणेषष्ठोऽध्यायः ६॥ छ ॥
श्रीशिवउवाच ॥रेरेसुन्दरयत्प्रोक्तंपशूनांसन्निधौत्वया॥ नाहंदासस्तवेत्येतत्साध्यतांकिंविलम्बसे १
जननीजगतामेषागौरीत्वद्दास्यसाक्षिणी॥ इमावपितथाभूतौ गजवक्त्रषडाननौ २॥ २ ॥ २ ॥

४९ इतिश्रीमानवल्ल्युपनामकनृसिंहविरचितायांस्कन्दोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांषष्ठोऽध्यायः ६॥ ॥छ॥ ॥
सुंदरंसंबोध्याहरेरेइति नीचसंबोधनेतुरेइत्यमरः द्रोहाचरणात्नीचत्वंपशूनांजडानां १ जननीति तथाभूतौसाक्षिणौ २॥ छ ॥

वृषभेति उमाचस्कन्दश्चगणेशश्चतैःसहितं ३ ४ गणेति विलक्षहृदयःविस्मयान्वितचित्तः विलक्षोविस्मयान्वितइत्यमरः ५ पुनरि
त्यर्द्धंएकान्वयिस्तुतिप्रकारमाह आहूयेति मिथ्यात्मसु असत्यचित्तेषु अभिरतं आसक्तं अतएवमृषागिरं असत्यवचसं इमंजनंमा
मित्यर्थः अज्ञातइतियतोवाचोनिवर्त्तन्तइतिश्रुतेः ६ यस्येति तदैक्षतबहुस्यांप्रजायेयेतिश्रुतेः ७ महदिति सार्द्धमेकान्वयि मह

श्रीसुन्दरउ॰ वृषभारूढमालोक्यसोमास्कन्दगणेश्वरं दधानंदक्षिणकरेमहतींदास्यपत्रिकाम् ३ विष्णुब्रह्मेन्द्रचन्द्रार्कयमा
ग्निवरुणाशुगैः सिद्धचारणगन्धर्वैस्तूयमानपदाम्बुजम् ४ गणाग्रणीसमाघातभेरिकाहलिकास्तुतम् विलक्ष्यहृदयोभूत्वा
निमील्यनयनेक्षणम् ५ पुनरुन्मील्यतुष्टावशंकरंसुंदरोनमन् श्रीसुन्दरउ॰ आहूयस्वयमादरेणभगवन्त्वंसर्वलोका
नतो मिथ्यात्माभिरतंमृषागिरमिमंवेधोहरीन्द्रादिभिः अज्ञातोमनसाचनित्यवचसादासंवितेनेजनंतस्मैभक्तजनप्रियाय
महतेदेवायतस्मैनमः ६ यस्यावलोकनादस्यमायाभूत्सृष्टिसाधनं नमस्तस्मैमहेशायदेवदेवायतेनमः ७ महद्वैषम्यमुत्पन्नं
माययायस्यशक्तितः अहंकारस्तथाजज्ञेमहतोयत्प्रभावतः ८ नमस्तस्मैमहेशायदेवदेवायतेनमः अनामरूपसंसृष्टःकदाचिद
पियःशिवः ९ नमस्तस्मैमहेशायदेवदेवायतेनमः भूतेन्द्रियमनःसृष्टिस्ततोयत्प्रेरितादभूत् १० येनपंचीकृतान्यासन्असंबन्ध
वतामपि अनुप्रविश्ययस्तानिविराड्रूपंविभर्त्तिच नमस्तस्मैमहेशायदेवदेवायतेनमः ११ ॥ ॥

द्वैषम्यंसत्वादिगुणतारतम्यप्रयुक्तंवैचित्र्यं महत्तत्वमित्यर्थः महतः अहंकारोजज्ञे ८ अनामेति नामरूपाभ्यां असंसृष्टमि
त्यर्थः तयोर्मायारूपत्वादितिभावः ९ भूतेति यत्प्रेरितात् येनशिवेन प्रेरितात् ततः अहंकारात् १० येनेति असंबंधवताम
पिपरस्परं असंसृष्टानामपितेषांभूतादीनां मध्ये पृथिव्यादीनीति अध्याहारः पंचीकृतानिस्वकीयार्द्धांशमेलनेन तानिअनुप्र

विश्यतत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः विराड्रूपं
सर्वभूतसमष्टिरूपं सार्द्धमेकान्वयि ११

३१ ३२ प्रकृतंप्रार्थयतेत्वदिति तवदास्यंदासकृत्यमेवभाग्यं ३३ शिवस्योत्तरमाह स्तुतिरिति ३४ शिवस्तुतेः दुष्करत्वमाशंक्य सुन्दरःपुनः प्रार्थयते चत्वारइति ३५ मनइति यतोवाचोनिवर्त्तन्तेइतिश्रुतेः ३६ ३७ तवेति अमूर्त्तस्य अशरीरस्य ३८ सर्वथेति सीकरेणजलकणेनमहाम्बोधेःमहासमुद्रस्यमहिमाकथंवर्ण्यतेइत्यन्वयः ३९ इमामिति मयाउपदिश्यमानामित्यर्थः पंचपातकानिस्वर्णस्तेयादीनि

मयिप्रसन्नेनपुनःशोकमभ्येतिकश्चन स्तुत्यात्वत्कृतयायेमांस्तुवंत्यहरहर्नराः ३१ नतेषांदुरितंकिंचिद्भवितेति मतिर्मम कृतःप्रसादोमहतादेवेनेत्यथसुन्दरः ३२ उत्थितोंजलिमाधायभगवंतंव्यजिज्ञपत् श्रीसुन्दरउवाच त्वद्दास्यभाग्यंमेलब्धंदुर्लभंयोगिनामपि ३३ कृत्यंदासस्यमेकिंचिद्विनिर्देष्टुंत्वमर्हसि श्रीशिवउ॰ स्तुतिर्मम= त्वयाकार्य्यासदासुन्दरसर्वतः ३४ इदंमत्प्रीतयेकृत्यंनित्यंयद्विहितंतव श्रीसुन्दरउ॰ चत्वारोनविदुर्वेदास्तथादेवादयो पियं ३५ मनोनिवर्त्ततेयस्मादविज्ञातंमहेश्वर स्तौमितंत्वांकथंबालःग्राम्यालापार्थयागिरा ३६ कीदृशीतेस्तुतिस्त स्याःकिमादिर्म्मध्यमुच्यते अवसानंचकिंरूपंनजानेकिंचिदप्यहम् ३७ तवामूर्त्तस्यपूर्णस्यनामरूपनिरूपणेवाचाप राधोभवितानहितस्यास्तिनिष्कृतिः ३८ सर्व्वथासापराधंमांकरुणाकरपालय शीकरेणमहांभोधेर्महिमावर्ण्यतेकथम् ३९ श्रीशिवउ॰ इमांपंचाक्षरींविद्यांपंचपातकनाशिनींगृहाणमयिभक्तोसितस्मादेनांददामिते ४० भ्रांतेतिसदसिप्रोक्तंत्वयामांप्र तिसुंन्दर तदादायपदंपूर्वंस्तुहिवागस्त्वनर्गला ४१ भुवंप्रदक्षिणीकुर्वन्यत्रमेस्थानमुत्तमं यत्रलिंगाकृतिर्वाग्भिःस्तुहिं

नाशयति तच्छीलांताच्छील्येणिनिः ४० स्तुतेरादिमध्यान्तान् नजानामीतियदुक्तंतत्रस्वापराधपूर्वकंस्तोत्रारंभमुपदिशति भ्रान्तेति वाक्अनर्गलाअस्त्वित्याशीः ४१ भुवमिति यत्रस्थानेलिंगाकृतिःलिंगमूर्त्तिरहंतिष्ठामिस्तुतिकृतांप्रियंतंमांस्तुहीत्यन्वयः ४२

तत्रेति पंचाक्षरीविद्याज्ञानरूपां ४३ ४४ प्रोवाहेति तस्यसुन्दरस्यवाचांलहरीं अमृतधुनीयथासुधातरङ्गिणीवप्रोवाहप्रबहतिस्म ४५ भूय इति पुनःतमेवशिवंभ्रान्तइत्यादिस्तुतिप्रारंभः ४६ ४७ भवानीति हंसकोटिप्रतीकाशंसूर्य्यकोटिसदृशं हंसविज्ञानंपरमात्मज्ञानंमस्तकेयस्यतं भानुर्हंससहस्रांशुरित्यमरः हंसहंसेतियोब्रूयाद्धंसोनामसदाशिवः इतिशिवसंकल्पस्यश्रुतेः ४८ हंसैरिति हंसैः

तत्रतत्रभविष्यामि प्रसन्नःसन्निधायते इतिपंचाक्षरींविद्यांउपदिश्यमहेश्वरः ४३ ब्रह्मादिभिरविज्ञातांशैवीं विद्यांव्यतीतरत् शब्दब्रह्ममयीदेवीतज्जिह्वायांननर्त्तह ४४ प्रोवाहवाचांलहरीतस्यामृतधुनीयथा वाग्विभूतिंससंप्राप्यसुन्दरःपरमेश्वरात् ४५ भूयस्तमेवतुष्टावसुन्दरःश्रीपुरेश्वरं भ्रांतःप्रपंचविज्ञानात्विमलेन्दुकलाधरम् ४६ महान्तंदेवमीशानंमहेश्वरमहंभजे भक्ताभयंकरंभर्गभक्तिमात्रेणसत्कृतम् ४७ भवानीसहितं देवंभावयामिसदाशिवं हंसकोटिप्रतीकाशंहंसविज्ञानमस्तकम् ४८ हंसैश्चपरमंसेव्यंहंसन्त्यमुपास्महे दुःपूरकामशमनंसत्सृजितपदांबुजम् ४९ कर्पूरालेपकह्लार स्रग्भूषणमहंभजे मुचुकुन्दमहीपालमुख्यभक्त्युररीकृतम् ५० मुक्तिप्रदंमुमुक्षूणांमुग्धेन्दुमुकुटंभजे पुराभक्तिपरीक्षायेश्रीमच्चोलमहीपतेः ५१ ॥ ७ ॥

परमहंसैःसेव्यंहंसन्त्यंहंसस्येवन्त्यंयस्यतं दुःपुरःदुःखेनपूरयितुंशक्यःयःकामःतस्यशमनं जहिशत्रुंमहाबाहोकामरूपंदुरासदमितिस्मृतेःसद्भिःपूजितंपदांबुजंयस्यतं ४९ ५० पुरेति पूर्वचोलराजस्यभक्तिपरीक्षायैस्वयंधेनुरूपःशिवः स्ववत्सराजकुमाररथचक्रेपातयित्वातस्मिन्मृतेतदविज्ञायराजनि स्वपुत्रंतथैवरथचक्राधःपातयित्वामारयतिस्मभक्त्याप्रसन्नःशिवः तदा वत्सराजपुत्रंच दृष्ट्वाजीवयित्वा विधिविदंकाख्यांलेभे इतिशिवपुराणकथांसंक्षिप्य सार्द्धचतुष्टयेनाह ५१

५२ ५३ ५४ ५५ एवमित्यादित्रिभिःसुन्दरस्याभ्युदयपूर्वकंकृत्यान्तरमाह५६ ५७ ५८ एतदध्यायस्यफलस्तुतिमाह्यइति ५९ इतिमा
नवत्युपनामकनृसिंहविरचितायांस्कन्दोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांससप्तमोऽध्यायः ७॥ ॥ ७ ॥ अथविवाह

कृतांतंनर्तकीकृत्यधेनुरूपःस्वयंभवान् अध्वभ्रमणवेगेनतत्पुत्ररथवर्त्मनि ५२चक्रनेमिहतेवत्सेघंटांगोभृंगता
डितां विज्ञायमंत्रिभिःसार्द्धंसभाभाजिमहीपतौ ५३ समंत्रिबोधनात्पुत्ररथचक्रबलिंनिजं कुर्वत्युज्जीवयन्
वत्संसत्कुमारंचयोदृशा ५४ समुत्थाप्यनृपायादात्सौभाग्यंभक्तिसंयुतं तंत्वांविधिविदख्यातंशरणंयामिः
शाश्वतम् ५५ एवंत्यागेश्वरंतत्रवाग्भिःस्तुवतिसुन्दरे देवावववर्षुःपुष्पाणिव्यनदद्देवदुंदुभिः ५६ तत्रत्या
ब्राह्मणाःसर्वेश्लाघन्तेस्माथसुन्दरं तमनुज्ञाप्यदेवेशःसहभूतैस्तिरोदधे ५७ सुन्दरोलब्धवाग्भूतिःसार्व
भौमैश्चपूजितः दिव्येषुशंभुस्थानेषुस्तोतुंसमुपचक्रमे ५८ यःपठेदिदमध्यायंश्रृणुयाद्वापिमानवः मूकस्या
पिभवेत्तस्यवाग्विभूतिरनुत्तमा ५९ इतिश्रीस्कन्दोपपुराणेससप्तमोऽध्यायः ७॥ ॥ ८ श्रीअगस्त्यउवाच॥
॥ प्राप्तुंतमेवभर्तारंसुन्दरंसर्वसुन्दरं कन्यावेदनिधेःशंभुमाराधतपस्विनी १ अथायंसुन्दरोद्रष्टुंचिदम्ब
रमहानटं प्रस्थितःसरितःपुण्याःसमुत्तीर्य्यमहामतिः २ उपास्यपश्चिमांसंध्यांअगात्सिद्धवटस्थलं तत्रैकापर्ण
शालाभून्मुनीनांनगराद्बहिः३ संविवेशसतांप्राप्यमार्गश्रांतोमुनीश्वरः अथतस्यशयानस्यनिशिकश्चनमूर्द्धनि ५

मध्यान्निर्गतंतमेवसुंदरं पतित्वेनलब्धुं कन्यायाःतपश्चर्यामाह प्राप्तुमिति १ अथेतिचिदम्बरमहानटंचिदम्बरेश्वरम् महाका=
लोमहानट इत्यमरः २ ३ संविवेशेति सुषापेत्यर्थः स्वप्नस्संवेशइत्यपीत्यमरः ५

५ ६ तमिति आप्रभातं प्रातःकालपर्यंतं इदं वक्ष्यमाणं यद्वा इदं साध्यमित्येकं पदं अस्यां संध्यायां भवं कर्म्म पुरा वामनेनार्चितमिति पुराणकथानुसारेण ७ तुष्टावेति त्रिगव्यू तिमिदं षट्क्रोशप्रमाणं ८ पुंडरीकेति महारजतसोपानैः कांचनारोहणैः महारजत

प्रहरन्वामपादेन ददृशेद्भुतपूरुषः सुन्दरः कोयमित्युक्त्वा विनिद्रः पश्यति स्म तम् ५ त्रिलोचनं नीलकण्ठं वैय्याघ्रं चर्म्म विभ्रतं संभ्रान्तस्तत्क्षणं भक्त्या बाष्पपूरितलोचनः ६ तमाप्रभातमस्तौषीदिदं सांध्यं समाप्य सः स्थानं शांकरमासाद्य वामनेन पुरार्चितम् ७ तुष्टाव गिरिशं तत्र तत्प्रसादादवाप्तवान् त्रिगव्यूतिमितं मार्गं समतीत्याथ सुंदरः ८ पुंडरीकपुरं दिव्यं ददर्शेन्द्रपुरोपमं महारजतसोपानै र्महानीलवितर्द्दिभिः ९ महाद्रिशिखराकारै र्मणिस्तंभविराजितैः प्रासादैरभ्रपथगैः वृषभांकितकेतनैः १० अलंकृताभिर्वीथीभिरचिंत्याभिर्विभूषितं वीणावेणुमृदंगोत्थध्वनिपूरितदिङ्मुखम् ११ ललनारत्नकोटीभिरप्सरोभिरिवोज्वलं सालमंदारसन्तानहिंतालक्रमुकासनैः १२ कदलीनारिकेलैश्च निविडोपवनान्तरम् वापीशतैः स्फुरत्पद्मकल्हारकुमुदोत्पलैः १३ स्वादुनिर्मलपानीयैः समन्तादभिशोभितं रथमातंगतुरगैः पदातिभिरलंकृतम् १४ सहस्रत्रयसंख्यातैः महार्हशयनोत्तमैः शैवदीक्षाविधिज्ञानामालयैरुपशोभितम् १५ हविराज्यपुरोडाशपुण्यगंधिभिरुत्थितैः अग्निहोत्राग्निधूमैश्च ब्रह्मस्थानेषु पावनम् १६ मुखरं ब्रह्मघोषेण वर्णधर्मैश्च सेवितं चिदंबरपुरं प्राप्य सुन्दरस्तुष्टमानसः १७॥ ७ ॥

कांचने आरोहणं स्यात्सोपानमित्यमरः महानीलानां मणीनां वितर्द्दिभिः वेदिकाभिः स्याद्वितर्द्दिस्तु वेदिका सोपानैरित्यादि तृतीयान्तानां विभूषितमित्यग्रिमेणान्वयः ९ १० वीणेत्यादि द्वितीयान्तानां चिदम्बरपुरमिति सप्तदशस्थेन विशेष्येणान्वयः ११ १२ १३ १४ १५

अभ्युत्थाय अभ्युत्थानं कृत्वा सभ्यैरर्चितइत्यन्वयः ऊर्ध्वप्राणाद्युत्क्रामन्ति॥ यूनः स्थविर आगते प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते इतिस्मृतेः १८ १९ २० सभ्यान् वर्णयति पतंजलिमिति द्वाभ्यां शैलादिः शिलादपुत्रो नंदी तस्य संमतान् इष्टान् २१ २२ २३ पंचाक्षरेति मायैव यवनिका तिरस्करिणी तस्याः अंतस्थं सभापतिं ववन्दे २४ २५ षड्भिः सभापतिं स्तौति स ते नमः इत्यादिना अरूपिणे इ

अभ्युत्थायार्चितः सभ्यैः प्रविवेश शिवालयं शिवगंगांभसि स्नात्वा भस्मरुद्राक्षभूषितः १८ उपहारं प्रदायाथ प्रययौ कांचनीं सभां सूर्य्यकोटिप्रतीकाशां रत्नस्तंभविराजिताम् १९ देवर्षिगणसंसेव्यां दर्शनान्मुक्तिदायिनीं ददर्श तत्र परितः भक्तेषु प्रथितानपि २० पतंजलिं व्याघ्रपादमगस्त्यं मुनिपुंगवं नारदं तुंबुरुं कण्वं भार्गवं मुनिपुंगवम् २१ इन्द्रादीनपि दिक्पालान् गणान् शैलादिसम्मतान् पुररक्षां प्रकुर्वाणं विष्णुं च कमलासनम् २२ द्वारे गणेशमभ्यर्च्य नत्वा स्तुत्वा तथा गुहं समनुज्ञाप्य नंद्यादीन् सभाभ्यंतरमाविशत् २३ पंचाक्षरमये पीठे पार्वत्या सह भासुरम् मायायवनिकांतस्थं सववंदे सभापतिम् २४ शतरुद्रीयमंत्रैश्च नमस्कृत्य नटेश्वरं सुंदरः सूक्तिभिर्देवं स्तोतुं समुपचक्रमे २५ श्रीसुन्दर उवाच स ते नमश्चिते नमः सदामुदात्मने नमः सतश्च साक्षिणे नमः सभाधिपाय ते नमः अरूपिणे च रूपिणे निरूपणातिगायते कपालिने कपालिने कपर्दिने नमो नमः २६ नमो हराय जान्हवीधराय चन्द्रमौलये त्रिलोचनाय ते नमस्त्रयीमयाय शंभवे अरालकालकूटनीलकंठनालकांतये कपालमालिने नमः करीन्द्रचर्मधारिणे २७ ॥ ॥

ति कपालिने अकपालिने इति छेदः अश्च कश्च अकौ विष्णुब्रह्माणौ तौ पालयति तच्छीलाय कपर्दिने इति कं गंगाजलं पिबतीति कपः स चासौ ऋधं ऋद्धिं ददातीति ऋद्धः तादृशः कपर्दो स्यास्तीति कपर्दी भगीरथप्रार्थनया गंगावतरणसमये शिवजटाभारोपतिता गंगा तृणाग्रबिन्दुदशां

लेभइति जटैकदेशस्य चतुर्दशभुवनतोलनेपि जटैकदेश एवगुरुरभूदिति चपौराणिकी कथात्रानुसंधेया २६ २७

२८२९पुंडरीकेतिपुंडरीकानां सितांभोजानांस्रक्मालायस्यतंपुंडरीकासनेनब्रह्मणाअर्चितंपुंडरीकाजिनधरंव्याघ्रचर्मधारिणंपुंडरीकाक्षस्यवि
ष्णोः नायकंनौमीत्यन्वयः व्याघ्रेपिपुंडरीकेनेत्यमरः ३० पुण्डरीकेतिपुण्डरीकोद्वितीयदिग्गजःतेनाराध्यंऐरावतःपुण्डरीकइत्यमरः ३१ एकेन=

नमःशिवायशंभवेनमस्त्रिशूलधारिणेमनोजगर्वहारिणेमहोक्षकेतवेनमः दिगंबरायतेनमश्चिदम्बुराशयेनमःस्वयंभु
वेसहानमश्चिदम्वरायतेनमः २८ नमःसुवर्णसंसदेनमःसभेश्वरायतेनमोस्तुभूतसंसदेनमोगणाययोगिनां नमोगि
रीन्द्रजापतेनमोहिरण्यबाहवेनमोस्तुचेतसस्पतेनमोनमःशिवायते २९ पुंडरीकस्तजन्मौमिपुंडरीकासनार्चितं पुंडरी
काजिनधरंपुंडरीकाक्षनायकम् ३० पुंडरीकगजाराध्यंपुंडरीकमुनिस्तुतं पुंडरीकपुरीनाथंपुरारिंप्रणमाम्यहम् ३१ महादे
वमहान्तंतमहादंबरसाक्षिणीं महादेवतनुंवामांशिवकामामहंभजे ३२ श्रीअगस्त्यउ॰वाग्जन्मसफलीकुर्वन्येवंस्तोत्रेणसुं
दरेशविश्यश्रीपुरंभूयःस्तुहितत्रैवमन्वहं ३३ विनाव्योम्निशरीरेणवाणीकापिव्यजृंभत तवस्तोत्रेणतुष्टोऽस्मिसूक्तिसुन्दर=
सुन्दर ३४ इत्युदीर्य्यनभोवाण्यांविरतायांहिरण्मयी दिवःशिवान्नयावृष्टिरभूत्सुन्दरमूर्द्धनि ३५ देवाश्चविस्मयंजग्मुःकिंपु
नर्भुविमानवाःपादेप्रणेमुस्तत्रत्याःसुन्दरंमेनिरेहरम् ३६ अचिन्त्यशक्तेर्देवस्यज्ञात्वासंकल्पवैभवं अहंकारान्धकारा
न्तःप्रविवेशनसुन्दरः ३७ महाप्रसादोदेवस्यकथमेवंविधेमयि इतिचिन्तापरःशंभोःभूयसीभक्तिमादधे ३८ सभांनत्वा
नदेशस्यव्याघ्रपादमुखान्मुनीन्नंद्यादिगणनाथांश्चशिवभक्तान्महीयसः ३९ अभ्यनुज्ञाप्यगौरींचचित्सभाधिपतिंप्रभुं

पार्वतींस्तौतिमहादेवेति ३२ अनन्तरवृत्तमाह वाग्जन्मेति श्रीपुरंकमलानगरं ३३ विनेति वाणीआकाशवाणी ३४ इतीति हिरण्मयी सुवर्णप्र
चुरा ३५ ३६ अचिन्त्येति अहंकारएवअन्धकारःतस्मान्तःनप्रविवेशेत्यन्वयः ३७ ३८ ३९ ४०॥ ॥ ॥ ॥

सुन्दरस्यनगरान्तरप्रवेशंवर्णयतिसंनिवर्त्तेति ४१ स्कन्देतिस्कन्दस्यकुमारस्यअपरतनुःद्वितीयमूर्त्तिःबोधसंबन्धनामासंज्ञायांचेति ड्वार्थेकन् प्रत्ययः चैतन्यसंबन्धद्वस्थितद्त्यर्थः ४२ बोधेति पद्यत्रयेण ४३ ४४ अथदक्षिणादिग्गमनमाह.प्रसादेति ४५ ४६ ४७ ४८ षड्भिःकावेरींवर्णे

सन्निवर्त्यानुगान्सर्वान्नमस्कृत्वाग्रजन्मनः उत्तीर्योत्तरकावेरीमगाद्ब्रह्मपुरंप्रति ४१ स्कन्दापरतनुर्यत्रबोधसंबंधकः शिशुः गौरीस्तन्यामृतास्वादात्तनर्त्तयामासभारतीम् ४२ बोधसंबन्धपादाब्जरेणुपावनवीथिका सेयंपुरीपदास्पृष्टुंनयुक्तेत्येवसुन्दरः ४३ कैलासवासंपुरुषमस्तोषीद्दूरतःस्थितः आविर्भूतोग्रतस्तस्यसहगौर्योमहेश्वरः ४४ प्रसादमकरोत्तस्मै कैलासपतिरीश्वरः अथानुज्ञाप्यतंदेवंदक्षिणाशामगाद्दत ४५ श्रीचोलविषयाभोगसौभाग्यमवलोकयन् कावेरीतीरमगमत्कपर्दिस्थानभूषितम् ४६ अवगाह्यनदींपुण्यांकुबेरमुनिसंभवां अवेक्षमाणःपरितोननंदसमहानदीम् ४७ कमलोत्पलकल्हारवासनामोदवासितां कर्पूरपुंजसच्छायमहापुलिनमण्डलाम् ४८ हिंतालक्रमुकस्कन्धबद्धरंभावनांतराम् सूर्य्याश्वखुरनिर्भिन्नानारिकेलफलद्रुमैः ४९ पयःपूरैर्निदाघेऽपिकालेकूलंकषोदकां अप्सरस्तनशैलाग्रघातव्याकुलवीचिकाम् ५० मज्जद्धोतवधूनाभिनिष्पीतरयवेणिकां चोलेंद्रसैन्यमत्तेभदानचन्द्रकभूषिताम् ५१ तीरद्रुमाकुलच्छायनिरुद्धोरुमहातपां हंसकापोतमायूरकलध्वनिमिलद्दिशम् ५२ तटोटजमुनिभ्रान्तवेदान्तध्वनिपावितां यायजूकारुशालासुयूपमालाविराजिताम् ५३ योगनिद्रासमासक्तरंगनाथांसमालिकां महार्णवस्थमहिषींकावेरींसमहानदीम् पश्यन्पशुपतेःस्थानंन्यसेवतमहाकविः मायूरमध्यार्जुनकुंभकोणश्रीकांचिजप्पैरनामभांक्षुस्थानेषुदिव्येषुहरंनिषेव्यसत्यागराजेशपुरंजगाम

यति कमलेत्यादिना ४९ ५० ५१ ५२ ५३ ५४ मायूरेति दिव्येषुद्योतनशीलेषु पञ्चसुमायूरादिशिवस्थानेषु हरं निषेव्येत्यन्वयः इतिश्रीमान

वत्युपनामकन्नसिंहविरचितायांस्कन्दपुराणव्याख्यायां भक्तविलासप्रकाशिकायांत्रयोदशोऽध्यायः ८

एवमत्यद्भुतसुन्दरमहिमाकर्णनेनजातकौतूहलानांमुनीनां चरित्रान्तरवर्णनेनप्रवृत्तिंदृढयन्नाह चरितमिति १ भक्तेःप्राधान्यंकथयति किमिति २३४५ चन्द्रोदयइति कमलापुरस्य संज्ञाप्रवृत्तिनिमित्तं आख्यानद्वारावर्णयति पुरेति ६ ७ देवानामिति नन्दकः खड्गः तेन छि

श्रीअगस्त्यउवाच चरितंसुंदरस्यान्यदद्भुतं शृणुतद्विजाः सर्वलोकेषुविख्यातंसर्वपापप्रणाशनम् १ किंदुर्लभंभगवतिप्रसन्नेवृषभध्वजे तथापिनान्यंवांछन्तिभक्त्याभक्ताविनाहरे २ यत्रयत्रशिवस्थानंतत्रतत्रससुन्दरः भवानीसहितंदेवं स्तुवंगुंफेगिरिंमुदा ३ लब्धप्रसादोऽथपुरंविवेशकमलालयं सन्निधौत्यागराजस्यप्रणम्यस्तोतुमैहत ४ तत्रसैःस्वागतं दृष्टःसुन्दरःसूक्तिसुन्दरः संदर्शनान्महेशस्यतस्यसूक्तिरवर्धत ५ चन्द्रोदयद्वांभोधेः :पूरोवारांनिरर्गलःपुराकल्पान्त रेविष्णुःशंखचक्रगदाधरः ६ प्रसादितःसुरैस्सर्वैरसुरैरर्दितैर्युधि योऽभ्युद्यतोदैत्यानारूढपतगेश्वरः ७ देवानामसुराणांचबभूवायोधनंमहत् नंदकच्छिन्नमूर्द्धानोगदासंचूर्णितासकाः ८ मूर्छिताशार्ङ्गनादेनविलग्नाश्चक्रधारया खगेशपक्षवातेनदूरंधूताश्चपर्णिवत् ९ विद्रावितारणेदैत्याःपलायनमशिश्रयन् हरिणाभ्यर्थितायूथपतयोह्याश्रमंभृगोः १० विविशुःशरणाकांक्षानापश्यंतत्रवैमुनिं अन्तर्वलीमुनेःपत्नींदैत्याःप्रापुर्गतिंपराम् ११ दत्ताभयाभृगोःपत्न्यादैत्यावेद्यन्तराविशन् अदृष्ट्वादानवपतीन्निवृत्तोहरिरध्वनि १२ देवैःसंचोदिताद्दृष्टेःप्रवृत्तिममरद्विषांउपलभ्यस्वकृशरणान्रक्षितुंत्रिदिवौकसः १३ भार्गवाश्रममासाद्यपक्षिराजादवारुहत् आगतंविष्णुमालोक्यभृगुपत्नीयशस्विनी

न्नामूर्द्धानोयेषांतथागदया संचूर्णिताःअंसाःभुजशिरांसियेषां ८ ९ विद्रावितादति यूथपतयः दैत्यसेनापतयः १० विविशुरिति अन्तर्वलीं गर्भिणीं अन्तर्वत्नीतुगर्भिणीत्यमरः अन्तर्वत्नीतिवतोरितिनुक् ११ दृष्टेतिवेद्यन्तरावेदिमध्ये १२ १३ १४ ॥ ७ ॥ ४ ॥

कृत्वेति सत्यतयासत्यप्रियया सत्यंतप्रियेसत्येइत्यमरः १५ त्वदिति प्रमुदितप्रहर्षिता अहमितिशेषः स्तौतिश्रीपतेइत्यादिना १६ प्रसीदेति दृश्य स्यजगतःस्थित्यादिकर्त्ता १७ ब्रह्मेति गिरावेदवाचा मुनेःभृगोः १८ आगमनकारणंपृच्छतिप्रसीदन्तीति १९ २० २१ देवादृति शरण्यशरणेसा

कृत्वांजलिप्रदानाख्यंस्वागतंपर्य्यपृच्छत अथाब्रवीदितंसाध्वीहरिंसत्यतयागिरा १५ त्वद्दर्शनात्प्रमुदिताचिरात्प्रभृत्य
ब्धनिधिर्यथा श्रीपतेभूपतेदेवनमस्तेऽस्तुजगत्पते १६ प्रसीदमयिभक्तायांभक्तवत्सलकेशव त्वमनादिरन
न्तश्चदृश्यस्थित्युद्भवान्तकृत १७ ब्रह्मादिभिश्चाविदितःस्तुत्यःप्राचीनयागिरा मयादृष्टोसिभाग्येनतपसे
वमहामुनेः १८ प्रसीदंतिमहात्मानःपत्रपुष्पफलार्चिताः अनुगृहाणमह्यंत्वंकिमागमनकारणम् १९ अ
नुगृण्हीष्वमांदेवसुधामधुरयागिरा इतिसंप्रार्थितःपत्न्याभृगोः कमललोचनः २० स्मयमानोब्रभाषेतांवनः
मालाधरःपुमान् श्रीविष्णुरुवाच शृणुमद्वचनंसाध्वि पूजितोस्मित्वयानघे २१ देवादैत्यभयार्तोमांशरण्यंशरणंग
ताःतद्रक्षणायदैत्यानांसंहारोऽस्मिन्कृतोद्यमः २२ हन्यमानेषुदैत्येषुमयाकेचनदानवाःवनांतरुटजंप्राप्तादुतिवन्हेः
श्रुतंमुखात् २३ देवान्त्यजतितेभर्त्ताप्रसन्नास्त्वयिसंतते चक्रेणदानवान्हन्मिविलीनायत्रतेवद २४ वैस्मवींगिरमा
कर्ण्यमुनेःप्राहपतिव्रता निरुध्यपर्णशालायाद्वारंभीतात्वधर्म्मतः २५ सन्तःसमंत्वांविदुरादिपूरुषंनतेप्रियःकश्चि
दथाप्रियोपिवा जगद्गुरुर्धर्मपथप्रवर्त्तकःकथपरप्रेरणयासिपापधीः २६ दैत्यामांशरणंप्राप्तायथात्वामसुरद्विषः श
रणागतसंत्यागान्नान्यत्पापंमहत्तरम् २७ अत्रैवोदाहरंतीममितिहासंपुरातनं श्येनायदत्त्वास्वशरीरमांसंशैव्यःक

धुंतत्रसाधुरितियत्प्रत्ययः २२ हन्यमानेष्वितिअन्तरुटजंपर्णशालाभ्यन्तरं पर्णशालोटजोस्त्रियांदित्यमरः २३ २४ २५ प्रस्तुतकार्य्यायविष्णु

प्रशंसन्ति २६ २७ भारतींयंक्ष्येनकपोतीयंदुरितहारंसमाचयति ॥ ॥ ॥

रक्षकीर्त्तिमहतींजगामशक्रंकपोतंशरणागतंच अपिप्राणभयंप्राप्तोनत्यजेच्छरणागतम् २९ त्यजतोनिरयेपातःया वदाचन्द्रतारकं नत्यजामितंतोदैत्यान्विस्मोयाहियथागतम् ३० अथवाजहिमामग्रेपश्चात्संहरदानवान् इतिरुद्र गृहद्वारंभृगुपत्नींपतिव्रताम् ३१ देवैःप्रोत्साहितोविष्णुश्चक्रेणनिजघानह निहत्यदानवान्पश्चाद्रक्षत्त्रिदिवौ= कसः३२ पालिताहरिणादेवाःबभूवुःसुखितादिवि भ्रूणहत्याथमहतीरमापतिमुपाद्रवत् ३३ भ्रूणहत्याविनाशायब भ्रामभुवनेषुसः विद्ययातपसापत्नीमुज्जीव्यकुपितोभृगुः ३४ शशापकेशवमपिस्त्रीवियोगस्तवास्त्विति हत्ययानुग तंविष्णुंविसृज्यकमलालया ३५ कमलालयमासाद्यभर्तुर्हत्यानिवृत्तये प्रयताभ्यर्चयामासभगवंतंमहेश्वरम् ३६ अ थविस्मुर्मुनीन्देवान्मेलयित्वानिजांहसः निष्कृतिंपरिपप्रच्छुप्राप्तुकामःश्रियंपुनः ३७ प्रसाद्यित्वामुनयःसहदेवैर्मुनिं भृगुंः प्रायश्चित्तविधानायथेनमुच्येतकेशवः ३८ अचोदयन्महाप्राज्ञाःशांतक्रोधश्चसोऽभवत् शांतक्रोधश्रि यःकांतमिदमाहमहामुनिः ३९ भ्रूणहत्याऽनिवार्यातेविष्णो कल्पशतैरपि ॥ यदिमेनक्रुधःशान्तिरिहस्यान्म धुसूदन ४० देवद्विजप्रार्थितस्यक्षमादिष्ट्याऽभवन्मम सन्तोनप्रतिकुर्वन्तिसागस्सुत्वादृशोष्वपि ४१ अनुग ण्हन्त्वपित्वार्य्याःशोकभाजिप्रति ष्टिषिनिष्कृतिरघस्यास्यतथापिश्रूयतामिदम् ४२ रुद्राध्यायमहामंत्रैर्द्वाद शावृत्तिकोटिभिः ॥ दुग्धधाराभिषेकेणशिवलिंगस्यनिष्कृतिः ४३ ॥ ॐ ॥ ॐ ॥ ॐ ॥

भस्मेति सोमास्कन्दं तन्नामकं शिवलिङ्गं ४४ ४५ ४६ दशेति विलीनानष्टाश्रियं व्रजगच्छेत्यर्थः ४७ ४८ साक्षात्कारं प्रार्थयते प्रत्युवाचे

भस्मशय्याशयानश्च भस्मच्छन्नस्तथा कुरु सोमास्कन्दं निषेव्याथ भूयः श्रियमवाप्स्यति ४४ इत्युक्त्वा स्वाश्रमं प्रापः
सहशिष्यैर्म्महामुनिः हरिस्तु शतरुद्रीयं चिरमावर्त्तयन्मनुम् ४५ कामधुक्क्षीरधाराभिरभिषिंचन्महेश्वरं दिव्ये
मारकते लिङ्गे दिव्यान्वर्षगणान्बहून् ४६ दशकोट्यब्दविलये वागभूदशरीरिणी विलीना भ्रूणहत्या ते व्रजवि
श्वंभरश्रियम् ४७ श्रान्तोसि पूजयाद्य त्वं किं भूयः प्राप्तुमिच्छसि विष्मराकर्ण्य तां वाणीं तां दिशं प्रत्युदंजलिः ४८
प्रत्युवाच विभो नष्टा यदि हत्या तवार्चया साक्षात्कर्त्तुं भवद्रूपमिच्छामि शशिशेखर ४९ इमं देहि वरं देव भक्तवत्सल
शंकर यादृशं भवतो रूपं देही ध्यात्वापि पापकृत् ५० सद्यो विमुच्यते सर्वैर्वाङ्मनःकायजैरघैः एवं हरिं प्रार्थयन्तं
वाग्विहायस्य भाषत ५१ ब्रह्मादयः सुरगणा अगस्त्याद्याश्च योगिनः अपि क्रतुशतैरिष्ट्वा दत्वा दानानि भूरिशः
५२ पूजयित्वापि मां लिंगे तृष्णया मुषिताशयाः न शक्नुवंति मां द्रष्टुं विना चित्तनिरोधनात् ५३ शृणु विष्णो त्विदं
वाक्यं यदि मां द्रष्टुमिच्छसि जितेन्द्रियः श्रिया सार्द्धं वर्षकोटिस्वयं व्रती ५४ विरक्तः सर्वभोगेषु व्रतं पाशुपतं चर द
र्शयिष्यामि सम्पूर्णे समये मत्कृते ततः ५५ द्रक्ष्यसे मम तद्रूपं दुर्दर्शं योगिनां च यत् विरतायामुदीर्यैवं गिर्यग्रे वा
रिवीचिवत् ५६ दधौ व्रते पाशुपते दीक्षां देवो जनार्द्दनः भस्मावगुंठनं कृत्वा चीरवासा जटाधरः ५७ जपन्
पञ्चाक्षरीं विद्यां षट्कालार्चनतत्परः कंठदघ्ने जले तिष्ठन् दिवारात्रमतंद्रितः ५८ ॥ ७ ॥ ७ ॥

ति ४९ ५० ५१ ५२ ५३ ५४ ५५ ॥ द्रक्षसे इति गिरिगगनवाण्यां एवं पूर्वोक्तप्रकारेणोदीर्य्य कथयित्वा अग्रे वारिवीचिवत् जलतरंगवत्

विरतायां शान्तायां इत्यर्थः ५६ ५७ ५८

५९ ६० ६१ ६२ ६३ अभ्यर्चितादिति हिमसारलिंगात् कर्पूरलिंगात् सिताभ्रोहिमवालुकेत्यमरः अस्यविष्णोः पुरतः प्रत्यक्षोऽभूदित्यर्थः ६४
इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कन्दोपपुराणव्याख्यायांभक्तिविलासप्रकाशिकायांनवमोऽध्यायः ९॥ ॥ ॐ ॥
पूर्वाध्यायांन्तेविष्णुनापूजितात् कर्पूरलिङ्गात् सोमास्कन्दतनुःशिवःप्रादुरभूत् इत्युक्तं तदर्थश्चऽउमाचस्कन्दश्चऽउमास्कन्दौताभ्यां

महान्तंदेवमुद्दिश्यचचारव्रतमुत्तमं भूयःसंप्राप्यभर्त्तारंकमलापिशिवाज्ञया ५९ ज्ञात्वाहत्याविनिर्मुक्तंतत्राभूत्परि
चारिका चारुचित्रैरमालिङ्गैर्यैरानर्चिमहेश्वरः ६० स्थानेजवंतिकापुष्पैःकमलालयनामनि कमलाक्रीडविकचैस्तै
रेषमधुसूदनः ६१ शिवनामसहस्रेणपूजयामासभक्तिमान् कर्पूरालेपकहारकलिकामालिकार्चितम् ६२ गते
कोटिद्वये ब्दानांसुप्रीतश्चन्द्रशेखरः सोमास्कन्दतनुर्भूत्वाविष्णुमन्वग्रहीद्धरः ६३ अभ्यर्चितान्मधुभिदाहिम
सारलिंगात्साद्रिंगिरीन्द्रसुतयाचषडाननेन कर्पूरलेपकमनीयवपुस्सुगंधिसौगंधिकस्रगभवत्पुरतोऽस्यशंभुः ६४
इतिश्रीस्कन्दोपपुराणेनवमोऽध्यायः ९॥❀॥ ॥सोमास्कन्दमहादेवमाविर्भूयाग्रतःस्थितं कर्पूरालेपक हार=
वासनांचितदिङ्मुखम् १ तप्तकांचनसच्छायसमुन्नतजटाधरं मृणालधवलांतन्वींमौलौचान्द्रमसींकलाम् २
गंगामहीन्द्रमम्भोज भूकपालस्रजंतथा॥ विभ्राणमलिकेचारुमृगनाभिविशेषकम् ३॥ ७ ॥ ७ ॥

सहितातनुर्यस्य तत्रशिवगौरीषण्मुखान्क्रमेणवर्णयिष्यन् आदौशिरप्रभृतिपादपर्य्यन्तंषोडशभिः शिवंवर्णयति सोमास्कन्दमि
ति कर्पूरालेपञ्च कल्हाराणिच सौगन्धिकानिच तेषांवासनया अन्वितानि पूजितानि दिङ्मुखानियस्यतं १ २ गङ्गामिति अम्भो
जभुवःब्रह्मणःकपालानांस्रजंमालां अलिकेललाटेमृगनाभिविशेषकंकस्तूरीतिलकं विभ्राणमित्यन्वयः ३॥ ७ ॥ ७ ॥

स्फुरदिति काश्मीरजातंकुंकुमं काश्मीरजन्माग्निशिखमित्यमरः तस्यतिलकमिव भास्वत्प्रकाशमानंवन्हिविलोचनंयस्यतं ४ ५ ६ ७ रत्नेति परश्चधेत्यादि चतुर्भुजमूर्त्तिवर्णनाभिप्रायेण ८ गन्धेति अपराङ्गेऽष्टमभागे विषक्तं अद्रिकन्यायाःपार्वत्याःभुजलता

स्फुरज्जवंतिकापुष्पकर्णाभरणभासुरम् कास्मीरजातितिलकंभास्वद्वन्हिविलोचनम् ४ शोभनभ्रू
लतंसान्द्रकरुणापाङ्गवीक्षणम्॥ कपोलादर्शसंक्रांतविंबंगौरीमुखाम्बुजम् ५ स मुन्नतनस
मुक्ताफलश्रीदशनावलिम्॥ विद्रुमोत्तमसच्छायमृदुलाधरपल्लवम् ६ वदनादर्शदन्ताभ
चुबुकश्रीविराजितम्॥ कालकूटप्रभामिश्रकंठकर्पूरलेपनम् ७ रत्नाङ्गुलीयकटकंकेयूरन
लयाङ्गदम्॥ परश्वधमृगाभीतिवरमुद्रास्फुरत्करम् ८ गन्धपंक्तिकृतोद्भ्रान्तभृङ्गसौगंधिकः
स्रजम्॥ अपरांगविषक्ताद्रिकन्याभुजलतास्पदम् ९ उद्भ्रीवनागमाणिक्यप्रभापूरितनाभिकम्
तारहारावलीनिष्कपदकाभांचितोदरम् १० उपवीताहिनिश्वासमृष्टभस्मानुलेपनम् व्याघ्रचर्म्म
परीधानंमणिनूपुरमंडितम् ११ उत्फुल्लाहिशिरोरत्नप्रभापाटलपादुकम् नम्राहंकारतिमिरप्रभाक
रतत्प्रभम् १२ कालवक्षस्थलशिलादंभोलिनखभास्करम् कैवल्यकल्पकक्षोणिरुहनूतनपल्लवम् १३

स्पदंयस्पतं ९ उद्भ्रीवेति तारणांशुद्भमुक्तानांमुक्ताभ्रुद्भौचतारस्यादित्यमरः तेषांहारावलीपुनिष्कपदकं रत्नांचितसुवर्णपदकं तस्यआभयाकांत्याअञ्चितंउदरंयस्यतं १० ११ १२ कालेति कालस्ययमस्यवक्षस्थलमेवशिलातस्याः दंभोलयोवज्ररूपाःयेन खाःतैर्भासुरं इत्यादिचरणांभोजंइत्यस्यविशेषणंकैवल्यंमोक्षःसएवकल्पकक्षोणिरुहः कल्पवृक्षः तस्यनूतनपल्लवइ

१४ १५ पार्वतींवर्णयति वसन्तीमित्यादि अस्यशिवस्यवामभागेवसन्तीमित्यन्वयः १६ कुमारंवर्णयति क्रीडन्तमिति तयोःशिव
योः १७ १८ शार्दूलेति शार्दूलनखरैःकंठाभरणलग्नैर्व्याघ्रनखैःउद्यत्सूर्यनिभैरित्यादिषड्भिर्मुखांबुजैरित्यग्रिमेणान्वेतितैरुपल
क्षितमित्यर्थःउपलक्षणेतृतीया एतादृशंकुमारंचालोक्य शिवस्यपदयोर्निपपातेत्यन्वयः १९ २० २१ २२ २३ प्रणम्येति बर्हिबर्हे

भक्ताभयप्रदावकिंकिणीपरिभूषितं संसारशोगभैषज्यपरागस्मृतिवैभवम् १४ दधानंचरणांभोजंदलितांबुजसन्निभम्
रत्नसिंहासनारूढंरमणीयतमाकृतिम् १५ उन्मिषज्जीवरत्नश्रीपरिवेषपरागतं वसन्तींवामभागेऽस्यवारिजायत
लोचनाम् १६ शैलराजसुतांदेवींसर्व्वभूषणभूषितां क्रीडंतंचतयोर्मध्येकुमारंकोमलाकृतिम् १७ मञ्जीरकिंकिः
णीकांचीकेयूरकटकांगदैः वलयैरंगुलीयैश्चमहार्हैःपरिभूषितम् १८ शार्दूलनखराश्लिष्टकंठाभरणभास्वरं उद्य
त्सूर्यनिभैःषड्भिःस्फुरद्दशनकुड्मलैः १९ अर्द्धोक्त्यमृतनिष्यन्दमन्दहासमनोहरैः सिद्धाञ्जनान्वितापांगलोलता
रकलोचनैः २० अंबिकास्तन्यकणिकाभूषिताधरविद्रुमैःसुविभ्रमद्भ्रूलतिकैर्मृगनाभिविशेषकैः २१ चूडामणि
परिष्वक्तनीलकुंचितकुंतलैः ललंतिकामणिज्योतिरनुविद्धालिकस्थलैः २२ सामोदश्वसितैःषड्भिःदर्शनीयमुखांबु
जैः आलोक्यानंदभरितःपादयोर्निपपातह २३ प्रणम्यकोटिशस्तुत्वाश्रियासहकृतांजलिः दधारछत्रमस्योर्ध्वंबः
र्हिबर्हेविनिर्मितम् २४ चंचच्चामरगुच्छेनश्रीरबीजयदंतिके पांचजन्यंदरवरंप्रदध्मौहर्षनिर्भरः २५ ॥ ७ ॥

णमयूरपिच्छेनविनिर्मितंछत्रं अस्यशिवस्योर्ध्वंदधारेत्यन्वयः २४ लक्ष्मीकृत्यमाह चंचदिति पुनर्विष्णुकृत्यमाह पाञ्चजन्यमि-
ति दरवरंशखश्रेष्ठं प्रकर्षेणदध्मौशब्दापयामास ध्माशब्दाग्निसंयोगयोरित्यस्यलिटिरूपम् २५ ॥ ७ ॥ ७ ॥

शिवसाक्षात्कारजन्यस्यानंदस्यअपारतांदर्शयति देवमिति २६ २७ २८ यथेति अविक्षतं अखंडितं २९ ३० श्रान्तइति एवंरूपंस

धार्येतिशेषः ३१ ३२ इतीति तेनविष्णुनाप्रार्थितःदेवाःयोगिनश्चतंशिवंदृष्ट्वाशुद्धचेतसः शुद्धचित्ताःआसन्इत्यन्वयः ३३ नाम

देवमालोक्यपुरतोयमानन्दमगाद्धरिः नतस्यकणिकामात्रंब्रह्मानन्दोऽपिसंभवेत् २६ अथप्रसन्नोदेवेशःसो मास्कन्दोमहेश्वरः प्रणतंप्राञ्जलिंप्रेक्ष्यमभाषतजनार्दनम् २७ निवृत्ताभ्रूणहत्यातेसंगतोसिश्रियापुनः मत्साम्य मधुनालब्धमनयाव्रतचर्य्यया २८ यथापूर्वंत्रिजगतामस्त्वैश्वर्य्यमविक्षतं तवाहंगोचरोऽन्येषामदृश्योयोगिना मपि २९ रत्नसिंहासनासीनंस्कन्देनचसहोमया येसेवन्तेमहाभागाःतेषांमुक्तिःकरेस्थिता ३० श्रान्तोसिसुचिरं विष्णोकिमन्यद्वांछितंतव श्रीविष्णुरुवाच मत्प्रसादायभगवन्एवंरूपंसदाविभो ३१ भूयोदेवाश्चमुनयःकृतार्थास्सं तुदर्शनात्योगनिद्राविधानायप्रयच्छतुमतिंविभो ३२ इतितत्प्रार्थितःशंभुःतथारूपोबभूवह देवाश्चयोगिनोदृष्ट्वातमासशु द्धचेतसः ३३ यद्यदिष्टतमंयस्यतस्यतत्तत्प्रदानतः त्यागेश्वराभिधांभेजेमनोवाचामगोचरः ३४ अथकालेगतवतिमहार्णवशयः पुमान् रत्नसंपुटमध्यस्थंकृत्वात्यागेश्वरंविभुम् ३५ निधायोरसिसुष्वापलब्धानुज्ञोमहेश्वरात् निश्वासोच्छ्वासवेगेननिद्रालोः कमलापतेः ३६ प्रसक्ततांडवंदेवंहंसन्नृत्यमथास्तुवन् योगिनोहंसनटनंविलोक्यगिरिजापतेः ३७ संसारार्तिजहुर्वेक्षः कंसारेरधिजग्मुषः अथासुरेभ्योभीतेनप्रार्थितोवज्रपाणिना ३८ उत्थायहरिरिन्द्रायदत्त्वाक्षोगतंहरं दिनेदिनेपूजयास्यपू

रूपरहितस्यशिवस्य त्यागेश्वराभिधानेप्रवृत्तिनिमित्तं दर्शयति यद्यदिति ३४ ३५ ३६ ३७ संसारेति इंद्रायशिवप्रसादं व र्णयति अथेत्यादिना ३८ उत्थायेतिषट्पदीदिनेदिनेहरंपूजयेत्यवोचदितिशेषः ॥ ॥ ॥ ॥

कुर्वाणइति अर्द्धेनइन्द्रस्यदृष्टलाभंसामान्यतोवर्णितमितिज्ञेयं ३९ विशिष्यइन्द्रसेवांविस्मृतुल्यसम्यत्प्रासिंचतस्यवर्णयति आकाशे
ति ४० इतिश्रीमानवल्युपनामकस्कन्दसिंहविरचितायांस्कन्दोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांदशमोऽध्यायः १०॥७॥
अथविस्मृशक्रयोरिवमुचुकुन्दस्यराज्ञःशिवप्रसादंवर्णयिष्यन् तदुपोद्घाततयाकैलासोपवने शिवयोर्विहारंवर्णयितुमारभते एत

कुर्वाणःसहितःशक्रोमहतीमद्भिमासवान् ३९ आकाशगंगा पयसाचबर्हिछत्रेणशंखध्वनिभिश्चमंद्रैःज
वंतिकास्त्रग्भिरुपास्यशंभुंहरिःश्रियंप्रापयथामुकुंदः ४० इतिश्रीस्कंदोपपुराणेदशमोऽध्यायः १०॥७॥ ॥
एतस्मिन्नंतरेदेवोदेव्यासहमहेश्वरः कैलासशैलोपवनंप्रपेदेपुष्पितद्रुमम् १ राजरंभासमुद्भांतैःकर्पूरैः
सेचकैरिव पांडुरंहेमपद्मानांपरागैःकुंकुमैरिव २ अरुणंनवदूर्वाभिःश्यामलंक्वचिदुन्मदैः अनेकवर्णैर्वि
हगैःकूजद्भिरमितोवनम् ३ प्रविश्योपवनंगौरींकामिनीमिवकामुकः अलंचक्रेनवैःपुष्पैःकामदर्पहरोहरः
४ अलकेकर्णिकारंचकर्णयोःपद्मकर्णिकां उन्नतेनासिकाग्रेचचारुपुंनागकुंडलम् ५ कपोलेलोध्ररेणुंचकंठ
नालेमनोरमं सिंदुवारकृतंदाममृणालवलयानिच ६ हस्तेमहोत्पलंदत्तपत्रलेखांचितंस्तने प्रसूनाभरणंगौरीवि
भ्राणारमयद्धरम् ७ श्रीफलद्रुममूलेतांप्रसूनशयनेहरः उपवेश्यतदुत्संगेशिश्येसर्वगुहाशयः ८ ९ ॥

स्मिन्निति १ तदेवोपवनंद्वाभ्यांवर्णयति राजरंभेत्यादिना २ ३ प्रविश्येति हरःउपवनंप्रविश्यकामिनींकामुकइवगौरींपुष्पैः अलं
चक्रेअनेनवेषविभावाख्यश्रृङ्गारःसूचितः ४ अलंकरणप्रकारमेवतत्तदवयवेषुवर्णयति अलकेइत्यादिनासार्द्धद्वयेन ५ ६ हस्ते
इति एवंप्रसूनाभरणंपुष्पाभरणंविभ्राणागौरीहरंअरमयत् रमयामास ७ श्रीफलेतिसर्वगुहाशयःसमस्तभूतानांहृदयाकाशवर्त्ती ८

९ यत्रेतिरोमशः बहुरोमवान् असितानन: कृष्णमुखःगोलाङ्गूलो वानरजातिविशेषः १० शाखेति श्रीवृक्षाग्रेबिल्ववृक्षाग्रेजातिसिद्धया ११ बभंजबिल्वपत्राणिकोमलान्यक्षतानिच तानिसर्वाणि पत्राणिपतंतिधरणीतले १२ दिष्ट्यागौरीसमेतस्यनिपेतुःपाद्योर्विभोः गणयामासतानीशोयावदष्टोत्तरं शतम् १३ कीशंचादर्शयत्तंगौर्यैसाकटाक्षेणवैक्षत ततऽस्थायसंदृष्टःपशूनांपतिरीश्वरः १४ आगच्छेत्या ह्वयामासबिल्वोपरिगतंकपिं तत्क्षणेजातविज्ञानःसोऽवरुह्यततोद्रुमात् १५ प्रदक्षिणीकृत्यपदेशिव योर्निपपातह तमाहभगवानीशःप्रीतोबिल्वदलार्चनात् १६ अष्टोत्तरार्द्धसाहस्रशतपर्य्यंतमेकराट् मंडलाधिपतिर्भूत्वाचांतेमत्सदमेष्यसि १७ गच्छभूमौमनोर्वंशेसंभवोस्तुतवानघ इत्युक्तःप्रस्खलन्नाहगो लांगूलोमहेश्वरम् १८ त्वत्सदसेवांहित्वाद्यदिजन्मभवेन्मम कदाजन्मनिवृत्तिःस्यात्तवसीदपरमेश्वर १९ भक्तिरेवपदांभोजेतवास्तुममशाश्वती त्वत्सदसेवाप्रत्यूहंनराज्यंदातुमर्हसि २० दासदासोभवाम्यत्र नभूमौयामिजन्मभाक् यत्रदिव्यावयंदिव्यासर्वेशमदमूढधीः २१ अहंकुवेन्नविज्ञायत्वामघोगतिमश्नुवे चतुरंगबलोपेतंसर्वभोगसमृद्धिमत् २२ तवराज्यंददामीतिवंचनातवनोचिता प्रसन्नोयदिकारुण्यदृष्टिः

या वानरजातिसिद्धया ११ १२ दिष्ट्येति दैवयोगेनविभोःशिवस्यपाद्योःनिपेतुःपत्राणीत्यनुषज्यते १३ कीशमिति कीशंवानरं मर्कटो

भवतोवांछितंनान्यंनसेवेश्रीकृतेभवन् नयत्रसेवायुवयोःतत्रजन्मनिरर्थकम् २४ प्रसीदकरुणासिन्धो
दयाभवतुतेमयि इतिशोचंतमाश्वास्यग्राहतंवृषभध्वजः २५ शृणुखेदंत्वमाकार्षीःयदादिष्टंतदाचर=
अज्ञानादर्चनंभुक्त्यैमुक्त्यैविज्ञानपूर्वकम् २६ वेदागमसहस्रेषुनिर्णीतंवेदवित्तमैः एकबिल्वदलार्चायाःप्रदोषे
ममयत्फलम् २७ रहस्यंतत्प्रवक्ष्यामिशृणुतत्फलभागसि विरक्तोमांप्रदोषेज्ञःपूजयित्वाविमुच्यते २८ अ.
ज्ञानात्काकतालीयामत्पूजाराज्यभोगदा ततस्त्वमेत्यजन्मैकंभुंक्ष्वभोगान्सुरेप्सितान् २९ मद्विज्ञानादमु=
ष्यान्तेमत्सदंप्राप्स्यसिध्रुवं आवयोर्दर्शनंतत्रभवितासख्यतोहरेः ३० मद्भक्तोनहिसंतापंकर्त्तुमर्हसिगच्छगाम्
इत्युक्तःसपुनःप्राहस्मयेमुखमिदंमम ३१ तत्रभूयादथेशोऽपितथेत्युक्तातिरोदधे गूलाङ्गूलमुखस्सोऽभून्नु
चुकुन्दोमनोःकुले ३२ सररक्षमहींराजादिवंदेवपतिर्यथा अजस्रंयायजूकस्यसखाभूत्तस्यवज्रभृत् ३३ एकदा
सुहृदाहूतोदैत्यानांविजयंप्रतिनिर्जित्यदानवान्सर्वान्सहेन्द्रेणाविशद्दिवम् ३४ अभ्युद्गतःसुरैस्सर्वैःकृताशीर्यु
रुणानृपः उपाविशन्महेन्द्रेणरत्नसिंहासनोत्तमे ३५ अर्द्धासनगतंजिस्मोरनंगसदृशाकृतिं सुरारिसैन्यबाणाग्रव्रण
भूषितवक्षसम् ३६ जयश्रियेवरागेणनखक्षतविभूषितं उपासांचक्रिरेतत्रनाकवारांगनानृपम् ३७ जग्राहचामं

लस्यदज्ज्याशीलोयायजूकदृश्यमरः ३३ ३४ ३५ ३६ जयश्रियेति सुरारिसैन्यबाणाग्रव्रणभूषितवक्षसं अतएवजयश्रियारागेणनख
क्षतविभूषितमिवेत्युत्प्रेक्षा ३७ तस्यअप्सरस्सेवांवर्णयतिजग्राहेत्यादिनाश्लोकद्वयेन भृङ्गारंकनकपानीयपात्रं भृंगारःकनकालुके

लमरः तालवृन्तंव्यजनं ३८

दधतुर्नृत्यचातुर्य्यउर्व्वशीचतिलोत्तमा वीणावतीचित्ररेखासहजन्याचतालभृत् ३९ सोपगानाश्चगन्धर्वाःमुचुकु
न्देसिषेविरेश्लाघद्वाथसंगीतंनभोमध्यगतेरवौ ४० आरुह्यैरावतस्कन्धंसहेन्द्रोन्तर्गृहंययौ दधारवृत्तिमिन्द्राणी
मुचुकुंदेमुकुंदवत् ४१ नरेन्द्रश्चमहेंद्रश्चस्नात्वामंदाकिनीजले पुरारिपूजासदनंजग्मतुर्मणिभूषितम् ४२ दिव्याग
रुधूपेनवासितेतत्रवज्रभृत् पुरारिपूजामारेभेभस्मरुद्राक्षभूषितः ४३ मुचुकुन्दोऽपिराजर्षिःमुरारिसमविक्रमः॥
सोमास्कन्दंमहादेवंदृष्ट्वारोमांचितोमुदा ४४ तदौर्यवाक्यंसस्मारतुष्टावमनसाशिवं रहस्यस्तुतिसंतुष्टःपशूनांपति
रीश्वरः ४५ अनुजग्राहतत्कर्णेभुविपूजयमामिति संभ्रांतस्तत्सपर्यायांनविवेदशचीपतिः ४६ पूजावसानेभूपालंगमि
ष्यंतंमहौतले किमभीष्टमितिप्राहगाढालिंगनमाचरन् ४७ अथपाणौगृहीत्वेन्द्रमिदमाहशचीपतिं सोमास्कन्दमिमंदे-
हिसोहार्दंयदितेमयि ४८ पूजांविधातुमिच्छामिकृतार्थेःप्रणयात्तव ऊवाचेन्द्रोऽपिभूपालंस्मयमानमुखांबुजः ४९ सखेः
सत्यंवदाम्येतद्रोप्यतेकिंमयातव विष्णोर्नान्यमिमंविद्धिपूजामात्रेस्यचोदितः ५० तवाप्यमुष्यपूजायांयदिवांछास्तिभूप
ते श्रीपतिंप्रार्थयस्वैनंयदिसंमनुतेहरिः ५१ अथवानास्मिदानस्यप्रभुःस्यादन्यथापिसः ऐन्द्रीमाकर्ण्यसगिरंदध्योद्दः
दिमहेश्वरम् ५२ तदाज्ञप्तोऽव्रजत्सार्द्धंगत्वावैकुंठमच्युतम् नत्वास्तुत्वाचबहुधासोमास्कन्दमयाचत ५३ केशवे
श्वक्षणंध्यात्वानियोगात्सारमेश्वरात्॥ ददावनुमतिंभूपःपुनर्गत्वाहवज्रिणम् ५४ ॥ ७ ॥ ७ ॥

वंदृष्ट्वा इन्द्रसमीपेइतिशेषः ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ॥ ७ ॥

५५ ५६ कथमिति अभ्याशे समीपे त्वष्टारंदेवशिल्पिनं ५७ ५८ ५९ अकल्पितमिति मामावंचयेति आदरादिरुक्तिः ६० ६१ अकल्पि
तमहेशानं अकृत्रिमं सोमास्कंदमित्यर्थः कलिः कलहः ६२ ६३ ६४ ६५ आज्ञप्तइति प्रत्यतिष्ठिपत् प्रतिष्ठापितवान् परः कलाः देवशि

लब्धानुज्ञोऽस्मिविस्मोस्त्वंजिस्नोदेहिमहेश्वरं अत्येतिसमयःक्षोणी यामिसौहार्दमेधताम् ५५ श्रुत्वान्नपः
गिरंशक्रश्चिंतामापतदंतरे दृमंदास्यामिभून्यानियास्यंतिदिवसानिमे ५६ कथन्नुपूर्णकामःस्यान्मुचुकु
न्दश्चभूपतिः आलोच्यधीमानभ्याशेशक्रःस्वष्टारमत्यगात् ५७ नजानीयाद्यथाराजाप्रतिबिंबोऽस्यकृ
त्यतां निर्मायविश्वकर्मापिदद्यौबिंबंशचीपतेः ५८ प्रदायकल्पितंबिम्बप्रयाहीत्यभ्यभाषत आदौचा
दायतमपिसखायंप्राहभूपतिः ५९ अकल्पितंपरंदेहिमामावंचयमामिति पुनःपुनःकल्पितानिषड्डिम्बा
निददौहरिः ६० सतानिप्रतिगृह्याथचिक्षेपनस्तमंपुनः वंचनांमुंचदत्रारेसाक्षात्प्रेरयतीश्वरः ६१ अक
ल्पितमहेशानंदेहिनोचेद्भवेत्कलिः अथानुनीयभूपालंसोमास्कन्दंमहेश्वरम् ६२ रत्नसिंहासनारूढंददौराज्ञेशचो
पतिः बर्हिश्छत्रंचशंखंचजवंतीपुष्पमेवच ६३ कल्हारमालांकर्पूरलेपनंनियमात्कुरु इत्यादिश्यमहीपालंप्रेषया
मासगांप्रति ६४ प्रदक्षिणीकृत्यभुवंमुचुकुंदोपिदृष्टधीः सर्वोन्नतेशिवस्येष्टेसक्षेत्रेकमलालये ६५ आज्ञप्तोवनिरक्षा
यैमहेशंप्रत्यतिष्ठिपत् स्थानेषुषट्सुपरितःप्रतिष्ठाप्यपरःकलाः ६६ नित्यंसंपूजयन्कीर्त्तिंविमलांप्राप्यशाश्वतीं अन्वग्र
हीत्सुराविष्णुंयोमहेन्द्रमनंतरम ६७ मुचुकुंदंततोयश्चप्रसीदतुसमेप्रभुः ६८ कर्पूरलेपायकलाधरायकल्हारमालांचितकं

लिनिर्मिताः ६६ नित्यमिति पुरायः शिवःविष्णुं अन्वग्रहीत् अनंतरंमहेंद्रं ६७ मुचुकुन्दमिति ततःयश्चमुचुकुन्दंअन्वग्रहीत्सः

निवसन्प्रभुःमेमंप्रसीदत्वितिसुन्दरस्योक्तिः ६८ तमेव
शेतिकर्पूरेति ६९ ॥ ॥

वरदानमाह इतीतिममसखेवकुबेरइवाधिवर्द्धस्वेत्याशीः ७० अनुग्रहानन्तरंशिवप्रेरणयासुन्दरस्यविवाहंवर्णयति इतीति ७१ इति
श्रीमानवल्युपनामकनृसिंहविरचितायांस्कन्दोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांएकादशोऽध्यायः ११॥ ॥❀॥अथ
विवाहानंतरंसुन्दरस्यकृत्यंमुनीन्अगस्त्योब्रवीति त्यागेश्वरेति त्यागेश्वरस्यप्रियसखंदृष्टमित्रंसुन्दरंनायकंप्राप्यकन्याआनन्दं
जगामेत्यन्वयः १सुंदरंप्रतिशिववचनमाह वरेति अमुक्तोद्वाहवेषः अपरित्यक्तविवाहालंकारः २ किमिति कौबेरंकुबेरसंबन्धिनं

इतिसुंदरसूक्तिसुधामुदितःतरुणेंदुकलाभरणोभगवान् परिकंपितमौलिरुवाचभवाननुकंपित्तएधिसखेव
मम ७० इत्याशिष्यमहेशानःविवाहंप्रतिचोदितः सुन्दरोन्वभवत्तस्याःपाणिग्रहणमङ्गलम् ७१ इतिश्रीस्कं
दोपपुराणेएकादशोऽध्यायः ११॥ ॥❀॥श्रीअगस्त्यउवाच त्यागेश्वरप्रियसखंसुंदरंप्राप्यनायकं धन्यावेदः
निधेःकन्याजगामानन्दमुत्तमम् १ वरवेषधरंदेवंप्रणम्यंसुहृत्तमं अमुक्तोद्वाहवेषोमांमजेत्याहमहेश्वरः २
किमन्यदुवनेभाग्यंसुन्दरःशांकरःसखा वंदारुवर्गकौबेरंवंदीचक्रेसुवेषभृत् ३ उमावक्षोजसंक्रान्तकर्पूरालेे
पगंधिना हरोरसासमाश्लिष्टंस्वमेनेसुंदरोगुहम् ४ त्यागेश्वरसकल्हारकर्पूरामोदवासितं त्यागेशभावनावन्तः
प्रणेमुःसुन्दरंजनाः ५ श्रीमुनयऊचुः कथंसुन्दरदूतोऽभूत्यागेशःपरमेश्वरः एतदाचक्ष्वचरितंकृपयाकुंभसंभव ६

वन्दारुवर्गअभिवादुकसमुदायं वन्दारुअभिवादुकेइत्यमरः शरिवंघोरुःसुंदरःवन्दीचक्रे अवन्दिनः वन्दिनश्चकारेत्यन्वयः वं
दिनःस्तुतिपाठकाइत्यमरः ३ उमेति सुन्दरः हरस्यउरसावक्षसासमाश्लिष्टं स्वमात्मानंगुहंषण्मुखंमेनेजानातिस्मतत्तुल्यत्वादि
तिभावः ४ ५ सुन्दरःशांकरः सखेत्युक्तं तत्रजातसंशयाः मुनयः पृच्छन्ति कथमिति ६ ७ ॥ ७ ॥ ७ ॥ ७ ॥

पुरा पार्वतीसख्यौ दृष्ट्वासुन्दरस्यमनश्चांचल्यं तस्मयुक्तशापादिकंचवर्णितं तयोरेकासुन्दरेणविवाहिता सम्प्रति द्वितीयासंबन्ध माह द्वितीयेति सागरिका तन्नाम्नीगणिकान्वयावेश्यावंश्या ७ तामेववर्णयति सामुद्रिकेत्यादिना ८ ९ १० ११ १२ ॥

द्वितीयासुन्दरासक्तायागौरीपरिचारिका सैवसागरिकाजज्ञेत्यागेशगणिकान्वया ७ सामुद्रिकोक्तनिःशेषल क्षणोत्तमलक्षिता अव्याजसुन्दरीबाल्यंविद्याभिस्तात्यनाद्दयत ८ परिज्ञाताखिललिपिःनृत्यगीतविशारदा सर्वातिशायिनी लोकेचित्रनिर्माणकर्मणि ९ जगदानन्दसन्दोहघनीभावद्ववोदितः देहस्तदीयोलोकानां नेत्रानन्दकरोऽभवत् १० यौवनारंभयोगेनश्रियसाभूयसीदधौ यथावसन्तयोगेनमाधवीपुष्पशालिनी ११ शारदीचन्द्ररेखेववविद्युल्लीववार्षिकी भूयिष्टशोभनातन्वीमणिरुत्तेजितोयथा १२ सावसन्तीगृहेमातुःनक स्यापिदृशःपथि चन्द्रलेखेवसुमुखीनिलीनामेघमंडले १३ साकदाचनसुश्रोणीनिद्राणानिशिसुन्दरं स्वप्नेदृष्ट्वा समुत्थायननिद्रामगमत्पुनः १४ मनसाराधयामाससुन्दराकारमद्भुतं प्रभातायांरजन्यांतुशयनागारमेत्यसा १५ रत्नभित्तौविलिख्यैनंयथादृष्टममोदत तन्मातात्रिचित्रमालोक्यज्ञात्वापिनबहिर्व्यथात् १६ अथकालेनकियताविख्यातोभुवनत्रये त्यागेशस्यप्रवर्तेसुमहान्फाल्गुनोत्सवः १७ नानादेशजनानांचसमवायोमहानभूत् रुद्रपादेश सात्रातुमाययोकमलालयम् १८ त्यागेशंतंवरंदेहीत्युक्तासस्मोसुभानना जनसंघेसुमहतिसंचरन्सचसुन्दरः १९

१३ सम्प्रतितस्याःसुन्दरसमागमसूचकंस्वप्नमाह सेति १४ १५ स्वप्नदर्शनमुक्त्वाचित्रदर्शनमाह रत्नभित्ताविति ज्ञात्वापिबहिः न व्यथात्नप्रकाशयामास अन्यथा अनेककामुकविरोधःस्यादितिभावः १६ अथेति दर्शनानन्तरंफाल्गुनोत्सवः कामोत्सवः १७ नाने

तिरुद्रपादेतन्नामकेतीर्थे १८ संप्रति तत्रैवसुन्दरस्यागमं वर्णयति १९ ॥

स्नात्वेति अष्टभिस्तांवर्णयति आपादंपादपर्यंतं परभागेणगुणोत्कर्षेण अभिव्यक्ताकुन्तलमञ्जरीयस्यास्तांइत्यादिद्वितीयान्त वि
शेषणानांनवमस्थेनसागरिकामिति द्वितीयान्तेनान्वयः २० २१ २२ २३ नानेति संव्यानंउत्तरीयं २४ २५ २६ २७ २८ स

स्नात्वोत्थितांसागरिकामपश्यत्स्तिमितेक्षणः आपादपरभागाभिव्यक्तकुंतलमंजरीम् २० निश्वासामोदसंमोद
मानमत्तमधुव्रतां व्याघ्रहुंकारवित्रस्तमृगार्भकविलोचनाम् २१ कपोलादर्शसंक्रांतवलान्माणिक्यकुंडलां अ
लकांतरसंसक्तनखकिंशुकधोरणीम् २२ मनोभवमहाराजेकुर्वाणांतोरणस्रजं अलिकासक्तकस्तूरीलेखोज्व
लमुखांबुजाम् २३ नानाभरणरत्नश्रीपरिष्वक्तगलस्थलां सूक्ष्मसंव्याननिर्मोकदृश्योन्नतपयोधराम् २४ महार्हक्षौ
मसंवीतामापादगलमस्तकं विभ्राणामभ्रगलितामिवसौदामिनीलताम् २५ लावण्यामृतनिष्यन्दशीकराननमौ
क्तिकां मीनकेतनकल्पद्रुनवोद्यत्पल्लवाधराम् २६ पादारविंदवाचालमणिमंजीरमंडितां मंदमंदपदन्यासकला
जितमरालिकाम् २७ निर्मितांरतिकोट्येवलक्ष्म्याःप्रतिकृतिंयथा मान्मथींमोहनकलामूरीकृततनूमिव २८ सतां
सागरिकांदृष्ट्वाविलक्षहृदयोभवत् पुरारिनेत्रनिर्दग्धस्मरस्तत्सुंदरींयथा २९ तांचापयष्टिमादायजिगायकिलसुन्दरं
स्तब्धस्यतामुदीक्ष्याथसर्वाश्चेन्द्रियवृत्तयः ३० लोचनद्वयमार्गेणनिपतंतिस्मतन्मुखे सापिदृष्ट्यासमालोक्यसोयमित्ये
वजानती ३१ कटाक्षोत्पलमालाभिःक्षणमानर्चसुंदरं तदीयेचैतदीयेचलोचनेमिलितेपथि ३२ ॥ ७ ॥

इति विलक्षं विस्मयान्वितंहृदयंयस्यस्थितः २९ तामिति तांसागरिकामेवचापयष्टिमादायसुन्दरंजिगायेत्यन्वयः अथानंतरंतामु
दीक्ष्यस्तब्धस्यस्तंभाख्यसात्विकभावंप्राप्तस्यतस्यसर्वाःइंद्रियवृत्तयःलोचनद्वयमार्गेणतन्मुखेनिपतंतिस्मेत्युत्तरेणान्वयः ३०

परस्परचक्षूरागंवर्णयति सापीति ३१ ३२

अन्योन्यमिति अथानन्तरंवेश्मगृहंप्रतिप्रयातायांसत्यां ३३ ३४ सुन्दरस्यविस्मयंवर्णयति तद्रूपमितिद्वाभ्यां ३५ ३६ ३७ पंचभिःअरतिं
वर्णयतिजपतइति ३८ ३९ ४० ४१ ४२ ध्यानेतिजागरावस्थायांनिशिनिर्निद्रमासीनंसुन्दरंत्यागेशःप्राहेत्यन्वयः तदेवाह सखेइति

अन्योन्यंगाढमाश्लिष्यपरान्निर्वृतिमापतुः अथतस्यांप्रयातायांप्रतिवेश्मससुन्दरः ३३ अन्वगाद्गृहद्वारमन
ङ्गपरतंत्रया गृहीत्वातत्परिजनांस्तदीयन्नामकीर्त्तयन् ३४ तद्रूपमनुसौंदर्य्यमेकांतेमौलितेक्षणः अहोकेश्य
महोसुभ्रूविभ्रमापांगवीक्षणम् ३५ अहोमंदस्मितमहोवदनंसरसोधरः अहोतस्यास्तनद्वंद्वंअहोमंदतराक्ष
तिः ३६ इतिचिन्तयतस्तन्वींचेतस्तादृष्यभागभूत् हित्वापंचाक्षरींविद्यांतन्नामचतुरक्षरम् ३७ जपतोभून्मन
स्तस्यकामोन्मादेनमेदुरंउद्वानाद्विघ्नमालापःकर्णयोःकालकूटवत् ३८ फणिफूत्कारवत्तस्यबभूवमलयानिलः
मौलीन्दुदर्शनभयान्नत्यागेशमसेवत ३९ नास्तोषीद्विमनादेवंमुचुकुंदवरप्रदं विषास्वादइवाहाराःभस्मनेवसितं
वपुः ४० उन्मत्तशेखरोभूत्वास्थानेशंभोरगात्सखा ४१ चंद्रातपोरात्रिषुचंद्रमुक्तश्चंडातपोपम्यममुष्यभेजे प्रसूनशय्यां
तरसंनिवेशोयंगारराशावजनिप्रवेशः ४२ ध्यानमौनपरिम्लानमानसंमदनांतकः निशिनिर्निद्रमासीनंत्यागेशःप्राह
सुन्दरं सखेसुन्दरकिंदैन्यमुपयासिस्थितेमयि ४३ नास्तोषीर्मोयथापूर्वम्लानंचवदनंकुतः किमितित्वंननिद्रासिनाश्नासि
नचभाषसे ४४ किंतेव्याधिसमुत्थानंयथावद्वदसुंदर शोचंतंसुहृदंमुक्त्वास्थातुंनोत्सहतेसुखम् ४५ उत्तिष्ठब्रूहिशोकस्यकार
णंशमयामितेसुन्दरउ· आधिर्मदीयोममदुर्निवारस्त्वयाविनातस्यनशांतिकर्त्ता अनंगरोगादवमांसखायंविषक्रमंत्वांभिषजांश्रेणिमि ४६ अतिशयेनवैद्यंश्रृणोमि प्रथमोदैव्यो

४३ ४४ ४५ उत्तिष्ठेति त्यागेशप्रश्नं श्रुत्वा सुन्दरोवक्तिआधिरिति त्वां विषजांमध्येभिषक्रमम् अतिशयेनवैद्यंश्रृणोमि प्रथमोदैव्यो

४८ ४९ ५० ५१ संप्रति दौत्यं प्रार्थयते दूतदृति दौत्यस्यप्रत्युपकारमाह नवीनेति ५२ उपायान्तरैर्दुर्निवाराकामपीडेत्याह तत्वेति ५३ सागेशःकिमकरोत्तत्राह प्रतिज्ञायेति सागरिकालयंययावित्यनेनान्वयः ५४ ५५ ५६ ५७ यातीति दौत्यं दूतकर्मतत्करोतित

अनंगज्वरदूनोस्मितत्कृतेव्यसनंमहत्यदितस्याःपरिष्वंगोलभ्यतेसकृदेवमे ४८ त्यागेश्वरभवत्पूजाफलमेतन्नसंशयः४९ त्वद्रूपचिंतांपरिहृत्यतावत्तद्रूपचिंतातरलंमनोमे त्वन्नाममांगल्यमपास्यदूरेतन्नामपारायणसादरोस्मि ५० दीनस्यकामदून स्यत्यागेश्वरदयानिधे देहिसंजीवनीमेनांसर्वाधिव्याधिशांतये ५१ दूतस्त्वमेवगत्वातांयद्यानयसिशंकर नवीनपद्मसाह स्रमर्पयामिस्तवप्रिय ५२ तत्वोपदेशसाहस्रैस्तस्यामाज्ञानवार्यते उपेक्षसेयदिस्वामिन्पश्यतस्तेत्यजाम्यसून् ५३ श्रीअ गस्त्यउ·इत्युक्तापणतंपादेसुंदरंभक्तवत्सलः ५३ प्रतिज्ञायतदेतस्मैदूतरूपमवीभरत् अथार्द्धरात्रेसर्वेषुनिद्राणेषुशरी रिषु ५४ सुंदरस्यविनिद्रस्यसागेशस्तापशांतये एकःसर्वगुहावासीययौसागरिकालयम् ५५ यांतंसुंदरदूतंतंकर्पूरालेप सुंदरं वीक्ष्यविश्वाधिकंदेवंविस्मयंतेस्मखेचराः ५६ तस्यपादाब्जविन्यासपरिपूतानिवीथिषु रजांसिशिरसाधत्तासिद्धांव धमुचोऽभवन् ५७ यातिसागरिकावासंत्यागेशेदौत्यकारिणि जयसुंदरदूतेतिकाहलीव्योम्न्यजृंभत ५८ अनुक्तासुंदरस खंगच्छंतंदूतरूपिणं व्यजिज्ञपन्परिजनाःदेव्यैदिव्यविभूतये ५९ मणिसौधाग्रमध्यात्साकमलालयनायिका गवाक्षेण विलोक्यशंगौरीमदस्मितंदधौ दधौचमनसादेवीतदप्येतस्यभूषणम् ६० भस्मास्थिमालान्करोटिपात्रश्मशानचर्याजरदु क्षभाजःसख्युःकृतेदौत्यमिदंपशूनांपत्युर्विनोदोनहिदूषणाय ६१ अथातीत्यमहावीथींमहादेवोदयानिधिः ययौसागरिका

च्छीलःतस्मिन्त्यागेशेसागरिकावासं यातिसति हेसुंदरदूतजयदृति व्योमनि काहलीवाद्यविशेषः अजृंभत ५८ ५९ मणीति षट्प

दी छंदः ६० भस्मेति भस्मादिभूषितस्यविकृतवेषस्येत्यर्थः पशूनांपत्युःशिवस्यसख्युः कृतेसुंदरस्यनिमित्तं दृढंदौस्थकरणंहियस्मात् कारणात् विनोदःअतोनदूषणायकिन्तुभूषणायेत्यर्थः ६१ अथेति शुभवितर्दिकंभद्रवेदिकं ६२ ज्ञातमिति गणिकागृहस्थशिलाद्वारस्य अधोदारुपशुपतेःतत्पादांबुजंयस्पर्शयत् वराहरूपिणा मुरारिणा न ज्ञातम् किंच नासाद्वारोपरिस्थितं दारुशिरःपस्पर्शयत् विधिरूपेणहंसेन मृग्यंमार्गितुंयोग्यं निशिसुंदरदौस्थभाजइति पशुपतेर्विशेषणं पुराखलु शिवरात्रौ परस्परंलोकेशाभिमानि-

ज्ञातंवराहवपुषानमुरारिणायत्पादांबुजंपशुपतेर्गणिकागृहस्य पस्पर्शतत्खलुशिलाविधिहंसमृग्यंनासाशिरोपिनि शिसुंदरदौस्थभाजः ६३ अथार्चकतनुर्भूत्वात्यागेशःसर्वरूपभाक् ऊह्लाटयाररंरात्रौरम्यंकात्रेत्यभाषत ६४ अथार्द्धरात्रेगंभीरांगिरमाकार्यशंकिता तत्रसागरिकामात्राविनिद्रासार्द्धमाययौ ६५ बालेसागरिकेपश्याद्भवपश्यामिकःपुमान् निशीथेसमुहहद्वारमेत्याहूयतिसाहसी ६६ इतिमातार्गलेन्यस्तपाणिस्तस्थौविशंकिता प्राहसागरिकातत्रजननींसुंदराशया ६७ मातःकर्पूरकल्हारजवंतीपुष्पवासना बहिराकर्षतीतूर्णकोयंद्वारिविलोक्यताम् ६८ पूर्वेद्युः कश्चनेत्येवंअर्द्धोक्तेविरामच ऊह्लाटयाररमितिध्वनिरासीद्बहिःपुनः ६९ त्यागेश्वरोवतुसुतेकुलदैवतन्नःलांप्रत्य सावुपगतोननुतर्कयामि आहूतएतिगणिकागृहमर्द्धरात्रेबालापिसाहसमिदंकथमातनोषि ७० ॥ ७ ॥

नेर्विधिविष्णोःतत्पदर्शनायसप्तश्लोकपरिमितंलिंगशरीरंधृत्वानिजचरणमस्तकदर्शनायपरमशिवःतावादिदेश तीच्च अनेककालमन्विष्यअदृष्टचरणमस्तकौशिवंतुष्टुवतुः इतिस्कंदपुराणकथात्रानुसंधेया अधस्ताद्वारुणिशिलानासादारूपरिस्थितमित्यमरः ६३ अथेति अररंअर्गलं ६४ ६५ सागरिकांप्रतितन्मातुर्वचनमाह बालेइति ६६ इतीति सुन्दराशयासुंदरागमनाशया ६७ ६८ ६९

बालेन्द्विति बालेन्दुरेवमौक्तिकंतंञ्जुषतीतितादृशस्य तवपरतंत्रतायुक्ता अयंसुन्दरः एतु आगच्छतु त्वांनृपसन्निधिंआनयामिइत्यु
क्त्वागृहमुखाररभेदकृत्गृहार्गलोद्घाटिनीसामाताविहितार्चकवेशं ईशंददर्शेत्यन्वयः ७१ इतिश्रीमानवल्युपनामकनृसिंहविर-
चितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांद्वादशोऽध्यायः १२॥ ॥ ७ ॥संप्रतिनिजभक्तस्यसुन्दरस्यकामसौख्यानुभ

बालेन्दुमौक्तिकञ्जुषःपरतंत्रतातेयुक्तायमेतुनृपसंनिधिमानयामि उक्तेतिसागृहमुखाररभेदकृत्तंमाताददर्शविहितार्च
कवेषमीशम् ७१ इतिश्रीस्कंदोपपुराणेभक्तविलासेद्वादशोऽध्यायः १२॥ ॥ ॥श्रीअगस्त्यउ॰ मत्वार्चकंह
रंप्राहतदासागरिकाप्रसूः इहतत्किंगुरूणामप्युचितंमद्गृहागमम् १ धन्यास्म्यनुगृहीतास्मिवृशीचेयमिहास्यतां नि
शीथेतादृशोवेश्यासदनंचेन्महान्व्रजेत् २ अपवादपरोलोकोमूढःकिंकिंनवक्ष्यति अनुग्राह्यावयंब्रूहिकिमागम
नकारणम् ३ इतितस्यांब्रुवाणायांस्मयमानमुखांबुजः मायार्चकवपुःप्राहभगवान्परमेश्वरः ४ शृणुसागरिकामा
तः श्रुणोतुचसुतातव श्रेयसेयशसेभूत्यैपुत्र्यास्तेवचनंमम ५ त्यागेश्वरसुहृत्कश्चिदस्तीहखलुसुंदरः सतुसागरि-
कांदृष्ट्वाताम्यत्यंग जमूर्छितः ६ दूतंतस्यागतंविद्धिसांप्रतंत्वद्गृहंप्रति ऐश्वर्यममितंतस्यवयोनवमनुत्तमम् ७ रूपं-
चविद्याप्रथितायया सीत्सुहृदीश्वरः आवयोरिवतेपुत्र्याःप्रणयोस्याप्यखंडितः ८ भूयादनर्घ्यंकौशेयमतस्संप्रतिगृह्यतां इत्यु

वपूर्वकंमोक्षप्राप्तिं वर्णयितुं दूतरूपस्य त्यगेशस्यसागरिकामात्रासहसंल्लापं उपक्रमतेमत्वेति १ धन्येति वृशीकुशासनं व्रतिना
मासनंवृशीत्यमरः २ ३ ४ तां लोभयतिशृण्विति ५ अथयद्वक्तव्यंतदाह त्यागेश्वरसुहृदिति अंगजः कामः ६ ७ रूपमि
ति ययाविद्यया ८ भूयादिति अनर्घ्यं अमौल्यं कौशेयं पट्टवस्त्रम् ९ ॥ ७ ॥ ७ ॥ ७ ॥

१० सागरिकाभिप्रायमाह ममेति ११ १२ १३ १४ भगवानिति द्विजोत्तमाः इतिसंबोधनं अनयोःसागरिकामात्रोः १५ १६ प्राहे
ति नागरिकान्नगरवासिनः स्वप्नेप्रत्येकंप्राहत्यागेश्वरः तत्रहेतुगर्भविशेषणं दिव्यशक्तिमानिति १७ १८ १९ नागरिकाणांविस्म

मातापुत्रीमुवाचेदंतथैवक्रियतामिति व्याजलज्जावतीसातुप्राहसागरिकागुरुम् १० ममत्यागेश्वरादिष्टोवरोभवतिसंम
तःसाक्षाद्यथामेसभवेत्तदानींहिवृणेवरम् ११ तदाकार्य्यार्चकःप्राहत्यागेशस्यापिसंमतं इदमेवसुहृत्तस्ययतोसौसुंदरः
कविः १२ तथासागरिकेकार्य्यमावयोर्यत्तदंतिके पुनःसागरिकाप्राहस्वामिनःसंमतंयदि १३ सएवसाक्षाद्वदतुतथा
कर्त्तास्म्यनंतरं इतितस्यांब्रुवाणायांस्वीयंरूपमदर्शयत् १४ भगवाननयोस्तत्रत्यागराजोद्विजोत्तमाः तेप्रणम्यपदांभो
जेवृषभारूढमीश्वरम् १५ प्रार्थयामासतुर्मुक्तिंदेहांतेस्त्वितिसोब्रवीत् संगमःश्वोस्तुयुवयोइत्युक्त्वाथतिरोदधे १६ प्रा
हनागरिकान्स्वप्नेप्रत्येकंदिव्यशक्तिमान् त्यागेश्वरःसागरिकांसुहृदाघटयेदिति १७ सुंदरंचसमासाद्यसंगमःश्वोभविष्य
ति इत्युक्त्वातत्कृतेस्नेहाद्गाढमाश्लिष्यसुंदरम् १८ सखेतद्रतिकालेमांमाविस्मरयथासुखं विहरेतितमादिश्यधामस्वंप्र
त्यपद्यत १९ अथापरेद्युःसर्वेपिनागरामिलिताजनाः परस्परानुरूपेणस्वप्नालोकेनविस्मिताः २० प्रत्यूषेसागरिकयासुं
दरंसमचोदयन् योजितःसागरिकयानागरैरथसुंदरः २१ स्वर्लोकदुर्लभान्भोगानन्वभूदिहदेववत् सुंदरालिंगना
लापशयनासनभाग्यभाक् प्रापसागरिकानंदंश्रितावल्लीवकल्पकम् २२ मणिविद्रुमसोपानस्वर्णस्तंभविभूषिते मू
र्छितागरुधूपांधपुष्पंधयसमाकुले २३ प्रासादेनिवसन्नित्यंप्रेयसींतामरीरमत् मंदरोन्मथितांभोधिपयःफेनोत्करप्रभाः २४

यमाह अथेति २० २१ स्वर्लोकेति सुन्दरस्यआलिङ्गनादिभाक्सागरिकाकल्पकंकल्पवृक्षंश्रितावल्लीवआनंदंप्रापेत्यन्वयः २२भो

गसामग्रींवर्णयति मणीति २३ २४

२५ योगेशेति तस्यसुन्दरस्यधिषणाबुद्धिःसैवलतेति रूपकं २६।२७।२८।२९वेषट्इतिषटपदी॥ मनोहरतमोऽतिशयेनमनोहरः तथातेनै
वनेषेण ननुस्नानादिकंविनादेवतासंस्पर्शेदोषःस्यादित्याशंक्यशिवभक्तमात्रस्यदोषोनभवति किमुतमित्रस्येति परिहरतिनेति अ
कर्मेविरुद्धकर्ममममदासस्य बंधायनसुहृदःकिमु ३० अदृष्टवशतःकामव्यापारप्रवणस्यतस्यशिवप्रसादात् शिवविस्मरणंक

यत्रशय्याःसुखस्पर्शाःप्रवालकुसुमास्तराः कवेःसागरिकाश्लेषक्रीडासौख्यामृतोर्मयः २५ त्यागेशवंदिनस्त
स्यपुष्पुर्धिषणालतां दिनेदिनेसागरिकानखदंतक्षतांचितम् २६ उत्थायोषसिगच्छंतमर्धभ्रष्टानुलेपनं कपो-
लगर्भसंशोभितांबूलकबलोज्वलम् २७ सुंदरंसुहृदंदृष्ट्वात्यागेशःप्रीतिमानभूत् अथैकदाकृतस्नानंकृतान्हि
कमुपागतम् २८ संनिधौस्तोतुकामंतमुवाचत्यागनायकः प्रातःसागरिकासौधादुत्थितस्यसखेतव २९ वे
षोमनोहरतमःतथानित्यंभजस्वमां नाकर्ममममदासस्यबंधायसुहृदःकिमु इत्यादिष्टोभगवतातथासेवतसुंद
रः॥३०॥ हासावलोकनविलासदृढोपगूढक्रीडासुखानुभवकोटिषुकोमलांग्याः नव्यस्मरसुहृदमासतमंमहेशंत्यागे
श्वरंसगिरिशस्तुतिसुंदरोक्तिः ३१ आकृतान्हिकमासीनंसुंदरंवीक्ष्यचालये अस्पृश्यंगणिकासक्तंधूर्त्तकेचिदूभाषिरे
३२ केचिदीशप्रसादाढ्यंत्यागेशंमेनिरेजनाः सुंदरस्तुसुहृच्छंभोर्निन्दास्तुत्योःसमोभवत ३३ नतस्यगणिकाभोगोदोषायस्मरत
शिवं यथागंगाप्रवाहस्यकर्दमक्षोणिसंगमः ३४ अथैकदासमायान्तंप्रातःसागरिकालयात् करेगृहीत्वापप्रच्छत्यागेशःसुंदरं

दापिनाभूदित्याह हासेति ३१ तथाविधंसुंदरंदृष्ट्वा केषांचि न्निन्दांवर्णयति आकृतेति ३२ अन्येषांस्तुतिमाह केचिदिति निंदास्तुति
भ्यांसुंदरस्यविकाराभावमाह सुंदरस्त्विति ३३ एवंकामव्यापारेपि सदाशिवस्मरणात् पापलेशोषिनाभूदित्याह नेतिदृष्टांतयति य

त्रेति ३४ भक्तमनःपरीक्षणायसुंदरंप्रतिशिवस्यप्रश्न
वदन्निराह अथेति ३५

३६ ३७ ३८ सुंदरस्यशिवेकतानतांवर्णयितुंतदुत्तरमाह मोदेति दृष्टवस्तुदर्शनजन्यआनन्दोमोदःतल्लाभजन्यःप्रमोदःतद्द्वोगजन्यःआनन्दःएतेषांमध्येअहंनकिंञ्चिद्वेद्मिसाक्षिरूपत्वात् त्वमेवजानासीतिभावः तत्रदृष्टांतमाह भोक्तुरिति शयनमध्यस्थस्यभोक्तुःसुखंशयनंयथानजानाति तथापंचकोशांतस्थितस्य साक्षिणस्तवसुखमहंनजानामीत्यर्थः ३९ सर्वेति सर्वेषांदृंद्रियाणांप्रेरयिता

सखेसुंदरइच्छामिकिंचित्सत्यमुदीर्यतां सुखंसागरिकासंगेयादृशंतन्निवेद्यताम् ३६ मच्चकुम्भस्तनस्पर्शेगाढाश्लेषेचयत्सुखं यच्चाधरामृतस्वादेयच्चगोष्ठीषुसुभ्रुवः ३७ सौहार्दादेवइच्छामिप्रश्नोनैवंविधोन्यतः यथानुभूतंतत्सर्वमेतन्मेवक्तुमर्हसि ३८ श्रीसुन्दरउ॰मोदप्रमोदानंदानांनकिंचिद्वेद्मिशंकरभोक्तुःसुखंनजानातिशयनप्रच्छदांशुकम् ३९ सर्वेंद्रियप्रेरयितासर्वलोकगुहाशयः कर्त्ताभोक्तात्वमेवैतज्जानास्यखिलतत्ववित् ४० नासिकर्त्तानभोक्ताचप्रेरणीयस्तवास्यहं यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा ४१ नामरूपात्मकंवस्तुत्वन्मयंसकलंखलु इत्युक्त्वात्यागराजस्यप्रणिपत्यपदाम्बुजे ४२ तस्थौससुंदरस्तूष्णींपार्श्वेभूयोयथाप्रभोः तदाज्ञयाद्विजान्स्तुत्वातिल्लकावनवासिनः ४३ तैश्चसंपूजितस्तेषांबभूवाग्रेसरस्सुधीः तस्यचित्तपरीपाकमवलोक्यमहेश्वरः ४४ ददौवेदांतविज्ञानंयत्रेतद्वीचिवज्जले स्वपादाब्जोदकस्नातंसुन्दरंज्ञानदीक्षया ४५ कृतार्थयतिदेवेशेतत्रासन्सनकादयःप्रणम्यसंशयच्छेदंप्रार्थयत्स्वयतेषपि ४६ ॥ ७ ॥

अंतर्यामिरूपेणप्रेरकःगुहाशयःदहराकाशवर्त्तीकर्त्ताविज्ञानमयःभोक्ताआनन्दमयश्च ४० नेतिप्रेरणीयःप्रेष्यः ४१ ४२ तिल्लकावनंतन्नामकं अरण्यं तत्रस्थान् द्विजान्तदाज्ञयाशिवाज्ञया ४३ ४४ ददाविति वेदान्तविज्ञानं ब्रह्मज्ञानं यत्रएतत्दृश्यंजगत्जले वीचिवत् तरंगइवउत्पद्यते विलीयतेचेत्यर्थः ४५ ४६ ॥

सुन्दरस्यनिश्चलभक्त्याप्रसन्नःशिवःसनकादिसहितायतस्मैतत्वमस्यादिमहावाक्यंउपदिशति निष्क्रियमित्यादिना निष्क्रियंक्रियार

रहितंकूटस्थमित्यर्थःनिर्मलंपापरहितम् निरवद्यंकामादिदोषरहितंनिरंजननिर्लेपं असंगोह्ययमात्मेतिश्रुतेः ४७ परिपूर्णमिति अखंडं अहंप्रत्ययि प्रत्यग्ज्योतिःसर्वसाक्षिचैतन्यंयदस्तितत्जगतः अभिन्ननिमित्तोपादानं मायाविद्योपाधिभेदेनेत्यर्थः त्वं मलिनसत्वप्रधानोविद्योपाधिकः जीवोसिनान्यदित्यर्थः ध्रुवंनिश्चयः सदेवसौम्येदमग्र आसीदितिश्रुत्यर्थमुपदिशति प्रागिति ४८

श्रुत्वैतन्मुनिषुश्रीमान्सुंदरंप्राहशंकरः श्रीमहेश्वरउवाच निष्क्रियंनिर्मलंशांतंनिरवद्यंनिरंजनम् ४७ परिपूर्ण महंप्रत्यग्ज्योतिस्तत्वमसिध्रुवं प्रागासमेकएवाहमस्मिनान्यदसच्चसत् ४८ निलीनेषथसर्वेषुयोवशिष्टोहम स्मिसः अंगुष्टमात्रंपुरुषंगुहाशयमनामयम् ४९ प्रत्यङ्मुखेनध्यायंतिमनसामांमुनीश्वराः मनोमयेषितं भूतंपत त्यसुगणोमया ५० चोदितोतश्चरत्यत्रचित्रंच्छिद्रघटाम्बुवत् रूपंयेनेक्षतेचक्षुःयेनशब्दग्रहश्रुतेः ५१ स्वादुविद्रुसनायेनसोस्मिसर्वेंद्रियांतरः मयिज्योतिषिसूर्योयानुभातेनेत्रदीपवत् ५२ अनुयांतिकृतःसर्वेराजानमनुसैन्यवत् भूतंजातंमयिमृषासिंधौवारिविकारवत् ५३ भिदाभश्चंद्रवन्मिथ्यादृष्टुःस्वप्नेशरीरवत् जायमानेषुभूतेषुलीयमा

निलीनेष्विति सर्वेषुनिलीनेषुसुषुप्तिसमाध्योरसत्वेनबाधितेषुयःसाक्षीसर्वबाधाधिष्ठानतयाअवशिष्टःसोहमस्मिजगद्भ्यै कसाक्षिणस्तस्यबाधोनास्तीत्यर्थः वैश्वानरविद्यामुपदिशति अङ्गुष्टमात्रमिति ४९ प्रत्यगिति मुनीश्वराःमननशीलाःमां प्रत्यङ्मु खेनअन्तर्मुखवृत्त्याध्यायन्ति समाधौसाक्षात्कुर्वंतीत्यर्थः असुगणःइन्द्रियसमुदायः ५० चोदितइति अत्रशरीरेयेनप्रत्यगात्म

नारूपंनीलपीतादिकं चक्षुरिन्द्रियंईक्षते पश्यति येनचश्रुतेः श्रोत्रेंद्रियस्यशब्दज्ञानंभवतीतिशेषः ५१ स्वादुतियेनरसनास्वादुवित् इदमस्वादुनोप्युपलक्षणं सर्वेन्द्रियान्नरःसर्वान्तर्यामीसोदयस्मीत्यर्थः नतत्रसूर्योभातीतिश्रुत्यर्थमुपदिशति मयीति ५२ ५३ भिदेति अम्भश्चन्द्रवत् जलप्रतिबिम्बितचंद्रइवद्रष्टुःपुरुषस्यस्वप्नेशरीरवत् भिदाभेदःमिथ्याअसत्वेसतिभासमानत्वादित्यर्थः मायामात्रभिदंद्वैतमद्वैतंपरमार्थतइत्युक्तेः ५४ नेतिमेघोदयान्ततः मेघोदयनाशाभ्यांवियतः गगनस्ययथाविकारोनास्ति तथामे

नमेविकारोवियतोयथामेघोदयांततः आब्रह्मस्तंबपर्यंतंयस्यज्ञानमनंतरम् ५५ तदस्यहमितिज्ञात्वापशुःपाशादि मुच्यते द्वौसरवायौरवगौ वृक्षंपरिष्वज्यस्थितौविमम् ५६ पिप्पलाशीतयोरन्यस्त्वन्योनश्नन्प्रकाशते कर्मानंदादमे सिंधोःशीकराइवतेमयि ५७ ज्ञात्वेतिमुक्तसंकल्पोदेहीनावर्ततेपुनः आन्वीक्षिक्यादयोविद्यानमद्विज्ञानहेतवः ५८ नमामुपनिषद्दीपःप्रकाशयतितद्विदः भक्त्यैवोपनिषद्वेद्यंचिरेणमदनुग्रहात् ५९ ज्ञात्वामामजसाकृत्स्नि च्छोकंतरतिदुस्तरं यथोर्णनाभिःसृजतिग्रसतेचतथेश्वरः ६० सृजत्यवत्यतिजगदितिज्ञात्वाविमुच्यते मामेवस र्वभूतानांहृदिस्थंपरमेश्वरम् ६१ तरंतिशरणंप्राप्यकृतार्थाःसर्वसाक्षिणं इतिवेदांतजंज्ञानंदत्तंसुंदरतेमया ६२

असंगस्यआत्मनःजगदुत्पत्तिलयाभ्यामितिभावः प्रज्ञानंब्रह्मेतिमहावाक्यार्थमुपदिशति आब्रह्मेति ५५ तदिति पशुर्जीवः द्वौसुपर्णा वितिश्रुत्यर्थमुपदिशति द्वाविति खगाविवखगौ द्रुमंवृक्षंशरीराख्यंपरिष्वज्य आलिङ्य द्वौजीवेश्वरौस्थितावित्यर्थः पृथ्पिप्पलाशीति तयोर्जीवेशयोरन्योजीवःपिप्पलंविषयसुखं अश्नाति तच्छीलःअन्यः ततोभिन्नःईश्वरः अनश्नन् भोगमकुर्वन् प्रकाशतेसाक्षिरूपेण त्यर्थः कर्मानन्दाःकर्मजन्यसुखविशेषाः ५७ ज्ञात्वेति आन्वीक्षिकीतर्कविद्याआदिपदेनसांख्यादयोगृह्यंतेताः भेदप्रधानत्वात्आ

सज्ञानकारणानिनभवन्तीत्यर्थः ५८ नेतिउपनिषदेवदीपःभक्त्यैवेति कारणान्तरनिषेधोक्तिः ५९ ज्ञात्वेति तरतिशोकमात्मविदितिश्रुतेः ऊर्णनाभिःकोशकारकीटविशेषः ६० सृजतीतिसर्वेभूतानां हृदिस्थंईश्वरःसर्वभूतानां हृद्देशेर्जुनतिष्ठतीतिस्मृतेः ६१ तरन्तीतिउपसंहरति इतीति ६२ ६३ ६४ मदिति ब्राह्मीब्रह्मसंबंधिनी सर्वंमद्रूपं सर्वंखल्विदंब्रह्मेतिश्रुतेः विज्ञायज्ञात्वानिन्दाःपामरलोककृताःन

विरक्तएतद्विज्ञायमुच्यतेकर्मबंधनैः श्रद्धयापरयाभक्त्यातपसागुर्वनुग्रहात् ६३ संच्छिन्नसंशयोधन्यः कश्चिदेवविमुच्यते तस्मात्सुंदरमामेवशरणंप्राप्तवानसि ६४ मत्प्रसादात्त्वयाविद्याब्राह्मीलब्धासुखीभव विज्ञायसर्वंमद्रूपंनिंदाश्चस्मरिष्यसि ६५ त्यक्तंयथाहिनिर्मोकंनचवैस्मरतेपुनः द्दमामेचिन्मयींमुद्रांध्यात्वाजन्मांतवान्ह्यहि ६६ इत्युक्त्वादर्शयन्मुद्रांत्यागेशःस्वस्यचिन्मयीं संच्छिन्नसंशयाःसर्वे सनकाद्याश्चसुंदरः ६७ सहस्रकृत्वस्त्यागेशंप्रणेमुःपूर्णमानसाः अथाज्ञप्ताभगवतातेजग्मुस्सनकादयः भावयंतोज्ञानमुद्रांनित्यं त्यागेशदर्शिताम् ६८ दीप्तोपचारंपरमेशकृत्यंसमापयन्स्तोत्रशतेनसुंदरः विमुक्तसंगोविषयेषुनिर्वृतिंपरामवापस्मरन्नित्यप्रसादतः ६९ श्रीअगस्त्यऊ· चरितंसुंदरस्यैतत्शृण्वंतिचपठंतिये तेषांशिवप्रसादेनमुक्तिःस्यान्नात्रसंशयः ७० इतिश्रीस्कंदोपपुराणेत्रयोदशोऽध्यायः १३ ॥ ❀ ॥ ७ ॥ ❀ ॥

स्मरिष्यसि ६५ तत्रदृष्टान्तमाह त्यक्तमितिनिर्मोकंत्वंच स्वोपदिष्टवेदान्तज्ञानदार्ढ्यायज्ञानमुद्रांदर्शयति द्दमामितिजन्मांतवान् जननमरणवान् ६६ ६७ सहस्रेति सहस्रकृत्वःसहस्रवारान् ६८ ६९ शृण्वतांमुनीनामगस्त्यः एतदध्यायश्रवणपठनफलमाह चरितमिति ७० इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंन्दोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांसुन्दरस्यज्ञानोपदेशवर्णनंनामत्रयो

अथनीलकंठोपाख्यानमारभ्यते तत्रअस्यग्रन्थस्यभक्तिप्राधान्यात् वर्णाश्रमहीनानामनधिकारिणामपि भक्तिवशान्महादेवः मुक्तिं द
दातीतिदर्शयितुंकुलालस्यनीलकंठस्यचरितंवर्णयन्अगस्यःमुनीनांभक्तिदार्ढ्यायशिवमष्टभिःप्रथमंस्तौतिनदेवतमित्यादिना १ स्वेति
शिवस्यैवकालभयमोक्षणेशक्तिरितिमार्कंडेयोपाख्यानेस्पष्टं तस्यकालस्य २ प्रारब्धेति प्रारब्धकर्मणांभोगादेवक्षयइतिनियमेनत
धीन सुखदुःखानां अतएवभूत्वा भूत्वाविनश्यतां अनादिसंसारप्रवाहपतितानामित्यर्थः देहिनां शरीरिणांएकः अद्वितीयःएकोरु-

अथकुलालकुलोद्भवस्यश्रीनीलकंठस्यचरित्रारंभः श्रीअगस्त्यउ॰ नदैवतंमहादेवादपरंसुलभार्चनं दृथापरिश्रमोलोकः
सेवतेदेवतांतरम् १ स्वकालभयमोक्षायशक्तिर्नान्यस्यकस्यचित् भीतःकालाज्जनस्तस्यसेवयाकिंकरिष्यति २ प्रार
ब्धाधीनभोगानांभूत्वाभूत्वाविनश्यतां उपास्योदेहिनामेकोभगवान्कालशासनः ३ फलंतुसुमहत्तस्यभजनेह्यपुनर्भवः
सुकरंचास्यभजनंमूढःश्लिष्यतिसंस्तौ ४ अनन्यप्राहरोभक्त्याप्रसीदतिदयानिधिः प्रसादादस्यमुक्तिश्चनज्ञानान्नापिक
र्मणः ५ अधिकारिविशेषेपिज्ञानंकर्मप्रवर्त्तते सर्वेधिकारिणोभक्तेरितिशास्त्रेषुनिर्णयः ६ ॥ ७ ॥ ७ ॥

द्वेनद्वितीयोवतस्थेइतिश्रुतेः भगवान् उत्पत्तिंचविपत्तिंचभूतानामागतिंगतिंवेतिविद्यामविद्यांचसवाच्योभगवानित्युक्तलक्षणः का
लशासनःमृत्युंजयएवउपास्योनान्यइत्यर्थः ३ कुतइत्याह फलंत्विति अपुनर्भवोविदेहमुक्तिः ननुतद्भजनमेवदुष्करमित्याशंक्य
परिहरति सुकरमिति मूढःसौकर्यानभिज्ञः ४ अनन्ययेति मुक्तेर्भक्त्येकसाध्यत्वमाह नज्ञानादिति ५ ननुश्रुतेज्ञानान्नमुक्तिःउभा
भ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यामित्यादिनाज्ञानकर्मणोःसाक्षात्परंपरयामुक्तिसाधनत्वश्रवणात् न
ज्ञानान्नापिकर्मणइत्यसंगतं इत्याशंक्यतयोःअधिकारिविशेषपरत्वात्भक्तेश्चसर्वोपयोगितयाभक्तिरेवप्रबलंसाधनमितिदर्श

यति अधिकारीति अर्थीसमर्थोविद्वान् शान्तोदान्तदृस्यादिना विद्वत्तादिगुणविशिष्टः शान्त्यादिगुणविशिष्टश्च कर्मणिज्ञानेचाधि कारीभक्तौतुसर्वेधिकारिणः चण्डालोस्तुसतूद्विजोस्तुगुरुरित्येषामनीषाममेति भगवतपादोक्तेः किंचभक्तिरसिकाः मुक्तिमपिने च्छन्तीत्यत्रनपरिलषन्तिकेचिद्रपवर्गमपीतिभागवतादिकंप्रमाणंद्रष्टव्यं इ भक्तिमार्गस्यसौलभ्यं दर्शयति भक्त्येति ७ साध

भक्त्याकेवलयाजंतोःपत्रपुष्पफलादिभिः प्रसीदत्यर्चितःशंभुर्नविद्यासत्कुलादिभिः ७ विनायोगेनसांख्येनत पसोत्तमजन्मना कर्मणाविद्ययाचापिभक्त्यामुक्तास्सहस्रशः ८ अत्रैवोदाहरंत्येतच्चरित्रंशृणुतद्विजाः यस्य श्रवणमात्रेणप्रसीदतिमहेश्वरः ९ अस्तिभूमंडलस्यास्यमंडनंक्षेत्रमुत्तमं श्रीमच्चिदंबरंनाम्ना दर्शनान्मुक्ति दंनृणाम् १० यत्रस्वर्णसभामध्येनृत्यंदृष्ट्वापिनाकिनः बभूवतुमुक्तबंधौव्याघ्रपादपतंजली ११ महेशंयजतांय त्रब्राह्मणानांगृहेगृहे अग्निहोत्रोत्थितोधूमःसायंप्रातश्चपावनः १२ हविराज्यपुरोडाशपुण्यगंधमनोहरः दिग्वधू मुखकस्तूरीपत्रभंगांकुरायते १३ तत्रकश्चित्कुलालोस्तिकुंभकारकुलोत्तमः दिवित्वष्टरिवामुष्यभुविनिर्मा णकौशलम् १४ सनित्यंशिवगंगायांस्नातःशिवकथाश्रुतिः नित्यंनवभांडजातंनृतराजमुदेददौ १५ ददातिशिवभ क्तेभ्योवांछितंपात्रमुत्तमं संभावयन्शिवाकारान्शिवभक्तानसेवत १६ भार्याचास्यवरासाध्वीशिवभक्त्यामहीयसी त यान्वितस्यभक्तस्यनासीद्दूशकरःसुतः १७ नचानपत्यभावेनखेदस्तस्याभवत्क्वचित् श्रीमच्चिदंबराधीशेभक्त्यानंदमु

नांतरनैरपेक्ष्येण भक्त्यैवबहवस्तीर्णादृत्याह विनेति ८ आख्यायिकामाह अत्रेति ९ १० यत्रेति यत्रक्षेत्रे व्याघ्रपादपतंजलीऋ षी मुक्तबंधौ बभूवतुः दृश्यंच कथा स्कन्दपुराणेप्रसिद्धा ११ १२ १३ १४ सदृति शिवगंगायां तत्रस्तीर्थेनृतराजस्यशिवस्यमुदे हर्षा

शृण्वतःशिवमाहात्म्यंशिवगंगातटेन्वहं सकलस्यनटेशस्यबिंबेचित्तमभूद्दृढम् १९ कदाचित्स्वप्नसंदृष्टांस्मरतःशं
भवींकथां कंठनालेमहेशस्यकालकूटप्रभांचिते २० रतिरासीत्तदारभ्यनीलकंठेतिसर्वदा तदासर्वैर्जनैर्नाः
म्नानीलकंठःकृतोहिसः २१ तस्यैवंवसतःकालःसुमहानत्यवर्त्तत अथप्रावृषिसायान्हेकदाचिद्गांडमुत्तम
म् २२ प्रदत्वानृत्तराजायप्रतस्थेस्वगृहंप्रति अंतरामहतीवृष्टिर्मरुद्वातसमन्विता २३ तयानज्ञायतेभू=
मिर्द्यौर्दिशोध्वातुकिंपुनः आसारपीडितश्चायमार्द्रवस्त्रश्चखिन्नधीः २४ आसन्नवेश्यासदनद्वारभूमितदा=
ययौ तन्नीलकंठंविज्ञायवेश्यातद्गृहवासिनी २५ नीत्वातमंतस्सदनंवन्हिप्रज्वाल्यसेंधनैः अनार्द्रवसनंद
त्वाताम्बूलादिसमर्प्यच २६ ददावागरवालेपंशैत्यंयेनोपशाम्यति अथासौविरतेवर्षेनीलकंठोनुमोदितः २७
वेश्ययास्वगृहंप्रापसोगरागविभूषितः शयानोभार्ययालेपंप्रतिदृष्टःससत्यवाक् २८ सर्वंजगादतत्त्वेनतस्याः
शंकामहत्यभूत् चिरायवेश्यासक्तस्त्वंनाद्यप्रभृतिमांस्पृश २९ नीलकंठोपरितःशापोदूरेस्थितोभव इतिसा
ध्व्यापिसप्रोक्तःतदाप्रस्रश्रृणोत्क्रुधा ३० आदेहपातं नैवत्वांस्पृशामीतिनिशम्यतत् चकंपेसापरंसाध्वीसात्वया=
मासतंपुनः ३१ प्रतिज्ञांनात्यजत्सोपितयोरिंद्रियनिग्रहात् भक्त्यानटेशःसंप्रीतःप्रसादंकर्त्तुमैहत ३२ मुनिवेशमु
पादायहरस्तत्सदनंययौ तमुत्थायप्रणम्याथनीलकंठोभ्यपूजयत् ३३ किंकार्य्यमितिपप्रच्छदत्वासनमनुत्तमं स्मयमानो

शापसंबंधिनं २७ २८ २९ नीलकंठेति ततःतस्मात्नीलकंठोपरिशिवोपरिशापःशपथःयदिमास्पृशतीत्यर्थःप्रस्रश्रृणोत्प्रतिज्ञातवती ३० ३१

३५ ३६ न्यासेति न्यासभूतं निक्षेपभूतंदृढंपात्रं ३७ ३८ न्यासरक्षणे तस्यसावधानतामाह सदृति ३९ न्यासरक्षिणां उत्तमलोक

नयोगिनोमेवांछास्तिकुत्रचिद्दृश्यवस्तुषु तथापिकिंचिद्वाक्यंमेनीलकंठनिशम्यताम् ३५ तपसापात्रमेतन्मेः प्राप्तमन्येनदुर्लभं यदाहंयच्चवांछामिददाम्येतद्भिमेतदा ३६ न्यासभूतमिदंरक्षयावदागमनंमम इत्युक्तात स्यहस्तेतत्प्रदायाद्भुतभाजनम् ३७ ययौमुनिःस्वैरगतिःसचतत्संररक्षह यथानकोपिजानातिपात्रमेतगृहेस्थितम् ३८ सगत्वायत्रकुत्रापिपुनरेत्यतदैक्षत देहांतःप्राणवत्तेनरक्षितंभाजनंगृहे ३९ न्यासंरक्षंतियेन्यस्य ते षांलोकाःसनातनाः हस्तेतस्यमुनेर्न्यासंपात्रंदत्वाकृतार्थताम् ४० यास्याम्यायास्यतिकदासचेतिसमचिंतयत् इतिचिंतापरेतस्मिन्देशमायाप्रकल्पितम् ४१ तिरोबभूवतत्पात्रंशास्त्रमस्मरतोयथा अथागत्यमुनिःप्राह नीलकंठेनपूजितः ४२ त्वयिविन्यस्तपात्रस्यदेशांतरचरस्यमे नकदाचिद्विचारोस्तिप्रसीदतुतवेश्वरः ४३ देहिपात्रंमदीयंतन्मायंद्रक्षतिमातवत् अन्नाभ्यंजनवस्त्राणिप्रदायाभीप्सितान्यहो ४४ नीलकंठोपितच्छ्रुत्वायत्रतत्स्थापितंगृहे नदृदर्शसतत्पात्रमन्विष्यमपितत्सुनः ४५ भार्यामाहकुतत्पात्रंनेवावैमीत्यभाषत किं मायाकिंनदुःस्वप्नउपसर्गोथिभौतिकः ४६ अपवादाम्बुधेरस्मान्नीलकंठोद्धरत्वमां नोचेद्दिमानहंप्राणान्त्सापवादान्नधारये ४७ इतिनिश्चित्यमनसामुनेरंतिकमाययौ मुनीश्वरोपितंप्राहनीलकण्ठाभुदीयतम् ४८ मदीयं पात्रमधुनाविलम्बःक्रियतेकथम् अथतंप्रणतःप्राहभीतःशोकविमूढधीः ४९ ॥ ७ ॥ ७ ॥

ग्रामिमाह न्यासमिति ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ७ ७ ७ ॥

इदमाकर्णयस्वामिन्नपराधंक्षमस्वमे सुरक्षितंततेतत्रात्रंदुरितान्मेनदृश्यते ५० अन्यत्तत्सदृशंपात्रंददामिप्र
तिगृह्यताम् श्रीअगस्त्यउ॰ नीलकंठेब्रुवत्येवंचुकोपसमहामुनिः ५१ ततस्त्वसौमुनिःसर्वान्मेलयित्वेदमब्रवीत्
अहोपश्यतदौरात्म्यंकुंभकारस्यदुर्मतेः ५२ अपहृत्येष्टदंपात्रमृत्पात्रदातुमिच्छतः व्याघ्रस्यगोमुखस्येववच
नाच्चातुरीतव ५३ दृष्टोसिवंचितोवेषभस्मरुद्राक्षधारिणः गांदोग्ध्रीमपहृत्येवप्रदातुंखरमिच्छति ५४ यदिक
स्यापितल्लोकेचरितंसंमतंभवेत् शृण्वंतिवाकथांनित्यंभस्मरुद्राक्षभूषिताः ५५ परद्रव्यापहारायपरंभ्रमः
तिसाधुवत् बलादपहृतद्रव्यंकुलकोटिंध्रुवंहरेत् ५६ नीलकंठततोहंत्वांब्रवीम्याज्ञानिवर्त्यतां अथवान्व
यकोटीभिनिरयेपत्तनंध्रुवम् ५७ सहमानोदुरुक्तिंचप्राजलिःप्रणिपत्यतं नमयापहृतंपात्रंसत्यमित्याहकुंभक
त् ५८ नीलकंठमथप्राहसमुनिर्जनसंसदि त्वद्वाक्येमेनविश्वासोयदिसत्यंब्रवीषिच ५९ शिवगंगाभसिस्ना
त्वाकुलतंतोःशिरस्पृश॥ अनपत्योसिचेद्वार्यंहस्तेकृत्वार्द्रवस्त्रभृत् ६० नटेशसन्निधौस्नात्वासत्यमेतदुदाहर
नष्टंचेदस्तुतत्रात्रहतस्त्वत्संगमाद्हम् ६१ प्रतिज्ञाभंगभीरुस्तनानुमेनेसकुंभभृत् निनायाथबलाद्योगीन
टेशपदसेविनाम् ६२ यज्ञनासंसदंचैवव्याजहाराखिलंचतत् प्रत्ययःकार्यइत्युक्तासचस्वाश्रुतमभ्यधात्
६३ सचनैवंविधास्येतिमुनिःप्राहाथतेऽवदन् नीलकंठमुनिःक्रूरःप्रतिज्ञायुवयोर्यदि ६४ उपायस्तत्रदृष्टोयंसद
सैे श्रूयतामयं अपवादोन्यथावास्याज्ज्ञानात्प्राप्तवतोश्चिरम् ६५ ननटेश्वरभक्तस्यभवंतिविपदः क्वचित् मुनि

महातीर्थस्नानीयप्रस्तावतृतीयाध्यायस्तावत् ६६

संघीभूयेति सदस्यानांजलदिव्यानुज्ञांवदति कोटीइति कोटीश्चयभागौ ६७ ६८ ६९ ७० अध्यायश्रवणपठनफलमाहयइति ७१ ७२ इतिश्रीमानवल्लुपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांनीलकंठोपाख्यानंनामचतुर्दशोऽध्यायः॥ १४॥ ॥ ॐ ॥ उक्तमनूद्यभक्तिमार्गस्यसौलभ्यंदर्शयितुं चतुर्भिःश्लोकैश्चरितमिति १ द्वितीयमनुवदति तथैवेति २ ननुश्रोतव्यः

संघीभूयमहांतोयदंडंश्रेयसेहितत् कोटीद्वेवेणुदंडस्यगृहीत्वाद्वौयुवामिह ६७ शिवगंगांभसिस्नात्वाप्रत्ययं ददतांमुनेः इतियज्वनिसाहस्रप्रोक्त्वाक्यंनिशम्यतौ ६८ दंपतीवेणुदंडस्यकोट्यालंब्यममज्जतुः शिवगंगांभस स्तस्मादुन्मज्जतौयुवाकृतौ ६९ तौमुनिंवृषभारूढंनटेशंतमपश्यतां तयोःप्रसन्नोभगवान्दत्वामुक्तिमभीप्सि ताम् ७० सहताभ्यांचिदाकाशंस्वधामप्रत्यपद्यत यःपठेदिदमध्यायंश्रृणुयाद्वासमाहितः ७१ नटेश्वरप्रसादेन पुनर्जायतेभुवि ७२ इतिश्रीस्कन्दोपपुराणेचतुर्दशोऽध्यायः१४॥॥ऋषयऊ· चरितंसुंदरस्योक्तंसर्वज्ञस्यमहात्मनः भ क्त्यावशंगतोयस्यगुरुरासीन्महेश्वरः१ तथैवनीलकंठस्यशिवकैंकर्यकारिणः आकर्णितंतच्चरितंभक्तिमान्योनटेश्व रे २ नयेषामधिकारोस्तिवेदांतज्ञानसाधने स्वयंचकर्त्तुंकैंकर्यमशक्तास्त्रिपुरद्विषः ३ अथापिमुक्तिंवांछंतिनिकृष्ट कुलसंभवाः केनप्रीतोददात्येषांमुक्तिमीशस्तदुच्यताम् ४ अगस्त्यऊ· अत्रेतिहासंब्रुवतोमत्तःशृणुतभूसुराःयस्यश्रवणा

श्रुतिवाक्येभ्यः तमेतं वेदानुवचनेनब्राह्मणाविविदिषंति इत्यादि वाक्यैर्ब्राह्मणस्यैवाधिकारोनान्येषां किंच सेवाधर्मः परमगहनः इत्यादिना शिवभक्तिरपि दुष्करा ततकथं मुक्तिरिति शंकतेन येषामिति ३ अंगीकृत्य पुनःश्लोकेन अथापीति निकृष्टकुलसंभवाः शूद्रादयः ४ तेषां उत्तरंदातुं आख्यायिकामवतारयति अत्रेति इतिहासं पुरावृत्तं ५

ज्ञानाधिकारिणामिति ब्राह्मणानामित्यर्थः अनुरूपार्चयावैदिकः ज्ञानयज्ञेनकर्मयज्ञेनचेत्यर्थः ६ निकृष्टेति स्वभक्तपूजयैवेत्येवकारेण वेदाध्ययनादिनैरपेक्ष्यंदर्शितं ७ यद्यदितिस्पष्टं ८ नन्वेवंशिवभक्तस्यपूजया केमुक्ताइत्याशंक्यबहवःसन्तीत्याह॥ बहवइति ९ तीर्थेति व्रतंउपवासादि दानंगोदानादि पूर्त्ततडागादिखननं निगमोवेदः १० इतिहासमुपक्रमते अस्तीति ११ वर्षेति संवत्सर

ज्ञानाधिकारिणांपुंसामपिकर्माधिकारिणां अनुरूपार्चयाशंभुःयथाप्रीणातिसर्ववित् ६ निकृष्टकुलजातानांज्ञा
नकर्मजडात्मनां स्वभक्तपूजयैवेशःतथाप्रीणातिदेहिनाम् ७ यद्यदिष्टतमंलोकेशिवभक्तस्ययाचतः तत्तत्प्र
दायहीनोपिजात्यासद्योविमुच्यते ८ बहवःसंतिभूलोकेशिवभक्तैकपूजया विमुक्तबंधनाःसद्योमुक्ताःशंभोरनु
ग्रहात् ९ तीर्थाटनाध्वरतपोव्रतदानपूर्त्तसन्मंत्रतंत्रनिगमागमवर्त्मभाजां प्रीणातिसर्वजगतांपतिरिन्दुमौलिस्त
द्यथास्वपदभक्तजनेषुभक्त्या १० अस्तिदक्षिणदिग्भागेकावेरीतीरभूषणं नगरंधनिनांलोकेवणिजांधनवर्ध
नम् ११ वर्षमात्रनिवासेनयत्रक्षुद्रोपिनिर्धनः संपदंमहतींप्राप्तःस्पर्धतेधनदेनच १२ हृतेषुनवरत्नेषुवणिग्भिर्य
न्निवासिभिः क्रोशतीवमहांभोधिःउदस्तोर्मिकरोन्वहम् १३ तत्रासीदूरुजःकश्चिद्धनदेनसमःश्रिया ख्यातोमहाधनो
रत्नपरीक्षासुविचक्षणः १४ सकृत्तस्यकरस्पृष्टंअत्यल्पंवर्द्धतेधनं तस्यार्णवचराःसर्वेनौधनाःपादसेविनः १५ बाल्येते
नोषितंद्रव्यंमहामेरुरिवापरः भार्यावसुमतीनामसर्वलक्षणसंयुता १६ तस्यासीद्बंधुकोटीभिःयस्याःपरिवृतंजगत् सत

मात्रनिवासेन धनदेनकुबेरेणसहस्पर्द्धतेजिगीषांकरोतिततोप्यधिकसंपत्मवतीत्यर्थः १२ हृतेष्वितिउदस्ताऽक्षिप्ताऽर्मयःतरङ्गाएवकरायेन १३
तत्रेतिऊरुजःवैश्यः १४ सकृदितिनौधनाःनावएवधनंयेषांनौकाव्यवहारनिपुणाइत्यर्थः बाल्येतिउषितंकांक्षितंसंपादितमित्यर्थः १५ १६ १७

भोगाननर्घ्याभरणालेपस्रग्वस्त्रभासुरः एवंभार्यासमेतस्यसमयःसुमहानगात् १८ व्रतचर्यापरस्यासीन्नापिवंश
करस्सुतः सदारःखिन्नधीस्तेनपरित्यक्तविभूषणः १९ वाणिज्येकल्पयित्वैकदासंतत्क्षींगृहेवसत् एकदासतुकावे
र्योग्रातःस्नात्वासहस्त्रिया २० गृहंजिगमिषुस्तीरेपौराणिकमवंदत सतेनास्वेतिनिर्दिष्टःस भार्यश्चाशृणोत्कथाम् २१
तस्माच्छिवपुराणानिपठतोब्राह्मणोत्तमात् श्रुत्वाशिवकथाःपुण्याःभक्तिस्तस्यशिवेभवत् २२ दिनेदिनेपुराणस्य
श्रवणासक्तचेतसः सभार्यस्यविरक्तस्यशांताविषयवासना २३ तोदंपतीद्विजंदृष्ट्वाशिवतत्वेषुनिष्ठितं प्रसाद्यप्राप
तुर्मंत्रंपंचाक्षरमनुत्तमम् २४ क्षेत्रवस्त्रगृहादीनितस्मैदत्वाविशुद्धधीः सदाशिवपुराणेषुसंसक्तोभून्महाधनः २५
गुरुंकदाचित्पप्रच्छविनीतोविहितांजलिः मुमुक्षोर्मेकथंमुक्तिर्भवितेशप्रसादतः २६ ज्ञानेनकर्मणावापिविहि
तेनयथाविधि उपासितोजगत्कर्त्तापप्रसीदतिमहेश्वरः २७ नतयोरधिकारोमेकथंमोक्षोभविष्यति प्रशंसंतिपु=
राणानिकर्मणोज्ञानमुत्तमम् २८ इमंमेसंशयंछिंधिसर्वज्ञोसिदयानिधे इत्याकर्ण्यगुरुस्तस्यवाक्यमेतदभाषत
२९ विश्वासोयदिमेवाक्येप्रसीदतिमहेश्वरः संशयश्चेद्गुरोर्वाक्येसंशयात्माविनश्यति ३० असत्संगंपरित्यज्यसदा
सत्संगवान्भव असतांचसतांचापिशृणुवक्ष्यामिलक्षणम् ३१ यत्परिज्ञानमात्रेणमतिःसत्संगतोभवेत् देहात्मवा
दिनोवित्तगृहक्षेत्रेषुसस्पृहाः ३२ लौकिकव्यवहारेषुसंसक्ताःसद्विलक्षणाः एषुयेसंगतावैश्याःशोकस्तेषांदुरत्यय

कापत्तिकाः पामराश्च ३२ लौकिकेति एषुपामरेषुसंगताःवैश्याःतेषां शोकःसंसाररूपोदुरत्ययः दुस्तरइत्यर्थः ३३ ॥ ७ ॥

नतेसंभाषिणीयास्तेसंतोयेषामसंमताः सतांचलक्षणंतावदुच्यमानंमयाशृणु ३४ शिवएवजगत्कर्त्तेशिवेस
र्वंप्रतिष्ठितम् कर्मोधकारेभ्रमतांमार्गदर्शीसभानुमान् ३५ सएवशरणंनान्यदैवतंधर्मसाधनं शिवगौरीपते
शंभोजयचंद्रकलाधर ३६ मांकालकवलंपाहिकालशासनशंकर इतियेशिवनामानिकीर्तयंतिदृढव्रताः ३७
शिवलिंगार्चनपराभस्मरुद्राक्षधारिणः पापिनामपिमुक्तिः स्यान्नूनंतत्पादसेवया ३८ यद्यदिष्टतमंतेषांभक्ताः
नांपरमेश्वरे तद्दानाद्भवतिक्षिप्रंशिवानुग्रहभाजनम् ३९ प्रीणातिनतथाक्षिप्रंकुर्वतांस्वपदार्चनं भक्तोपासन
याशंभुर्यथारुद्रेतितुष्यति ४० कुर्वन्लोकविरुद्धामिशिवभक्तमुदेनरः शिवप्रसादात्संसारशोकंतरतिदुस्तरम्
४१ निषेव्यशिवभक्तांघ्रिमिष्टवस्तुसमर्पणात् ज्ञानाभ्यासप्रसादेनविनामुक्तोभविष्यसि ४२ इतिस्वगुरुणादिष्टः
तंप्रणम्यतथेतिसः भाग्यवान्शिवभक्तानांपादसेवांचकारह ४३ भस्मांकितालिकंदृष्ट्वातथारुद्राक्षधारि
णं ॥ नमस्करोतिशतशःतद्भीष्टंप्रयच्छति ४४ प्रददात्यखिलम्वेनदुर्लभंतद्भीप्सितं भस्मानुलिप्तसर्वांगोरु
द्राक्षस्रगलंकृतः ४५ नित्यान्नदाताभक्तेभ्यस्तदुच्छिष्टाशनोभवत् पतिव्रताचतद्भार्याभर्तुरिष्टानुसारिणी ४६
अनुकूलास्यकृत्येषुगुरुवाक्येनचोदिता बांधवास्तस्यतत्कर्ममिलितानानुमेनिरे ४७ निषेतुःप्रतिषेधंचसते
पांनाशृणोद्दचः उच्छिष्टभोजिदासोऽयंवंचितोभस्मधारिभिः ४८ करोत्यनुचितान्येवद्योचिसारिपुरस्कृतः इतिं

४६ अनुकूलेति तस्यवैश्यस्यबांधवाः ज्ञातयःमिलिताःसंगताःसंतोततद्दानादिकर्मणा नानुमेनिरे अनुमतिंनचक्रुः ४७ ४८ ४९ ॥ ॥

नकश्चिच्छिवभक्तोस्तिसतेनानर्चितोहियः इतीशभक्तदासस्यमहान्कालोभ्यवर्त्तत ५० सर्वेब्राह्मणसात्कृत्य॰
यत्नेनार्जितंधनं भक्तपादजुषस्तस्यप्रसन्नोभूदुमापतिः ५१ पंचविंशतिवर्षस्यब्रह्मबंधोर्विधायसः वेषंमध्या
न्हसमयेतद्गृहद्वारमाययौ ५२ भिक्षांदेहीत्युवाचोच्चैर्मुहुरेवाचितालिकः सासम्यगन्नमादायतद्भार्यानिरगाद्गृ
हिः ५३ तांविलोक्यद्विजस्तस्यौतरुणींधूर्त्तशेखरः भिक्षांगृह्णेत्युक्तोपिप्रतिजग्राहनैवसः ५४ तस्याःस्तनोमु
खंचापिस्तब्धदृष्टिरवैक्षत तद्दृष्टिंकिनीसाध्वीनाथमेहीत्युवाचसा ५५ तंप्राप्यभिक्षांगृण्होष्वेत्युवाचसमहा
धनः तमुवाचमहादेवःप्रहसन्छद्मनाविटः ५६ आगतोनान्नभिक्षार्थंलभ्यतेऽन्नंगृहेगृहे द्विजस्यनास्तिदेहि
भिक्षाम्मेभस्मधारिणः ५७ अथप्रणम्यतंवैश्योभिक्षांपप्रच्छकामितां दीयतेयदिवक्ष्यामिनोचेद्यास्येयथागत
म् ५८ सविप्रेणैवमुक्तस्तुगाविलंबोऽस्तुगृह्यतां इत्युक्त्वापादयोस्तस्यसनत्वासीत्कृतांजलिः ५९ ययाचेत्तरु
णींभिक्षांनिर्विशंकोद्विजोविटः अविचार्यसभार्योचप्रददौतत्रशंभुधीः ६० प्रचोदिताचसाभर्त्राद्विजंप्राजलिर
न्वगात् बांधवास्तस्यकुपिताःब्राह्मणंहंतुमाययुः ६१ निरोधकारिणोबन्धून्खड्गपाणिर्जघानसः स्वधर्मविद्वि
जोबन्धूननिहत्यसविलोकयन् ६२ नब्राह्मणंददर्शाथभार्यांपप्रच्छविस्मितः तयानवेत्तीत्युदितःसंस्मरन्हृदिशं
करं ६३ ददर्शवृषभारूढःसहगौर्यामहेश्वरः स्तूयमानःसुरगणैःसचान्यैश्चगणैर्वृतः ६४ गत्वासवैश्यदंपत्योर्मुक्तिं
मुनिगणोचितां पश्यतांसिद्धसंघानांसंधामप्रत्यपद्यत ६५ किंकर्मणाबहुविधेनचदुष्करेणज्ञानेनकिंबहुषुजन्मसु

भक्त्याप्रसीदतिपरंभगवान्महेशोतस्माद्विरूज्यसकलंभवताशुभक्ताः ६६ इतिश्रीस्कन्दोपपुराणेपंचदशोऽध्यायः१५॥ ॥७॥श्रीअगस्त्यउ॰ शिवभक्तान्नपानीयप्रदानस्यान्वहंद्विजाः नतुल्यंसुकृतलोकेशंभोःप्रीतिकरंभवेत्१ भूषणंभूतलस्यास्तिकनिषुघटिकापुरं ब्राह्मणैःक्षत्रियैर्वैश्यैःस्वकर्मनिरतैस्सदा २ शूद्रैरपिद्विजातीनांशुश्रूषणपरायणैः संपूर्णशिवभक्तैश्चशिवव्रतधरादरैः ३ तत्रकश्चिदभूत्ख्यातोमारोनामपदोद्भवः शूद्राणांशिवभक्तांघ्रिसेवयेशःप्रसीदति ४ एवंगुरूपदेशेनस्थिरबुद्धिःसजायया सहनित्यान्नदानेनशिवभक्तानपूजयत्५ तस्यन्यायार्जितंद्रव्यमवर्द्धतसमुद्रवत् सर्वंतदुक्तपूजायैविनियोजयतिस्मसः ६ आरभ्योदयमारान्नप्रभातेचदिनेदिने ददातिशिवभक्तानामिष्टमन्नंचतुर्विधम् ७ तस्यभक्तिपरीक्षायैमतिंचक्रेमहेश्वरः अपुत्रस्यसभार्यस्यभक्तानामन्नदायिनः ८ धनजातमशेषंचतस्यसर्वैश्चराज्ञया दिनेदिनेक्षयंप्रापकृष्णपक्षेशशांकवत् ९ मारःप्रक्षीणवित्तोऽपिक्षेत्रपात्रादिविक्रयात् आगतायददावन्नंयथापूर्वमविन्नधीः १० गृहोपकरणेष्वेवंविनष्टेष्वन्नदानतः अवशिष्टमभूद्भार्याकंठमांगल्यसूत्रकम् ११ अथप्रावृषिकस्मिंश्चिद्दिवसेतमसावृते निशीथेतापसः कश्चित्क्षुत्तृष्मापरिपीडितः १२ अन्विष्यान्विष्यशनकैःमारस्यगृहमाययौ आगत्यतद्गृहद्वारंमायातापसरूपभाक् १३

यः१५॥ ॥७॥शिवभक्तोपकारस्यसर्वोत्तमत्वंवर्णयितुंइतिहासांतरमारभमाणःप्रथमंतत्प्रशंसामाह शिवेति १ इतिहासमेवोपक्रमतेभूषणमिति २ ३ ४ ५ ६ आरभ्येतिचतुर्विधंभक्ष्यभोज्यलेह्यचूष्यभेदेन ७ ८ धनेतिधनजातंधनसमूहजातंधनसमूहयोरिति

॥ १८ ॥

मारमाद्यभगवानिदमाहमहेश्वरः क्षुधातृषाचसंक्रांतोतपस्वीवचनाक्षमः १४ दूरेत्वामन्नदंश्रुत्वातवा
स्मिगृहमागतः देहिमह्यंक्षुधार्तायग्रासायसदनंनिशि १५ अन्नमन्नप्रदश्चासिपितामातातपस्विनां इति
तद्वाक्यमाकर्ण्यनिर्गतस्सहभार्यया १६ प्रणम्यपाणिलिःपाद्यमासनंचप्रदायसः विषण्णहृदयोमारःभार्यान
नमुदैक्षत १७ इतिनिश्चस्यचोवाचमंदंमंदंकुटुंबिनीं एहिसाध्विनिशीथेसौ संप्राप्तस्तापसोमहान् १८ क्षु
धितोन्नंप्रयच्छेतियाचतेदूयतेमनः नोपायमिहपश्यामियेनास्यक्षुत्प्रशाम्यति १९ वृथाजन्ममममेदंस्याद्य
दीहोपवसेदयं माजीवत्वधनःकश्चिन्मादृशोदुर्लभोभुवि २० यस्यमेगृहमासाद्यसक्षुत्तिष्ठतितापसः गृहिणो
शरणंभर्त्तुरिच्छतःपरमांगतिम् २१ भार्यानुकूलानग्रासायेनतस्यवनंगतिः अनुकूलाचसाध्वीचममत्वदयिता
ननु २२ चिरंत्वदानुकूल्येनभक्तानामन्नदोस्म्यहं आपदोस्यास्त्वमेवात्रमामुद्धरपतिव्रते २३ इतिभर्त्तुर्वचःश्रु
त्वानाथंभार्याजगादतंनकचिदन्नपश्यामिनाथोपायगृहेतव २४ लवणान्नहिसौम्यास्तिदिवसेत्ववशेषित अ
थाप्याहवसत्वेषादृष्टोपायस्यहंप्रभो २५ पूर्वेद्युरुप्तकेदारेबीजजातमदूरतः अस्माकमस्तिमादैन्यंभजेतद्विनि
युज्यताम् २६ आनीयतांतद्भवतातदन्नंक्रियतेमया उप्ताःपल्लविताद्रुमाःसंतित्वत्सदनांगणे २७ नकिंचिन्न्यून
मत्रास्तिमहादेवप्रसादतः इतिभार्यावचःश्रुत्वाहृष्टःप्रोवाचतापसम् २८ मारोहमत्रशेष्वान्नस्वामिन्मृडितिपच्च

लवणरूपमन्नं २५ पूर्वेद्युरिति केदारेक्षेत्रे बीजजातंबीजसमुदायः २६ आनीयतामिति उप्ताःभूनिक्षिप्ताः २७ २८ २९ ॥ ७ ॥

इतीति संविवेश निद्रांप्राप ३० ३१ सांकुराणीतिसम्भर्ज्य सम्यक्भर्ज्जनंकृत्वा आशुशीघ्रं अवहत्यअवहननेन वितुषीकृत्य ३२ ३३ ३४ ३५ ३६ तयोःशिवप्रसादंवर्णयन्नुपसंहरति अथेति ३७ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कन्दोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांषोडशोऽध्यायः १६॥ ॥ॐ॥ पूर्वाध्यायेशिवभक्तान्नपानादि दानेनमुक्तिर्वर्णितासंप्रति शिवभक्तापराधसहने

इतिमारोक्तिमाकर्ण्यसंविवेशसतापसः मारोपिप्राप्यकेदारंउप्तबीजान्युपाहरत् ३० तावदेवचसासाध्वीनवैर्मुद्गलतादलैः अवशिष्टैश्चलवणैःशाकंस्वादुचकारह ३१ सांकुराणिचबीजानिसंभर्ज्याश्ववहन्यच संपाद्यान्नंपतिंप्राहतापसोबोध्यतामिति ३२ मारोपियावत्सुमनाःतापसोद्बोधनोद्यतः आगच्छन्नपिसुस्नातोनैवेद्यंगृह्यतामिति ३३ ब्रुवन्प्राप्यांतिकंतस्यददर्शाद्भुतहर्षभाक् आरूढवृषभंदेवंवरदाभयमुद्रितम् ३४ वामांकरूढयागौर्यापरिष्वक्तंमहेश्वरं प्रणम्यबहुधाभीतःतत्पादंशरणंययौ ३५ भार्याचास्मैप्रहृष्टात्मानैवेद्यंसमुपाहरत् ववर्षुःपुष्पवर्षाणिदेवाश्चमुनयोस्तुवन् ३६ अवादयन्गणाःसर्वेवाद्यानिविविधान्यपि अथप्रसन्नोभगवानंविकापतिरीश्वरः ३७ दत्वाकैवल्यमनयोःसहताभ्यांतिरोदधे इतिश्रीस्कंदोपपुराणेषोडशोऽध्यायः १६॥ ॥श्रीअगस्त्यउ॰ शिवभावनयाभक्तान्पूजयंतोपिनित्यशः अपराधान्सहंतेयेभस्मरुद्राक्षधारिणाम् १ प्राप्तेपिप्राणसंदेहेशिवप्रीतिमभीप्सवः शिवप्रसादपात्रंतेह्यप्रतिद्रोहकारिणः २ स्वयंकृतेपकारेपिभक्तैस्तान्पूजयंतियेप्रीणातीशोयथा

नापिमुक्तिर्भविष्यतीतिवर्णयिष्यन् द्वाभ्यांप्रतिजानीते शिवभावनयेति १ प्राप्तइति अप्रतिद्रोहकारिणःभक्तकृतापराधस्यप्रतिक्रियामकुर्वंतः २ स्वयमिति भक्तैःअपकारेकृतेपि ये स्वयंतान्पूजयंतीत्यन्वयः ३

इतिहासंप्रवर्त्तयति अत्रेति ४ चेदिदेशेसत्यार्थोनामप्रसिद्धः राजाभूदित्यर्थः ५ ६ ७ तस्येति मुक्तिनाथोनामराजाप्रातिवेश्यः प्रति
वेशेभवःशत्रुः अभवत् तेनसह अस्यसत्यार्थस्यरणः युद्धमभवत् ८ ९ १० समयमिति छिद्रंदोषस्थानंविलोकयंति ११ तापसाका

॥ ९७ ॥

अत्रेतिहासंप्रथितमाकर्णयतभूसुराःयस्यश्रवणमात्रेणभक्तिःशंभौभवेद्दृढा ४ चेदिदेशेपुरंकिंचिदस्तिगो
पैरधिष्ठितं सत्यार्थोनामराजाभूत्त्रिषुलोकेषुविश्रुतः ५ सएकःशिवभक्तानांनित्यमिष्टंप्रयच्छति याचितःशिव
भक्तानांसप्राणांश्चप्रयच्छति ६ समंडलपतिर्दृष्ट्वादूरेभक्तान्नमस्यति निरोधःशिवभक्तेषुनास्तितद्वारिकस्य
चित् ७ तस्यैवंवर्त्तमानस्यमुक्तिनाथोमहीपतिः प्रातिवेश्योभवच्छत्रुःतेनास्यचरणोभवत् ८ तंविनिर्जित्यसमरे
सत्यार्थोरिपुमोजसा बलंधनंपुरंचास्यसर्वंजग्राहपार्थिवः ९ मुक्तिनाथःसतेनैवनिरस्तोदुर्बलोरणे दुद्रावत्यक्त
सर्वस्वःक्वचिद्दीनोवनांतरे १० समयंगमयामासशत्रोःछिद्रंविलोकयन् चिरायोपायमासाद्यनिश्चित्यैवमितिस्व
यम् ११ तापसाकारमापन्नोभूतिरुद्राक्षपुस्तकः सत्यार्थसदनद्वारंययौभस्मानुलेपनः १२ तदाशेतेस्मनृपतिःआखे
टायासनिद्रया छन्नस्तापसवेषेणरिपुंचांतर्निरैक्षत १३ निद्राणेनृपतौकार्यंकिंतवांतर्बहिर्भव द्वास्थैरितिनिरुद्धो
ऽपितानतादृत्यतापसः १४ रहस्यागमतत्वार्थमुपदेष्टुंमहीपतेः गच्छामीतिहठात्कृत्वाशय्यागृहमरिर्ययौ १५ आ
गतंपुस्तकधरंसमुन्नतजटाधरं समीक्ष्यतापसंराज्ञीभर्त्तारंसमबोधयत् १६ सचप्रबुद्धःसत्यार्थःछन्नंवेषेणवैरिणं

रमिति सदनद्वारंगृहद्वारंययावित्यन्वयः १२ तदेति आखेटोमृगयातत्संबंधीयआयासः खेदःतेनयानिद्रातयाअन्तःगृहमध्ये १३ १४
रहस्येति रहस्यभूतः आगमानांशास्त्राणांय स्तत्वार्थः तंउपदेष्टुमित्यर्थः १५ १६ सइति सराजावेषेणतापसवेषेणछन्नंगुप्तं १७

१८ १९ २० प्राणेष्विति मदीयेषुप्राणेष्वपि त्वदीयाप्रभुताऽस्तीतिशेषः २१ २२ २३ इदमिति गौर्यैपार्वत्यैईशेनवर्णितं २४ तस्यामिति कपाटेनमुखंद्वारंआवृणोत् आच्छादयामास किंचतस्मै राज्ञेभस्मप्रसादरूपंदत्वा तंनमनम्रोभवदित्याह २५ तथेति क्रोडेभुजा

ऊवाचप्रांजलिश्चैवउपवेश्योन्नतासने धन्योस्म्यनुगृहीतोस्मित्वत्तोदाम्बुजदर्शनात् १८ परिपूतमिदंवेश्मगुरूणांपादरेणुभिःभवतांसेवयाचित्तमिदमद्यप्रसीदति १९ किंकरोस्मिविधेयंकिंनियुंक्ष्वानुगृहाणमां धनादिष्वपिमेस्वामिन्प्रभुताहिनकेवलम् २० प्राणेष्वपिमदीयेषुत्वदीयासत्यमीर्यते इतिब्रुवाणेनृपतौगृहीतविनयांजलौ २१ जगादतापसच्छद्मःस्मयमानमुखोऽथतं शृणुराजेंद्रमेवाक्यंभक्तानांप्रवरोह्यसि २२ शिवतत्वरहस्यार्थानहंबोधयितुंतवप्राप्तोहंखांत्वमेवैकःशृणुसत्सार्थपार्थिव २३ इदंचशास्त्रंकैलासेगौर्याईशेनवर्णितं इत्याकर्ण्यनृपःपत्नीबर्हिर्गच्छेत्यभाषत २४ तस्यांबर्हिर्गतायांचकपाटेनावृणोन्मुखं भस्मदत्वागतस्तस्मैतंनमेत्याहतापसः २५ तथेत्युत्थायतंपादेप्रणमंतमहीपतिंनिगूढेनासिनाक्रोडेजघानसतुमर्मणि २६ खड्गप्रहाराभिहतोमुमोहधरणीपतिः आहतोस्मीतिचुक्रोशद्वार्स्थःक्रुद्धोभ्यगाद्रुतम् २७ भित्वाकपाटंवेगेनगृहीत्वातापसंकरे हंतुंतेनैवखड्गेनजटासुचपरामृशत् २८ क्षणादुन्मील्यसत्यार्थोतदाहास्मैसमाहूयत् शापितोसिममप्राणैःमोचयारिमितीरयन् २९ संधीभूताश्चबहवःतत्रक्रुद्धाश्चतद्भटाःसंहर्तुमभवन् राज्ञानिरुद्धारुषिताअपि ३० राजासोढ्वाप्रहारंतंमाभैषीरित्यभाषत वेषाच्छन्नंवेपमानंश्रुत्वाकेचिन्नृपान्नया ३१ ॥७॥

न्तरे नानाक्रोडोभुजान्तरमित्यमरः निगूढेनगोपितेन असिनाखड्गेन मर्मणिजघानेत्यर्थः २६ खड्गेति आः इतिपीडायां हतोस्मीतिचुक्रोश २७ २८ क्षणादिति ममप्राणैः शापितोसि अरिंमोचयइतिईरयन्वदन् २९ ३० राजेति तंप्रहारंसोढ्वासहनंकृत्वात्वंमाभैषीःइतिवेपमानंप्रसभा

विषयेति विषयान्तम् देशान्तं कृतागसं कृतापराधं तं नयंतिस्म ३२ कृतेति भस्माङ्कितालिकः भूतिचिन्हितभालः ३३ ३४ दध्याविति नटे शं शिवं ३५ एतत् दृष्टांन्तेन विशेषभूतेन सामान्यतः लोकानां भक्तापराधसहनं मुक्तिसाधनमुपदिशति भक्तैरिति ३६ इतिश्रीमानवल्युप

विषयांतं नयंतिस्म नाभ्यहंसन् कृतागसं उपेक्षसे कथं शत्रुमिति पृष्टः सुहृज्जनैः ३२ कृतापराधोपि मम शत्रुर्भस्मांकितालिकः स शंभुरेव मे स्वामी नैष वैरीत्यभाषत ३३ क्षेमं तपस्विनस्तस्य श्रुत्वा दूतमुखान्नृपः बहुमेने निजभटान् अर्थाज्ञापरिपालकान् ३४ दध्यौ नटेशं मनसा सत्यार्थः पार्थिवोत्तमः सन्निधाय महेशोपि ददौ मुक्तिं महीपतेः ३५ भक्तैर्हतोपि परुषोक्तिभिरर्दितोपि संप्रापितोप्यसुषु संशयमिंदुमौलेः यः प्रीतये हितममीषु तनोति तस्मै प्रीतः प्रयच्छति हरो न पुनर्भवार्त्तिम् ३६ इतिश्रीस्कंदोपपुराणे सप्तदशोऽध्यायः १७॥ ॥श्रीअगस्त्य उवाच सदाशिवपदांभोजे भक्तिः परमपावनी पूर्वजन्मार्जितैः पुण्यैर्धन्यानामिह लभ्यते १ य एष देही तरति दुस्तरं भवसागरं॥ उच्छिन्नभवसंक्लेशो व्याघ्रः पंजरबंधनम् २ शिवभक्तिर्यथा मुक्तेर्मुख्यं भवति साधनं शिवभक्तांघ्रिभक्तिश्च तथा मोक्षैकसाधनम् ३ सपर्यां भक्तरूपेण साक्षाद्गृह्णाति शंकरः परोक्ष एव गृह्णाति लिंगादिषु समर्चितः ४ प्रत्यक्षेश्वररूपाणां भक्तानां पादसेवनं तत एव प्रशंसंति न परोक्षेशसेवनम् ५ ॥ ॥ ॥

नामक नृसिंहविरचितायां स्कंदोपपुराणव्याख्यायां भक्तविलासप्रकाशिकायां सप्तदशोऽध्यायः १७॥ ॥ ॥पुनर्भक्तिमेव दृढयन् भक्तानेव प्रशंसति सदाशिवेति १ य इति एष देही शरीरी दुस्तरं भवसागरं तरति तत्र दृष्टान्तः व्याघ्रः पंजरबंधनमिव स उच्छिन्नभवसंक्लेशः क्षीणसंसारदुःख इत्यर्थः २ शिवभक्तिरिव तद्भक्तभक्तिरपि प्राधान्येन मुक्तिहेतुरित्याह शिवेति ३ सपर्यामिति लिंगादिषु समर्चितः शंकरः परोक्ष एव अप्रत्यक्ष ए

येषामितियेषांभक्तानांदर्शनादेःसंसारेशोचतांखिद्यतांसद्यःशोकोबंधःविलीयतेक्षीयते ६ ७ इतिहासमाह अत्रेति वीरमिन्द्रस्यतन्नामकस्यभक्तस्य८ अस्तीतिचतुर्थान्वयजन्मभाक्भूद्रङ्त्यर्थः ९ १० ११ यद्इति शिवेशिवभक्तेचयोनरःसापराधःतस्मिन्हन्यमानेतत्सा

येषांसंदर्शनात्संगात्संल्लापात्पादसेवनात् शोचतामिहसंसारेसद्यःशोकोविलीयते ६ विनायज्ञेनतपसावि
नावेदांतचिंतया मुक्ताःसहस्रंलोकेस्मिन्भक्तपादाब्जसेवया ७ अत्रैवोदाहरंतीममितिहासंपुरातनं वीरमिं
द्रस्यभक्तस्यभक्तिर्यत्रोपवर्ण्यते ८ अस्तिकेरलभूभागेपुरंशोणाचलाह्वयं तत्राभूद्वीरमिंद्राख्यःचतुर्थान्वयज
न्मभाक् ९ आसीद्बाल्यमेतस्यभक्तिर्भक्तेषुभूयसी नतथाभक्तिरभवन्महतीपरमेश्वरे १० तस्यैवंवर्त्तमान
स्यमतिरासीन्मनोहरा विभ्रतःपरशुंतीक्ष्णंशिक्षायैभक्तविद्विषाम् ११ यःशिवेशिवभक्तेचसापराधोनरःक्वचि
त् हन्यमानेनतत्सापंप्राणांस्त्यक्ष्याम्यथान्यथा १२ इतितीक्ष्णःसपरशुर्दधारव्रतमुत्तमं महापथेन्वहंतिष्ठन्
भक्तानागच्छतःपथि १३ पूजयित्वाशिवधियाप्रापतेषामनुग्रहं एवंनिवसतस्तस्यवीरमिन्द्रस्यचेतसि १४
कांचिद्बुद्धिरभूद्भूमौयेभक्ताश्चन्द्रशेखरे विख्यातेषुशिवस्थानेष्वासतेतेकथंमया १५ नसेव्यंतेवृथाजन्ममयाते
षामदर्शनात् प्रदक्षणीकृत्यभुवंचरित्वातत्रतत्रच १६ स्थानेनिषेव्यगौरीशंतद्भक्तानांचसेवया कृतार्थयामिजन्मै
ततसंगत्यामानुषंसतां १७ इतिव्रतस्थेविषयान्भार्गवेणविनिर्मितान् अतीत्यसरितोमार्गेशैलान्देशान्वनानिच १८

पंनभवति अन्यथाअहन्यमाने अहंप्राणान्त्यक्ष्यामीत्यर्थः १२ इतीतिपरशुःपरशुनासहितः १३ १४ १५ १६ स्थानेइति सतांसंगत्या ए
तत्मानुषंजन्मकृतार्थयामि सफलयामीत्यर्थः १७ इतीति भार्गवेणपरशुरामेणविनिर्मितान् रचितान् विषयान्कोंकणदेशान् १८

वीरमिन्द्इति क्षेत्रं काशीक्षेत्रं यत्रक्षेत्रेदेहंत्यजतांजन्तूनां ईश्वरोविश्वेश्वरः तारकप्रदः तारकमन्त्रोपदेष्टा अत्रहिजन्तोःप्राणेषुउक्र
ममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टे इतिजाबालश्रुतेः १९ सेवमानइति विश्वस्याधिपतिंविश्वेशं प्रभुंसेवमानः तत्रस्थान्क्षेत्रवासिनः

वीरमिंदोययौक्षेत्रंविख्यातंभुवनत्रये तद्यत्रदेहंत्यजतामीश्वरस्तारकप्रदः १९ सेवमानोन्वहंतत्रविश्वस्या
धिपतिंप्रभुं तत्रस्थानपितद्भक्ताननयद्भूसरत्रयम् २० ततोनिर्गत्यशनकैरवापकमलालयं तत्रदिव्यमहाली
र्थैस्नात्वात्यागेश्वरंविभुम् २१ रत्नसिंहासनारूढंसिषेवेदृष्टमानसः अथालयांतस्तद्भक्तान्जितकामान्जितक्रु
धः २२ भस्मावगुंठिततनून्रुद्राक्षस्रग्विभूषणान् पंचाक्षरीजपपरान्शतरुद्रीयजापिनः २३ शिवदीक्षासमायु-
क्तान्शिवव्रतपरायणान् श्रोत्रेशिवपुराणानांशिवलिंगार्चनेरतान् २४ दृष्ट्वाद्वादशसाहस्रसंख्यातान्ब्राह्मणो
त्तमान् भक्त्यारोमांचिततनुःप्रणनामपुरस्सतान् २५ इदंविज्ञापयामासवीरमिंदःकृतांजलिः शुश्रूषांकर्त्तुकामो
स्मिभवतामहमन्वहम् २६ शिवभक्तद्रुहामस्मिनिग्रहेबलवत्तमः अनुजानीतमांसर्वेदासंवःशरणंगतम् २७
तथेत्यंगीकृतस्तैस्तान्सिषेवेत्यागराजवत् दृशभावनयाभक्तान्भजमानस्यभूसुरान् २८ अत्यगुर्वीरमिंदस्य
समाद्वादशतत्पुरे कृतेषुशिवभक्तानांकैंकर्येपारमेश्वरे२९ तंमिलित्वावितेनुस्तेशिवकार्यधुरंधरं एतस्मिन्नंत
रेप्रातःकदाचनससुंदरः ३० अपरित्यक्तताम्बूलकपोलोधूर्त्तलक्षणः वेश्यांगरागसंसक्तसूक्ष्मवस्त्रावगुंठितः ३१॥

तद्भक्तानपि अन्वहंसेवमानोवत्सरत्रयंनिनायेत्यर्थः २० ततइति कमलालयंप्राग्वर्णितं २१ २२ २३ २४ २५ २६ २७ २८
अत्यगुरिति द्वादशसमाःवर्षाण्यत्यगुरतिक्रान्तानीत्यर्थः २९ ३० अपरित्यक्तेति धूर्त्तानांकितवानांलक्षणंचिन्हंयस्यसः ३१

३२ ३३ वीरमिंदइति सुन्दरआततायिनं वधोद्यतंतंवीरमिन्दंदृष्ट्वा ३४ प्रविश्येति अररंकपाटं मुखे द्वारे ३५ स्थितइति हेब्रह्मबंधो ब्राह्मणाधम ब्रह्मबंधुरधिक्षिप्तेइत्यमरः ३६ विद्येति विद्यामदेन अवलिप्तोसि गर्वितोसि तंतुधारिणिउपवीतधारिणि ३७ ३८ ३९

अतीत्यगोपुरद्वारंविवेशालयमंडपे स्थितान्मिलित्वासबहून्सेवमानान्महेश्वरम् ३२ अवमत्यानवैक्षैतान्वीर मिन्देपिपश्यति गंतुमंतर्गृहंशंभोरियेषसमहाकविः ३३ वीरमिंदःसुसंक्रुद्धःतंहंतुंपरशुंदधौ आततायिनमायां तंतंदृष्ट्वासुंदरोभिया ३४ प्रविश्यांतर्गृहेशंभोर्दृढीचक्रेररंमुखे सखायंशरणंप्रापसुंदरस्त्यागनायकम् ३५ स्थितो गर्भगृहद्वारेवीरमिंदोजगादतं निर्याहिब्रह्मबंधोत्वांनिहन्म्यद्यहरद्रुहम् ३६ विद्यामदावलिप्तोसिमहाद्रोहैकसा धनं तंतुधारिणियद्यत्रत्वय्यद्यापिमहेश्वरः ३७ विदधातियदिप्रीतिंसबाह्यःक्रियतेमया इत्याकर्ण्यवचस्तस्य संत्रस्तःसचसुंदरः ३८ आपदुद्धारणोपायंअंतःपप्रच्छशंकरं स्तुहिभक्तानितीशस्यनियोगेनमहाकविः ३९ भू यिष्टभक्तिस्तान्भक्तान्तुष्टावपरयागिरा श्रीसुन्दरउवाच संसारसंक्लेशमहांधकारविध्वंसनोद्यद्दिवसाधिना थान् श्रीकंठभक्तांघ्रिसरोजरेणून्विधायमौलौविपदंतरामि ४१ श्रीअगस्त्यउवाच सुंदरेणस्तुताःसर्वेभक्ताः संभूयतेमुदा वीरमिंदंनिवार्याथवृणुतेसुंदराभयम् ४२ वीरमिंदेनसख्यंचसुंदरस्ययया चिरे तथेतिशिवभक्ता नांवचनंसचकारह ४३ यदुक्तंशिवभक्तैस्तन्ननेत्याहकदाचन त्यागेश्वरस्तस्यतथाकृतेनसंतुष्टचित्तस्तुषितःपु रस्तात् वृषेंद्रमारुह्यतदोमयाविर्भूत्वाददौमुक्तिममुष्यधीराः ४४ इतिश्रीस्कंदोपपुराणेअष्टादशोऽध्यायः १८॥

४० सुन्दरःशिवभक्तान्स्तौति संसारेति संसारक्लेशएवमहान्धकारःतस्यविध्वंसनेउद्यद्दिवसाधिनाथान्उद्यद्भास्कररूपान् ४१ सुन्दरेणेति

संभूयमिलित्वा ४२ ४३ ४४ वृतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांअष्टादशोऽध्यायः १८॥ ॥७॥ आख्यानान्तरमुपक्रमतेपुराणेत्यादिना लोकविश्रुता लोकप्रसिद्धा १ २ ३ ४ ५ प्रथमेति प्रथमाश्रमिणः ब्रह्मचारिणः क

श्रीअगस्त्यउवाच पुराणसरिदाख्यातानगरीलोकविश्रुता तत्रास्त्यमरनीत्याख्योब्राह्मणःशिवभक्तिमान् १ सोभूत्तत्रपुरेशंभोःस्थानेप्रीतिकरेस्वयं निर्मायधर्मशालांचविदधेधर्ममुत्तमम् २ अन्वहंशिवभक्तानामन्नंक्षीराज्यपूरितं अभ्यंगवस्त्रममलंकौपीनंब्रह्मचारिणाम् ३ यतीनामुचिताःकंथाःसदनानिकुटुंबिनां ददातिशिवभक्तेभ्योयदभीष्टंक्षणेनतत् ४ एवंनिवसतस्तस्यह्यात्रिंशद्वत्सराययुः विधातुकामस्तद्भक्तिपरीक्षापरमेश्वरः ५ प्रथमाश्रमिणोवेषंगृहीत्वातद्गृहंययौ कपर्दस्तच्छिखाजटेलललाटाग्रावलंबिनी द भस्मरेखाभवच्चाद्रौक लासाच्छ्रमनावदोः भस्मबिंदुरभूद्भालेतार्तीयीकंविलोचनम् ७ यज्ञोपवीतमस्यासीत्प्रवाहःसोरसैंधवः आषाढदंडोजगबंधनुरस्यकरेभवत् ८ करभूषणनागोभूत्सवित्रंदक्षिणेकरे कृष्णाजिनमभूच्चर्मवैयाघ्रंमौंजिबंधनम् ९ आसीद्वासुकिरेतस्यदीर्घभोगःफणीश्वरःयदान्नतमिदंचास्यमायाकौपीनतांदधौ १० भिक्षापात्रमभूद्बूस्नकपालंसर्वमाहितम् ११ समंदहासद्युतिभिर्दिगंतानुद्भासयन्निंदुरिवस्वभाभिः गृणन्मधीतानपिवेदमंत्रान्जगामवेश्माऽमरनीतिनाम्नः १२ सतदामरनीतिस्तंप्रज्वलद्बूस्नवर्चसं मायावपुरिवप्रांचंमहाबलमदापहम् १३ ॥ ॥

पर्दःजटाजूटः द भस्मेति तार्तीयीकंविलोचनं तृतीयनेत्रं ७ यज्ञोपवीतमिति सौरसैन्धवःसुरसिंधुसंबंधी आषाढदंडःपालाशदंडः अजगवंपिनाकः ८ ९ आसीदिति दीर्घभोगःदीर्घकायः १० ११ १२ सदिति प्रज्वलत्प्रकर्षेणदीप्यमानं ब्रह्मवर्चसं वृत्ताध्ययनसंपत्तिः १३ ॥ ७ ॥

१४ १५ १६ १७ भैक्षेतिभैक्षंभिक्षासमूहः तद्रूपस्यअन्नस्यभोजनं अधीयानस्य वेदाध्ययनं कुर्वतः वटोःब्रह्मचारिणःमुक्तमुचितमित्यर्थः १८
१९ २० २१ २२ इदमिति इदंकौपीनं वर्षाम्भसा वृष्टिजलेन ऊक्षितं सिक्तं माभूत् २३ २४ पालाशेति लतादाम्नि लतारूपेरज्जौ २५ आपादे

हर्षितस्तेजसातस्यप्रत्युत्थायकृतांजलिः स्वागतंतेवटोतावदास्यतामिहसांप्रतम् १४ त्वद्दर्शनात्कृतार्थोस्मि
प्रीतिःपशुपतेर्मम आतिथ्यंकर्तुकामोस्मिदयादृष्ट्याविलोकय १५ सएवंवटुमभ्यर्च्यप्रार्थयामासभक्तिमान्
मायावटुश्चतंप्राहस्मयमानमुखाम्बुजः १६ त्वमेवामरनीतिःकिंश्रुतवानस्मितेयशः शिवभक्तार्चनायैवत्व.
दर्जितमहोधनम् १७ भैक्षान्नभोजनंयुक्तमधीयानस्यमेवटोः नाहंगृहस्थस्यैकस्यकरोम्यन्नेनभोजनम् १८
दीयतामागतेभ्योन्नंभक्तेभ्योस्यर्चितोऽमुना नैकत्रभुक्तिर्विहितायथेच्छंब्रह्मचारिणः १९ स्थीयतेत्वद्गृहेताव
द्यावद्वृष्टिःप्रशाम्यति मध्यान्हसमयोत्येतिवृष्टिश्चेयंप्रवर्त्तते २० इतितद्वाक्यमाकार्यसभक्तस्तस्यपादयोः प्र
णाम्यप्रार्थयामासभुज्यतामितितंपुनः २१ वटुश्चानुमतिंदत्वास्नात्वाहविहितान्हिकः आगच्छामिभवद्भिक्षौ
पीनंगृह्यतामिदम् २२ इदंसुरक्षणीयंमेमास्तुवर्षांभसोक्षितं इत्युक्त्वाप्रददौतस्यहस्तेजग्राहसोपितत् २३ आ
षाढपाणिश्चवटुर्जगामस्नातुमापगां गृहिणीत्वरयामासत्वंहरश्चार्च्यतामिति २४ पालाशदंडादवमुच्यतद्धुतंसत
ल्लतादाम्निगृहांतरस्थे निबध्यपूजांविदधेपुरारेःशिवार्चनांतेवटुराजगाम २५ आपादकेशाग्रमसौतदानीमासार.
धाराजलसिक्तगात्रं उत्कंपरोमांचजुषंददर्शवटुंधृतस्वस्तिकमागतंच २६ शीतिकाबाधतेतावत्कौपीनंतत्प्रदीय

ति आसारःधारासंपातः धृतःस्वस्तिकः अंसन्यस्तकरद्वयरूपो बंधनविशेषोयेनतम् २६ २७ ॥ ७ ॥ ४ ॥ ७ ॥

यत्रतन्निहितंतत्रनस्मपश्यतिविस्मितः बहुधान्वीक्ष्यमाणश्चनददर्शतिरोहितम् २८ अथागत्यवटुंप्राहगृह्य तामन्यदुत्तमं रज्जुबंधेनपश्यामिनापिकश्चिदिहागतः २९ विस्मयोमेमहानत्रमायेवप्रतिभातिमे अथक्रुद्धोवटुः प्राहनान्यद्दृष्टामिकिंचन ३० तदेवामरनीतेमेदेह्यज्ञानादिहागमं अस्पृश्यमन्यत्कौपीनंमादृशान्नह्मचारिणां ३१ नेहानयसितद्यावत्तावन्मेनास्तिभोजनं नाहंकारेणवच्मीदंश्रूयतांतस्यचागमः ३२ वामदेवोपदिष्टेनमंत्रेणमहतापुरा अच्छोदेतत्रसरसि प्रभोरुपरिभूभृतांम् ३३ आह्वादशाब्दमंभस्थोदेवींत्रिभुवनेश्वरीं अस्तोषंवचसा देवीसाप्रसन्नाभवन्मम ३४ तयाचकरुणापांगतरंगैरनुकंपितः उक्तःशारदयादेव्याजनन्याजगतामहम् ३५ उत्तिष्ठविरमायाहिसर्वविद्याःस्फुरंतुते शीतार्त्तोसिगृहाणेदंदुर्लभंयोगिनामपि ३६ इत्युक्तोसाद्यसव्यानमेकौपीनमिदमुत्तमं ददौसाहिदयासिंधुर्वाग्देवीवरदाममम ३७ तदहंचद्विधाकृत्यप्रतिसंध्यंधरामिच निर्णयस्सर्वविद्यासुजातोमेतस्यधारणात् ३८ तच्चेद्विनाशितंनूनंमद्विधैश्चर्यभूर्भव वंचकःसाधुवेषेणमादृशांचरसिक्षितौ ३९ किंकरोमिक्वगच्छामिवाणीकोपंकरिष्यति विज्ञातोराजराजेननत्वांमुंचामिसात्वत नप्रदास्यसिचेच्छिक्षाभवेद्देह्यलमल्लकं ४० वटूक्तिभीतोऽमरनीतिरन्यत्पट्टाम्बरंकिंचिदनर्घ्यमस्ति ॥ ७ ॥ ७ ॥

तिमद्विधानां मादृशानांयदैश्वर्यं कौपीनधारणभिक्षाटनादिरूपंतस्यभूःस्थानंभव ३९ किमिति सजराजेन कुबेरेण नेति त्वंनप्रदास्यसिचेत् कौपीनमितिशेषः भिक्षाभवेत् अल्लकं कौपीनं देहि ४० ४१

४२ ४३ ४४ ४५ हतइति मममनः सीदतीवखिद्यतीव ४६ ४७ ४८ ४९ तुलितमिति यत्कौपीनंधृतेनमयापूर्वंधृतेनेत्यर्थः समंतुल्यंभ

स्पृष्टंनचान्येनददामितत्तेगृहाणतुल्यंकरुणांविधेहि ४१ इत्युक्त्वान्यपतत्पादेभीतस्तदुपवासतः ४२ सचन
प्रतिजग्राहपरुषोक्तिपरोबटुः मिलिताश्चजनाःसर्वेवटौगर्वंप्रभाषिरे ४३ जहसुश्चापरेतत्रपप्रच्छुःकोभ
वानिति वटुःप्राहस्मतैःपृष्टःशिवनामसमुच्चरन् ४४ नमेमातास्तिनपितानबंधुर्नापिसोदरः नवेश्मब्रह्मः
चार्यस्मिभिक्षाश्यमरनीतिना ४५ हतोस्मिसकलंनष्टंतपोमेतस्यनाशतः नोपायमन्यंपश्यामिसीदतीवम
नोमम ४६ भूयादमरनीतेतंपुण्यमायुश्चवर्धतां परिहासैरलंदेहिमदीयमलमल्लकम् ४७ तत्तुल्यमन्य
द्दातास्मीत्युक्तःप्राहपुनर्वटुः यदिसत्यमिदंवाक्यंप्रतिज्ञांजनसन्निधौ ४८ विधेहितथ्यंचेत्तत्तत्स्यात्तद्गृ
ह्णामीत्यभाषत जनाश्चयुक्तमित्यूचुःब्रह्मचारीतदावदत् ४९ तुलितंदेहिकौपीनंयद्धृतेनसमंभवेत् ध
टांचानीयतांतूर्णंजनाःपश्यंतुसाक्षिणः ५० इत्याज्ञयाधटांतत्रसभक्तस्तूर्णमानयत् वटुर्दिगंबरोभूत्वानि
दधेस्वालमल्लकम् ५१ एकत्रभक्तःसंतुष्टोनूतनंनिदधेन्यतः नतदासीत्समंतत्रन्यधत्तान्यत्पुनश्चसः ५२ तदप्या
सीदसदृशमन्यदन्यत्तथापरंवासःपट्टांशुकशतंसर्वंलघुतदाभवत् जनाश्चविस्मिताःसर्वेभक्तःसोपिविसिस्मये ५३
प्रदक्षिणीकृत्यवटुंप्रणम्यतदारुरोहान्वितपुत्रदारः धटातदास्तांसदृशेधटेद्वेदिवोववर्षुःकुसुमानिदेवाः ५४ प्रसः
न्नोवृषभारूढस्तदाभूत्वावटुर्हरः तस्मैप्रदायकैवल्यंकैलासशिखरंययौ ५५ इतिश्रीस्कंदोपपुराणेएकोनविंशोऽ

वेत् धटा तुला ५० इतीति स्वालंस्वभूषणं अल्लकविशेषणमेतत् ५१ ५२ ५३ ५४ ५५ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदो

पपुराणव्याख्यायांभक्तविलासप्रकाशिकायांएकोनविंशति
तमोऽध्यायः १९ ॥ ॥

एतावताशिवभक्तोपकारकस्यशिवभक्तापराधसहिष्णोश्चपरमगतिंप्रदर्श्यसंप्रतिशिवभक्तरक्षायेनिजप्राणान्त्यजतोपिमुक्तिर्भवतीत्याह रक्षायेदूति १ कथंप्रवर्त्तयति अत्रेति दारकस्यतन्नामकस्य २ ३ ४ तत्रेत्यादि श्लोकद्वयमेकान्वयि शिवधर्माह्वयःतन्नामकः

अगस्त्यउ·रक्षायेशिवभक्तानांत्यजंतिप्राणमात्मनः एतेशिवप्रसादेनमुक्ताःस्युःकर्मबंधनैः १ अत्रवक्ष्येकथां पुण्यांश्रवणात्सापहारिणीं त्यजतस्तूलवत्प्राणान्दारकस्यमहात्मनः २ अस्तिश्रीगोस्थलंनामक्षेत्रंभुविपुरद्विषः तत्रदेवंमहेशानंदारकःसेवतेन्वहम् ३ शिवायशिवभक्तेभ्योवायेदुर्द्यंतिभूतले संहारार्थमसौतेषांधारपरशुंकरे ४ तत्रास्तिब्राह्मणःकश्चिच्छिवधर्माह्वयःपुरे आजन्मनोव्रतंतस्यस्वहस्तापचितैःशुभैः ५ कुसुमैरर्चनंनित्यंनतस्याभंजतव्रतं त्रिकालमर्चयानस्यमहांतंदेवमीश्वरम् ६ पुष्पाहरणलक्ष्येणसमयस्सुमहानभूत् अनपायनयोनामतत्रराजामहायशाः ७ पुरंदरसमोवीर्यबभूवचतुरंगवान् सोपिभक्तेषुमहतीप्रीतिवहतिशंकरे ८ शिवद्रोहिणमालोक्यसद्यःशिक्षांकरोतिच नित्यार्चनपरोभूत्वाभक्तानामुत्तमोभवत् ९ तस्यसेनागजःकश्चिन्महीधरइवोन्नतः बभूवमत्तोदानेनयस्यजंबालितंपुरम् १० दानगंधंसमाघ्रायद्रवंतिस्मापरेगजाः युगमानोचतद्दंतोत्थुलोगिरिभेदिनौ ११ दूरेदृष्ट्वाजनाःसर्वेभीत्याधावंतिचान्वहं आधोरणाश्चतंपश्चादग्रेतस्यदसूचकाः १२ संचरंतिमहारावास्तीक्ष्णकुंतधराःकरे राजाज्ञयादिवारात्रंरक्षंतिनगरंभटाः १३

५ ६ पुष्पेतिलक्ष्येण व्याजेन अनपायःनाशरहितःनयोनीतिर्यस्य तन्नामक नामेतिप्रसिद्धौ ७ ८ ९ तस्येति यस्यगजस्य दानेनमदेन पुरंजंबालितं कर्दमितं १० दानेति युगमानो युगप्रमाणो ११ दूरेतिआधोरणाः हास्तिपकाः १२ १३ कदाचिदिति अन्यत्रमार्गेनि

रूढेसति गजेनेतिशेषः १४ १५ मन्द्रेति बृंहितंगर्जितं १६ १७ १८ १९ २० २१ २२ २३ २४ जघानेति निशितेनतीक्ष्णेन २५ २६ २७ स

कदाचिद्दारकःस्नातुंमध्यान्हेवापिकांययौ दूरंनिरूढेचान्यत्रमार्गेपार्श्वेन्यलीयत १४ सपुष्पपेटिकांविभ्रद्द्विपं
दृष्ट्वातिकोपतं उच्चैःस्वरेणचुक्रोशपाहिशंकरमामिति १५ मंद्रस्तनितगंभीरंकुर्वन्स्तनितमुच्चकैः वेगात्करे
णुरागत्यतत्पुष्पपुटिकांहठात् १६ आकृष्यशतधाचक्रेपुष्पौघश्चव्यशीर्यत विशीर्णेषुप्रसूनेषुशिवधर्मसखि
न्यधीः १७ आधोरणानुवाचेदंयुष्माभिःकिंदुरात्मभिः करेणुःप्रेरितोदुष्टःशिवार्चनविरोधकृत् १८ किंकरोमि
क्वगच्छामिशरणंमेनकश्चन नयुष्माभिःकृतमिदंकृतंराज्ञाशिवद्रुहा १९ विलापध्वनिरित्यस्यश्रुत्वेबहुदू
रतः तंश्रुत्वादारकस्तूर्णमागतःप्राहभूसुरम् २० महात्मन्केनपुष्पाणिशिवपूजापरस्यते विनाशितानितंब्रूहिप
ण्यायममविक्रमम् २१ शिवधर्मोवदत्त्वेष्टंदुष्टस्यद्विरदस्यतं तदाकार्यकरौकर्णेकृत्वाशिवशिवेतिच २२ त
दाजज्वालकोपेनहुताग्निरिवचक्षणात् प्राणत्यागेगतत्रासःसोनुप्राप्यतदागजम् २३ निहंतिस्मपदेतस्यचुक्रो
धचनिवृत्यसः गृण्हातिशुंडयायावत्तावदागत्यतत्पुरः २४ जघानदंतयोर्मध्येनिशितेनायुधेनसः गतासुस्तत्प्र
हारेणसपपातमहागजः २५ वारणस्कंधमारूढान्जिघांसन्ततायिनः दारकोनिजघानत्रीन्द्वौचत्तस्यानुयायिनो
२६ द्विरदानुचरास्सर्वेभीत्यागत्वानृपंतिकं साहसंदारकस्यैतद्विस्मापकमबोधयन् २७ सराजातूर्णमागत्यनिहतं
वीक्ष्यचद्विपं हतंकुवलयापीडंहरिणेवभटानपि २८ दारकंशिवधर्मचक्षुसमापायदुःखितं निवार्यसोद्यमान्योधा

इति हरिणाकृष्णेनकुवलयापीडंकृष्णवधायकंसेनप्रेषितंगजमिवदृयंचकथाभागवते दशमेप्रसिद्धा २८ दारकमितिप्रहितांजलिःकृ

तनमस्कारः २९

५७ मदीयेर्विहितंकर्ममयैवविहितंध्रुवं सापराधोस्म्यहमितिदेवेभक्तेचशंकरे ३० प्रायश्चित्तंनपश्यामिद्रोहस्या
स्यमृतेर्विना तस्मात्स्वशुनानेनभिंधिमामपिदारक ३१ परिपूतोभविष्यामिशिक्षितोभवतात्यहं इतिवाचस
माकर्ण्यदयालौदारकेसति ३२ सतस्यहस्तात्सशुंजग्राहमरणोत्सुकः स्वयमेवगलच्छेदेप्रवृत्तंवीक्ष्यभूप
तिम् ३३ निरुध्यचमहाभक्तंदारकःखिन्नधीरभूत् अनपायनयंशंभोर्महांतंधर्मचक्षुषम् ३४ इमंभक्तमवि
ज्ञायह्येतदीयाद्मेहताः मयागिरीशभक्तानांयेनद्रव्यंविलुप्यते ३५ निष्कृतिस्तस्यमरणंनान्यथाक्वापिनिष्कृ
तिः छिन्नकंठोभविष्यामिस्वयंपरशुनाऽमुना ३६ अहंद्रोह्यस्महद्रोहीमुमूर्षुःप्रागहंत्विति यदालंबितशस्त्रो
तौतदाभूदशरीरवाक् ३७ अनपायनयप्रीतस्तवाहमधुनानृप यस्त्वंसाम्राज्यमुत्सृज्यभक्तद्रोहान्मुमूर्षसि
३८ तवास्मिदारकप्रीतःकृतंकर्मसुदुष्करं परशुंत्यजभावेनपूजयाद्यप्रभृत्यसि ३९ मुक्तश्चनिहतास्सर्वेस
मुत्तिष्ठंतुसांप्रतं इत्युक्तासहसोत्तस्थौगजःपंचभटाऽपि ४० सर्वेऽपिविस्मयंजग्मुःपुष्पवृष्टिरभूद्दिवि दारकं
शिवधर्मंचप्रणम्यसमहीपतिः ४१ सख्यंताभ्यामियायाथगजारूढोगृहंययौ दारकस्यकृपरशुर्मनसैवमहेश्व
रम् ४२ तत्रस्थःपूजयामासतदारभ्यसमात्रयं ततःशिवप्रसादेनदुर्लभेनचदेहिनाम् ४३ साक्षात्कारादवासेन
कैलासपदमासवान् ४४ इतिश्रीस्कंदोपपुराणेविंशतितमोऽध्यायः २०॥ ॥श्रीअगस्त्यऊ·अन्यथाभावयंतश्च

३८ तवेति असीतित्वमित्यर्थकंविभक्तिप्रतिरूपकं ३९ ४० ४१ ४२ तत्रस्थइति समात्रयं वर्षत्रयं ४३ ४४ इतिश्रीमानवल्युपनाम

कनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांविंशतितमोऽध्यायः २०॥ ७॥ ॥अथशत्रावपिशैवलक्ष-
णदर्शनेन देशत्यागेशिवप्रसादोवश्यंभवतीत्याहअन्यथेति १ २ ३ लक्षणमिति शतरुद्रीयंरुद्राध्यायःपंचार्णःशिवपंचाक्षरोमंत्रः
४ ५ अग्निहोत्रोद्भवमिति वैवस्वतोयमः ६ धृतमिति पंचपातकानिस्वर्णस्तेयादीनितेषांसंघातः समुदायएव तूलःकार्पासः तस्य

शिवभक्तेषुयःपूजांविदधातिशिवेयथा तस्यनश्यंतिपापानिवर्द्धंतेपुण्यराशयः २ शिवभक्तावमानेनशिवद्रो
हीभवेन्नरः शिवभक्तप्रसादेनशिवानुग्रहभाग्भवेत् ३ लक्षणंशिवभक्तानांभस्मरुद्राक्षधारणं शतरु
द्रीयपंचार्णजपादिचविशेषतः ४ भस्मधारणमेवाहुःपरमंभक्तलक्षणं ब्राह्मणस्यकुलीनस्यवेदाध्य
यनवद्भवेत् ५ अग्निहोत्रोद्भवंभस्मयस्यभालेधृतंभवेत् तस्यवैवस्वतोराजादर्शनाद्दूरतोव्रजेत् ६
धृतंभस्मचयत्किंचित्पंचाक्षर्यभिमंत्रितं पंचपातकसंघाततूलदावानलोभवेत् ७ भूतप्रेतपिशा
चाहिवृश्चिकादिविषापहं आयुरारोग्यसौभाग्यभोगभाग्यसमृद्धिदम् ८ भस्मैवकेवलंशुद्धं पुनर्भव
विनाशनं पंचाक्षरविधानेनधृतंतन्मोक्षदंभवेत् ९ धृतभस्मानमालोक्यभक्त्याप्रणमतीहयः प्रसन्नस्तस्य
जन्मार्त्तिशिवएवनिरस्यति १० श्रीऋषयऊ॰ भस्मधारणमात्रेणप्रसीदतिकथंशिवः महामोहजुषामेतत्कुं
भयोनेवदस्वनः ११ श्रीअगस्त्यउ॰ अत्रैवोदाहृतंपूर्वैःचरितंब्रह्मवादिभिः भक्तस्यैनादिनाथस्यशृणुतश्रद्धया

दावानलोवनाग्निःभवेत् ७ भूतेति अहयःसर्पाःभूताश्चेत्यादि वृश्चिकादयश्चेतिद्वंद्वःतेषांविषापहंविषनाशकं ८ ९ १० एवंभ
स्ममाहात्म्यश्रवणेनसंजातकौतूहला ऋषयःपुनःकुंभयोनिंपृच्छन्ति भस्मेति महामोहजुषां बलवदज्ञानसेविनां पापिनामित्य

र्थः शिवःकथंप्रसीदतीत्यन्वयः ११ इतिहासमारभते अत्रैवे
ति एनादिनाथस्य तन्नामकस्य १२

१३ १४ दृष्ट्वेति सर्वकलासु समस्तविद्यासु दाक्ष्यं दक्षत्वं सामर्थ्यमितियावत् १५ १६ १७ शूराइति अतिशूराख्यः तन्नामकः अन्यः त स्यएनादिनाथस्य ज्ञातेयवान् ज्ञातित्वाश्रयः अभूदित्यन्वयः १८ वीरेति आत्मानंवीरंमन्यते असौवीरमानी केषांचित् दुरभिमानिना

दक्षिणापथदेशेऽस्तिनगरंशावराव्हयं कश्चिदेनादिनाथाख्यस्तत्राभूद्भक्तिमान्हरे १३ सह्यर्चयत्यभेदेनशि वभक्तान्शिवंयथा धृतरुद्राक्षभस्मानःस्वस्यप्राणद्रुहोपिये १४ दृष्ट्वातान्प्रणमत्येषःतदिष्टंचप्रयच्छति तस्यैवंवर्त्तमानस्यदाक्ष्यंसर्वकलास्वपि १५ निरंकुशंविशिष्यासीच्छस्त्रेशास्त्रेमहौजसः सर्वायुधविशेषाणां प्रयोगपरिमोक्षयोः १६ यथाभूदस्यसामर्थ्यंनतथान्यस्यकस्यचित् येतत्रनगरेयोधादेशांतरगताश्चये १७ शूराविख्यातिमंतश्चतेषामासीदयंगुरुः अभूदन्योतिशूराख्योतस्यज्ञातेयवानिह १८ वीरमानीसकेषांचिदाचा र्यइतिसंमतः स्पर्धतेन्वहमेतेनगोमायुर्हरिणायथा १९ नमत्समोयमेनादिरित्यघोषयदन्यतः चत्वरेक्रंदनंतस्य श्रुत्वापिसनकुप्यति २० गर्जितंप्रतिभेकस्यनहिक्रुध्यतिवारिदः शिष्याःकदाचिदेतस्यतस्यस्पर्धासहान्वह म् २१ समरायोद्यमंचक्रुस्तान्क्षांत्यासन्यवारयत् असमर्थतयायोद्धुममुष्यैतन्निवारणम् २२ पुनरुक्तोपिचस्प र्द्धामतिशूरश्चकारह चक्षमेतदपिश्रीमान्महात्माशिवभक्तिमान् २३ अतिशूरोदिने क्वापिमुहुःप्रोत्साहितःख लैः आगत्यैनादिनाथस्यगृहद्वारंजनैर्वृतः २४ प्राहयुध्यस्वशूरश्चेन्मयासार्धंनचेन्मम त्यक्त्वायुद्धंपदेकृत्वाप्रणा

मित्यर्थःएतेनएनादिनाथेनस्पर्द्धते जिगीषांकरोतीत्यन्वयः तत्रोपमा गोमायुर्हरिणायथेति गोमायुर्मृगधूर्त्तकइत्यमरः हरिणासिंहे न १९ नेति चत्वरे अङ्गणे २० गर्जितमिति भेकस्यमंडूकस्य २१ २२ २३ २४ प्राहेति पदेप्रणामंकृत्वाशरणागतोभूत्वेत्यर्थः २५ ॥ ७ ॥

२६ २७ नेति बद्धकक्षौ बद्धकटिबंधौ २८ २९ ३० ३१ परिश्रान्तइति दिनयौवने मध्यान्हे इभं गजं हरिर्यथा सिंहइवेत्यर्थः ३२ ३३ ३४

इतितस्योक्तिमाकर्ण्यकर्णयोःपरुषाक्षरां हसन्नेनादिनाथोपिप्रत्युवाचभटाग्रणीः २६ गृहाणशस्त्रंनिर्याहि बहिर्यावोरणांगणं अथैवमुक्तेसर्वेपिश्चःप्रभातेस्तुसंयुगः २७ नेदानीमतिमध्यस्थाःप्रतिषेधंव्यतन्वत अथा परेद्युरुषसिबद्धकक्षौगतावुभौ २८ रणांगणंविविशतुःशिष्यैःसहधृतायुधैःपौराःसर्वेचददृशुःसाक्षिणःसंयुगंत योः २९ घणादितेषुतूर्येषुसिंहनादेदिविस्पृशि पश्यत्सुवीरवर्येषुरणाकक्षांबबंधतुः ३० चरंतौविविधैर्मार्गैर्हे तिभिःपरिभूषितौ दर्शयामासतुःशिक्षांनानाशस्त्रप्रयोगतः ३१ परिश्रांतोऽतिशूरोऽभूत्प्रस्विन्नोदिनयौवने च र्मखड्गंचविभ्रंतंजग्राहेभंयथाहरिः ३२ नजघानगृहीत्वातंदययासुभटोत्तमं तमुवाचातिशूरस्त्वाश्वोजेतास्म धुनात्यज ३३ तथेतितंहतप्रायंतत्याजेनादिनाथकः अतिशूरोगृहंप्राप्यचिंताक्रांतोबभूवह ३४ उदेष्यतिरविर्यु द्धंभविष्यतिचतत्रमां विजित्यैनादिनाथोपिकीर्त्तिप्राप्स्यतिशाश्वतीं ३५ वृथाघोत्साहितोमूर्खैःस्पर्धालुरधुनास्म्य हं प्रबलस्यापराधेनप्राप्तोहंप्राणसंशयम् ३६ एनादिनाथंसमरेसंपश्यामिधृतायुधं क्रुध्यंतमिवमत्तेभमनुकेसरि णंवने ३७ प्रातःकथंनिरीक्ष्येहंसक्रोधस्फुरिताधरं मुखमेनादिनाथस्यशार्दूलस्येवजृंभतः ३८ यदिशूरोऽपियोस्मा भिरगमिष्यम्यंतकालयं शाक्प्रार्थितःकथंभूयःकरिष्येस्यपदानतिम् ३९ त्राणोपायंनपश्यामिप्राणानांकथमप्यहं रणे विनाप्रणामेननविमोक्ष्यतिमांरिपुः ४० अप्ययुक्ततरंमन्येममरात्रौपलायनं इतिचिंतापरस्याभूत्उपायःप्राणरक्षणे ॐ

३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

४२ ४३ प्रास्थादिति श्रुता तस्य अतिशूरस्य बिरुदावलीप्रबंधविशेषः तल्लक्षणं तु वर्ण्यमानां कबिरुदवर्णनप्रचुरोज्वला वाक्याडंबरसंयु
क्तासामता बिरुदावलीति ४४ तत्रेति शुष्मिणोरिव गजयोरिव ४५ ४६ ४७ ४८ आहूत इति शिवभक्तानां अभिषंङ्गः पराभवः तेन यदंहः दुरितं तस्य नि

इतिकर्त्तव्यमित्युक्त्वासोतिशूरोस्वपन्निशि रजन्यां तु प्रभातायां त्रिपुंड्रालंकृतालिकः ४२ चतुर्विंशतिरुद्राक्षभूषि
तौ च दधद्भुजौ खड्गखेटधरैः सार्द्धमतिशूरो विनिर्ययौ ४३ प्रास्थादेनादिनाथोपि श्रुततद्बिरुदावलिः गच्छंतमन्व
युः शिष्यास्ताराश्चंद्रमसं यथा ४४ तत्र सर्वेषु पश्यत्सु तयोर्युद्धमवर्त्तत वाञ्छतोः कीर्त्तिमतुलां शुष्मिणोरिव मत्त
योः ४५ हस्तदूतेन खड्गेन स जघान रणे रिपुं अतिशूरोपि खड्गेन तत्प्रहारं न्यवारयत् ४६ एनादिनाथोथोत्कर्ष
न्लग्नं चर्मण्यसिं निजम् भाले भस्मरिपोर्दृष्ट्वा संभ्रांतहृदयोभवत् ४७ विचारं चागमत्तीव्रं शिवद्रोहभयेन
सः कथं मया शिवद्रोहमविचार्य दुरात्मना ४८ आहूतो भस्मरुद्राक्षधारी युधि रिपूकृतः शिवभक्ताभिषंगांहो
निष्कृतिर्न मृतिं विना ४९ यदि त्यक्तायुधो हंस्यामयशस्यं भवेदघं पराङ्मुखवधात्तस्मादतस्तिष्ठामि सायुधः ५०
छिन्नग्रीवोऽस्य खड्गेन प्राणांस्त्यक्ष्येद्य शुद्धये नान्यथा निष्कृतिर्मेस्ति वर्षकोटिशतैरपि ५१ धृतासिरेवं निश्चित्य त
स्थाउद्यमवानिव भावज्ञोपि रिपुस्तस्य न जानन्निव तत्क्षणे ५२ अतिशूरः शिरश्छेत्तुं शत्रुं कैश्ये परामृशत् निर्वि
कारो यदा तस्थौ प्राणानामत्ययेपि सः ५३ तदानीं वृषभारूढः शंकरः प्रत्यदृश्यत पार्वत्या च गणैः सार्द्धं विबुधेंद्रैरभि
ष्टुतः ५४ स्थितिं दत्वास्य कैलासे चक्रे पारिषदोत्तमम् किं वा न सुलभं पुंसां प्रसन्ने परमेश्वरे ५५ प्राप्याप्यापदमीश

स्य प्रीतिं संपादयेत्ततः ॥५५॥

ष्कृतिः प्रायश्चित्तं मृतिं विना नेत्यर्थः ४९ ५० ५१ ५२ अतिशूर इति कैश्ये केशसमुदाये ५३ ५४ स्थितिमिति पारिषदोत्तमं प्रमथा

इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांएकविंशतितमोऽध्यायः २१॥ ॥श्रीः॥
संप्रति निषादादिहीनजातीनामपिशिवभक्त्यामुक्तिर्भवतीतिवदति शिवेइतिजन्मादिपदेनरोगमरणादिपरिग्रहः तेनयःक्लेशसएव ध्वांतंअंधकारःतस्य अर्कस्वरूपंसूर्यात्मकंतन्नाशकमित्यर्थः अङ्घ्रिसरोरुहंपादकमलंयस्यतादृशे १ नेतिश्लोकद्वयं एकान्वयि श्रुतं शास्त्रंइज्यायागः व्रतंउपवासादि स्वाध्यायोवेदाध्ययनं कुलादिकंसर्वे तथा तेनप्रकारेणपुनर्भवक्लेशहरं नभवति यथाशिवभक्तिः

इतिश्रीस्कंदोपपुराणेएकविंशतितमोऽध्यायः २१॥ ॥अगस्त्यउ-शिवेजन्मादिसंक्लेशध्वांतार्कोघ्रिसरोरुहे भक्तिंवितन्वतेयेत्रतेषांनास्तिपुनर्भवः १ नकुलंनश्रुतंनेज्यानव्रतंनतपोमहत् नस्वाध्यायोनदेवार्चानचतीर्थनिषेवणम् २ पुनर्भवक्लेशहरंभवतिब्राह्मणास्तथा शिवभक्तिर्यथापुण्याजन्मदोषविनाशिनी ३ शमादिगुणसम्पन्नोब्राह्मणोविजितेंद्रियः अपिब्रह्मविदोंघ्रयोर्विनाभक्तिंनमुच्यते ४ शिवभक्त्येकयालोकेनिषादश्वपचांत्यजाः छिन्नबंधाविनायोगैरनावृत्तिपथंगताः ५ मांसनेत्रार्पणेनैकश्चंद्रचूडप्रसादतः निषादसूनुःपरमांगतिमापद्विजोत्तमाः ६ श्रीऋषयऊचुः॥ कथमर्पितवान्नेत्रंनिषादोनिंद्यजन्मभाक् ॥ कथंशंभोःप्रसादेन विमुक्तभवबंधनः ७ ॥ ७ ॥ ७ ॥

ब्राह्मणादृतिसंबोधनं २ ३ शमादीति आदिपदेन दमादयोपिगृह्यंते तथाच शमादिषट्कसम्पन्नोपीत्यनेन साधनसंपत्तिसत्वेपीत्यर्थः शिवचरणभक्तिंविना नमुच्यतेइत्यन्वयः ४ शिवभक्त्येति श्वानंपचंतीतिश्वपचाः चंडालाःनिषादाश्च श्वपचाश्च अन्त्यजा शूद्राश्चेतिद्वन्द्वः अनावृत्तिपथंमोक्षमार्गं नसपुनरावर्त्ततइतिश्रुतेः अनावृत्तिः शब्दात् इतितदर्थकं चरमं ब्रह्मसूत्रंयंप्राप्यननिवर्तन्तेतद्धामपरंममेतिस्मृतेश्चगताःप्राप्ताः ५ ६ जातकौतुकामुनयःपुनःकुंभयोनिंपृच्छन्ति कथमित्यादिश्लोकद्वयेन ७ ॥ ७॥

८ इतिहासमारभते कांचीपुरस्येत्यादिभिः एकादशश्लोकैः ९ पर्वतंवर्णयति नाम्नेति कुंजराकारेणगजाकारेण भूषितोलंकृतः वन्यस त्वानां वनेभवानांजन्तूनां शरणेसाधुःशरण्यः १० कुन्देत्यादिश्लोकत्रयमेकान्वयि चलच्छदाः अश्वत्थाशम्याकाः चतुरंगुलाः ११ अरिष्टाःफेनिलाःपारिभद्राःनिंबतरवः १२ वेणुभिरिति यत्रशैलेभूमीरुहाङ्गणाः वर्द्धन्तेइत्यन्वयः १३ वर्धमानेति हर्यक्षाःसिंहाः १४ रत्नेति

अवापसिद्धिंपरमांदुर्लभांयोगिनामपि चरित्रंतस्यधन्यस्यवदनःकुंभसंभव ८ श्रीअगस्त्यउवाच कांचीपुरस्यमहतःस्थानस्येशानकोणतः सुवर्णमुखरीतीरेपर्वतोस्तिमहत्तरः ९ नाम्नावेणुगिरिःश्रीमान्कुंजराकारभूषितः शरण्योवन्यसत्वानांनानाधातुविचित्रितः १० कुंदमंदारहिंतालतालबिल्वचलच्छदाः सप्तपर्णाम्रशम्याकशललासनरोहणाः ११ नागकेसरपुन्नागनालिकेरविभीतकाः वरणौदुंबरारिष्टपारिभद्रादयोद्रुमाः १२ वेणुभिःसहवर्द्धंतेयत्रभूमिरुहांगणाः निकुंजनिलयायत्रवर्षातपनिरोधिनः १३ वर्धमानमहावेणुपर्वनिर्मुक्तमौक्तिकैः हर्यक्षनखनिर्भिन्नहस्तिकुंभच्युतैश्चतैः १४ रत्नकुंजांतरासंगपरभागमनोहरैः निशातशललीसूचीकृतरंध्रसमुज्वलैः १५ निर्मायंतेनिषादानांहारायत्रवनेचरैः छिंधिभिंधिनमुंचानुद्रवप्रहरमारय १६ इतियत्राभितःशब्दाःश्रूयंतेशबरेरिताः कलभायत्रबध्यंतेलताभिःशबरार्भकैः १७ भिल्लमल्लशुनोयत्रभषंतोवीक्ष्यसूकरान् तरक्षवश्चशार्दूलाःपलायंतेवनेवने १८ ॥ छ ॥ छ ॥

रत्नखचितानांकुंजानां लतागृहाणां अन्तरस्य मध्यभागस्य आसङ्गेनयःपरभागः गुणोत्कर्षः तेन मनोहरैः निशाताः तीक्ष्णाःयाशलल्यः शल्यरोमाणिताएवसूच्यः तत्कृतैः रंध्रैःसमुज्वलानितैरिति मौक्तिकविशेषणं १५ १६ १७ भिल्लेति तरक्षवः मृगादनाः १८ ॥ छ ॥

हरीति हरीणांसिंहानांकेशरदामानिसटामालाःतदन्तःबद्धाःव्याघ्रनखाङ्कुरायैःतादृशाःस्तनंधयाःबालाःदंष्ट्रिभिःवराहैः १९ कापोतेति
कपोतानांसमूहःकापोतंएवमग्रेपि तस्यमांसभुक् व्याधवाहिनी किरातसेना २० अवान्तरकथामुपक्षिपति तत्रेति विस्तरं

हरिकेसरदामांतबद्धव्याघ्रनखांकुराःस्तनंधयानिषादानांयत्रक्रीडंतिदंष्ट्रिभिः १९ कापोतशोकमापूरमार्गकोत्त
कूटमांसभुक् दुर्भिक्षंनैवजानातिश्रितायंव्याधवाहिनी २० तत्रास्तिगोधापुरमित्यनेकशवरास्पदं यत्सर्युषितमां
सौघविस्रगंधिदिगंतरम् २१ नानापक्षणसाहस्रशतयूथपसेवितं सिंहव्याघ्रवराहेभत्वगावृत्तमहातपम् २२ नाः
गोनामाधिपस्तस्यनिषादकुलवल्लभःकुलाचलपुलिंदौघदीयमानकरोमहान् २३ महाधनश्चशूरश्चभूपालानांः
चसम्मतः सदृशंनामशबरींसमानकुलसम्भवम् २४ उद्वाह्यहर्षवानासीत्हस्तिन्यागजराडिव रूपयौवनसौज
न्यशालिन्याचतयासह २५ रममाणोमुदंप्रापयोगीवब्रह्मविद्यया तस्यैवंवर्त्तमानस्यनापत्यमभवद्द्विजाः २६ दं
तानपत्यभावेनखिन्नाशोचयतिस्मतं अनुद्वृतापिबहुशोरत्नवस्त्रविभूषणैः २७ भर्त्राप्रणयिनानित्यंबहुमानेन
किंचन पपौनमधुमांसानिबुभुजेचनचाशनम् २८ दधौमृगमदंनापिनसस्नौकुंकुमांभसि नवेण्युदूर्त्तनंचक्रेनदुकू
लंबभारसा २९ तामवेक्ष्यनिषादानामनुशोचन्नधीश्वरः नामन्यतसुखंगेहेरहितेपुत्रसम्पदा ३० एवंयातेबहुतिथेकां

धिआमगंधि २१ नानेति पक्षणाःशबरालयाः सिंहादीनांत्वग्भिःचर्मभिः आवृत्तःनिवर्त्तितःमहान्आतपो यस्मात् तदिति पूर्वश्लोक
स्थगोधापुरमित्यस्यविशेषणं २२ नागदृतिकुलाचलेषु हिमालयादिषु येपुलिन्दौघाः किरातसंघाःतैःदीयमानःकरः राजग्राह्यधनंयस्मै
२३ २४ २५ २६ २७ २८ दधाविति मृगमदंकस्तूरीं नसस्नौस्नानं नकृतवती वेण्युदूर्त्तनं केशसंस्कारं २९ ३०एवमिति संसदिसभायां ३१

३२ ३३ प्राणानिति स्पष्टमर्द्धं व्याधादित्यादिश्लोकद्वयमेकान्वयि वद्धांपप्रच्छुरित्यन्वयः ३४ ३५ प्राभृतमिति प्राभृतंउपायनं ३६ ३७ ध्या

अनपत्योस्मिखिन्नोस्मिसदागेनिंदितःकुले नभूतपूर्वःकोप्यस्तिमादृशोभाग्यवर्जितः ३२ यत्रकुत्रापिगच्छा
मिअनपत्येनमेफलं यदिकश्चिदुपायोस्ति पुत्रसंपत्प्रदोमम ३३ प्राणानपिपरित्यज्यतस्यकर्त्तास्म्यसंशयं व्याधा
स्तस्यवचःश्रुत्वापप्रच्छुश्चकुलोत्तमाः ३४ पक्वणस्यबर्हिर्वद्धांजटिलांपर्णवेश्मगां प्रियंगुपिष्टभांडानांसहस्रम
धुसर्पिषाम् ३५ प्राभृतंप्रस्थसाहस्रंदत्वाप्रांजलयोंतिकेनागोपिमौक्तिकप्रस्थंप्रणामांतेददौपुनः ३६ माणिक्यवे
त्रमतुलंलक्षंपट्टाम्बरंतथा प्रतिगृह्यचतत्सर्वंजरतीशवरीक्षणम् ३७ ध्यात्वाशक्तिधरंदेवंसहवल्यामनोज्ञया
चालयंतीशिरःकिंचिदिदमाहवनेचरान् ३८ सहभर्त्राप्रसन्नेनवल्यस्मद्देवतंमहत् मौक्तिकप्रस्थशतकंयद्यनेनः
प्रदीयते ३९ नागादप्यधिकःपुत्रोभविताप्रतिभूरहं इतितस्यांब्रुवाणायांशकुनानामभूध्वनिः ४० प्रत्ययंप्रापिः
तोव्याधःप्रत्यक्षासीत्तथैवतु मुक्ताप्रस्थशतंद्यांसंजातेतनयेमम ४१ तथाविधेहिमातर्मेयथावल्लीप्रसीदति वद्धा
तद्वचनंश्रुत्वानागमाहस्थितंमिथः ४२ तवदत्तव्रतंमत्तःगृहीत्वावत्सरंयदि तिष्ठन्मनोरथःपूर्णःभविताबल्यनु
ग्रहात् ४३ अस्त्वित्युक्तागृहीत्वोद्योगीतद्वाचातोषयद्वधूं साप्रीताव्याधवचनाद्वद्धांप्रातर्ननामताम् ४४ उपस्पृश्य
व्रतंवद्धास्पृशंतीभस्मनालिके पद्यंचपाठयामासवल्लीप्रीतिकरंपरम् ४५ नमोनमःषण्मुखवल्लभायेनमोनमोन
मज्जनार्त्तिहंत्रेनमोनमःसर्वसमृद्धिदायेनमोनमस्तेद्विशवल्लिपुत्रम् ४६ एतत्पद्यंजपंतीसामधुमांसविवर्जनात्

शक्तिधरंषण्मुखं वल्यातन्नाम्न्या पत्न्यासह ३८ ३९ नागादिति प्रतिभूःउत्तमर्णाधमर्णयोः मध्यस्थः ४० प्रत्ययमिति विश्वासमि

त्यर्थः प्रत्यज्ञासीत् प्रतिज्ञामकरोत् ४१ ४२ ४३ ४४ उपस्पृश्येति आचम्येत्यर्थः भस्मनाग्निकेभालेस्पृशन्ती ४५ ४६ ४७ मासत्रयेद्गति

मासत्रयेष्यतिक्रांतेनाभवल्लक्ष्मकिंचन पुनःसापद्यमदिशत्षण्मुखस्तुतिसुन्दरम् ४८ नमोनमःशैलसुतात्मजायन
मोनमोबर्हिणवाहनायनमोनमोवल्लिमनोहरायनमोनमोदेहिसुतंगुहेश ४९ इतिपद्यद्वयंवृद्धापाठयित्वाचतां
नतां बभूवपरमप्रीताकृतार्थासीत्यभाषत ५० अतीतेसप्तमेरात्रेदंतानिद्रावशंगता स्वप्नेददर्शस्वोत्संगेस्थापितंपू
र्णमंडलम् ५१ निषादाधिपतेर्भार्याभास्वंरजनीचरं अंतर्गृहेप्रदीप्तंचप्रदह्यायैव्यजिज्ञपत् ५२ मान्यत्रकथयेत्युक्ता
साप्रहृष्टतराभवत् अथमासेत्वतिक्रांतेप्रास्फुरत्गर्भलक्षणम् ५३ व्याधाश्चमुदितानेमुःव्रतांतेजरतीमपि प्रागेवज
न्मनःस्नोर्यथोक्तंशबराधिपः ५४ मौक्तिकप्रस्थशतकंवल्लीदेवीमुदेददौ शुभेमुहूर्त्तेव्याधेंद्रःसर्वाभरणभूषिताम् ५५
आसन्नप्रसवांदंतामवलोक्यदधौमुदं बाहुभ्यामवतीर्णोब्धिपारंगतइवस्वयम् ५६ इयेषतनयंजातंकर्त्तुंशबरनायकं
ततःशुभान्वितेलग्नेशुभग्रहनिरीक्षिते ५७ दंतासूतात्मजंप्राचीहरिच्चंद्रमसंयथा नागःश्रुत्वात्मजंजातंबभूवमुदितांत
रः ५८ नष्टदृष्टिःपुनर्दृष्टिलाभेनतनुमानिव मधूनिदापयामासपक्वेषुचसर्वशः ५९ निषादोजरनींसाक्षाद्देवीवल्लीम
मन्यत्त काहलीशृंगहिक्कानांशब्दास्तत्पुत्रजन्मनि ६० वियतोधोव्यजृंभंतनादयंतोदिशोदश ववर्षुःपुष्पवर्षाणिखेचराः
शबरालये ६१ यथाधिकारंव्याधेंद्राःरत्नप्राभृतपाणयः उपासतांतिकेनागंयथापूर्वेप्रियंवदाः ६२ जगुःकलंचगंधर्वानन्नतु

लक्ष्मगर्भचिन्हं ४८ ४९ ५० ५१ ५२ मेति अन्यत्र माकथयेत्यर्थः ५३ ५४ ५५ ५६ ५७ दन्तेति प्राचीहरित् पूर्वादिक् ५८ ५९ ६० ६१
६२ जगुरिति अतनुः अशरीरिणी वाणी ६३

शिवेति नयनार्पणात् निजनयनसमर्पणात् अच्युतात् विष्णोरपि अधिकां कीर्त्तिं प्रदधे धारयामास भूतकालस्य अविवक्षया धारयिष्यतीत्य

शिवभक्तिपरीक्षायां प्रददे नयनार्पणात् अच्युतादधिकां कीर्त्तिं संप्राप्य शबरान्वयम् ६४ अलं कर्त्तुमयं जातः दं
तायास्तनयो महान् इति तद्गिरमाकर्ण्य सिद्धाः श्लाघामकुर्वत ६५ रोदनध्वनिमाकर्ण्य शिशोर्दंताकलाक्षरं अ
विंदत परानंदं योगसिध्येव योगिनः ६६ क्रमेण ववृधे बालो मात्रा समुपलालितः शुक्लपक्षमनुप्राप्य कलानिधिरि
वोदितः ६७ शबरी शबराणां च तस्मिन्नयनपङ्क्तयः पूर्णामृतमिवासाद्य तटाकं तृषिता जनाः ६८ देहवर्णस्य स
दृशं नाम चक्रे पिता शिशोः नीलवर्णतया नीलः प्रथितः पक्कणेष्वभूत् ६९ जानुभ्यामपि बाहुभ्यां चंक्रमंतं कुमारकं
पश्यतोर्व्याधदंपत्योः प्रीतिं जानाति शंकरः ७० जातदंतस्य नीलस्य व्यक्ताऽव्यक्ताक्षरा मुदा गिरस्सुधासमरसाः श्रू
यंते स्म तदा मुहुः ७१ छिंधि दारय भिंधीति नागः पाठयति स्म सः धूलीकेल्यां निषादानां शिशूनाक्षिप्य खेलति ७२
बालं विलोकयन्नागः भोजनस्य न चास्मरत् व्याघ्रभल्लूकभूदारहर्यक्षगजपोतकैः ७३ क्रीडंतं बालकं दृष्ट्वा प्रह
रेत्यब्रवीत्सिता श्वानौ बभूवतुस्तस्य किशोरकसमौ सदा ७४ पार्श्वयोर्भोजने निद्रासमयेपि समीयतुः व्याधवृद्धानु
दिवसं भस्मरक्षां वितन्वती ७५ वल्लीषण्मुखकारुण्याच्चिरं जीवेत्युवाच सा ७६ इति श्रीस्कंदोपपुराणे द्वाविंशोऽध्यायः
२२॥ ॥ द्वादशे वत्सरे तस्य नूतनायुधसंग्रहं कारयिष्यन्मुदा नागो व्याधान्सर्वान्समेलयत् १ हिमालये महामेरौ निष
धे गंधमादने विंध्ये महेंद्रे मलये त्रिकूटे मल्लिकार्जुने २ गिरावन्यत्रये व्याधाः ते च सर्वे समागताः नानोपायनहस्ता

र्थः ६४ ६५ ६६ ६७ ६९ ७० ७१ ७२ बालमिति भोजनस्येति कर्मणि षष्ठी ७४ ७५ ७६ इति श्रीमानवल्युपनामक नृसिंहविरचितायां

भक्तविलासप्रकाशिकायां द्वाविंशोऽध्यायः २२॥ ॥❀॥ अथनागोनामव्याधराजः निजपुत्रस्यनीलस्यअस्त्रशिक्षादिकंचकारेत्याह द्वाद
शद्वति अमेलयत् एकत्रचकार १ २ ३ संपूज्येति उपदीकृतं उपायनीकृतं द्रव्यजातं त्रिपादैः त्रिभिरंशैःसंगृह्य चतुर्थभागस्य संचया
र्थरक्षणीयत्वादितिभावः ४ ५ उलूकेति उलूकध्वनिंकुलाचारप्राप्तं घूकस्येवशब्दं तेषांतस्य मंगलार्थत्वादितिभावः अंगुलित्रं ह

संपूज्यमधुमांसादिजात्याहारप्रदानतः द्रव्यजातंससंगृह्यत्रिपादैरुपदीकृतम् ४ शुभेमुहूर्त्ततनयंव्याघ्रचर्म
णिनूतने निवेश्यप्राङ्मुखंहस्तेनागःस्वांक्षुरिकामदात् ५ उलूकध्वनिमातेनुःशबर्यश्चसमंततः अथबद्धां
गुलित्रस्यसूनोर्वामकरेधनुः ६ ददौनागःशरंकिंचिदिदंसदसिचाब्रवीत् पुरःपुत्रशमीवृक्षेनिबद्धःक्रोडपोत
कः ७ शरेणाकर्णकृष्टेनशरव्यंतन्निपातय इतिनागेनसंदिष्टोनीलःसंधायकार्मुके ८ सायकंतंप्रतिसृविसस
र्जेकृतास्त्रवित् समूहागर्भकंलक्ष्यद्विभिन्नंवीक्ष्यसर्वेशः ९ श्लाघमानावनचरास्साधुसाध्विति चाब्रुवन् पुलिं
दकुलवृद्धानाकारयित्वाननिंपदे १० नागःपुत्रंसमाश्लिष्यपरांनिर्वृतिमापह ततःपरंसमामंत्र्यपुलिंदास्तेनपू
जिताः ११ युवराजस्यनीलस्यचाज्ञयास्वंपदंययुः बद्धकक्षस्ततोनीलःशबराचार्यशिक्षया १२ सर्वायुधेषुपरमां
शिक्षामध्यगमच्चिरं शर्करामरुकांतारधावनेहरिणद्विषाम् १३ निरोधेनिर्भयामर्दनतस्यासीत्समोपरः आनाया
दिप्रयोगेषुयुद्धेकेसरिभिःसह १४ सत्वप्रहारमोक्षेचसदृशस्तस्यनापरः आखेटकौतुकाक्रांतचेतसोऽस्यानुवास

स्तावापः ६ ददाविति क्रोडपोतकःवराहबालकः ७ शरेणेति शरव्यं लक्ष्यभूतं ८ सायकमितिसः नीलः ९ १० ११ १२ सर्वायुधेष्वि
ति शर्कराःक्षुद्रपाषाणः मरुःऊषरभूमिः कान्तारं दुर्गमंवनं तेषुधावनेहरिणद्विषांसिंहानां १३ निरोधइति निर्भयं यथास्यात्तथा

आमर्दैपरस्परसंमर्दैआनायःजालंमृगबंधनसाधनं१४ सत्वेति सत्वाःजंतवः १५ १६ १७ वलिशइति वलिशःकणिशश्चेतिनाम्नाप्रसिद्धौ आदिवसात्प्रयं संध्याकालपर्यंतं १९ २० २१ नेति करणमांघेनचक्षुरादिजाड्येन २२ २३ २४ २५ २६ विस्तार्येति वागुराःमृगबंधिनीः व

नशेकुरनुयानेपिनागस्तोर्वनेचराः सिंहव्याघ्रवराहेभशरभारण्यवासिनः १६ नतस्याविदितंकिंचिद्वनमस्तिम हीतले मार्गानुसारिणोतस्यसुहृदोचबभूवतुः १७ वलिशःकणिशश्चेति व्याधयोधाधिपात्मजौ सहताभ्यांवि निर्गत्यप्रातरादिवसात्ययम् १८ चरित्वासमहारण्येरात्रावायातिपक्वणे एवंविचरतस्तस्यपंचसंवत्सरायय्युः १९ वर्षेवातातपास्तस्यबभूवुर्नैवदुस्सहाः ततोवनचराःप्राप्यनागपक्वणवासिनः २० ऊचुर्दक्षिणतोबाधांमह तींदुष्टसत्वजां निशम्यवचनंतेषांव्याधःप्रोवाचतानिति २१ नप्रागिवबलव्याधाःमृगयायाममाधुना वृद्धःकर णमांद्येनखिन्नोस्मोहवनेचराः २२ भवंतएवदुष्टांस्तान्निवारयतसायुधाः तरुणाबलवंतश्चबलिभिश्चान्विताः श्वभिः २३ तमूचुःश्रुततद्वाक्याःपुलिंदामिलिताःशतं पुत्रंतदधिकंनीलंकुरुसेनाग्रयायिनम् २४ नागोपिप्रीत येतेषांप्रेषयामासतैःसुतं प्रतस्थेव्याधसेनासादुष्टसत्वजिघांसया २५ नीलःसुहृद्भ्यांसहितोनीलमेघसमद्युतिः धनुर्द्धरैःकवचितोमहद्वनमगाहत २६ विस्तार्यवागुराःव्याधाःतस्थुश्चपरितोवनं ह्रिधिभिधिगृहाणेतिवदंतःस त्वभूषणाः २७ ततःश्वनादमुखरेवनेसर्वत्रसंशयात् बभ्रमुर्मृगयूथानिगगनेघनयूथवत् २८ ॥ ७ ॥

नंपरितः वनस्यसमन्तात् अभितःपरितद्त्यादिना षष्ठ्यर्थेद्वितीया सत्वभूषणाःसत्वंबलंतदेवभूषणंयेषां २७ ततद्वति शुनांनादेन मुखरे संशयात्जीवनसंशयात्मृगयूथानिगजसमूहाः भद्रामंद्रामृगाश्चेतिविज्ञेयास्त्रिविधागजाः हिमवद्विंध्यमलयशैलजाताःक्रमेणते द्

जघ्नुरिति लगुडैः दंडैः निस्वनंतः नितराब्दं कुर्वंतः २९ ३० ३१ ३२ ३३ ३४ उज्जहारेति वन्यदंष्ट्रिनः वनवराहस्य वपुषः शरीरात् यावत् श

जघ्नुर्व्याधाश्च लगुडैः मृगानंतिकचारिणः नीलराजेन दलितानिस्वनंतो महाबलाः २९ सिंहव्याघ्रवराहाश्च निपेतुः स्त्यक्तजीविताः नीलबाणप्रहारार्त्तनानासत्वसमाकुलम् ३० आसीदरण्यं मथितं क्षुभितार्णववारिवत् नीलो निकुंजाद्धावन्तं दक्षिणाशामुखं भयात् ३१ कृष्णसारमनुद्रुत्य प्रतस्थे धृतकार्मुकः कनिशो वलिशश्चोभौ सहतेनाभ्यधावताम् ३२ दृश्यादृश्यतनुर्नीलं कृष्णसारोपि दूरतः विचकर्ष परिश्रांतं मारीचो राघवं यथा ३३ धावतः कृष्णसारस्य मध्ये कश्चन सूकरः विनिर्ययौ नागसुतो निजघान शरेण तम् ३४ उज्जहार शरं यावत् वपुषो वन्यदंष्ट्रिणः स कृष्णसारः सहसा वने क्वापि तिरोदधे ३५ अथ तापपरिश्रांतः क्षुधितस्तृषितो वने व्याधराजसुतः प्राह सुहृदौ च धृतश्रमौ ३६ मृगः पलायितोरण्ये परिश्रांता वयं क्षुधा उपलक्ष्येत चेद्वारिश्रांतिः शांतिमुपैष्यति ३७ कणिशोऽथ तमाहेदं सखे स्वादुत्तरं ननु जांगलं वन्यलोकस्य भुज्यतां किं विलम्बसे ३८ नवन्हिमिह पश्यामि पिपासा महती मम उपायः को नु भवितेत्याह नीलो धृतस्तरुम् ३९ कणिशः प्राह तं भूप श्रूयतां मद्वचः सखे क्रोशद्वयादितः शैलो दृश्यते कश्चिदुन्नतः ४० सिद्धचारणगंधर्वसेवितो देवभूषितः फलभारानतैः पुष्पैः सांद्रः सानुशतं श्रितः ४१ सुवर्णमुखरी नाम तत उत्तरतो नदी कमलोत्पलकल्हारवनामोदाधिवासिता ४२ घृतपिंडोपमा यत्र चरंति शफराः सखे तत्र गत्वा महानद्यां स्नात्वा पीत्वा झषोत्तमान् ४३ स्वादतस्तेन पुनरावृत्तौ बुद्धिर्भविष्यति मया परिचिता पूर्वं सा नदी मृगयांतरे ४४ ॥ ७ ॥

रं उज्जहार उद्धृतवान् ३५ ३६ ३७ कणिश इति जांगलं वनं ३८ नेति तरुं धृतः धृतवान् इति कर्त्तरि क्तः ३९ ४० ४१ ४२ घृतेति झषोत्तमा

ஜாம்பவம் நிஜ்ஜ்ஜாநெ ஜ்ஜிஷ்ஷாம்ஸெ நவம்ஸ்கம்H

॥ मत्स्यश्रेष्ठान् ४३ ४४ ॥

மொழிபெயர்ப்பு நூலகம் ஜப்பான்

४५ ४६ श्लाघमानइति निमित्तानि शुभशकुनानि ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ गंधर्वेति गंधर्वाणां देवयोनिविशेषाणां गीतस्य गानस्यमाधुर्येणद्रवंतः नादक्रियायेतिभावः गानशास्त्रज्ञैःसमयविशेषंप्रतीक्ष्यतदुचितगानकरणे पाषाणाअपिद्रवन्तिस्रुक्ताश्च

उत्तिष्ठोत्तिष्ठतन्वीलंबलिशःप्राहहेसखे त्वयावनवराहोयंमयाविद्धःप्रतीक्ष्यताम् ४५ अत्रैवजलमानीयतवदास्यावहेपुनः तथेत्युक्तेऽपिसुहृदानागसूनुर्नदींप्रति ४६ श्लाघमानोनिमित्तानिप्रतस्थेकणिशान्वितः मुहूर्त्तेनैवतंगत्वापर्वतंतस्यचांतिके ४७ ददर्शनीलस्तटिनींसुवर्णमुखरींततः स्वादुशीतलपानीयामतिस्वच्छांमहामुदा ४८ तरंगमधुराधूतपांथजालपरिश्रमां नानातीरतरुव्रातशिरःसाहस्रवर्त्तिनाम् ४९ विहंगमानांध्वनिभिःमुखरीकृतदिङ्मुखां मज्जन्मुनिवरस्तोमशिष्यकोटिसमावृताम् ५० कालहस्तीशनिर्मोल्यपुष्पभासुरवेणिकां मत्स्यकच्छपसंचारसमाधूतसरोरुहाम् ५१ मकरंदरसास्वादमत्तालिध्वनिनादितां मरालचंचुसंदष्टविसलालसहंसिकाम् ५२ मज्जन्निर्जरवारस्त्रीस्तनकस्तूरिकाबिलां पानावतीर्णवन्येभदानचंद्रकमंडिताम् ५३ हर्यक्षहतमत्तेभकुंभमौक्तिकशर्करां बालदूर्वादलश्यामसरोमांचमृगांचिताम् ५४ गंधर्वगीतमाधुर्यद्रवदभ्रमनोहराम् उपांतकुंजसंशुष्यन्मुनिवाट्यकवल्कलाम् ५५ इङ्गुदीफलसंक्षोदस्निग्धश्लक्ष्णशिलांतरां तटकीचकसंदष्टबालार्त्तचमरीमृगाम् ५६ खंजरीटविहारक्ष्माखातशुकुवनेचरां स्फुरदावर्त्तनाभीकांनीलोत्पलविलोचनाम् ५७

तरवःपल्लविताभवंतीतिसंप्रदायः नादश्रायेअभ्रानःतैःमनोहरां वाट्यंकदुसमूहः ५५ इङ्गुदीति संक्षोदःचूर्णःजटाबंधनार्थमितिभावः तटकीचकैःसंदष्टाःयेबालाःकेशाःतैःआर्त्तीःचमरीमृगाःतेषां बालप्रियत्वादितिभावः ५६ खंजरीटेति खंजरीटानां खंज

नाख्यपक्षिविशेषाणां विहारक्षमायां क्रीडाभूमौ खाताःनिखाताः शंकवः कीलायैःते वनेचराः यस्यां खंजरीटमिथुनक्रीडां दृष्ट्वा किं
णातास्तत्रनिधिनिश्चयेन कालान्तरे तत्परिचयाय शंकून् खनंतीतिभावःनिधिमत्येवदेशे खंजनाः क्रीडंतीतिप्रसिद्धिःस्फुरदित्यादिना
सरितं नायकात्वेन रूपयति आवर्त्तएवनाभौ यस्यास्तामित्यादि ५७ उन्नमदिति पुलिनमेव श्रोणिः नितंबः शुद्धफेनएव वराशु

उन्नमत्पुलिनारोहांशुद्धफेनवरांशुकां विकसत्संकजमुखीं दीर्घशैवालकुंतलाम् ५८ चक्रवाकस्तनवतींचारु
कुंचितहंसकां महिषीसिंधुराजस्यमंडितामिवभूषणैः ५९ सुवर्णमुखरीदिव्यासरितंशबरात्मजः समीक्ष्यमुमुदेः
नीलःसख्यासहविगाह्यताम् श्रमपहायपरिश्रांतिमभवन्मोदनिर्भरः ६० सद्यःसुवर्णमुखरीसलिलावगाहाद्याघ
स्यनष्टमखिलंदुरितंबभूव चेतश्चनिर्मलमभूद्दहुजन्मभाग्यकल्पद्रुमोप्यथफलोन्मुखतांप्रपेदे ६१ इतिश्रीस्कं
दोपपुराणेत्रयोविंशोऽध्यायः २३॥ ॥❀॥ ६॥ श्रीअगस्त्यउवाच तीरद्रुमफलंस्वादुभुक्त्वाथसुहृदर्पितं ब
भूवतृप्तोमुदितोनीलःश्रांतपरिश्रमः १ पश्यन्नभ्रंलिहान्वृक्षान्सुवर्णमुखरीतटे विभ्राणस्सशरंचापंविचचार
वनेचरः २ अथश्रीकालहस्तीशसेवासंप्रीतचेतसां आसीदप्सरसातस्मिन्संभ्रमःशैलमूर्द्धनि ३ निक्काणिः
तरवोन्मिश्रोवेणुस्वनविचित्रितः मंद्रमर्दलनिर्ह्रादकृतमायूरकौतुकः ४ नानताररवालापलीलाकोरकित
द्रुमः गंडशैलशिलासारद्रवीकरणपंडितः ५ कालहस्तीशभूषाहिराजराजानुमोदितः संगीताडंबरस्तासांव्यान

कंयस्याः ५८ ५९ ६० ६१ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांत्रयो।
विंशोऽध्यायः २३॥ ॥❀॥ प्रस्तुतमेववर्णयति तीरेति १ २ अथेति संभ्रमः त्वरा ३ निक्काणितेति निक्काणितरवःभूषणशब्दः

भूषणानांतुशिंजितं निक्काणोनिक्वणः क्काणः क्वणः क्वणनमित्यपीत्यमरः मायूरंमयूरसमूहः तस्यकौतुकंमेघगर्जितभ्रमजन्यंकौतू
हलंकृतंयेनसादृश्यादितिभावः ४ तानेति तानानांस्वरविशेषाणां तारवस्यअत्युच्चशब्दस्य-आलापःआरंभसमयःतस्यलीलयाकोरकि
ताःसंजातकोरकाःद्रुमाःयस्यपूर्वोक्तनादक्रिययेतिभावः ५ कालहस्तीशेति भूषार्थं येअहिराजराजाःमहासर्पाः तैः अनुमोदितःतेषांगा

तेनाकृष्टमनानीलःसुहृदःप्राहकौतुकात् परिमृष्टाममश्रांतिरपिश्रांताक्षुधातृषा ७ सुवर्णमुखरीस्नानात्परि
पूतोस्मिसांप्रतं न्यस्तभारमिवाभातिप्रसन्नमिवमानसम् ८ आपूरयतिकोयंमेमुहुःशब्दामृतैःश्रुतिं अवतीर्णइव
स्वर्गःशैलाग्रेकिंनपश्यसि ९ अथतंप्राहकणिशःपितुस्तेमृगयांतरे मयासहगतेनप्रागिदमाकर्णितंतथा १० शि
खरेशैलराजस्यदिव्याकाचनदेवता देवास्तांपूजयंतीतिकिंवदंतीमहीयसी ११ द्वयमेकपदीतत्रसेवार्थंगच्छ
तांसखे मधुमाक्षिकशब्दानुविधायीश्रूयतेध्वनिः १२ दिदृक्षा यदिगच्छावःतत्रापिप्रियसांप्रतं तथेतिनीलःग्रथि
तःत्वरितःसुहृदासह १३ आरुरोहगिरिश्रेष्ठंसोपानैःक्षुल्लकाश्मभिः समाधिमिवयोगींद्रःशनकैःसंयमादिभिः
१४ पार्श्वेपरिणमद्वेणुपर्वांतोद्गांतमौक्तिकैः समंततःशर्करितामतिक्रम्यसवर्त्तनीम् १५ चरंतियत्रजीमूताःक
लभाद्रवमेचकाः अध्यारोहतान्नीलःससुहृत्तदधित्यकाम् १६ ददर्शशैलशृंगाग्रेनमेरुवनमुत्तमं कृतमालवनोन्मि

नप्रियत्वात् व्यानशे व्याप्नोतिस्म ६ ७ ८ ९ १० शिखरेइति देवताअस्तीतिशेषः किंवदंतीजनश्रुतिः ११ द्वयमिति एकपदी एक म
नुष्यसंचारयोग्यामार्गःगच्छतांजनानां गम्यतामितिपाठेत्वयेतिशेषः १२ दिदृक्षेति प्रियेतिसंबोधनं १३ आरुरोहेति क्षुल्लकाःसूक्ष्माः स
माधिमिवभूमिकाक्रमेणेतिभावः १४ पार्श्वेइति परिणमतांजातपरिपाकानां वेणूनां पर्वभ्यः ग्रन्थिभ्यः उद्गांतैःमौक्तिकैः शर्करितां सं

जातशर्करांवर्त्तनींएकपदीं१५ चरंतीतिश्रधित्यकाऊर्ध्वभूमिं १६ १७ १८ १९ पदेइति प्रससादतरां अत्यंतंप्रसन्नंबभूव २० ततदर्दुरेणमंडूकेन फूत्कुर्वन् अतएव उत्फणःउद्धतफणः यःअहिःसर्पःतस्यफणाकृति फणाकारं २१ २२ २३ कपोलेति कपोलयोः गंडस्थलयोः कषणे घर्षणे कण्डूशमनायेतिभावः आसक्तानांमत्तेभानां मदेनवासितं सुगंधितं वल्मीकेषु सर्पायतनेषु येअहयःसर्पाः ते

बिल्ववृक्षंतमुद्दिश्यगच्छन्व्याधोत्तमात्मजः॥ ददर्शपरितःसर्पान्शांतवैरान्सहस्रशः १८ गच्छतःपदवींतस्यसीमावधिमगाहत मुनेःशिवप्रसादेनसंसाराध्वावधिर्यथा १९ पदेपदेस्यपापानिकोटिजन्मार्जितान्यपि प्रणष्टानियतस्तस्मात्प्रससादतरांमनः २० ततोदर्दुरफूत्कुर्वदुत्फणाहिफणाकृति लिंगंमाहेश्वरंदिव्यंप्रत्यङ्मुखमनस्थितम् २१ कृतोपहारंभक्तेनकृतमालस्रगंचितं कोटिसूर्यप्रतीकाशंकोटिशीतांशुशीतलम् २२ सकृद्दर्शनमात्रेणसर्वपापहरंपरं सन्निधौमुनिविन्यस्तपुष्पदूर्वातिलाक्षतम् २३ कपोलकषणासक्तमत्तेभमदवासितं वल्मीकाहिशिरोरत्नदीपांचितदिगंतरम् २४ दुकूलेनेवमहतानिर्मोकेणपरीवृतं कस्तूरिकामृगासंगकस्तूरीरसवासितं २५ कालहस्तीश्वरंनामकालमृत्युनिवारणं बभूवमुदितोदृष्ट्वायोगीवज्योतिरंतरम् २६ ननामदंडवद्भूमौप्रदक्षिणमथाचरत् स्वामिन्मांरक्षरक्षेतिवदन्नंजलिमादधे २७ अभूद्रोमांचिततनुरानंदाश्रुकणांचितः भक्तिंदधावतितमांभवेभवभयापहाम् २८ पश्यतोव्याधपुत्रस्यभगवंतंमहेश्वरम् चक्रुश्चक्षुष्यनस्थानंसर्वोःकरणवृत्त

षांशिरोरत्नान्येव दीपाःतैः अंचितं पूजितंदिगंतरंयस्य २५ दुकूलेनेति श्वेतपट्टवस्त्रेणेव स्थितेन निर्मोकेण सर्पत्वचापरीवृतंपरिवृतं २५ २६ २७ २८ पश्यतइति करणवृत्तयः चक्षुर्भिर्नेंद्रियवृत्तयः चक्षुषिनेत्रेअवस्थानंस्थितिंचक्रुःएकाग्रमनादर्शेसर्वे २९ ॥

नवमितिअदःलिङ्गं नवन्नवमिवाभूत् अदृष्टपूर्वतयाअतिरमणीयतयाचेतिभावः क्षणेक्षणेयन्नवतामुपैति तदेवरूपंरमणीयता
यादृस्युक्तेः तस्मात्सेवनात्सआत्मनः जातिं किरातजातिंव्यस्मरत् विस्मृतवान् ३०पिबन्निति उदन्यया पिपासया ३१ ३२ जारिणीतिपूर्वंप्रोषि

नवंनवमिवादोभूल्लिङ्गंव्याधःसशंकरम् सिषेवेसादरंतस्मात्व्यस्मरज्जातिमात्मनः ३० पिबन्निवमुहुःघ्रोत्या
लिहन्निवउदन्यया जिघ्रन्निवचसंश्लिष्यत्किमाकर्णयन्निव ३१ गृह्णन्निवकरेशंभुंव्याधःस्ववशमानयन्
आलिंग्यसाहरद्वृत्तिर्व्याधपुत्रस्यमानसी ३२ जारिणीवदृढंतस्थौप्रेयसंप्रोषितागतं एतावंतमिमंदेवमनिषे
ब्यातिवाहितम् ३३ कालंकरुष्मदंमन्येदृशैवायुर्व्ययःकृतः हृतःप्रभृतिनैवास्यत्यक्तव्यःसन्निधिर्मया ३४ कृ
तकृत्योभविष्यामिकालहस्तीशसेवया इतिनिश्चित्यमनसासखायंप्रियमानसः ३५ केनवामूर्ध्निदेवस्यम्लानःपु
ष्पांजलिःकृतः उत्सार्यार्हविधास्येऽस्यनवाराग्वधमालिकाम् ३६ द्रुमानिवन्यपुष्पाणिनिपतंतिकथंयथा इति
नीलोक्तिमाकर्ण्यकणिशःप्राहविस्मितः ३७ पितुराखेटकालेतेदृष्टःकश्चिद्दिहागतः तस्यमुष्टिमिताःकेशाः
मौलिमध्येदृढीकृताः ३८ त्रिगुणैःतंतुभिःकूर्चंवामांसेवामतोवहन् असावन्वहमभ्येत्य सुवर्णमुखरीजले ३९
आनीतकलशेनामुंमूर्ध्निसिंचतिदेवतां नवानिबिल्वपत्राणिशम्याकुसुमानिच ४० मौलौपादेचनिक्षि
प्यमंदंकिमपिजल्पति अग्रस्थूलान्नकवलंकृत्वाहस्तंचदक्षिणम् ४१ दर्शयित्वागृहीत्वान्नंप्रत्यहंयातिमं
दिरं हस्तस्पर्शजलक्षेपंसहतेनैवदेवता ४२ महतीयंनचास्माकंछायामपिसहिष्यते तस्मात्वंदूरतस्तिष्ठयदेकः

तःपश्चादागतःतंप्रेयसंजारिणीवयोषाजारमिवप्रियमितिश्रुतेः ३३ ३४ ३५ केनेतिआरग्वधमालिकांशम्याकपुष्पमालिकां ३६ ३७ ३८ ३९ ४० ४१

४४ ४५ ४६ बहूनीति देवस्यप्रसादेजन्मकर्मादिनैवकारणंभक्तेरेवमुख्यकारणत्वादितिभावः ४७ ४८ ४९ ५० ५१ अङ्गीकुरुष्वेति

सख्युर्वाचंसमाकर्ण्यनीलःप्राहस्मयन्निव वनेचराणामस्माकमेतद्विकुलदैवतम् ४४ अस्मद्विधिवनेयस्माद्
सत्यासतमस्ततःसुहृत्तमंविधास्यामित्वामिवामुंमहेश्वरम् ४५ द्वित्रैरेवदिनैःपश्यभक्त्याकिंकिंनसिध्यति सुवर्ण
मुखरीवारिसुलभंकुसुमानिमे ४६ बहूनिमृगमांसानिकथंनाराध्यतेहरः जन्मकर्मादिदेवस्यप्रसादेनैवकारणम्॥
४७ साधनंभक्तिरेवास्मिन्जात्याहीनोप्यहंप्रियः रमतेनमनस्तत्रसखेमेपितुरालये ४८ यथात्रानंदभरितस्तस्मादत्र
वसाम्यहं इत्युक्त्वासन्निधिंप्राप्यसांजलिःसव्यजिन्नपत् ४९ कथमेकोनिवससिवनेदुष्टमृगान्विते प्रभुस्त्वमसिलो
कानांशैलाग्रेवर्तसेकथम् ५० अप्यस्माकंपरिजनोनतेकश्चिदिहापरः अहमेवभविष्यामिदिवारात्रंचपार्श्वतः ५१
अंगीकुरुष्वमांदेवदासभागःक्षमस्वमे करोम्यंजलिमात्रंतेप्रसीदमयिशंकर ५२ एवमात्मार्पणंकृत्वाशवराधिपनंद
नः सपर्योशांकरींकर्त्तुतदारभ्योपचक्रमे ५३ शरैराच्छिद्यतस्यारात्तृणगुल्मलतादिकं दूरीचक्रेक्षणेनैवदुरितान्यपि
भक्तितः ५४ मृगान्निहत्यबहुशोमृगयायामथानले निक्षिप्यचिंतांमहतीमवापशबरात्मजः ५५ वतदूरेसरिद्वारिवने
पुष्पाणिनांतिके कलशादिनमेकिंचित्करिष्येर्चांकथंविभोः५६ इतिचिंतयतस्तस्यप्रत्यभात्बुद्धिरुत्तमा एवम
स्तितिनिश्चित्यसचक्रेयन्महास्नानः ५७ अनन्यसुकरंतद्धिश्रूयतांभक्तिसाहसं अभिषेकांबुकलशमतनोन्मुख
मात्मनः ५८ सोपानत्प्रपदंचापिव्यधान्निर्माल्यशोधनं दूराहृतानांपुष्पाणांभाजनंकेशिकांतरम् ५९ ॥ ७ ॥

हेदेवदासंमांअङ्गीकुरुष्वनिजभक्ततयास्वीकुरुमेआगः अपराधंक्षमस्व ५२ ५३ ५४ ५५ ५६ इतीति उत्तमाबुद्धिःप्रत्यभात्प्र

तिष्ठतिस्म ५७ ५८ सोपानदिति उपानद्धापादरक्षयासहितं प्रपदंपादाग्र्यं निर्माल्यशोधनंव्यधात् विदधातिस्म पादेनैवक्षिङ्गःशिरोग
तंनिर्माल्यं दूरीचकारेत्यर्थः एवंकेशिकांतरंकेशवंदमध्यंपुष्पाणांभाजनंपात्रंचकारेत्यर्थः ५९ हस्तमिति अनलेन अग्निनापूर्वमुच्छूनं
स्थूलंपाकवशेनपश्चाच्छोषितं ६० उद्धृत्येति हेतिना शस्त्रेणस्पृश्यं स्पर्शीयोग्यं ऊष्मलं कदुष्मं सिध्मादित्वादलच् ६१ परीक्ष्येति दं

हस्तंचदक्षिणंमेनैनैवेद्यफलभाजनं अथसंवीक्ष्यपिशितंअनलोच्छूनशोषितम् ६० उद्धृत्यहेतिनाकृत्वाफूत्का
रैःस्पृश्यमूष्मलं इदंयुक्तंकिमीशस्यस्वादुपक्वंनवाभवेत् ६१ परीक्ष्यदास्येदेवायनचेद्धोहोभविष्यति दृष्ट्वादंतैस्त
तोमांसंपर्यैक्षतचक्षिहूया ६२ यद्यत्स्वादुतममांसंमधुसिक्तंवनेचरः शैलरंभादलपुटेततस्त्यंजगृहेऽथक् ६३
सुवर्णमुखरीवारिनिमज्यार्द्रंथकेशिके तत्रपुष्पाणिसंगृह्यमुखेसंजगृहेजलम् ६४ वामेनसशरंचापंआदायनि
जपाणिना अन्येनमांसपुटिकामनुप्रातिष्ठतेश्वरम् ६५ यत्रास्तेकालहस्तीशोत्वरयाभ्येत्यतत्रसः सोपानद्धाप
दाग्रेणभक्त्यानिःशंकमैश्वरम् लिंगंस्पृष्ट्वाप्रचिक्षेपनिर्माल्यंपरमेशितुः ६६ इतिश्रीस्कंदोपपुराणेचतुर्विंशोऽध्या
यः २४॥ ॥ ७ ॥श्रीअगस्त्यउवाच मौलौनिरस्तनिर्माल्येगण्डूषजलधारया अभिषिच्यनिधायाग्रेमांसपत्र
पुटंविभोः प्राक्षिपत्केशभारस्थंनतास्यःकुसुमोत्करं निवेदितानिमांसानिनोपयुक्तानिकिंमया २॥ ७ ॥

तैर्दृष्ट्वा दंशनंकृत्वाजिह्वयाच पर्यैक्षत परीक्षितवान् ६२ यदिति ततस्त्यं तत्रविद्यमानं ६३ सुवर्णेति वारिजले ६४ वामेति दूरेश्वरमनु
शिवलिंगमुद्दिश्यप्रातिष्ठतप्रतस्थे ६५ ६६ इतिश्रीमानवत्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांच
तुर्विंशोऽध्यायः २४॥ ॥ ७ ॥ क्रमेणनौलस्यशिवपूजाप्रकारमाह मौलाविति गण्डूषःमुखस्थितस्यजलस्य थूत्कारः १ २

विचारयन्निति मार्गमृगसंबंन्धि एवमग्रेपि मधुना आप्लुत मिति अग्रिमेणान्वयः ३ ४ ५ ६ ७ ८ प्रातरिति महाग्रासः प्रलयेजग

विचारयन्निति प्राह प्रांजलिस्सन्निधौ हरं भुंक्ष्व मांसमिदं स्वादु मार्गमायूरमाप्लुतम् ३ मधुनेदं तु कापोतं गो
धा मांसमिदं प्रियं ऐणेयं यदि वाराहं प्रियं ते चानयामि तत् ४ सुवर्णमुखरीमीनानिमान्पश्य घृतोपमान् भुज्य
तां कालहस्ती शशपे मयि दयां कुरु ५ यदि नाश्नासि देवेश नाश्नीयामप्यहं ध्रुवं ददामि वदने वा ते मधुसिक्तं
महेश्वर ६ एवमस्त्विति तद्वक्त्रे मांसं किंचिदथार्पयत् दयालुः कालहस्ती शो तन्मांसं बुभुजे यदा ७ ददौ स
र्वं तदा व्याधः स्वीचकार च शंकरः अथोत्थाय मुदा नृत्यन्निदमाह कृतांजलिः ८ प्रातर्भुक्तमिव स्वादु मांसं किंतु
ममापि ते व्याधवाक्यं निशम्याथ महाग्रासो महेश्वरः ९ ततोप्यधिकमेवेति शिरः कंपादमोदत विवक्षुर्व्याधवृ
त्तांतमिव देवो दिवाकरः १० वरुणस्यापरांभोधौ ममज्ज ब्राह्मणोत्तमाः बहिर्गतैरिवाघौघैस्तिमिरैर्विश्वमावृतम्
११ गृहीतस्तंभिताहींद्रफणारत्नप्रदीपिते सन्निधौ निशि देवस्य तस्थौ दीपप्रदो हि सः १२ चिकीर्षुरालयं पूजा
मेवमेव बनेचरः अन्येद्युः प्रातरटवीं मृगयार्थमगाहत १३ अर्चकोपि समागत्य मांसगंधिं महेशितुः दृष्ट्वा लिंगं वि
निश्वस्य रुरोद पतितः क्षितौ १४ उच्चैः स्वरेण चुक्रोश व्याधैर्दुष्टैरिदं कृतं नरके निपतिष्यंति शिवद्रोहरता हि ते
१५ इति संप्रोक्षणं कृत्वा पूजयित्वा च पूर्ववत् जगाम स्वालयं विप्रः शबरोऽथ समाययौ १६ ॥ ॥ ॥

द्रक्षकत्वादिति भावः ९ १० वरुणस्येति विवक्षुरिवेति पूर्वेणान्वयः बहिर्गतैरिवेति शिवपूजाप्रभावात् नीलदेहतो निष्क्रांतैः अ
घौघैरिव स्थितैरित्युत्प्रेक्षा ११ गृहीतेति पूर्वं गृहीताः पश्चात् स्तंभिताः ये अहींन्द्राः तेषां फणारत्नैः प्रकर्षेण दीपिते प्रकाशिते १२

चिकीर्षुरिति आलयं यावद्देहपातं १३ १४ १५ १६

१७ १८ १९ अर्चकइति वनदेवैःवनदेवताभिःगृहीतंसुतं श्रुत्वा नागःनीलस्यपिता २० वैद्यैरिति भेषज्यकरणेपिसुतस्यालाभात्निराश्
इत्यर्थः २१ दीर्घेति निरोगःरोगरहितःदीर्घरोगीवसनीलः २२ २३ २४ भक्त्येति आध्वर्यवसंबंधि हविंपुरोडाशादि २५ माल्यमि

अतीतःकिन्नुसमयःक्षमस्वकरुणाकर इतिनत्वायथापूर्वंकृत्वानिर्माल्यशोधनम् १७ स्वगंडूषाभिषिक्तस्यमांसा
हारंन्यवेदयत् तथैवभोजयामासतच्छेषंबुभुजेपुनः १८ एवमर्चयतःशंभुमासएकोत्सवस्तेन दूषितंप्रत्यहंमत्वा
लिंगंसंप्रोक्षणादिना १९ अर्चकःशोधयामासविचाराक्रांतमानसः वनदेवगृहीतंस्वंनागःश्रुत्वागतःसुतम् २०
वैद्यैश्चकारभैषज्यंनिराशःस्वालयंययौ प्रतियातेऽथशबरेततःपितरिपक्षणम् २१ दीर्घरोगीवनीरोगस्सबभूव
वनेचरः प्रतिबंधविनिर्मुक्तोमुमुक्षुरिवशंकरे २२ दधारपरमांभक्तिंप्रीतिंकामीवयोषिति गंधोदकाभिषेकंतंगं
डूषजलसेचनम् २३ सपादत्राणतत्पादप्रहारोमूर्ध्निचान्वहं स्कंदस्येवशिशोर्लीलाविन्यासोंघ्रिरुमापतेः २४
भक्त्यापरीक्षितंस्वादुवन्यमांसंयदर्पितं सहस्राभुतुलांतस्यनैवार्हत्याध्वरंहविः २५ माल्यंतत्केशविभ्रष्टंनिर्दो
षंहेमपुष्पवत् पर्यटन्विपिनेनिघ्नन्सत्वान्जक्षन्पिबन्हसन् २६ नकिंचिदन्यसंरंभात्एवमेववनेचरः
वारिपूरितगर्भास्यमांसंपत्रेधनुःकरे २७ शिवार्चनार्थमायांतंखेचराःप्रशशंसिरे शिवार्चकःपरंतस्मिन्शबरे
द्वेषमादधे २८ परंशंभुस्त्वतितरांशबरेप्रीतिमातनोत् अथैकदाद्विजःप्रातःपूजार्थंप्रागिवागतः २९ ददर्शलिं
गमीशस्यशबरेमृगयांगते मांसकीकससंकीर्णंवसामंत्रितमक्षिकं ३० काकगृध्राकुलोपांतंश्वापदैःपरितोवृत्तं

तिजक्षन्भक्षयन् २६ २७ २८ २९ ददर्शेति कीकसान् अस्थीनि वसया मेदसा आमन्त्रिताःआकारिताःमक्षिकायेनतत् ३० ३१

देवेति सूनास्थानमिव पशुहिंसनस्थानमिव ३२ ३३ ३४ ३५ ३६ ३७ अथेति शाबरीं शबरसंबंधिनीं तद्द्वेषी शबरद्वेषी ३८ परी

देवस्थानमिदं पुण्यं सूनास्थानमिवाधुना पापेन द्रोहिणा केन कृतमेवं दुरात्मना ३२ अपराधं कथं नित्यं सहसे शबरैः कृतं हा हतोस्मि न मे मृत्युः किं पश्यसि महेश्वर ३३ न पश्यामि दुरात्मानं शिवलिंगविदूषकं गते मयि प्रतिदिनमेवं दूषयते खलः ३४ अद्य क्षांतमिदं सर्व्वं श्वः स चाहं मृतो ध्रुवं इत्युक्त्वा स्थीनि मांसानि स्वयमुत्सार्य दूरतः ३५ संप्रोक्षणविधिं कृत्वा गंधतैलादिलेपयन् सुवर्णमुखरीतोयकलशीशतसेचनात् ३६ शतरुद्रीयमंत्रेण पूजयित्वा महेश्वरं यथापूर्व्वं ययौ वेश्मनमुक्तिं विदधे शुचः ३७ अथ स्वप्ने तमाहेशः शाबरीं भक्तिमुत्तमां तस्मात्प्रियतरो नान्यस्तद्द्वेषी तु ममाहितः ३८ परीक्षणीया यदि ते भक्तिस्तस्य महात्मनः वसैकत्र निगूढस्त्वं रात्रौ गुल्मे परेहनि ३९ इत्युक्त्वांतर्धिमकरोत्कालहस्तीश्वरो विभुः अथार्चकः समुत्थाय भयात्पुलकितो निशि ४० नैव निद्रामवापायं स्मारं स्मारं विभोर्वचः शबरोपि यथापूर्वं पूजयामास चादरात् ४१ नीत्वा रात्रिं ययौ वन्यमाखेटायारुणोदये द्विजोप्याजंतुसंचारदर्शनात्प्राक्समुत्थितः ४२ आगत्य कालहस्तीशमर्चयित्वा सविस्मयः उपांतवटवृक्षाग्रशाखामारुह्य संस्थितः ४३ अतिक्रांतेऽथ मध्यान्हे लम्बमाने दिवाकरे निहत्य विविधान्सत्वान् आदाय पिशितम्बहु ४४ स्नातः सुवर्णमुखरीवारिसंपूरिताननः मांसायुधकरः शंभोरंतिके समदृश्यत ४५ द्रुतमागत्य पादाग्रात्कृत्वा निर्माल्यशोधनं गण्डूषपयसा मौलावभिषेकं विधाय च ४६ ॥ ७ ॥

क्षणीयेति गुल्मे लतागृहे ३९ ४० नीत्वेति आसमंतात् जन्तूनां संचारदर्शनात् प्राक् किंचित् अवशिष्टायां रजन्यामित्यर्थः ४१ ४२ ४३

क्षिपन्केशस्थितंपुष्पंपिशितान्यवेदयत् यथापूर्वमभुंजानमिदमाहमहेश्वरम् ४७ विलंबसेकथंदेव॰
मांसंमधुरसापुतं भुंक्ष्वाद्यस्वयमेवास्मिन्नांतादूरादूनंगतः ४८ इत्युक्त्वाचिकुरान्व्याधोदृष्टिमार्गनिरोधिनः
सन्नद्धेशंभोजघ्नितुंमांसहस्तोतिकंपयौ ४९ वामनेत्रस्रवद्रक्तमुखमालोक्यशांभवं आहतोस्मीतिशबरःपरं
मूर्छामवापह ५० क्षणादुत्थायविरुदन्ममार्जरुधिरंदृशः पुनश्चरुधिरंतस्मान्नयनादपतद्भुवं ५१ गजदंता
भिघाताद्वामृगाणांवाखुराहतं देवदेवस्रवद्रक्तंतववामविलोचनात् ५२ अर्चकापसदस्यागोमहदस्तिन॰
संशयः अस्तुवायेनवाकेनदृग्रोगस्तेनशाम्यति ५३ यावत्तावन्नभोक्ष्येहंज्ञातमस्यौषधंचमे दृग्रणायादुपा
दायविशल्यकरणीरसम् ५४ असिंचन्नयनेशंभोःदृग्विकारस्तथैवसः व्याधोपिशूलिनश्चक्रेभैषज्यंविविधौ
षधैः ५५ नशशामयदातावदेवंचक्रेसनिश्चयं ममनेत्रार्पणेनास्यविकारःशांतिमेष्यति ५६ करिष्यामितथैव॰
वाहंनान्यत्सिद्धौषधंभवेत् इत्युत्कृत्यशरेणाक्षिनिदधेभगवद्दृशि ५७ विकारःशंभुनेत्रस्यशशामसमुदेचसः उ
पाजहारपिशितंदक्षिणादुत्कमीक्षणात् ५८ धारात्तमपतच्छंभोःव्याधश्चिंतामवापह नतेरोगोमहादेवममभ
क्तिंनिरीक्ष्यसे ५९ अन्यदप्यक्षिदयांचेत्सपर्यास्विकथंभवेत् किंव्याधपूजयादेवदक्षिणाक्षिगृहाणमे ६० इ
त्यर्पयिष्यन्व्याधेंद्रोद्वितीयमपिलोचनम् क्षणंविचारमगमत्तत्रज्ञानंकथन्विति ६१ ततोबुद्धिःसमुत्पन्नाव्याधवंशशि

५३ ५४ ५५ ५६ ५७ ५८ ५९ अन्यदितिसपर्यापूजा कथंस्वित्नभवेत् केनप्रकारेणस्वित्प्रश्नेच विकल्पेचेत्यमरः ६० ६१ ततइति चरा

णांगुष्ठं तदपिदक्षिणंईशस्य दृग्पथे दृष्टिस्थाने स्वनेत्रस्थापनपरिचयायेत्यर्थः नेत्रद्वयापहरणे स्वस्यांध्यप्रसक्तेरितिभावः ६२ ६३ ६४
६५ ६६ ६७ नेतिप्रसादादिति त्यक्त्वापेपंचमीप्रसादंविहाय परमन्यत् किञ्चित् नचकमेनाचकांक्षे ६८ ६९ इतिश्रीमानवल्युपनाम॰

॥ ६ ॥

उन्मूलयिष्यन्नयनंनिदधेशस्त्रमक्षिणासः आविर्भूयतदादेवोभ्यनंदत्समहेश्वरः ६३ ववर्षुःकुसुमासारान्खेचरा
राःशबरोपरि ददर्शदृषभारूढंसोमास्कंदंमहेश्वरम् ६४ सेव्यमानपदांभोजंगणेन्द्रैरष्टषष्टिभिः प्रणम्यशं
भुंव्याधोभूत्त्रिनेत्रस्तदनुग्रहात् ६५ तमाश्लिष्यमहादेवःप्राहगंभीरयागिरा मद्भक्त्यापरिपूतस्यनजातिर्वि
घ्नसाधनम् ६६ भवेन्मद्भक्तिशून्यस्यसंन्यासोऽपिनसिद्धिदः दत्तास्थितिस्तेकैलासेकिमन्यद्वांछितंतव ६७
नकिंचिच्चकमेव्याधःप्रसादाच्चपरंविभोः सहतेनैवभगवान्ययौकैलासमीश्वरः ६८ दत्वास्वमासनयनेशबरो
पियस्मैदूरोचकारमहतीमयिकालभीतिं वन्देसमस्तसुलभार्चितपादपद्मंतंचंद्रशेखरमपारदयाम्बुराशिम्
६९ इतिश्रीस्कंदोपपुराणेपंचविंशोऽध्यायः २५॥ ॥ श्रीअगस्त्यउवाच येनकेनापिनियमात्पूजयंतिमहे
श्वरं येधन्याःशंकरस्तेषामचिरेणप्रसीदति १ अस्मिन्नर्थेपुरावृत्तंइतिहासंब्रवीमिवः यस्यश्रवणमात्रेणशिवभ
क्तिःप्रजायते २ दक्षिणापथमध्येस्तिचौलभूमौविभूषणं कलशीपुरमित्याहुःयदिहब्राह्मणोत्तमाः ३ यत्रप्री
तोमहादेवोमृकंडुसुतपूजया निहत्यकालंपादेनचक्रेतंचिरजीविनम् ४ चतुर्वेदविदांस्थानंतदासीद्ग्रजन्मनां शि

॥ ७ ॥

कन्नसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांनीलोपाख्यानंनामपंचविंशोऽध्यायः २५॥ ॥ ७ ॥ भक्तिमेवोपो
द्बलयन् इतिहासान्तरमाह येनेति येनकेनापिपूजाद्रव्येणेत्यर्थः १ इतिहासमेवावतारयति अस्मिन्निति २ ३ यत्रेति मार्कण्डेयोपाख्या

वाचनरत्नाध्यानंपविचित्तम्

तत्रास्तिब्राह्मणःकश्चित्कलानाथइतिश्रुतः वेदशास्त्रागमांभोधिपारदृश्वागुरुःसताम् ६ सशास्त्रंसर्वमालोक्य
कर्मब्रह्मविवक्षया कथंचिन्निश्चयंचक्रेयथानस्यात्पुनर्भवः ७ अविधाययथापूजानमेभक्तिर्भविष्यति शिव
भक्त्याविनाजंतुर्मृत्युंनातितरिष्यति ८ तस्मादूंधनिवृत्यर्थेविधेयंगिरिशार्चनं नियमद्रव्यसंपत्याकयापूज्योमया
शिवः ९ केनसातिशयंभूयाच्छिवार्चनमितिद्विजः परीक्ष्यागममर्मोणि धूपेबुद्धिंदृढांदधौ १० तस्यभार्याचसुम-
तीनामेदारिवचंद्रिका तयासहद्विजःशंभोःपूजायानियमंदधौ ११ द्रोणगुग्गुलुधूलीभिःधूपंदेवायशंभवे कला
नाथवितीर्णेनधूपजालेनभूयसा १२ पूजाकालेपुरारातेःसर्वाश्चामोदितादिशः परीक्षितुमनास्तस्यभक्तिंपरमपाव
नीम् १३ विघ्नंचकारसर्वत्रतस्यद्रव्यागमेयतः धनेष्वलभ्यमानेषुकलानाथोमहामतिः १४ स्वभूषणानिविक्रीय
नियमंपर्यपालयत् कंठसूत्रस्थितंहेमविनाभार्याविभूषणम् १५ विक्रीयपूजयामासशिवंगुग्गुलुधूपतः धान्य
क्षेत्रगृहादीनांविक्रयादपिगुग्गुलुम् १६ संपाद्यधूपयामाससन्निधिंचांद्रशेखरीं भार्याप्यनशनात्पुत्राःक्षुधार्ता
स्तस्यजज्ञिरे १७ हसंतिस्मजनाःशंभोःप्रसादःसुमहानिति तथापिनात्यजद्भूपदानंधीरःशिवाग्रतः १८ अथैक
स्मिन्दिनेनष्टःसुवर्गुग्गुलुसंचयः नास्तिप्रस्तिमात्रंवाधान्यतंडुलमालये १९ यदातदाकलानाथःप्राहभार्यांपतिव्र
तां तवाहंसाध्विसाहाय्यादपूजयंमहाप्रभुम् २० आस्मैतत्क्षणपर्यंतंकेनस्याद्यपूजनम् इतिभर्तुर्वचःश्रुत्वा

येतितमेवविदित्वातिमृत्युमेतीतिश्रुतेः ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ ८

किमस्तिभवदज्ञातंभक्तिमीशःपरीक्षते नियमंपालयाद्यापिमांगल्यमणिविक्रयात् २२ इतिभर्तुर्दयोद्दे-
स्तेसत्रमात्रधरासती तदादायकलानाथःप्रीतास्तुतवशंकरः २३ इत्युक्त्वापणमासाद्यगुग्गुलुद्रोणि-
कागतं विक्रीयतद्गृहीत्वाथसायंदेवार्चनंव्यधात् २४ कुबेरःशिवसंदिष्टःप्रदोषेतस्यवेश्मनि ववर्षकां
चनीधारांमेरुतुल्यांसमंततः २५ यस्यदृश्यंतगोष्ठेषुभूयस्यःकामधेनवः महामूल्यानिपात्राणिदासीदा
सीःसहस्रशः २६ क्षौमाभरणकोशाश्चधान्यकोशाःपरःशतं पयःफेनोज्वलाःशय्याश्चोद्यानंनंदनोपमम्
२७ आसीत्स्वप्नेतुतद्भार्यांतवैतानीतिशंकरः बोधयित्वास्वयंदेवःतत्रैवांतरधीयत २८ अथस्तुत्वाकला
नाथोत्रियामाप्रहरावधि महेश्वरंप्रणम्याशुप्रतस्थेमंदिरंनिजम् २९ स्वमिदृभवनप्रख्यंवेश्मदृष्ट्वातिवि
स्मितः किमेतदितिपप्रच्छुदासीदासाभिनंदितः ३० प्रत्याहसाध्वीतत्पूजाप्रसन्नेनपिनाकिना भुंक्ष्वभोग्या
निदत्तानिदुर्लभान्यपिदैवतैः ३१ श्रीमांगल्यमणिक्रीतगुग्गुल्वर्पणतोषितात् शंभोःप्राप्तंत्वदैश्वर्यंपश्यशंभोर
नुग्रहम् ३२ इतिभार्यावदन्धीरःसोन्नदानपरोभवत् अर्चयामासहरवच्छिवभक्तान्समागतान् ३३ गृ
हक्षेत्रान्नवसनवाहनाभरणादिभिः द्विगुणंधूपमीशस्यचक्रेगुग्गुलुधूलिभिः ३४ अथचोलेश्वरःश्रीमा
न्प्रादुरेलिंगमैश्वरं अंतराभुग्नमतनोत्ऋजुकर्तुंसमुद्यमम् ३५ तादृक्पूजनमित्यक्षेत्रंलोकेषुविश्रुतं
बहवोमिलितास्तत्रनानादेशांतरागताः ३६ जनाराजान्वहंचक्रेलक्षब्राह्मणभोजनं आकृष्ययत्नान्मनु

यथातथापरंयत्नंचोलेन्द्रःसचकारह गजद्वादशसाहस्रहस्ताग्राकृष्टदामभिः ३८ अथाकृष्टमहालिंगंनर्म्मो
सीत्समहीपतिः उपोषितश्चोलपतिःपरांचिंतामवापह ३९ अथद्विजानृपंप्रोचुःकलानाथस्त्वयार्चितः यद्यागतस्त
दानूनमुपायंसविधास्यति ४० स्वयमागत्यचोलेन्द्रःप्रार्थयामासतंद्विजं सतथेतिसमाहृतःस्थानंतत्यापशांकरम्
४१ आभुग्नंलिंगमालोक्यबहुधाविहितस्तवः स्नातःकृतजपःशुद्धोभस्मरुद्राक्षभूषितः ४२ निवार्यलौकिको
पायान्उत्सार्यचबहिर्जनात् स्वकंठेशिवलिंगेचकृत्वैकंदामसाजलिः ४३ ऋजूकरिष्यन्नित्याहवक्रतेयं
कुतस्तव ऋजूभवमहादेवनोचेन्ममरणंध्रुवम् ४४ इत्युक्त्वाविचकर्षेशलिंगंतज्जिह्मतांजह्नो चोलेंद्रः
प्रणमन्यादेलिंगंवीक्ष्यऋजूकृतम् ४५ कांक्षितंकिंवदेत्याहकलानाथंद्विजोत्तमं अभिषेकजलाधारघ
टानयनकिंकरान् ४६ गजानद्वादशसाहस्रसंख्यातान्तस्यशासनात् विदधेदेवदेवस्यचोलेंद्रश्चातिविस्मि
तः ४७ दिविदुंदुभयोनेदुःपुष्पाणिववृषुःसुराः प्रशशंसुश्चतत्कर्मखेचराश्चारणैःसह ४८ यथापूर्वंकलाना
थःस्वपदंप्राप्यपूजयन् शंभुगुग्गुलुधूपेनदेहांतेमुक्तिमासवान् ४९ श्रीमत्कलानाथचरित्रमेतत्पठंतिश्रृ
ण्वंतिचयेमुनींद्राः आयुःश्रियंभक्तिमपीहशंभुर्मुक्तिंचतेषांभगवान्ददाति ५० इतिश्रीस्कंदोपपुराणेषडिंशोऽ
ध्यायः २६॥ ॥ ७ ॥ संतिलोकामहाभागाःभक्तापेक्षितदानतः अवापुर्दुर्लभांमुक्तिंप्रसन्नात्सार्वतीपतेः १॥ ॥

फलस्तुतिमाह श्रीमदिति ५० इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांषड्

विंशोऽध्यायः २६॥ ॥ ७ ॥उपायान्तरेषु सत्स्वपि भक्त्यैवमुक्तिर्भवतीतिद्योतयितुं पुरावृत्तमारभते सन्तीति १ माहेश्वराद्इति शैवाद्इत्य
र्थः आस्पदमिति २ ३ तदेवस्थानंवर्णयति बालेति बालानां षोडशवार्षिकीणांकरांबुजैः करकमलैःआलूनानि आसमन्तात्छिन्ना
नि यानिकल्हाराणिसौगंधिकानितैः वासितैःसुरभितैःसमृद्धैः पूर्णैः मरैः प्रवाहैः भ्रमितः संवृतं कुसुमाकरैरिति उद्यानविशेषणं ४ ५
नृत्यदिति नृत्यतांजातितुरंगाणां जात्यश्वानाम् अंघ्रिभिःसंक्षुण्णं चूर्णितं उदंरयस्याःतादृशीमंदुरावाजिशालायस्मिन्किञ्चकृशांगीजन

माहेश्वरावदंतीमभितिहासंमहाद्भुतं श्रवणाद्यस्यपापानिविलयंयांतिदेहिनाम् २ आस्पदंसंपदामस्तिश्रीम
संचनदेश्वरं षडंगवेदविदुषामास्पदंतद्विजन्मनाम् ३ बालाकरांबुजालूनाशेषकल्हारवासितैः मरैःसमृ
द्धैरभितःसंवृत्तकुसुमाकरैः ४ उद्यानैरुन्मिषन्मत्तमधुव्रतकुलस्वनैः वीथीविहारविश्रांतदंतिदानाधिवा
सितम् ५ नृत्यज्जातितुरंगांघ्रिसंक्षुण्णोदरमंदुरं कृशांगीजनसंगीतहृतसोपानवापिकम् ६ यायजूकमख्वा
ख्यशालाशतसमुज्वलं प्रशांतहरिणोपांतमर्चितमुनिव्रजम् ७ शिवभक्तद्विजाधीतशतरुद्रीयनादितं क
र्मकांडब्रह्मकांडवादिमंदिरशारिकं ८ दिवःप्रतिनिधीभूतंचतुर्वर्णनिषेवितं यत्रसपूजितोभक्तैःसन्निधत्ते
सदाशिवः ९ तत्रासीदुत्तमोराजामहेंद्रसमविक्रमः यस्यन्यायार्जितंद्रव्यंस्पर्द्धतेमेरुणासमम् १० ॥ ७ ॥

स्यकान्ताजनस्यसङ्गीतेनहृताभिद्रुवीभूतानिसोपानानिआरोहणानियासां तादृश्योवापिकायस्मिन् ६ यायजूकेति यायजूकाः इज्याशी
लाःयज्ञकर्त्तारः प्रशान्ताःहरिणाःयेषुतादृशैः उपान्ते मठैः छात्रादिनिलयैः अर्चिताः मुनिव्रजाः यस्मिन् ७ शिवेति कर्मकाण्ड
ब्रह्मकाण्डवादिनः द्विजाध्ययनसंतानपरिचयेन स्वयमप्यधीयानाः मंदिरशारिकाःयस्मिन् ८ ९ १० ७

नित्यान्नदाननिरतोविख्यातोदिक्षुसर्वतः मानविक्रमशालित्वान्मानविक्रमनामकः ११ प्रजास्सपालयामास॰
पितापुत्रानिवौरसान् प्रतिजज्ञेसभूपालःशिवभक्तेष्टपूरणे १२ प्राणपर्यंतदानेऽपिभक्तानांतन्मतिस्थिरा सना
स्तिशिवभक्तोत्रराज्ञायस्तेननार्चितः १३ भार्याकलावतीतस्यभानोरिवसुवर्चला तयोर्बभूवदांपत्यंरतिमन्म
थयोरिव १४ ऐश्वर्यैवर्त्तमानोऽपिमहतिस्मयवर्जितः नबभूवतयोःपुत्रःततश्चिंतापरोनृपः १५ भार्ययासहदे
वेशमपत्यार्थमहेश्वरं उपास्ततेनसंतुष्टोप्राहतंचंद्रशेखरः १६ नजन्मन्यत्रपुत्रस्तेकन्याकाचिद्भविष्यति इ
त्युक्त्वांतर्दधेशंभुर्मुदितौतौबभूवतुः १७ गतेनातिचिरेकालेकन्याकाचिदजायत नष्टेवदृष्टिरंधस्यजाताशंभो
रनुग्रहात् १८ जातकर्मचकारास्यामुदितोमानविक्रमः षोडशेदिवसेनामसुकेशीतिव्यधत्तसः १९ माणिक्यमंचम
ध्यस्थाशयनोत्तमशायिनी दिनेदिनेसाबवृधेचांद्रीलेखायथोदिता २० कुटिलालकसंवीतंनिटिलांतललंतिकं चटु
लेक्षणमुन्मीलंतमालोक्यतन्मुखम् २१ अभ्यनंदन्महीपालोनिधिंदृष्ट्वेनिर्धनः घनसाररजःसांद्रेस्वांकणेकृतचंक्रमा
म् २२ जानुभ्यामपिबाहुभ्यांनिर्निमेषमुदैक्षत धूलिकेलिपराबालाधूसरालकजालका २३ स्फुरदेकावलीशिंजत्का
ञ्चीनूपुरकिंकीणी तनुपट्टांबरधरातरुणायतलोचना २४ विस्मताहारमवहद्विकाररसिकंमनः कुबेराक्षीभिरन्यासांपां

तिकालंबमानमुक्ताहारविशेषः यस्यतत् २१ अभ्यनंददिति घनसारःकर्पूरं २२ २३ स्फुरदिति एकावली एकयष्टिर्हारः २४ वि
स्मृतेति विस्मताहारमिति क्रियाविशेषणं विकाररसिकक्रीडासक्तं कुबेराक्ष्यःकरंजफलानि क्रीडासाधनानि कंदुकाःगेन्दुका॰

चिक्रीडेति सखीनांनयनाच्छादनादिना अन्योन्यनेत्रनिमीलनक्रीडया २६ क्रीडेति उद्भान्तानि निर्गलितानि हल्लकानि सौगंधिककुसुमा
नियस्मात् २७ २८ २९ अतीतेति आसन्नः उपस्थितः कुसुमोदयःऋतुप्रादुर्भावः यस्यास्तां ३० यथेति महामौल्यो मणिःशाणो पलनिघ
र्षणात् निकषोपलसंघर्षात् अतिरमणीयोभवति तथेत्यर्थः मरालानांहंसानां आवलिःपंक्तिरेव आवलिकाः तयाअध्येयं अध्येतुंयोग्यं

चिक्रीडसायंचसखीनयनाच्छादनादिना पुनःपुनश्चविस्तीर्णकबरीसंवृताननम् २६ क्रीडांतरेषुबालायाःस्रस्त
मुद्भांतहल्लकं हिंतालस्तवकाकारंकुटिलंकबरीभरम् २७ जनोविलोक्यनगरेविस्मयंपरमंययौ चिकुरांतर
मात्रंतदाहृतोर्ध्वमुखाम्बुजम् २८ प्रवृद्धकबरीभारंवद्रोपरितमोयथा वर्द्धमानागृहेतस्यमेरौहेमलतेवसा २९
अतीतबाल्यापदेशमासन्नकुसुमोदयां अलंचक्रेयतारुण्यबालामव्याजसुंदरीं ३० यथामणिर्महामौल्यःशाणो
पलनिघर्षणात् मरालावलिकाध्येयसौकुमार्यगतिश्रियम् ३१ नखप्रभासमासक्तपरभागांघ्रिपंकजां शालिगर्व
धमाहृत्तजंघांनिस्तुलजानुकाम् ३२ रंभाप्रकांडसिग्धोरुपत्रावलिविभूषितां मेरुकांतारतटिनीपुलिनारोहमं
थराम् ३३ मनोभवरथाकृष्टचक्रचारुनितंबिनीं सदसत्संशयाधारमध्यावटतलोदरीम् ३४ स्तनाद्रिचरतारुण्यहि
मांदूरोमराजिकां वलित्रयप्रभाधूतनिकषस्वर्णरेखिकाम् ३५ अहिनिर्मोकधवलसव्यानस्थगितोरसं स्निग्धपल्लवक

सौकुमार्ययस्याः तादृशीगतिश्रीःगमनशोभायस्यास्तां ३१ नखेतिनखप्रभयासमासक्तःसंलग्नःपरभागोगुणोत्कर्षो ययोस्तेअंघ्रिपंकजेयस्या
स्तां शालीनांधान्यविशेषाणांगर्वंधमतिनाशयति साबर्ण्यादितिभावः निस्तुलेवर्तुलेजानुनीयस्यास्तां ३२ रंभेति रंभाप्रकांडो कदलीस्तं
भाविव ऊरूयस्यास्तांपत्रावल्या मकरिकापत्ररचनयाविभूषितांमेरुकान्तारेयातटिनी तस्याःपुलिनंसैकतमिव आरोहःनितंबस्तेन-

मंथरांभंदगामिनीं ३३ ३४ स्तनेति स्तनावेवाद्री तयोश्चरति तादृशोयः तारुण्यमेवद्विपोगजः तस्यअंदूः निगडभूतारोमराजिःयस्यास्तां ३५ अहीति अहिनिर्मोकवत् सर्पत्वगिव धवलेन संव्यानेन उत्तरीयेणस्थगितमाच्छादितं उरोवक्षःयस्यास्तां ३६ ३७ लावण्येति ॥ लावण्यंनाममुक्ताफलेषुछायास्तरलत्वमिवांतराप्रतिभातियदङ्गेषु तल्लावण्यमिहोच्यते इत्युक्तलक्षणंचाकचक्यं तदेवामृतंतस्य संदोहेन समुदायेनसमानारदनानां दंतानांत्विट् कांतिर्यस्यास्तांकपोलयोः श्रियाजितं अनंगरत्योः विभ्रमदर्पणं विलासमुकुरः यस्या

कंठनालपराभूतपांचजन्योदरश्रियं बिंबाधरांतविश्रांतमंदस्मितमनोहराम् ३७ लावण्यामृतसंदोहसमान रदनत्विषं कपोलश्रीजितानंगरतिविभ्रमदर्पणाम् ३८ उन्नमन्नासिकाधूतवज्रपुष्पसदोदयां लावण्यलह रीचारुविहरन्मीनलोचनाम् ३९ विश्रांतयमुनावीचीभ्रूविभ्रमविमोहिनीम् ॥ चतुर्थीचन्द्रसश्रीकलला टतिलकोज्वलाम् ४० कर्णाभरणमाणिक्यमयूखालंकृतालकां अंशुकाडंबराक्षिप्तकिंशुकप्रसभप्रभाम् ४१ मं जीरमेखलाहारग्रैवेयकटकांगदैः मासामौक्तिकताटंकचूडामणिविभूषणैः ४२ भूषितांमान्मथींमूर्तामिंद्रजाल कलामिव कलालापसुधाधूतगंधर्वातोद्यतंत्रिकाम् ४३ तांदातुंचकमेतत्रोत्कलिकामापभूपतिः लग्नंशुभंवि निश्चित्यनगरींसमभूषयत् ४४ आहूताबांधवास्तेनसमवेताःतदालये राजानश्चाययुःसर्वेनानोपायनपाणयः ४५

[illegible]

स्तां ३८ उन्नमदितिउन्नमंत्यानासिकयाआधूतंकंपितं यद्वज्रपुष्पंनासाभरणं हीरदलं तस्यसदोदयःसार्वकालिकप्रकाशोयस्यास्ताम् ३९ विश्रान्ताया यमुना वीची तरंगःसेवयाभ्रूः तस्याविभ्रमेणविलासेन विमोहिनीं विशेषेणमोहनकर्त्रीं चतुर्थीचंद्रेणसश्रीकं समानकान्ति यल्ललाटंतत्रतिलकेनउज्वलां ४० ४१ ४२ ४३ तामिति उक्तविशेषणविशिष्टांतांकन्यांदातुंचकमे इयेषतत्र कन्यादाने भूपतिः उत्क

लिकां उत्कंठांआप ४४ ४५

४६ तोरणैरिति सर्वोनीथ्यः तोरणैःपल्लवपुष्पादिरचितवंदनमालिकाभिः गांगैःगंगासंबंधिभिः ऊर्मिभिस्तरंगैरिवभूषिताः ४७ तत
इति कलिकामः तन्नामकोवरः ४८ ४९ शंखेति कुलपालिकाः कुलस्त्रियःताश्चताः सत्यःपतिव्रताः पुंवत्कर्मधारयेत्यादिना पुंवद्भावः
ताभिःमुक्तैः लाजैःपुष्पैश्चनिरंतरं निविडां अस्यविवाहवेदिकामित्यग्रिमेणान्वयः ५० ५१ ५२ ५३ केशेति केशदामनि केशपंक्तौपरि

व्यानशेनगरंसर्वंधूपःकालागरूद्भवः दिशोमुखरयंश्चक्रुःवादित्राणिसमंततः ४६ तोरणैर्भूषितावीथ्यःसर्वा
गांगैरिवोर्मिभिः अभ्यनंदन्परिजनाःतदुद्वाहमहोत्सवम् ४७ ततस्सन्निहितेलग्नेकलिकामोविभूषितः स्व
बंधुभिर्गजारूढोययौराजनिवेशनम् ४८ प्रत्युज्जगामराजापिकन्यामादायभूषितां भूषयामासकन्यांचवस्त्रा
भरणचंदनैः ४९ शंखतूर्यमृदंगानांनादेव्योम्निविसर्पति कुलपालिकसन्मुक्तलाजपुष्पनिरंतराम् ५० विवा
हवेदिकांतत्रकलिकामोविवेशह एकासनस्थितौवीक्ष्यबांधवास्तोवधूवरौ ५१ दांपत्यमेतयोरासीत्प्रतिमन्म
थयोरिव एवंसंभाषमाणास्तेचक्षुःप्रीतिंपरांदधुः ५२ तदामाहेश्वरःकश्चित्तत्रत्यदृश्यतसंसदि आपादमस्त=
कंभुद्भस्मनालिप्तविग्रहः ५३ केशदामपरिष्वक्तवरटशतसंवृतः कर्णेदूतयसंस्यूतमहास्फटिककुंडलः॥
५४ कपालपात्रंविभ्राणःपरशुंचकरेपरे किंचिदापूरणीयांतांबिभ्रत्संचवटीमयीम् ५५ भुजंगकटिसूत्रांतकं=
थाकौपीनभूषणः आपीनांसोमहाबाहुःमांसलोरक्तलोचनः ५६ भाषयाभीषयन्सर्वान्उपागान्मानविक्रमं अथसंपूजि

षक्तेनसंसक्तेन वरटशतेन कपर्दिकाशतेनसंवृतःएवंकर्णेदूतये संस्यूतेमहास्फटिककुंडलेयस्यतादृशः ५४ कपालेति किंचित्
आपूरणीयःअंतःअंतभागोयस्यास्तांपंचवटीमयीं पंचवटपत्रनिर्मितांद्रोणीमित्यर्थःविभ्रत्दधानः ५५ भुजंगेति भुजंगएवकटिसूत्रं

जनानांसंभ्रमःकोयमितिपप्रच्छभूपतिं संप्रीतश्चमहीपालःतापसंप्राहसांजलिः ५८ सुकेशीममकन्येयंकलिका
मायदीयते दिष्ट्यामुहूर्तसमयेप्राप्तस्त्वंकिमपेक्षितम् ५९ अथराजवचःश्रुत्वाकंपयन्मौलिमात्मनः माहेश्वरस्त
प्रत्याहदीयतेयदिचोच्यते ६० प्रतिजज्ञेनृपतिनातथेत्याहसतापसः महाक्रंभृणुमाकार्षीरमंर्षमानविक्रम
६१ असंपूर्णोमिमांपश्यप्रियांपंचवटीमम विलूयकन्याकबरींदीयतांकिंविलंबसे ६२ तदाकार्यजनाःसर्वे.
कर्णेविन्यस्तपाणयः हंतहंतेतिजगदुःक्षुभेनमहीपतिः ६३ माहेश्वरःपुनःप्राहदीयतेचेन्नगम्यते दृश्यश्रा
तुंकृतोद्योगमुपवेश्यवरासने ६४ वंदस्वतापसमितिप्राहकन्यांनिजांनृपः वंदनंचापिभार्यायाःकथमित्यच
लोकयन् ६५ उत्तिष्ठंत्यानमस्कृत्यासुकेश्याःकबरीभरं विलूयामूलमुत्फुल्लहल्लकामोदवासितम् ६६ निज
श्छुरिकयाधीरोनिःशंकंशकप्रियः मायामाहेश्वरायादासकेशःसतिरोदधे ६७ कलिकामस्यवदनेयावत्कार्ष्ण्यं
विदृश्यते तावत्सएवधम्मिल्लोराजपुत्र्याव्यवर्धत ६८ देवोपिवृषभारूढोनृपतेरग्रतोभवत् शतशःप्रणनामेशं
भीतिमान्समहीपतिः ६९ कलिकामोपितांकन्यांउद्वाह्येश्वरशासनात् प्रीतिमापपरामिंद्रःपुलोमतनयामिव ७०
परीक्षितोसिराजन्स्त्वंदृढाभक्तिर्यतोमयि दत्तामुक्तिरितीशेपितेनापरजताचलम् ७१ स्वकालपाशेनसहावलूयभ

६६ ६७ कलिकामस्येतिकृष्णवर्णतावैवर्ण्यमित्यर्थः ६८ ६९ ७० परीक्षितइति ईशेपितेनरात्तासह रजताचलंकैलासमापेत्यन्व
यः ७१ स्वेति स्वस्यकालपाशेनसहतनूजायाः कन्यायाः घनकेशपाशंविलूयभक्त्या केशपाशदानस्यकालपाशनाशकत्वात् तेनस

हकालपाशनाशदृतिभावःवदान्यायदात्रे राज्ञेदत्ताभयःपिनाकपाणिःशिवःभवापदःसंसारविपत्तेःसकाशात्नःपातु ७२ इतिश्रीना
नवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांसप्तविंशोऽध्यायः २७॥ ॥❀॥सम्प्रति
मुक्त्युपायस्यसौलभ्यंदर्शयति मुक्तीति १ द्रव्येति द्रव्यादीनांहोमसाधनीभूतघृतादीनां शुद्धयःसंस्कारजन्याःपवित्रताः ककुत्र

राज्ञेवदान्यायपिनाकपाणिःदत्ताभयःपातुभवापदोनः ७२ इतिश्रीस्कंदोपपुराणेसप्तविंशोऽध्यायः २७॥ ❀
श्रीअगस्त्यउवाच मुक्त्युपायेतिसुलभेविनायत्नेनदेहिनः यंतंते दुर्लभेप्यत्रसाहसंकिमतःपरम् १ द्रव्यदेशक्रि
याकालमंत्रकर्त्रादिशुद्धयः क्वयत्नहेतवःक्वायंविषयव्याप्ततोजनः २ क्वनुवैराग्यनिष्ठायाःसीमाब्रह्मादिदुर्लभम्
क्वनुवेदांतविज्ञानंतत्साध्यंक्वायमल्पधीः ३ तस्मादन्यत्परित्यज्यविशिष्यचकलौयुगे भक्तिरेवमहादेवेकर्त्तव्या
मुक्तिमिच्छता ४ पूजनीयःसदाशंभुःकालकर्मभयापहः अक्लेशशुद्धद्रव्येणप्रसीदत्यर्चितोविभुः ५ लिंगार्थे
सुलभोनद्यांसिकतादिश्चनिर्मलः जलदुर्वादिविपिनेकर्त्तव्यःसत्कृतांजलिः ६ एतत्कर्त्तुमशक्तस्यज्ञानंचेत्सु
लभंभवेत् आकाशचंद्रग्रहणंशिशोश्चसुलभंतदा ७ ऋषिशाकंनियमतोभक्त्याशंभोःसमर्पयेत् योवाकोवापि
मुच्येतसंसारात्सत्यमुच्यते ८ अस्मिन्नर्थेपुरावृत्तमितिहासमिमंविदुः शृणुतश्रद्धयाविप्राःभक्त्यामाहात्म्यमुत्तमम्

अयंजनःकेति अननुरूपघटनात्मकविषमालंकारेणकर्ममार्गेणमुक्तिर्दुर्ल्लभेतिदर्शितं २ ३ भक्तिमेवगुर्वीकुर्वन् उपसंहरति त
स्मादिति ४ ५ शिवपूजायाःसौलभ्यंदर्शयति लिङ्गार्थमिति ६ एतदिति अत्रमिथ्याध्यवसित्यलंकारेण आकाशचन्द्रग्रहणमिवशि
शोःशिवपूजामकुर्वतःज्ञानंदुर्लभमितिप्रतिपादितं ७ शिवपूजायांअल्पेनवायेनकेनचिद्द्रव्येणभक्त्यानियमतः समर्पितेन शिवः प्र

इतिहासमवतारयति अस्तीतिशालिभिःसहोद्भूतैः कान्तारमेवकान्तारकंतदुद्भवैः इक्षुजन्यैरपि इक्षुभेदश्चकान्तारइति अनेकार्थध्वनिम

अस्तिशालसहोद्भूतैरपिकांतारकोद्भवैः मौक्तिकैःसांद्रकेदारोदेशश्चोलेंद्रपालितः १० सूर्याश्वखुरनिर्भिन्ननारि
केलफलांभसां निष्यंदैर्यत्रविच्छिन्नैर्नदीमातृकतांगतः ११ कावेरीतीरपर्यंतेतत्रास्तिचपुरंमहत् चतुर्वर्णाश्र
मयुतंनामतःकणमंगलम् १२ अस्त्येकःशंकुलादायनामागांगेयवंशभूः हालिकोदिक्षुविख्यातःशिवभक्तार्च
नेरतः १३ सक्रोशद्वयमात्रस्थेश्रीचिदंबरनामके बाल्यएवपरांभक्तिमुवाहानन्यदुर्लभाम् १४ तस्यभक्तिमती
नामभार्यातुल्यान्वयाभवत् तयासहप्रतिदिनंचिदम्बरमहेश्वरम् १५ नत्वानियमनैवेद्यंदत्वाभुङ्क्तेनिशामुखे ॥
श्रीऋषयऊचुः किंवानियमनैवेद्यंशंकुलादायकल्पितम् १६ वदैतत्कुंभयोनेनःप्रीतोयेनसभापतिः श्रीअगस्त्य
उवाच नवीनशालिसंभूतंशुद्धतंदुलमक्षतम् १७ ससंपाद्यचशाकंचसहचूतशलाटुकं प्रयच्छतिनटेशायकृ
त्वासंकल्पितंव्रतम् १८ कारयत्यभिषेकंचविशेषदिवसेसति तस्यैवंवर्त्तमानस्यगताःषोडशवत्सराः १९ तस्यः
भक्तिपरीक्षार्थमासीत्कौतुकवान्हरः महामारीप्रकोपेननष्टंगोधनमुत्तमम् २० सस्यानितस्यनष्टानिह्यनावृष्ट्या
थमंदिरं सधान्यधनकोशंचवन्हिदग्धंक्षणादभूत् २१ तथापिचुक्षुभेनैवसभक्तःसहभार्यया कृषिमानर्थमादा
यशंभोःपूजामचीकरत् २२ शकटंनिष्कुटेस्वीयेबहुधासमवर्धयत् तेनतौदंपतीकृत्वावृत्तिंतुष्टौचिरार्जितैः २३

ञ्जर्यां मौक्तिकैःताम्रपर्णीमिलितस्यसमुद्रस्यमुक्ताप्रभवत्वादितिभावः सान्द्राणिकेदाराणिक्षेत्राणियस्मिन् १० सूर्येति अनेन नारिकेलतरु
णांताव दौन्नत्यंसूचितं ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ शकटमिति निष्कुटेगृहारामेशक

शालिभिःशंकरस्यैवनियमार्चोविनेनतुः कोद्रवैश्चापिगोधूमैःश्यामाकैश्चकुलत्थकैः २४ कुल्माषैर्जीवनोपा
यंविधायसहभार्यया वर्त्तमानस्यभक्तस्यचित्सभेश्वरदर्शनात् २५ कर्त्तुनियमनैवेद्यंसुलभाःशालयोभवन्
सोमवारदिनेक्वापिशंकुलादायनामकः २६ कृत्वाभिषेकद्रव्याणिभार्याशिरसिचस्वयं शालितंडुलमुद्धृत्
शाकंचूतशलाटुकम् २७ वहन्मूर्ध्निमहेशस्यपूजार्थंसायमाययौ गव्यानिपंचतैलंचनारिकेलफलानिच २८
वोढुमत्यक्षमासाधीपश्चान्मदमुपागमत् झटित्यायाहिहेभद्रेदृश्यतेगोपुरंविभोः २९ इतिकिंचिद्विहृत्तास्यो
भूत्वाहृयकुटुंबिनीं गंतुमैच्छत्तथाग्राविणापुरस्तादस्खलत्पदम् ३० क्वचिन्मूर्ध्निचतत्सात्रन्यपतद्धुवंतंडुलाः
सुरक्तशाकंविविशुःसहचूतशलाटुकम् ३१ निदाघतपनाक्लुष्टभूगर्त्तेक्वापिभूसुराः खिन्नस्तदाविनिश्चित्यत्र
तभंगंविनिश्चसम् ३२ स्मृत्वासशंकुलादायःस्वयंनियममादधे ममास्तुमरणंश्रेयोनन्वस्माद्व्रतभंगतः ३३ न्य
धत्तचायुधंकंठेशंभुराविरभूत्तदा तावत्तंडुलासाज्यशाकचूतशलाटुकाः ३४ दर्शिताःशंभुनावक्त्रेतद्दृष्ट्वा
ह्यचायुधं वृषभारूढमीशानंदपत्योःसेवमानयोः ३५ अस्खलन्न्यपतद्भूमौदिव्याःकुसुमवृष्टयः तयोःसायुज्यमुक्तिं
चदत्वादेवोमहेश्वरः ३६ पश्यतांसर्वदेवानांकैलासशिखरंययौ ३७ इतिश्रीस्कंदोपपुराणेऽष्टाविंशोऽध्यायः २८॥ ॥श्री
अगस्त्यउवाच सपर्यांशांकरीकर्तुमशक्तायेमुमुक्षवः नामसंकीर्त्तनंशंभोस्तेषांमोक्षैकसाधनम् १ ॥

स्कंदपुराणव्याख्यायांभक्तविलासप्रकाशिकायांअष्टाविंशोऽध्यायः २८॥ ॥अथनियमेनयत्किंचिदपिद्रव्यंपूजायांसमर्पयितुमशक्तस्यशि

वनामसंकीर्त्तनादेवमुक्तिर्भविष्यतीत्याहसपर्यामिति १

अत्रैवोदाहरंतीमंसनकाद्यामहर्षयः इतिहासंमहापुण्यमयत्नान्मुक्तिसिद्धिदम् २ अस्तिश्रीचोलराजेंद्रकोशवृद्धिकरोमहान् श्रीमानजनपदःशंभोःस्थानैर्दिक्षुविभूषितः ३ कबेरकन्यकायत्रबालकानिवपादपान् पुष्पातिपयसानित्यंपुष्पारामशतैस्सह ४ कदलीदलगर्भेषुवान्तंवारिबलाहकैः घनीभावंगतंयातिदिव्यकर्पूरसारताम् ५ यत्रक्रमुकराजद्रुस्तवकामोदवीचिषु क्रीडतांमत्तभृंगाणांकारैर्मुखरादिशः ६ स्वपंतिवापीनलिनीषुहंसाःचूतप्रवालेषुपिकाश्चयत्र विलासिनीकुंतलगर्भशय्यामध्यास्यमत्तभ्रमराश्रमंते ७ मंगलाख्यंपुरंयत्रपुंडरीकपुरांतिके अस्तितत्रसदैवास्तेदेवीमंगलदेवता ८ गोनाथदत्तभूक्ष्मिद्वैपालकुलसंभवः कुलक्रमागतंयस्यदेशगोकुलरक्षणम् ९ सबाल्यएवगारक्षन्ब्रह्मण्योविजितेंद्रियः घृतैःपयोभिर्दधिभिर्द्विजान्भुश्रूषतेन्वहम् १० तस्यप्रीतोमुनिःकश्चित्संजातोभार्गवान्वये प्रार्थितःप्रददौतेनपंचाक्षरमनुत्तमम् ११ सद्भक्त्रिंशत्सहस्राणिजजापानुदिनंसुधीः महामंत्रजपस्तत्रमहिमानमवर्धयत् १२ पालकस्यगवामंतःसर्वंशिवमयंजगत् ब्रजन्तिष्ठन्शयानश्चभुंजानश्चपिबन्नपि १३ नविसस्मारतंमंत्रंतद्दातारंचदेशिकं शिवशंकरगौरीशनीलकंठत्रिलोचन १४ महेश्वरमहादेवत्रिपुरांतकधूर्जटे कालशासनकामारेबालचंद्रकलाधर १५ कारुण्यालयपाहीतिसदाभक्त्याप्रजल्पति जिह्वाजल्पतिनैवान्यत्गोनाथस्यमहात्मनः १६ प्रीतस्तस्यमहादेवोभारतींसमचोद

११ १२ १३ १४ १५ १६ १७ ❀ ❀ ❀

ऊश्चितःसहसादृष्टोवेणुमालोक्यगोपतिः गातुमेवसमारेभेपंचाक्षरमहामनुम् १८ प्रथमंचाष्टरंध्रस्यमणिवे
णोर्महायशाः आद्यरंध्रेधरंन्यस्यरंध्रेष्वन्येषुचांगुलीः १९ व्यापारयन्यथास्थानंजगौसप्तस्वरान्वितं अपदानंम
हेशस्ययूथंपुलकयग्रवाम् २० भावात्रेशावशंविश्वंकृत्वास्थावरजंगमं तोषयामासदेवेशंवेणुनादामृतेनसः
२१ दिनेदिनेचगोनाथवेणुगानरसादृताः ग्रावाणस्तनुतांयाताःशुष्कवृक्षाश्चपुष्पिताः २२ अथैकस्मिन्दिनेप्रा
तश्चारयित्वासगोकुलं प्रातिष्ठतप्रतिवनंगोपालशतसंवृतः २३ संचारयित्वागास्तत्रतृणसौहित्यमंथराः छा
यांतरेषुवृक्षाणांशरीरंस्वन्यधाद्भुवि २४ दामाकलितचूलीकःकटीकलितकम्बलः नमेरुतरुसंसक्तापरांगोभुग्न
कंधरः २५ सन्यस्तवेणुरधरेत्रिभंगिललिताकृतिः निषादर्षभगांधारषड्जमध्यमधैवतान् २६ त्रिषुत्रिष्वपि
रंध्रेषुचालयन्पंचमंपुनः पंचमेमूर्छयामाससक्षिपन्सकलंजगत् २७ अगायत्स्वरमीशानंध्यात्वापंचाक्षरी
मनुं कलंजगौकलालापान्मुद्रयन्नपिकोकिलान् २८ अमदंतारमच्छिद्रमविलंबितमद्रुतं पयोहीनास्रवद्
त्सागौर्गृष्टिर्गर्भवत्यपि २९ यथादोग्ध्रीभवेत्सद्योगंगावत्सातथाजगौ वेणुनादामृतेविश्वंचराचरममज्जयत् ३०

ल्यःगवां कर्णमूलानियेन नद्यृतश्चेतिकप्रत्ययःनमेरुतरौछायादक्षेसंसक्तंलग्नंअपरांगंपृष्ठंयस्यभुग्नाकुटिला कंधराकंठोयस्य २५
२६ २७ २८ २९ तमेवार्थंपुनरप्याह यथेति अवत्सापिगंगा गंगाशब्देनलक्षितलक्षणयागौरुच्यते सद्योदोग्ध्रीभवेदित्यन्वयः ३०

ணகுவாளவுலுகுாளவுஜ்ஜீ ஃஜுவுலுகுளெகுாள

३१३२३३ नृत्यतदिति हेमसभापतेःकर्णेआरात् नृसतःअनुपपातगीतमितिशेषः ३४ ३५ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांएकोनत्रिंशोऽध्यायः २९॥ ॥❀॥सम्प्रति चन्दनादिद्रव्यैःशिवार्चनेन इहैवकेचनजीवन्मुक्ताबभूवुरितिवक्तुंउपक्रमते चन्द्रचूडेत्यादिना १ इतिहासमवतारयति अत्रेति २अस्तीति अगस्त्यदिक्दक्षिणा सैवाङ्गाक्षीकमल

तस्यगीतिरसाकृष्टैःवियद्वैमानिकैर्वृतं विस्मृतान्योन्यवैरैश्चमहीव्याघ्रगवादिभिः ३१ आसीत्सपदिनीरंध्रातस्मिन्गायतिवेणुना स्वरयोगःसमंनेणोःवदधेतस्यससधा ३२ कपर्दादिवनिर्यातिमहादेवस्यजान्हवी वशीकृत्यजगत्सर्वंगीतेनाब्रह्मकीटकम् ३३ नृत्यतोनुपपातारात्कर्णेहेमसभापतेः३४ अथकनकसभेशःसार्द्धमागत्यगौर्याश्रुतिमधुरमुदारंगीतमाकर्ण्यतस्य प्रमदभरितचेतामुक्तिमस्मैवितीर्यश्रुतिभिरभिनुतांघ्रिःस्वपदंप्रापभूयः ३५ इतिश्रीस्कंदोपपुराणेएकोनत्रिंशोऽध्यायः २९ श्रीअगस्त्यउ· चंद्रचूडार्चनेनित्यंचंदनादिप्रदानतः इहैवश्रियमासाद्यप्राप्तामुक्तिंचकेचन १ अत्रायमितिहासोऽस्तिशिवभक्तैरभिष्टुतः श्रीमतोमूर्त्तिनाथस्यचरितंयत्रगीयते २ अस्त्यगस्त्यदिगङ्गाक्षीमुखश्रीतिलकायितं प्रथितंत्रिपुलोकेषुनगरंमधुराह्वयम् ३ यत्रमौक्तिकताटंकमंडिताशफरेक्षणा ममतासततंधत्तेमातात्रिजगतामपि ४ यत्रपाड्यमहाराजपूजितःपरमेश्वरः विराजतेचतुःषष्टिलीलारत्नाकरःसदा ५ यस्यलीलाशुकालापरसिकापरदेवता विरिंचिविष्णवीशपदवदान्यायां

नयनानायिकेति रूपकं तस्याःमुखश्रियोवदनशोभायाःतिलकायितंतिलकवदाचरितं ३ तदेवनगरंवर्णयति यत्रेति शफरेक्षणामीनाक्षीत्यम्बीभगवतीत्यर्थः त्रिजगतामपीतिपदद्वयं मध्यमणिन्यायेनउभयत्रान्वेति त्रिजगतामपिममतांधत्तइत्यर्थः ४ ५ यस्येति विरंच्या

हीनांपदस्यवदान्यंदातऋपांङ्गवीक्षणंयस्यादस्यर्थः ६ कदम्बेति अच्युतस्य आद्यवतारोमत्स्यावतारःतस्यस्त्रियायुक्तेनेत्रेएवमीनोत
चेाः उत्पलाकृतिंपद्माकारां ७ अंशुकेति वीणाकोरकितद्रुमामिति नादक्रियाभिप्रायेणसङ्गीतशास्त्रेनादक्रियया गानेक्रियमाणेशुष्काअ
पितरवःपल्लविताभवन्तीतिप्रसिद्धिः ८ महानीलेति महानीलमणयःसिंहलद्वीपसंभूताःनीलमणिविशेषाःतद्वत्श्यामां सिंहलस्याक

कदम्बवनसंचारकृणत्कणितनूपुरां अच्युताद्यवतारस्त्रीनेत्रमीनोत्पलाकृतिम् ७ अंशुकद्युतिनिर्धूतकिंशुक
स्तवकप्रभां नखनादितमाणिक्यवीणाकोरकितद्रुमाम् ८ महानीलमणिश्यामांमलयध्वजकन्यकां अर्चेति २
ताम्रासंभूतैर्दिव्यैश्चनवमौक्तिकैः ९ नित्यमप्यमरार्धीशैनैवानमितमौलयः दक्षिणाशाधनाधीशाःपांड्यवंश
भवानृपाः १० सर्वसंपत्समृद्धासासमृद्धविपणापणा बभूवभूषणंभूमेर्यौरिवप्रतिबिंबितम् ११ तत्रास्तिमूर्त्तिनाथा
ख्योवैश्यवंशोमहाधनः किंकरःशिवभक्तानांशंकरेदृढभक्तिमान् १२ दृष्ट्वाभस्मचरुद्राक्षंप्रणमत्साहितांजलिः
नतदस्त्यन्यतःकापिरत्नाद्यस्यनयद्गृहे १३ सोंतर्द्वीपांतरानीतदिव्यचंदनलेपनं नित्यंहालास्यनाथस्यकारयामास
भक्तिमान् १४ एवंनियमशीलस्ययुर्विंशतिवत्सराः तदापांड्यपतिस्त्रैणोनैवकिंचिदिचारयन् १५ रंध्रान्वेष्यंध्रन्
पतिर्मधुरामभ्यवर्तत सनिष्क्रास्यपुरात्पांड्यराजाभूज्जिनसेवितः १६ तस्यप्राग्जन्मपापेनजैनतंत्रेभवन्मतिः वेदनापंचकं

रोद्रूतामहानीलास्तुतेमताः द्यूतगस्यशास्त्रेमलयध्वजोराजा ताम्रा ताम्रपर्णीनदी ९ १० ११ १२ दृष्टेति रत्नादिवस्तु अस्यवणिजोगृहेय
न्नास्ति तदन्यतः कापिनास्तीत्यर्थः १३ १४ १५ १६ तस्येतिजैन तंत्रे बौद्धशास्त्रे यत्रमूढैःअज्ञातवेदतत्वैः बौद्धैःवेदनापंचकं आत्मेति

गीयते रूपादिस्कंधपंचकमेवशरीरस्थमात्मानातिरिक्तइतितेषांमतं १७ १८ १९ मूर्तिनाथमिति तन्मतानुगाःजैनमतानुयायिनः २० २१ स इति सःजैनःसघभंङ्गीप्रपूजासुबौद्धावतारविष्णुपूजासु २२ अप्रत्यक्षमिति प्रत्यक्षातिरिक्तंनप्रमाणमिति चार्वाकमतानुसारेणेयमुक्तिः

अ.३०

अवतीर्णोमतेतत्रवेदेविद्वेषवानभूत् ततोभूद्वैदिकद्वेषीवेदांताध्वरदूषकः १८ क्रमेणद्विजदेवानांसपूजान्यरूण त्तदा स्वमतानुस्तानेवपूजयामासनेतरान् १९ मूर्त्तिनाथंविनातत्रबभूवुस्तन्मतानुगाः मधुरानगरेसर्वेयथारा जातथाप्रजाः २० मतानानुप्रवेशित्वान्मूर्त्तिनाथोविरोध्यभूत् आज्ञातिलघनेराज्ञांकोपःखलुसुदारुणः २१ सपंचप रमेष्ठिश्रीचरणांभोरुहार्चकः सप्तभंगीप्रपूजासुवंचयामासवैदिकान् २२ अप्रत्यक्षंकथंवास्यात्प्रमाणमितिचाल यन् खिलीचकारपाषंडोवैदिकंमार्गमुत्तमम् २३ हरिशंकरपूजायामंतरायंपरंपराम् आविष्कुर्वन्त्रयीबाह्यानर्चः यामासदुर्मतिः २४ यदाहालास्यनाथस्यसपर्यांतेनविघ्रिता मूर्त्तिनाथस्तदास्वीयैःपूजांप्रावर्त्तयज्जनैः २५ पूजांहा लास्यनाथस्यमूर्त्तिनाथप्रवर्त्तितां निजाज्ञोल्लंघनंचापिदृष्ट्वातत्तुमहीपतिः २६ विनामदनुमत्यायोविक्रेतांचंदन स्यसः वध्यःस्यादित्यापणेषुघंटांनित्यमघोषयत् २७ मूर्त्तिनाथस्तदारभ्यसंगृहीतैःसुचंदनैः नित्यालेपनमीशस्य निर्विघ्नमतनोच्चिरम् २८ यदानलभ्यतेक्वापिचंदनंवणिजांवरः विचारमगमद्वोरंहालास्येशंविचिंतयन् २९ अद्या स्तिचंदनंशंभोतवालेपनसाधनं श्वःकरिष्यामिकिंवाहंहालास्येश्वररक्षमाम् ३० इत्युक्त्वादत्तपाटीरोवणिक्काम नयन्निशां अथप्रातस्समुत्थाययावद्कोस्तमिच्छति ३१ पर्यटन्नगरेतावद्वणिग्गेहेनचन्दनं अथहेमाब्जिनीतो

खिलीचकारशिथिलीचकार २३ हरीति त्रयीबाह्यान् वेदबहिष्कृतान् २४ २५ २६ २७ २८ २९ ३० ३१ पर्यटन्निति हेमाब्जिनीतीरे

अदत्तेति हस्तेन किंप्रयोजनं इत्यर्थः प्रकोष्ठं कूर्पराधोभागं ३३ ३४ ३५ ३६ आंध्रनाथोपीति एनंजैनं तेतत्कालागताःशत्रवः ३७ ३८

अदत्तचंदनस्याद्यममहस्तेनकिंभवेत् इतिप्रकोष्ठमापेष्टुंयावच्छाणोपलेर्पयेत् ३३ तदातंवारयामासवाणीं काप्यशरीरिणी मैवंकुरुभवानंगभूत्वापांड्यमहीपतिः ३४ वेदबाह्यान्निराकृत्यवैदिकान्स्थापयिष्यति अद्यायंशत्रुणायुद्धेनिहतोमृत्युमेष्यति ३५ पश्येत्याकर्ण्यहालास्यनाथसन्निधिमापसः अथान्येमधुरामेत्यरुरुधुर्जिनशत्रवः ३६ आंध्रनाथोपियुयुधेनिर्गतोनगरात्सतैः रणेप्येनंप्राहरंतसचतेविलयययुः ३७ हतावशिष्टजैनास्तुदूरेदुद्रुविरेदिशः ततस्तुसचिवाःसर्वेसंभूयेश्वरशासनात् ३८ दुकूलबद्धनयनंनगरेचालयन्गजं॥ सोंतःशिवालयंगत्वागृहीत्वामूर्त्तिनायकम् ३९ निजस्कंधेतमास्थायप्रतस्थेवीथिकांतरे ववर्षुःपुष्पवर्षंचखेचरानागरैःसह ४० अस्तुवन्वंदिनश्चापिदिविभेर्यश्चदध्वनुः सिंहासनेप्रतिष्ठाप्यमूर्त्तिनाथंगजेश्वरः ४१ अभिषिंचत्स्वहस्ताग्रकलशामृतधारया अथाभिषिक्तःसाम्राज्येमूर्त्तिनाथोमहीपतिः ४२ वेदबाह्यान्सशूलाग्रेचक्रेवैदिकसंमतः चंदनालेपनंशंभोःसांद्रंकालत्रयेव्यधात् ४३ वैदिकान्स्थापयामासपांड्यभूमिमवर्द्धयत् शतसंवत्सरंराज्यंकृत्वावैदिकसंमतः ४४ मुक्तिंहालास्यनाथस्यप्रसादादगमत्ततः मूर्त्तिनाथस्यचरितंशृण्वंतिचपठंति ये ४५ तेषांशिवप्रसादेनकैलासःसुलभोभवेत् ४६ इतिश्रीस्कंदोपपुराणेभक्तविलासेत्रिंशोऽध्यायः ३०॥ ॥अगस्त्यउ॰

३९ ४० ४१ ४२ ४३ ४४ ४५ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांत्रिंशोऽध्यायः ३०॥ ॥ॐ॥ अथपञ्चाक्षरादिभिःशिवपूजनंसुगंधिपुष्पैर्विरचितंमुक्तयेभवतीत्यगस्त्योवक्तुमुपक्रमते पञ्चाक्षरेति १

पंचाक्षरादिभिर्मंत्रैर्दिव्यपुष्पैर्महेश्वरं नित्यं पूजयतांपुंसांपुनर्जन्मनविद्यते १॥

अत्रैवोदाहरंतीदंनंदिकेशाच्युतादयः चरितंस्कंदनाथस्यशिवभक्तशिरोमणेः २ अस्तिकावेरिकावारिप्ररोह स्तस्यसंपदि देशेदिव्यपुरेरम्येदेवद्विजविभूषिते ३ अग्रहारोमहानस्तिश्वेतद्वीपइवार्णवे आश्रयःसर्वभूतानामावासोब्रह्मवादिनाम् ४ दीनांधपंगुबधिरमूकानाथरुजापहः शरण्यभूतःसर्वेषांप्रख्यातःशरणार्थिनाम् ५ अग्निहोत्राग्निसुहुतहविराज्यकुशेधसां धूमेनामोदसांद्रेणसमाक्रांतदिगंतरः ६ बह्वृधीक्रग्यजुःसामध्वनिध्वनितमंटपः पदवाक्यप्रमाणज्ञैःशोभितोब्राह्मणोत्तमैः ७ तटाकोपवनोद्यानपुष्पगंधाधिवासितः यूपालंकृतपर्यंतवेदिकाशतसंवृतः ८ अष्टादशपुराणार्थवेदानिकषोपलः तत्राभूद्ब्राह्मणःकश्चिच्छिवनाथान्वयोमहान् ९ प्रतिग्रहेसमर्थोपिप्रतिगृह्णातिनक्वचित् तत्रोञ्छवृत्तिर्निवसन्प्रत्यहंशिवमर्चति १० तस्यैवंवर्त्तमानस्यमहादेवप्रसादतः पुत्रोवैस्कंदनाथाख्यःकश्चिदासीन्महामतिः ११ निःस्पृहयितुःशंभुंसपितुःसन्निधेवसन् स्वयंस्निग्धोपलेक्षापिपत्रैरर्चयतीश्वरम् १२ पितासंवत्सरेषष्ठेददौव्रतमनुत्तमं वेदानध्यापयामासषट्शास्त्राण्यप्यपाठयत् १३ व्याकरोदथमीमांसांपुराणार्थानबोधयत् पंचाक्षरंमहामंत्रंददौलग्नेशुभेसुधीः १४ पूजाविधिंमहेशस्यपाठयामाससूनवे १५ सपरीक्षितसर्वशास्त्रतत्वस्सविकल्पंसकलंनिरस्यदूरे गिरिशार्चनमेवनिर्विकल्पंनिरपायार्थकरंस्मनिश्चिनोति १६ अथकालेगतेतस्मिन्शिवनाथेदिवंगते गतिंकालस्यमहतींसजानन्समशोचयत् ९

पुराणियस्मिन्रम्येदितिदेशस्यविशेषणम् ३ अग्रहारइति ब्रह्मवादिनां वेदांतिनां ४ ५ ६ बह्वेति बह्वृधियां पण्डितानांपदवाक्यप्रमाणज्ञैःव्याकरण

मीमांसान्यायशास्त्रज्ञैः ७ ८ ९ १० ११ १२ १३ १४ १५ सदिति परीक्षितं परितोविमृष्टंसर्वशास्त्राणांतत्त्वंयेनतादृशः सःस्कंदनाथःसकलंविकल्पंसंदेहं दूरेनिरस्यनिरपायःनित्यःयोर्थःमोक्षः तत्कर्मैगिरिशार्चनमेवनिर्विकल्पमसंदिग्धंनिश्चितोतिस्मेत्यन्वयः १६ १७ १८ १९ २० २१ २२ २३ २४ २५ सदिति महामनुं पञ्चाक्षरीविद्यां आवृत्तिशून्यां पुनरावृत्तिरहितां गतिंमुक्तिं नसपुनरावर्त्तनद्

कृत्वोर्ध्वदेहिकंतस्यवेदोक्तेनैववर्त्मना ददारपरमांभक्तिंपरमात्मनिशंकरे १८ पुष्पारामंस्वयंकृत्वापुष्पाणिसमवर्धयत् तत्रत्यैरेवकुसुमैरर्चयामासधूर्जटिम् १९ जटावान्चीरवसनोभस्मरुद्राक्षभूषितः पञ्चाक्षरेणमहतामंत्रेणकुसुमैर्हरम् २० अर्चयन्गमयामाससमयंनवथाक्वचित् जपन्द्वादशसाहस्रसंख्यंपञ्चाक्षरीमनुम् २१ पुष्पैर्द्वादशसाहस्रसंख्यैरानर्चशंकरं अवकाशेसतिक्वापिमदेशंहृदिभावयन् प्राग्जन्मसफलीकुर्वन्नभिष्टौतिस्मसादरंनमःशिवायत्रिगुणात्मकायनमःशिवायत्रिविधात्मनेते नमःशिवायत्रिजगद्विधात्रेनमःशिवायत्रिदशैकधाम्ने इतिस्तुवन्महादेवंशिवभक्तद्विजोत्तमैः पूजितश्चयथाशंभुःविरक्तःसर्वतोभवत् गौरीस्तन्यामृतास्वादधन्योभक्ताग्रणीश्चसः यस्यसौहार्दलाभेनकृतार्थस्वममन्यतासदृश्यमभ्यर्च्यमहेश्वरंसदामहामनुंचप्रजपन्चितन्वन् स्तुतिंचदेवस्यविभोःप्रसादादावृत्तिशून्यांचगतिंप्रपेदे २६ इतिश्रीस्कंदोपपुराणेभक्तविलासेएकत्रिंशोऽध्यायः ३१॥ ॥श्रीअगस्त्यउ॰ वेदसारेणयेदेवंमहांतंसमुपासते नगर्भवाससंक्लेतिश्रुतेःप्रपेदेप्रापेत्यर्थः २६ इतिश्रीमानवल्युपनामकन्दसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांएकत्रिंशोऽध्यायः ३१॥ ॥❀॥ अथरुद्राध्यायमाहात्म्यंवक्तुमारभमाणो महामुनिरगस्यःश्रोतॄन्ब्राह्मणानभिमुखीकरोति वेदेति येद्विजाः

वेदसारेण वेदानांश्रेष्ठेनरुद्राध्यायेनश्रेष्ठत्वंचास्य वेदमध्यघटितत्वेनतथाहित्रयोवेदाः ऋग्यजुःसामानितत्रमध्यमोयजुर्वेदःतस्यापिस साष्टकेषुमध्यमेचतुर्थाष्टकेमध्यमप्रश्नःरुद्राध्यायइत्युच्यते अतोस्यसारभूतत्वं तेनमहान्तंदेवंमहादेवंउपासते जपाभिषेकहोमार्चनादिभिः तेषां इत्यन्वयः १ संप्रतिरुद्राध्यायपराङ्मुखान्निंदति दुर्लभमिति २ रुद्राध्यायजपंविनामुक्तिर्नभवति इत्याह अजस्वेति ३

दुर्लभंब्राह्मणकुलेजन्मप्राप्यापिकेचन नयंतीहवृथाकालंरुद्राध्यायपराङ्मुखाः २ अजस्वाशतरुद्रीयमन्यत्रापिकृतश्रमाः विंदंतियदिकैवल्यंतृप्तिंस्यादप्यनश्नतः ३ इष्ट्वापिहयमेधेनपुनरावर्त्ततेमुनिः शतरुद्रीयजपकृन्नहिभूयोनिवर्त्तते ४ स्तेयंकृत्वासुरांपीत्वाहृत्वापिगुरुदारिकां यदिप्रमाणमाम्नायोरुद्राध्यायीविमुच्यते ५ श्रीरुद्रसूक्तंप्रजपन्नियमेनद्विजोत्तमः दर्शनाल्लोकपापानिहरत्यर्कोयथातमः ६ अपिगोघ्नःकृतघ्नोयःशतरुद्रीयमंत्रतः लिंगेशिवंसमभ्यर्च्यलिप्यतेनाब्जपत्रवत् ७ आद्यंतयोर्यःप्रणवेनयुक्तंश्रीरुद्रसूक्तंप्रजपत्यघघ्नं तस्यांघ्रिरेणुंशिरसावहंतिब्रह्मादयःस्वाघविशुद्धिकामाः ८ यथासर्वेषुतेजस्सुज्योतिःसौरंमहत्तरं तथैवमंत्रकोटीषुशतरुद्रीयमुत्तमम् ९ सद्योजातादिभिर्मंत्रैःधृत्वाभस्माभिमंत्रितं योजपेच्छतरुद्रीयंधृतरुद्राक्षमालिकः १० अभिषिंचन्महालिंगेमहादेवंमहेश्वरं त्रिसप्तकुलमुद्धृत्यशिवलोकेमहीयते ११ यतःकुतश्चिद्विहितान्नभक्षणःयतःकुतश्चापिकृतप्रतिग्रहः श्रीरुद्रजापीदुरितानिसर्वशःविहायमुक्तःसभवे

४ स्तेयमिति स्तेयंचौर्यं आम्नायोवेदः ५ ६ ७ आद्यंतयोरिति स्वस्यात्मनो अघस्य पापस्य विशुद्धिं कामयंतेइति तादृशाः ८ ९ सद्योजातेति कालाग्निरुद्रोपनिषदुक्तप्रकारेणेत्यर्थः श्लोकद्वयमेकान्वयित्रिसप्तकुलं दशपूर्वाणि दशापराणि आत्मनासहएकविंशतीत्यर्थः मही

श्रुतिर्यथा १२

यते पूज्यते १० ११ यतइति श्रुतिर्यथा वेदानुसारेण स्वार्था नतिक्रमे यथेत्यव्ययं १२

एवंमाहात्म्यमुक्त्वासंप्रतिपुरावृत्तमाह इतिहासमिति १३ अस्तीति सह्यजाकावेरी यज्वभिः विधिनेष्टवद्भिः १४ तत्रेति षडंगःशिक्षा व्याकरणादिषडंगवान् आम्नायोवेदः १५ कंठेति कंठदघ्रे कंठप्रमाणे प्रमाणेदघ्रच्प्रत्ययः १६ १७ १८ द्रोणपुष्पैरिति द्रोण

इतिहासंवदामोहश्रृणुतश्रद्धयाद्विजाः श्रुत्वायंशतरुद्रीयेपुमान्भवतिभक्तिमान् १३ अस्तिश्रीसह्यजातो
रेश्रीकालाख्यपुरंमहत् वेदशास्त्रार्थतत्वज्ञैःयज्वभिःसमलंकृतम् १४ तत्रकश्चिद्भूद्विप्रःषडंगाम्नायतत्ववि
त् सनित्यंसह्यजातोयेस्नात्वाहुतहुताशनः १५ कंठदघ्नजलेस्थित्वारुद्राध्यायंजपत्यसौ पुष्पैःश्रीरुद्रमंत्रेण
समर्चयतिशंकरम् १६ जपतःशतरुद्रीयतस्यश्रुत्वात्रियोजनं विमुक्तशापाभ्रभवत्पैशाचीमास्थितस्तनुम्
१७ तस्यश्रीशतरुद्रीयजपमाहात्म्यवेदिभिः पशुपत्यभिधादत्तावसिष्ठाद्यैर्मुनीश्वरैः १८ द्रोणपुष्पैःसनिर्दो
षैर्बिल्वपत्रैरखंडितैः तिलाक्षतैश्चदूर्वाभिःशम्याकैरुत्पलैरपि १९ शतरुद्रीयमंत्रेणशंकरार्चनतत्परः जिगा
यसकलान्लोकान्ब्रह्माद्यैरपिपूजितः २० अणिमादिविभूतीश्चतृणीचक्रेमहामतिः पशुपत्यर्पितंपुष्पं
सदाशंकरमूर्धनि २१ शैलादिप्रमुखास्सर्वेदृष्ट्वासंप्रशशंसिरे २२ श्रीरुद्रमाहात्म्यविदस्सपुत्रान्शिष्यांश्चशै
वार्चनजागरूकान् भुविप्रतिष्ठाप्यशिवप्रसादात्द्विजोत्तमोधामजगामशंभोः २३ इतिश्रीस्कंदोपपुराणेभ
क्तविलासेद्वात्रिंशोऽध्यायः ३२॥ ॥श्रीअगस्त्यउ॰सन्निधौपुणतिंशंभोःनियमेनदिनेदिने कुर्वंतियेहरस्तेषां

पुष्पैःआरण्यकैःश्वेतपुष्पविशेषैःनिर्दोषैःकीटवेधादिदोषरहितैःअखंडितैःसंश्लिष्टत्रिदलैःशम्याकैःचतुरंगुलैःपीतपुष्पैः १९ २० २१
२२ उपसंहरतिश्रीरुद्रेति २३ इतिश्रीमानवल्लपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांद्वात्रिंशो

ऽध्यायः ३२॥ ॥ ॥संप्रतिनियमेनशिवंप्रणमतामात्यन्तिकीदुःखनिवृत्ति र्भवतीत्याहसन्निधाविति १ इतिहासमवतारयति अस्तासनाख्यमिति चोलविषयस्य चोलदेशस्य आभरणंपुरं अस्तीतिशेषः २ निष्ठेति निष्ठाविशेषेणधर्मासक्त्यतिशयेन निष्ठ्यूतः निष्कासितः वसिष्ठादीनांयशोभरोयैः अतिथिषु साधु आतिथ्यं तत्रसाधुरितियत्प्रत्ययः तत्कारिभिः शान्तैः शमप्रधानैः दान्तैः जितेन्द्रियैः अ

अस्तासनाख्यंश्रीचोलविषयाभरणंपुरं वेदवेदांगतत्वज्ञैःक्रतुप्रवरदीक्षितैः २ निष्ठाविशेषनिष्ठ्यूतवसिष्ठादियशोभरैः आतिथ्यकारिभिःशांतै र्दांतैरग्न्याहितैरपि ३ अधिष्ठितंसदासद्भिःब्रह्मघोषाभिनादितं तस्यपर्यंतकेदारकुल्यारोधसिकाचन ४ क्षोण्यंत्यजानांमहतीरुधिरैःपंकिलांतरा पुराणमांसखंडासृग्वासनाहूतवायसा ५ कुक्कुटानांमहारावसन्नादितदिगंतरा पर्यंतशुष्यद्गोचर्मपर्यस्तव्रीहिसंचया ६ मद्याःस्वादमदोन्मत्तचंडालकुलसंकुला तत्रास्तिनगरेख्यातःकश्चिन्नंदाह्वयोंत्यजः ७ सदिष्ट्याबाल्यमारभ्य दृढभक्तःशिवेभवत् सशिवालयवाद्यानांजीर्णानांमुखबंधनम् ८ विदधातित्वचानित्यंदत्तेगोरोचनामपि कदाचिच्चर्मणावाद्यंकृत्वाचंडालसत्तमः ९ करंजीपुरनाथस्यसन्निधौन्यस्यदूरतः लिंगसंदर्शनाकांक्षीमुहूर्त्तंतस्थिवानथ १० महावृषभसंछन्नंस्वामिनंद्रष्टुमक्षमः विषसादस्वकंजन्मनिंद्यजातौकिमागतम् ११ स्मरन्नितिशिवंदध्यौभक्तिपूतमनाःक्षणं शशासदेवस्तद्भक्त्याप्रीतःशांकरसन्निधिम् १२ ॥ ७ ॥

ग्न्याहितैः आहिताग्निभिः वाहिताग्न्यादिष्विति परनिपातःएवंभूतैःसद्भिःअधिष्ठितमितिपरेणान्वयः ३ अधिष्ठितमिति ब्रह्मघोषो वेदघोषःतस्यपुरस्यपर्यन्तकेदारस्य प्रान्तक्षेत्रस्य संबंधिनी याकुल्या कृत्रिमासरित् तस्यारोधसि तटे काचन अन्त्यजानाम् चण्डाः

लानांक्षोणीनिवासभूमिः अस्तीतिशेषः ४ ५ ६ ७ ८ ९१० महावृषभेति महान्स्थूलाकारःयोवृषभःशिववाहनभूतःतेनसंछन्नं आन्तरितंस्वामि
नंशिवंद्रष्टुमक्षमःनिंद्यजातोस्वकंजन्मकिमागतमितिविषसाद विषण्णोबभूव ११ स्मरन्निति तस्यभक्त्या प्रीतःदेवःशांकरसन्निधिंशशासे

पार्श्वेगस्तंभवेत्याहसचदक्षिणतोभवत् ततोज्योतिर्मयंलिंगंदृष्ट्वादूरेस्थितोपिसः १३ प्रणनामसुहृःप्रीत्यान
र्त्तकरतालवान् गतंदेवाग्रभागस्थंविदधेनलिनाकरम् १४ संस्मरन्सवेदाशंभुंजातिनैच्यभयातुरः शिवमां
रक्षरक्षेतिमनसाव्याजहारह १५ सेवांनटेश्वरस्याथकरिष्यन्यातुमुद्यतः यज्वसादपुरंतत्वनगच्छेतिस्वजा
तिभिः १६ निवारितोपिश्चोगंतेत्याहभूयःपरेहनि प्रस्थितस्तैर्निरुद्धश्चतथैवाहानुवासरम् १७ पुंडरीकपुरे
शानसेवासादरचेतसः वदतश्चैवमेवागात्मासेकोनश्चवत्सरः १८ अथैकस्मिन्दिनेप्रातःप्रस्थानपरिपंथि
नःशपन्भार्यामपिरवलांसमाश्वास्यनिरुंधतीम् १९ निमज्यसद्यज्ञातोयेधृतभस्मानिजालिके गव्यूतिमा
त्रेसंवीक्ष्यगोपुरंतत्सभापतेः २० प्रणतिंविदधेदृष्टःप्रपेदेचपुरंतिकं प्राचीनगोपुरद्वारक्रोशमात्रेपुरस्थितः
२१ शालाशतंद्विजेंद्राणांनानाध्वरविधायिनां नादितंब्रह्मघोषेणपुण्यधूमाचितांबरम् २२ दृष्ट्वाभीतोन
मेयुक्ताजातिहीनस्यहिस्थितिः विधास्येचान्यतोयत्नमितिदक्षिणतोगमत् २३ ददर्शगोपुरस्याग्रेदक्षिणस्य
मठायुतं सनकप्रख्यसन्यासिवेदसाराभिनादितम् २४ महावाक्यपदव्याख्यापरकीलांकितद्रुमं पुरके
नपथागंतुंमेयुक्तमितिसोंत्यजः २५ क्रोशमात्रेगोपुरस्यप्रत्यग्भागस्थितस्यच स्थित्वाददर्शतत्रापियोगारूढा

त्यन्वयः १२ १३ १४ १५ सेवामिति यज्वभिःविधिनेष्टवद्भिःसान्द्रंपूर्णेपुरंनगरंत्वंनगच्छेतिस्वजातिभिःनिवारितोपीत्यग्रिमेणान्वयः १६ १७

पुण्डरीकेतिमासेनएकेनऊनःवत्सरःएकादशमासात्मकःकालइत्यर्थः १८ १९ निमज्येति सद्यजातोयेकावेरीजले गव्यूतिमात्रेक्रोशद्वयप्रमाणे गव्यूतिःस्त्रीक्रोशयुगंइत्यमरः २० २१ २२ २३ दर्शेतिमठानांछात्रादिनिलयानां अयुतंदशसहस्रं २४ महेति महावाक्यानांतत्त्वमस्यादीनां पदव्या

उदीच्यांगोपुरद्वारिराजर्षीनपरानपि शैवान्सदाचारपरान्दृष्ट्वानिंदत्स्वकांजनिम् २७ हीनजातेःकथं भाविदर्शनंमेसभापतेः अनिषेव्यसदानाथंनाहंगतेत्यवर्तत २८ ततस्तद्वुक्तिमुदितःपुंडरीकपुरेश्वरः स्वप्रेतमाहश्चोवन्हिंप्रविश्यायाहिमत्सभाम् २९ इत्यादिश्यतमेवैकंत्रिसहस्रद्विजोत्तमान् नंदस्यभुङ्क्ष्वेवन्हिर्दीयतामित्सचोदयत् ३० प्रातःप्रबुद्धास्तेसर्वेस्वप्नसंवादविस्मिताः प्रार्थयंतश्चतंवन्हिमालोकेधांस्थानयन् ३१ वर्द्धयामासुरनलंदक्षिणद्वारसन्निधौ नंदःस्नात्वाथमध्यान्हेधृतभस्मानुलेपनः ३२ नत्वादिजानविवेशाग्निंभृंगःपद्मवनंयथा वन्हिनादह्यमानात्तद्देहात्कश्चिद्द्विजोत्तमः ३३ भस्मत्रिपुंड्ररुद्राक्षमालाभूषितविग्रहः वामेदंडमथाऽवामेपाणौविभ्रत्कमंडलुम् ३४ शिवाबंधोल्लसन्मौलिःदिव्यांबरपरिष्कृतः उत्तस्थौपश्यतांतेषांवामदेवोयथामुनिः ३५ तदावबर्षुःकुसुमानिमौलौवैमानिकादुंदुभयश्चनेदुः तमस्तुवन्चारणयूथमुख्याएहित्वमित्यूचुरिमंगणेद्राः ३६ सयज्वभिस्तैरुपदिष्टमार्गःचिदंबरेशस्यसभांप्रविश्यदेवंचिदाकाशमयंनिषेव्यपश्यत्सुसर्वेषुनदृश्यतेस्म ३७ श्रीसूतउ· इतिनंदस्यचरितंभक्त्यामुक्तस्यसंसदि

ख्याएवपराःकीलाःशंकवःतैःअंकिताःचिन्हिताःद्रुमाःयस्मिन् २५ २६ २७ २८ २९ ३० प्रातरिति तेसर्वेब्राह्मणाःस्वप्नसंवादेनविस्मिताःप्रार्थयन्तश्चवन्हिमालोक्यएधांसिकाष्ठान्यानयन् ३१ ३२ नत्वेतिभृङ्गःपद्मवनंयथेत्युपमयानंदनामकस्यशिवेरतिभावस्योत्कर्षःप्रतीयते ३३ ३४ विमानैःसञ्चरन्तीतिवैमानिकादेवाःगणेन्द्राःप्रमथाद्यः तंप्रहरंतीति इतीति द्विनिश्चयेनभक्तिःमुक्तीसाधनंनंदस्यभुङ्क्ष्वेवन्हिर्दीयतामित्सचोदयत्

न्यदित्यर्थः ३८ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांत्रयस्त्रिंशोऽध्यायः ३३॥ ॥❀॥ अघशिवस्यतदुक्तानांवादास्यकरणेन ज्ञानयोगादिनिरपेक्षामुक्तिः सुलभेतिवक्तुमुपक्रमते शिवस्येति १ इतिहासमुपक्रमते अत्रेति यसुरावृत्तमाकर्ण्य क्षीणाः नष्टाः वासनाः अनाद्यविद्यासंस्काराये षां २ अहमिति स्वस्य आवासेमहागिरौ कैलासे अहंकुर्वति सतिपरमशिवाधिष्ठानतया अहमेव सकलस्थानेषुश्रेष्ठइति अहंकारवति तस्यकैलासस्यनिग्रहाय अभिमान

इतिश्रीस्कंदोपपुराणेभक्तविलासेत्रयस्त्रिंशोऽध्यायः ३३॥❀॥ श्रीअगस्त्यउ॰ शिवस्यशिवभक्तानांकैंकर्ये येवितन्वते विनैवज्ञानयोगाभ्यांतेषांमुक्तिरदुर्लभा १ अत्रसिद्धैश्चरैर्गीतमितिहासंब्रवीमिवः विस्मयंतेय दाकार्यज्ञानिनःक्षीणवासनाः २ अहंकुर्वतिकैलासेस्वावासेचमहागिरौ तन्निग्रहायदेवेशशंभुनासृष्ट मद्भुतम् ३ दैनंदिनेलयेयस्यलयोनास्तिशिवाज्ञया यदवाङ्मुखनिक्षिप्तकुंभवत्प्रलयार्णवे ४ अनष्टम॥ तःसलिलैर्विभातिशिवयोःपदं कामाक्ष्येकाम्रनाथाभः केलिमज्जनसंगतैः ५ भस्मकस्तूरिकालेपैर्यत्रगंगा यतेसरित् अस्तितच्छांभवस्थानंत्रिषुलोकेषुविश्रुतम् ६ विंध्यस्यदक्षिणेदेशेस्वर्गस्यप्रतिबिंबवत् उपा गतानांसमयेगौरीसेवार्थमन्वहम् ७ विमानैरिवसिद्धानांसंबाधंभवनोत्तमैः आक्रीडवाटीरंभाग्रस्टष्टमद्भुतं

निवृत्तये देवेशेनशंभुनाअद्भुतंयथास्यात्तथास्टष्टमित्यन्वयः २ दैनंदिनेतिदिनेदिनेभवःदैनंदिनःयस्यस्थानस्यअवाङ्मुखंअधोमुखं यथातथास्यादवाङ्न्यधोमुखःदत्यमरःनिक्षिप्तोयःकुंभःतेनतुल्यं ४ अनष्टमितिपदंस्थानं कामाक्षीदेवी एकाम्रनाथःशिवःतयोःआ भःकेलिभिःजलक्रीडाभिःमज्जनैःअवगाहनैश्चसङ्गतैःभस्मकस्तूरिकालेपैःदत्यग्रिमविशेषणं ५ ६ ७ विमानैरिति विमानैर्दि

वयानेरिवस्थितैः भवनोत्तमैः गृहश्रेष्ठैः संबाधंससंमर्दं आक्रीडाः उद्यानानि च सुरेति सुरसिंधौमंदाकिन्यांनिमग्नंयत् स्वस्त्रैणं स्वर्ग स्त्रीसमुदायः तस्यआभरणंभृतः भूषणधारिणः द्रुमाःयस्मिन् उद्यानेनारिकेलाग्रेषु विश्रांतं अतिदूरआकाशमार्गखेदेन आश्वस्तं अर्कोश्वानांसूर्यतुरगाणांमंडलंयस्मिन् द्रष्ट्यौन्नत्यातिशयोक्तिः ९ क्रमुकेति पूर्वार्द्धस्पष्टं कृशाङ्गीजनस्यकान्ताजनस्य सङ्गीतेनद्रुतानि द्रुवी

सुरसिंधुनिमग्नस्वःस्त्रैणाभरणाभृद्द्रुमं उद्याननारिकेलाग्रविश्रांतार्कोश्वमंडलम् ९ क्रमुकस्तवकाढ्यत देवोद्यानमधुव्रतं कृशांगीजनसंगीतद्रुतरत्नाग्रगोपुरम् १० रमणीवेणिकामोदश्रेणिवासितवीथिकं तरुणीरत्नतांडवसूर्यपीततमोव्रजम् ११ मुग्धामंदस्मितज्योत्स्नातृषकेलिचकोरकं क्वचिन्मत्तेभदानांभोजंबालितनृपांगणम् १२ क्वचिदश्वखुरक्षुण्णरजस्थगितांबरं क्वचित्सुभटखड्गाग्रसंहोत्कंपितभास्करम् १३ गोरीसेवागतोपेंद्रश्रीकटाक्षसमृद्धिमत् कूलंकषामहानद्यामूलेचैकाम्रभूरुहः १४ द्वात्रिंशद्धर्मचारिण्याशिवोयत्रोमयार्चितः पराकाशबिलंयत्रमुक्तिद्वारमपावृतम् १५ महाभैरवमुख्येनगणयूथेनपाल्यते सर्वैःसिद्धैश्चदेवैश्चसेवितंपरमाद्भुतम् १६ अद्यापियत्रकामाख्यास्सन्निधौतिष्ठतादिशः नज्ञायंतेचिरेणापिब्रह्मणापिमुनीश्वरैः १७ छायाग्राहिप्रतिस्पर्धैर्यत्रदिव्यसुधारसः कृतोपहारैःसिद्धेशैःसकौतूहलमीक्ष्यते १८ ॥ ७ ॥

भूतानिनादक्रियायोगादितिभावः रत्नानिअग्रेयेषांतादृशानिगोपुराणियस्मिन् १० ११ १२ क्वचिदितिअश्वखुरैःतुरंगशफैः क्षुण्णंचूर्णितं यत्क्ष्मारजःभूरेणुः तेनस्थगितंआच्छादितं अंबरंयस्मिन् १३ १४ द्वात्रिंशदितिद्वात्रिंशद्धर्माः पतिव्रतासंबंधिनः तांचरति तच्छीलयाउमया ब्रह्मविद्यारूपिण्यापार्वत्या यत्रस्थानेशिवः अर्चितःपराकाशबिलं दहराकाशरन्ध्रम् १५ १६ १७ छायेति यत्रस्थाने छायाग्राहिणा समु

दृश्यनंतुविशेषेण सहप्रति स्पर्द्धीयेषांता दृशैः सिद्धैर्दिव्यसुधारसः सकौतूहलंदृश्यते १८ वैतानेति वैतानानां ऋतुसंबन्धिनां वन्हिनां धूमेनवर्द्धितैः मेघैः पयोजलंसम्यक् अभिवर्ष्यते धूमज्योतिःसलिलमरुतांसन्निपातोमेघरतिप्रसिद्धेः अग्नौप्रास्ताहुतिःसम्यगादि

वैतानवन्हि धूमेनयज्वनामनुमंदिरं वर्द्धितैःसमयेमेघैःपयःसमभिवर्ष्यते १९ कामाक्षीकुंतलामोदिक ल्हारोत्तमवासितः सेवागतानांयत्रार्त्तिमनिलोहरतेन्वहम् २० कामाक्ष्यालिंगितोयत्रभगवान्परमेश्वरः कामीवालंकृतोद्यापिस्तनकंकणमुद्रया २१ देवीगर्भगृहेयत्रलिखितानिशिलांतरे लोकत्रयरहस्यानि नज्ञायंतेपियोगिभिः २२ आसीदेकाम्रनाथस्यतत्रवस्त्रावनेजकः ख्यातोविचारवान्नामभक्तिमान्प रमेश्वरे २३ सशिवानुग्रहादासीच्छैवानांवस्त्रशोधकः नैवादत्तेभृतिंकापिरजकान्वयसंभवः २४ वि भूतिरुद्राक्षभृतांकांचीपुरमुपेयुषां आसन्वासांसिशुद्धानिभक्त्यातस्यमनोयथा २५ आलोक्यवसनं दूरेशैवानांमलिनंस्वयं प्रार्थयत्येत्यतान्लाशोधयित्वातदंबरम् २६ आतपेशोषयित्वाचसायमेवप्र यच्छति ननिर्निजेऽन्यवसनंराज्ञोपिरजकोत्तमः २७ एवंनिवसतस्तस्यद्वात्रिंशद्वत्सरायय्युः एकाम्र नाथस्तद्भक्तिंपरीक्षितुमनाह्यभूत् २८ कस्यचिद्द्विजस्यगृहीत्वावेषमीश्वरः कञ्चरामुद्वहन्कंथांरज कस्याग्रतोभवत् २९ सहस्तरुद्राक्षधरंभस्मोद्धूलितविग्रहं विचारवान्विप्रदृष्ट्वतत्सांजलिरब्रवीत् ३०

त्यमुपतिष्ठते आदित्याज्जायतेवृष्टिः वृष्टेरन्नंततःप्रजाः इतिस्मृतेश्च १९ २० २१ २२ आसीदिति वस्त्राणां अवनेजकः क्षालकः रजक इत्यर्थः २३ सदृति भृतिं मौल्यं २५ २५ २६ २७ २८ कस्यचिदिति कञ्चरां मलदूषितां कंथां २९ ३० ॥ ॥ ॥ ॥

प्रवयादृतिप्रकृष्टंवयोयस्यसःप्रवयाःवृद्धः ३१ ३२ कालदृतिहिमभूयिष्ठःहिमप्रचुरःमिहिकाहिमःपटच्चरंजीर्णवस्त्रं ३३ विशिष्येत्

तिशीतालुःशीतंनसहतेदृतिसः ३४ ३५ ३६ ३७ वासदृतिमातुःकामाक्षीदेव्याःआलये मंदिरेआस्वतिष्ठ ३८ ३९ ४० आदि

प्रवयास्त्वमसिब्रह्मन्महतामस्मिकिंकरः मालिन्यमंबरस्थंतेमाभूयान्मयितिष्ठति ३१ श्रीवृद्धउवाच॥
कामाक्षीदर्शनायाहंदूरादस्मिसमागतः पुरीनदृष्टपूर्वेयंनैवजानामिकिंचन ३२ कालोयंहिमभूयिष्ठो
भूयसीमिहिकानिशि नवस्नातमप्यस्तिकच्चरंचपटच्चरम् ३३ विशिष्यवृद्धःशीतालुःनजानेत्वांगृहच
ते परकीयंनवसनंधार्यमाद्रुर्मनीषिणः ३४ आचारःशीलमाचष्टेभक्तस्त्वंसाधुसंमतः कंथांसंशोधयित्वे
मांशोषयित्वामद्गातपे ३५ सायंदातुंसमर्थश्चेत्गृहाणनमृषावद् इतिवृद्धोक्तिमाकर्ण्यभूयःप्राहविचा
रवान् ३६ नमेकार्यांतरंकिंचिद्वासःसंक्षालनादृते चंद्रिकाधवलंकृत्वाशोषितंचातपेनते ३७ वासःसा
यंप्रदास्यामिभगवन्मातुरालये आस्वेत्युक्ताऽग्रहीत्कंथांवृद्धस्यरजकोत्तमः ३८ स्वजन्मशतपापौघैःस
हतांसमशोधयत् बहिःप्रसारयामासपुलिनेतांद्रुतातपे ३९ रजकःसुमहत्यासीदृष्टिरीशान्नयात्तदा
कंथासाचंडवातेनक्वापिनीतादिगंतरे ४० आदिनातमविच्छिन्नेचासारेसविचारवान् प्रतिज्ञाभंगतः
प्राणत्यागएवमहत्तरः४१ इतिनिश्चित्यधीरःस्वंवृद्धेतस्मिन्कृतागसं त्यक्तुकामोतिकृपाप्यवस्त्रंनिनैजनाश्म
नः ४२ शिरोघातयितुंयावत्प्रवृत्तस्तावदीश्वरः तंयेनकंथयासार्द्धमाविरासीद्वृषोपरि ४३ ॥ ७ ॥

नान्तमिति आदिनान्तं आसायं आसारेधारासंपाते ४१ ४२ ४३ ७ ७ ७ ७ ७

४४ ४५ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांचतुस्त्रिंशोऽध्यायः ३४॥ ॥ॐ॥ अथशिवस्यगोक्षीराभिषेकेणमहापापनिवृत्तिपूर्वकंमुक्तिरवश्यंभवतीत्याह क्षीरेति १ आख्यायिकामुपक्रमते इतिहास मिति ब्रह्मवादिनः वेदवादिनः २ अस्तीति अभ्रसरितःमंदाकिन्याः तटेद्यौः अमरावतीव मणिनिर्झरिण्याः तन्नामिकायानद्याः ती

देवोद्यानप्रसूनानिववर्षुःखेचरस्त्रियः देवदुंदुभयोनेदुःसंवादश्चसतामभूत् ४४ निवार्यसहसोद्युक्तंरजकं वृषभध्वजः नित्यंस्वसन्निधौवासंकैलासेतस्यदत्तवान् ४५ इतिश्रीस्कांदोपपुराणेभक्तविलासेचतुस्त्रिंशोऽ ध्यायः ३४॥ ॥अगस्त्यउवाच क्षीराभिषेकमीशस्यगवांयत्रवितन्वते तेविमुक्तामहापापैर्मुक्तास्युस्सत्य मुच्यते १ इतिहासमितिप्राहुःप्राचीनाब्रह्मवादिनः यस्यश्रवणमात्रेणब्रह्महत्याविनश्यति २ अस्तिस्कंद पुरंनामख्यातंस्कंदप्रतिष्ठितं मणिनिर्झरिणीतीरेद्यौरिवाभ्रसरित्तटे ३ अप्रमत्तधियोधर्मेनित्यंहुतमखाग्न यः अधीतचतुराम्नायाःसर्वत्रब्रह्मवादिनः ४ षट्कर्मनिरतानित्यंसप्तर्षिसमतेजसः अष्टमूर्त्तिस्तुतिपराः नवद्वयकलाधराः ५ दशेंद्रियनिरोद्धारःएकादशधृतेश्वराः द्वादशादित्यसंकाशाःयत्रब्राह्मणसत्तमाः ६ त्रयोदशस्वरार्थज्ञाःचतुर्दशसुदेशिकाः यत्रयज्ञविशेषेषुमरुतायज्वनामपि ७ ॥ ७ ॥ ७ ॥

रस्कंदपुरेऽस्तीतिअन्वयः ३ ४ षडिति षट्कर्माणियजनादीनि तेषुनिरताः नवानां द्वयं अष्टादशतादृश्यः कला विद्याः ऋग्वेदा दयः तासांधराः धारयितारः ५ दशेति दशेन्द्रियाणां पञ्चकर्मेन्द्रिय पंञ्चज्ञानेंद्रियाणांनिरोद्धारः दमनशीलाः एकादशे मन सिधृतः ईश्वरो येः तादृशाः ६ त्रयोदशस्वराणां उदात्तादीनां अर्थज्ञाः चतुर्दशसु विद्यासुदेशिकागुरवः यज्ञविशेषेषु वाजपेयादि

षुमरुतां देवानां यज्वनां विधिनेष्टवतामपि व्योमयानानि रथाश्च राजवीथिषु दृश्यन्ते इत्यन्वयः ७ ८ तेज इति नारिकेलेषु तत्रत्य वृक्षेषु यत्रेति यूथगताः सजातीय समुदायगताः दुर्ग्रहाः ग्रहीतुमशक्या अपि ९ वटूनामिति वटूनां ब्रह्मचारिणां दोहेषु दोहन

रथाश्च व्योमयानानि दृश्यंते राजवीथिषु यत्र श्रीशतरुद्रीयमहामंत्रजपोन्मुखान् ८ तेजोधिकान्विलोक्यार्को नारिकेलेषु लीयते यत्र यूथगता गावो दुर्ग्रहा अपि योषिताम् ९ वटूनां सामगानेन दोहेषु सुकरग्रहाः तत्रासीद्यज्ञदत्ताख्यः कश्चिद्ब्राह्मणसत्तमः १० विद्यासाम्राज्यलक्ष्मीर्यं वव्रे श्रीरिव केशवं ११ सभापतेः शिष्यवरार्पितेन स्वदक्षिणाद्रव्यभरेण सत्तमः ॥ सगां वितेने धृतहेमपट्टां यस्तस्य भार्या जनिसा पवित्रा १२ तयोरर्चयतोः शंभुं नियमेन महीयसा ॥ भाग्योदयेन पुत्रोभूत्षण्मुखः शिवयोरिव ववृधे लालितो मात्रा एक एव निशाकरः १३ सतां संधानमासाद्य बाल्य एव द्विजार्भकः सपंचमाच्च प्रागब्दान्मुखादभ्यस्यताः कलाः १४ विनैव दैवाज्जग्राह सकृदाकर्ण्य तीक्ष्णधीः व्रतं ददौ च गायत्रं पंचमेब्दे विधानतः १५ उपनीतः सगुरुणा सकृदेवोपदेशतः अधीयायाखिलान्वेदान्साङ्गोपाङ्गपदक्रमान् १६ पठितानि च शास्त्राणि सर्वाण्यष्टमवर्षतः अष्टादशपुराणानां वेदानामपि तत्वतः १७ तात्पर्यं शिव एवेति निरचैषीत्स्ववृत्तिभिः परित्यज्याखिलं कार्यं भक्तिं चक्रे महेश्वरे १८ नित्यं द्वादशसाहस्रं पंचार्णं प्रजपन्मनुं जजापैकादशावृत्तिरुद्राध्यायं

क्रियासु १० विद्येति श्रीः केशवमिव विद्यासाम्राज्यलक्ष्मीः सकलविद्याधिपत्यसंपत् यं वव्रे वृत्तवती ११ स इति सभापतेः शिवस्य गां स्वदक्षिणाद्रव्यभरेण धृतहेमपट्टां वितेने चकारेत्यर्थः १२ १३ सतामिति सतां सज्जनानां संधानं संसर्गं १४ विनेति गायत्रं व्रतं उपनयनमित्यर्थः

१५ १६ १७ तात्पर्यमिति वेदशास्त्रपुराणादीनां शिवैकतात्पर्यमिति निरचैषीत्निश्चितवान् १८ नित्यमिति पञ्चार्णं पञ्चाक्षरं
नुमंत्रं १९ आदधे इति सायंप्रातः अग्नेःसमिधःपालाश्यःआदधे चिक्षेप अग्निकार्यंचकारेत्यर्थः अतंद्रितः अप्रमत्तःसहस्रकृत्वः
सहस्रवारान् २० भस्मेति अवकुंठितोलिप्तः रक्षया भस्मना २१ २२ विचारेति विचारशर्मा तन्नामाद्विजपुत्रः समयंकालं २३ प्रती

आदधेसमिधोवन्हौसायंप्रातरतंद्रितः सहस्रकृत्वोगायत्रींजपत्यर्द्धोदितेरवौ २० भस्मावगुंठितोमौंजी
दंडकृष्माजिनांचितः रक्षयालंकृतोभालेज्वलन्नग्निरिवाबभौ २१ आमध्यान्हंमठेस्थित्वाशिवलिंगार्चनं
व्यधात् भैक्षंचपंचमेकालेभुंजानोगुर्वनुज्ञया २२ विचारशर्मासमयंगमयामासभूसुराः कदाचिल्लम्ब
मानेर्केकृतलिंगार्चनाजपः २३ प्रत्यग्रहारंभैक्षार्थंप्रातिष्ठतगृहंमठात् अजग्धयवसांधेनुंवत्सवात्सः
ल्यतःपथि २४ हनंतमथदंडेनतद्ग्रामपशुपालकं तन्निरुध्यदुरात्मानंमहात्माधेनुसादिनम् २५ दर्शना
द्गर्णिनोदस्युःपलायनमशिश्रयत् अथधेनोर्दयोग्रासंशाडूलादाहृतैस्तृणैः २६ कमंडलुजलैस्तस्याःपि
पासामप्यपाकरोत् महिमानंचसंस्मारगवांवाचामगोचरम् २७ सर्वदेवमयीधेनुःसर्वतीर्थमयीतथा सर्वय
ज्ञमयीप्रोक्तासर्वस्यामृतसाधनम् २८ सकृत्प्यग्निनिष्टप्तंयस्याभस्मप्रशस्यते पंचगव्यंयदुत्सन्नंमहापाप

ति पथिमार्गे वत्स वात्सल्यतः अजग्धयवसां अभक्षिततृणां धेनुं नवप्रसूतिकां दंडेनहनंतं तद्ग्रामपशुपालकं गोपालमित्यर्थः २४
अपश्यदिति शेषः महात्माद्विजः धेनुसादिनं गोपीडकम् तं दुरात्मानं निरुध्य रुध्वा अतिष्ठदितिशेषः २५ २६ २७
२८ शकृदिति शकृत् पुरीषं यदुत्सन्नं यस्याः धेनोः सकाशादुत्सन्नम् २९

३० यत्सादेति गोधूलिस्नानस्य पार्थिवस्नानत्वेन स्मरणादितिभावः ३१ ३२ ३३ ३४ स्वकर्मेति आसंगवं द्वितीयकालपर्यंतं ३५

यस्याःक्षीराभिषेकेणप्रीणातिपरमेश्वरः स्तुवंतियज्ञतत्वज्ञाःसर्वधर्मदुघांचयाम् ३० यत्सादधूलिर्गंगेवपु
नातिशिरसाधृता वृषभेंद्रोयदुत्पन्नोमहादेवस्यवाहनम् ३१ दर्शनादेवपापघ्नीसेयंधेनुर्जगत्प्रसूः ब्राह्म
ण्यसाधनंयस्याहोमेषुघृतमुच्यते ३२ दंडेनहंतितामेवदुरात्मापशुपालकः अद्यारभ्यकरिष्येहमग्निहोत्रं
गवांसदा ३३ परिचर्याकिमन्येनकर्मणाभवितामम इतिनिश्चित्यगोपालंनिष्कास्यस्वयमेवसः ३४ स्वक
र्मासंगवंकृत्वाचारयामासतास्तृणं ररक्षशाड्वलैःसर्वाःपीतोदा श्छाययान्वितैः ३५ सुहितासुतृणैस्तासुशि
वमानर्चनित्यशः स्निग्धशुश्रूषयातस्यपुष्टांगास्ताश्चधेनवः ३६ द्विगुणंदुदुहुःक्षीरंसमयोनातिवर्त्तते य
दाकंडूयतेतास्तुददुस्तावत्पयस्वयम् ३७ दुग्ध्वापयस्वयंदुग्धंवर्णीनिजकमंडलौ तेनाभिषिंचतिशिवंसि
कतालिङ्गपूजितम् ३८ एवंदिनेदिनेचक्रेश्लाघितःसकलैर्द्विजैः क्षीरबाहुल्यमुदिताःनेर्ष्यांतत्रवितन्वते
३९ प्रीतौचमातापितरौतन्निष्ठांवीक्ष्यतस्थतुः गवांशुश्रूषणंनित्यमेवमेववितन्वतः ४० विचारशर्मणस्त
स्यययुःसंवत्सरास्त्रयः अथैकस्मिन्खलःकश्चित्दिनेकर्ममहात्मनः ४१ गत्वाग्रामद्विजान्सर्वान्श्रावयाः
मासदुर्मतिः विचारशर्मपितराबाहूयोचुश्चतेद्विजाः ४२ सुतस्तेपालनव्याजात्मध्यान्हेचारयन्पशून् निरु
ध्यशाड्वलेधूर्त्तोदुग्ध्वास्वैरंपयोगवाम् ४३ दौष्ट्यात्पिंडीकृतेसिंचन्सैकतेविचरत्यसौ त्वत्सूनुःशिक्षणीयोसौत

सुहितास्विति तासु गोषु तृणैः घासैःसुहितासु तृप्तास्वित्यर्थः ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ॥

४५ ४६ समांसमीनामिति समांसमीनांप्रतिवर्षप्रसूयमानांगृष्टीःसकृत्प्रसूताःनैचिकीःगोधूत्तमाःवष्कयणीःचिरप्रसूताः ४७ प्र
च्छायेतिप्रकृष्टच्छायायुक्ते ऊधसःआपीनस्यअधस्तात्कमंडलुंकृत्वामंदंकंडूयतेस्मेत्यन्वयः ४८ ४९ वर्णीतिवर्णीब्रह्मचारी व

इतितस्योक्तिमाकर्ण्यपितरौखेदमापतुःयज्ञदत्तःपरेद्युस्तत्कलंशोधयितुंकुचित् ४५ तस्थौनिकुंजेसंलीनोभू
योविप्रवचस्मरन् अथोदितेदिवानाथेकृतकृत्योहुताननः ४६ समांसमीनांगृष्टींश्चनैचिकीश्चचिरप्रसूः अ
पिवष्कयणीःसोगाश्चारयित्वातृणंबहु ४७ प्रच्छायेतरुमूलेतांनिरुध्यात्मकमंडलुं अधस्तादूधसःकृत्वामंदंकं
डुयतेस्मसः ४८ पयःपूर्णंसमादायकमंडलुमथात्मनः कृत्वासैकतलिंगस्यसमीपेलिंगमर्चितुम् ४९ वर्णीप्रव
दृतेतत्रपत्रपुष्पैरुपार्जितैः धातकीमूलमासाद्यतीर्थपत्रैफलैरपि ५० भक्त्यासमर्चयामासयथापूर्वंमहावटुः
अथागत्यपिताकोपात्पादेनास्यकमंडलुम् ५१ चिक्षेपकिंकिदुष्टात्मन्निरुक्ताभर्त्सयत्सुतं पादप्रहारविध्व
स्तंतस्यदुग्धंकमंडलोः ५२ विशीर्णमपतन्मूर्ध्निशंभोःसैकतरूपिणः शिक्षादंडंगवांपाणौगृहीत्वाद्रोहका
रिणःजघानपादौकोपेनपरशुंभूयसोच्छिनत् ५३ सकृत्तपादोनिपपातभूमौहाहेतिमूर्छांसहसाप्रसन्नः ॥
तावत्प्रसन्नःपतिरंबिकायाःआदुर्बभूवास्यवृषाधिरूढः ५४ श्रीसूतउ॥ कैलासशिखराकारेवृषभेगिरिजासख
म् अवलोक्यमहादेवमस्तौषीत्प्रणिपत्यसः ५५ अवरुह्यहरस्तदावृषेंद्रा दृटुमाश्लिष्यसुराग्रतोजगाद मयि
भक्तिमताजितात्रिलोकीभवमुक्तःसततंभवांतिकेमे ५६ निवेदितंमेयत्किंचिदृत्तंतेस्तुफलप्रदं आधिपत्यंचम

र्णःप्रशस्तिःस्मरणाद्यष्टविधमैथुनाभावरूपःसोस्यास्तीति व्युत्पत्तेः ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ८ ८

५८ ५९ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांपञ्चत्रिंशोऽध्यायः ३५ ॥ ७ ॥

सम्मतिशिवभक्त्यास्त्रियोपिमुच्यंते ताश्चस्वदर्शनमात्रेण अन्यानपि संसारसागरात्तारयंन्तीत्यध्यायचतुष्टयेनाह शिवेति १ इतिहास भवतारयति अत्रेति २ अस्तीति हालिकानां लाङ्गलोपजीविनां केदारेषु क्षेत्रेषुसञ्चितः व्रीहिसञ्चयः शालिसमुदायः ३ वर्द्धमानेति व

कैलासेत्वत्पितुर्भूयान्मुक्तिःसालोक्यरूपिणी इत्युक्त्वाभगवान्शंभुःसहतेननिरोदधे ५८ प्रसादादथदेवस्य यज्ञदत्तोपितत्क्षणात् भवबंधाद्विनिर्मुक्तःकैलासपदमासवान् ५९ इतिश्रीस्कांदोपपुराणेभक्तविलासेपंचत्रिंशोऽध्यायः ३५॥ ॥श्रीअगस्त्यऊ· शिवकैंकर्यमात्रेणमुच्यंतेयत्पित्रियः प्रणतंदर्शनादेवतारयंतिभवांबुधेः १ अत्रैवोदाहरंतीममितिहासंपुरातनं स्थाणोःप्रसादःप्रत्यक्षोयत्पित्रियतेजनैः २ अस्तिकिञ्चित्पुरंरम्यमूर्ध्वपाटीतिविश्रुतं यत्रहालिककेदारसंचितोव्रीहिसंचयः ३ वर्द्धमानोन्नतिःस्पर्धांभजतेहिमभूभृता यत्रोद्यानतरुस्तोमकोटरेषुद्विजन्मनाम् ४ अग्निहोत्राग्निधूमौघोधत्तेपारावतश्रियं तरुणीवदनांभोजसौरभोर्मिषुमज्जताम् ५ मधुव्रतानांविरुतैर्दिशोयत्रनिरंतराः यदाह्वयोमुनेनामपुरंभुविपुराविदः ६ यत्रावतीर्णौविख्यातौभक्तौवागीशसुंदरौ तत्राभूत्कौर्त्तिमान्नामचतुरःकुलवल्लभः ७ हलसंभूतयाभक्तान्श्रियाय. स्समपूजयत् धर्मश्रद्धेवतस्याभून्मानिनीनामवल्लभा ८ कुलसौंदर्यसौजन्यविनयादिगुणान्विता कौमुदीव

श्री
108
111
ചരണ
ശ്രീ:

र्द्धमानाउन्नतिरीन्नत्यं यस्यहिमभूभृताहिमाचलेनसहस्पर्द्धां जिगीषांभजते तादृगौन्नत्यादितिभावः ४ ५ मध्विति मधुव्रतानांभ्रमराणां विरुतैःनिरंतराःसान्द्राः ६ यत्रेति वागीशसुंदरौ वक्ष्यमाणौ कुलवल्लभः कुलपालकः ७ हलेति श्रियाधान्यरूपया ८ ९ ॥

१० ११ लक्षण्यःलक्षणेषुसाधुः १२ विनीयमानइति शिष्यमाणःश्रमोघश्रमान् सफलायासान् व्यधात् चकारशिष्यस्यविद्याप्राप्तिरेव गुरूणांअध्यापनश्रमसाफल्यमितिभावः१३ कुलेति कुलस्यस्थितिं मर्यादां द्वादशेवत्सरे सतीतिशेषः १४ १५ कलीति उद्वोढुकामः

कालेनाथतयोरासीत्कन्यैकातिलकावती सावर्धमानाबालापिमनोनयनहर्षिणी १० शारदीवशशा
ङ्कस्यकलाप्रासनवोदया अथपुत्रार्थिनस्तस्यजातःकीर्त्तिमतस्सुतः११ लक्षण्योबोधवान्नामनिशाकरइवा
बुधेः कृतनामादिसंस्कारोबोधवान्पंचवार्षिकः १२ विनीयमानोगुरुभिस्तानमोघश्रमान्व्यधात् स्वातंत्र्यं
सर्वविद्यासुदृष्टात्मास्यखिलाजनाः १३ कुलस्थितिंकीर्त्तिमतोमेनिरेसुप्रतिष्ठितां कीर्त्तिमानपिकन्यायावय
सिद्वादशेसति १४ वरमन्वेषयामाससमानकुलसंपदं एतस्मिन्समयेतस्यपूर्वसंबंधिवंशजः १५ कलिंशत्रु
रितिख्यातःमंत्रीराज्ञःशिलार्चकः उद्वोढुकामःस्वान्बंधून्प्राहिणोत्कन्यकार्थिनः १६ कीर्त्तिमंतंचतेप्रोचुर्मानिताः
स्वजनांतरे कलिंशत्रोरियंभार्याकन्यांतेतिलकावती १७ भूयादनन्यसामान्यंतयोर्दांपत्यमद्भुतं इत्युक्तःकी
र्त्तिमानाहतथास्तिसबांधवः १८ अतीत्यचैत्रंवैशाखेमुहूर्त्तेस्तिमानिताः कलिंशत्रुपुनःप्राप्ताःबांधवा
स्तदचक्षत १९ कलिंशत्रुरभूत्प्रीतोवार्त्तामाकार्यमंगलां अप्यभूत्तिलकावत्यामनःप्रीतिर्महीयसी २० अ
थराजाज्ञयाशत्रून्विजेतुंसमरंप्रति कलिंशत्रुर्बलैस्सार्द्धंवरमान्योरणस्थलीम् २१ प्राप्तोविद्विषतांसैन्येहन्यमा
नेर्दैतोनिशि मारयित्वाबहून्योधानभवद्वैरिणाहतः २२ दिवसैःपंचषैरेवकीर्त्तिमान्ज्वररोगतः पीडितोविजहौ

विवादंकर्त्तुकामः १६ १७ १८ अतीत्येति तत्कीर्त्तिमत-प्रियंवदंअचक्षत अकथयन् १९ २० २१ २२ दिवसै

रिति मानिन्यपिकीर्त्तिमतः कान्तापि तंकीर्त्तिमंतं अन्वगात् सतीधर्मेण अनुगमनंचकार २३ २४ २५ २६ प्रवेक्ष्यामीतिजन्मनि भविष्यत् जन्मनिप्रत्यूषेधन् निवारितवन्तः २७ अनूढानामिति अनूढानां अविवाहितानां कन्यकानामित्यर्थः तेद्विजातयः २८ २९

चकारपित्रोःसकलंबोधवानौर्ध्वदेहिकं कलिशत्रुंहतंश्रुत्वाशुशोचपरमातुरा २४ प्रदातुकाममन्यस्मैबोधवंतंनिवार्यसा वचःपित्रोःकरिष्यंतीदृधारव्रतमुत्तमम् २५ पितृभ्यांमनसादत्तापुराहंकलिशत्रवे सचेद्विनिहतोयुद्धेममभाग्यविपर्ययात् २६ प्रवेक्ष्याम्यग्निमस्त्वेषपतिर्जन्मनिमामिति इतितांविदितोद्योगांप्रत्यूषेधन्द्विजातयः २७ अनूढानांस्मृतिःशास्त्रेविहितानेतितेगताः ततस्सात्यक्तभोगेवस्थापितानुजरक्षणे २८ काषायवासिनीनित्यंपंचाक्षरजपान्विता भस्मोद्धूलितसर्वांगीधृतरुद्राक्षमालिका २९ वीरदेशालयंगत्वा मार्जनालेपनादिकं कुर्वंतीशिवनामानिकीर्त्तयंतीजितेंद्रिया ३० ददानाशिवभक्तेभ्योवासश्चान्नंयदीप्सितं मितभुग्मौनवत्यासील्लोकवार्तासुमूकवत् ३१ अचिरात्तिलकावत्याःसदाशिवकथाश्रुतेः प्रसादमनःशंभोःप्रसादेनगुरावपि ३२ शिक्षितोग्रजयाबालोद्विजशुश्रूषणेरतः अष्टादशपुराणार्थानाशृणोद्गुरुसन्निधौ ३३ चकारोच्चावचान्धर्मान्मत्वासर्वंविनश्वरं वापीकूपतडागाश्च पुण्यभूरुहवाटिकाः ३४ प्रतिश्रयांश्चगोशालाःपुष्पारामाननेकशः आर्त्तौषधप्रदानंचदीनांधपरिपालनम् ३५ क्षीरंतैलंशि

वीरेति वीरदेशालयं शिवालयं ३० ३१ ३२ ३३ चकारेति ऊच्चवचान् अनेकविधान् सर्वंदृश्यंविनश्वरं अस्थिरंमत्वा यदृश्यंतन्नश्यमितिन्यायादितिभावः ३४ प्रतिश्रयानिति प्रतिश्रयान् पांथनिवासान् ३५ क्षीरमिति घर्मेग्रीष्मे अस्यबालस्यबोधवतःनास्ती

तिवाक् नाभूत् यस्य यदीप्सितं तद्दानीत्यर्थः ३६ तस्येति मूर्त्तिमद्भिः पापैः तत्स्वरूपैः जिनैः आर्हतैः पाषंडापसदैरितितेषांविः
शेषणं याशब्देनत्रयीप्रोक्तापालनाज्जगतः सदा तांखण्डयंतियेते वैपाखण्डावेदनिन्दकाः इतिपाखण्डशब्दनिरुक्तिः अतए
वअपसदाःनीचाः ३७ एकदेति प्राधान्यं स्वमतस्येतिशेषः अहिंसापरमोधर्मइतितेषां मतंतयानिमित्तेन अन्यत्रवैदिकमतेहिं
सया यागीयपशुहिंसया निमित्तेन दुष्टतां पापजनकताम् ऊचुःउक्तवंतइत्यर्थः ३८ अप्रमाणमिति यदूस्तु अप्रत्यक्षंसन्नि

चक्रेकिंबहुनोक्तेननास्यनास्तीतिवागभूत् ३६ तस्येवंवर्त्तेमानस्यपापैःप्राग्जन्मसंचितैः मूर्त्तिमद्भिरभूत्सं
गःपाषंडापसदैर्जिनैः ३७ एकदातेसमागत्यवेदबाह्यमतेस्थिताः अहिंसयोचुःप्राधान्यंहिंसयान्यत्रदुष्ट
ताम् ३८ अप्रमाणमुपादिष्टमप्रत्यक्षंश्रुतंचयत् विहितःक्षणिकःशब्दैःधर्मःकिंसाधयिष्यति ३९ नष्टेक
र्त्तरिनान्वेतिस्वर्गादिर्यत्फलंभवेत् उपचारश्चबिंबेषुपूर्णस्यज्योतिषःकथम् ४० ऐक्येजीवात्मनोर्नस्या=
सुखादेःकिंविचित्रता कर्मणाचेत्समुत्कर्षेनकोपिब्रह्मविद्भवेत् ४१ देवालयेविहारस्यात्तस्मात्तत्रनमे
द्बुधः नवर्णेचाश्रमेभेदोदृश्यतेक्वचिदात्मनः ४२ बुधस्त्वमसिकिंवाचांविस्तरेणानुचिंतय युक्तंचेदार्हतमतं

कर्षीगोचरंश्रुतंशब्दप्रमाणलब्धंचउपादिष्टंतदप्रमाणमित्यर्थः शब्दैःवैदिकशब्दैःविहितःप्रतिपादितःक्षणिकः अनित्योधर्मः किं
साधयिष्यति स्वर्गादिकं कथंसाधयिष्यति धर्मस्यक्षणिकत्वेननष्टत्वादितिभावः ३९ नष्टेइति नान्वेति धर्मोनानुगच्छतीत्य
र्थः यस्यधर्मस्यफलं स्वर्गादिर्भवेत् बिम्बेषु परिच्छिन्नेषुप्रतिमादिषु पूर्णस्यज्योतिषः अपरिच्छिन्नब्रह्मचैतन्यस्य उपचारः कथं
भवेत् ४० ऐक्येइतिजीवेश्वरयोरैक्येसुखादेःकिंविचित्रता किंन्त्वित्वसर्वज्ञत्वादिविरुद्धधर्माध्यासादितिभावः कर्मणा या

गादिनासमुत्कर्षेःआत्मसंस्कारूपःचेद्यदिनकोपिब्रह्मविद्भवेत् कर्मणोजन्मारंभकत्वादितिभावः ४१ ४२ ४३ ४४ ४५ ४६ चैत्येति चै
त्यस्यस्वसंकेतकल्पितस्य स्थंडिलस्य कटंतृणादिनिर्मितं अंबरंवस्त्रं वस्तेस्म आच्छादयतिस्म ४७ स्मेति आर्हतमतेजिनमते

दृस्यादिवचसांगुंफैरार्हतानांसवंचितः वैदिकाध्वस्थितोश्रद्धामत्यजद्दुष्टसंगतः ४४ किमत्रेतिप्रलोभ्यैनंश्रुत
यन्स्वपदंजिनाः समंततःप्रवेशेनजनान्सर्वानतोषयत् ४५ बोधवानथतत्याजस्नानदानद्विजार्चनं वर्णा
निदायधर्मंचवेदबाह्योचिरादभूत् ४६ चैत्यप्रणामंविदधेवस्तेस्मकटंबरं सपाटलिपुरेसर्वैरभिषिक्तोजि
नैरभूत् ४७ स्मेत्याप्राङ्नामनामान्यद्रुमसेनाह्वयोभवत् तमार्हतमताध्वन्यास्तस्थुराद्रत्यसर्वदा ४८ दर्शयं-
स्तःपदंनेमुःसंध्ययोरार्हतस्त्रियः दृष्टतच्चित्तसाहस्रःसोभवत्पुरुषार्थवान् ४९ कदाःसोमताचार्यसंमतो
वदधेसच जिनतत्राध्वगंश्रुत्वाभ्रातरंतिलकावती ५० विदीर्णहृदयाशोकाच्छरणंप्रापशंकरं सात्तार्द्यसरि
तिस्नात्वासायंप्रातर्दिनेदिने ५१ जलाद्विवसनादेवंभेजेभस्मावगुंठिता स्वहस्तोपचितैःपुष्पैःनिर्मायविविधास्त्र
जः॥ ददानाप्रत्यहंभेजेविद्रुमाधीश्वरंविभुं ५२ नमःशिवायत्रिदशार्चितायनमःशिवायत्रिपुरांन्तकाय॥ नमः
शिवायाधिविमोचनायनमःशिवायप्रणतार्तिहंत्रे ५३ पतितंदुर्मतेबोधे भ्रातरंकरुणानिधे॥ स्वामिन्मुद्ध
रदेवेशदयामयिविधीयतां ५४ एवंसंप्रार्थयन्तीसाकृत्तिवाससमीश्वरम् उपवासपराकार्श्मंजगामतिलका

अध्वन्याःपांथाःतत्रप्रविष्टाइत्यर्थः ४८ ४९ ५० ५१ ५२ नमदिति आधिविमोचनायमनोव्यथानाशनाय ५३ पतितमिति अबोधेज्ञानशून्ये दु-
र्मतेजैने ५४ ५५ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांषट्त्रिंशोऽध्यायः

संप्रतितिलकावत्याःशिवप्रसादंवर्णयति तपसेति १ तिलकावतीतिशोकंमाकृथाद्त्यन्वयः नशोचति भिद्यतेहृदयग्रन्थिःछिद्यन्तेसर्वसं
शयाः क्षीयन्तेचास्यकर्माणितस्मिन्दृष्टेपरावरेइतिश्रुतेः २ शृणिवति तथागतमतंजैनमतम् अस्मिन्नर्थे पुरावृत्तंवर्णयति आर्यावर्त्तइति

श्रीअगस्त्यउवाच तपसातिलकावत्याःप्रसन्नःपरमेश्वरः इदंस्वप्नेसमागत्यजगादहृदयंगमम् १ श्रीमहे
श्वरउवाच तिलकावतिमाशोकंकृथामनसितेव्रतैः प्रीतोस्मिमयिसुप्रीतेसतिजंतुर्नशोचति २ शृणुचाप्यप
रंवाक्यंतिलकावतियेनते तथाऽऽगतमतंप्राप्तोभ्रातायदनुशोचसि ३ आर्यावर्त्तेभवत्कश्चित्सुतपानामस
र्वित् मुनिरासीन्महाप्राज्ञःसर्वशास्त्रविशारदः ४ भक्तिमान्मयिधर्मार्थंविद्यामुपदिदेशच अज्ञानिनोयेन
पुराबहवःसुधियोभवन् ५ तदाकश्चित्समागत्यशांतिमान्नाममस्करी ब्राह्मणोविहितातिथ्योशिष्याणान
मेदातदे ६ व्याकरोहृदसारार्थंजीवात्मैकंयतोभवेत् तदात्मपरीक्षायैप्रवृत्तःसुतपामुनिः ७ तथागतम
तालंबीव्याजहारात्मनोभिदां नैषवेदांतसमयःत्वंयदाथेतिसोब्रवीत् ८ प्रामाण्यंनैववेदानामित्याहसुतपाः
पुनः शशापशांतिमानेनंतदानींवेदनिंदया ९ कुपितोवेदबाह्यानामस्त्वेकोयंकुलेषिति पुनर्नेत्वाक्षमस्वे
तिशापांतंतमयाचत १० दयायासपुनःप्राहशिवभक्तिस्तदास्त्विति मदुक्तस्यवचोभूया न्नमिथ्यामदूचोयथा
११ तवभ्रातार्हतमतं तस्मादेषप्रवेशितः पश्यमेशक्तिमतुलांत्याजयिष्यामितन्मतम् १२ ॥ ७ ॥ ७ ॥

४५ तदेति मस्करीयतिः ६ व्याकरोदिति वेदसारस्यउपनिषदःप्रणवस्यवा ७ तथेति भिदांदैश्वरद्वैतं आत्मनःजीवस्य त्वंयदाथ अ
वोषि ब्रुवःपञ्चानामित्याहादेशः ८ प्रामाण्यमिति शान्तिमान्नामएनं यतिनंकुपितइति वेदबाह्यानांजैनानां १० ११ १२

इतीति तस्मैतिलकावतीभ्रात्रेधर्मसेनायेत्यर्थः शूलगदं उदरशूलरोगं १३ १४ १५ १६ निपतन्निति विनेष्यंतः दूरीकरिष्यन्तः कटवा
ससः जैनाः संभूय संघीभूय १७ प्रायुंजत प्रयोजितवन्तः १८ सर्वाणीति महामयो महारोगः १९ २० आपादेति पिच्छाग्रैः मयूरबर्हा

इत्युक्त्वांतर्हितःशंभुःतस्मैशूलगदंददौ प्रीतातदद्भुतंस्वप्नंदृष्ट्वासीत्तिलकावती १३ अथैकदापिबद्दुग्धं
धर्मसेनोनिशांतरे अजीर्णमभवत्क्षीरंततश्चासीद्गदोमहान् १४ उदरेवर्द्धतेव्याधिःकालकूटाग्निसंनि
भः दावाग्निरिवजज्वालतेनमूर्छाभवन्मुहुः १५ स्वच्छंदपीतमशितंयदल्पमपितद्बहु विव्हलःशूलरोगे
णधर्मसेनोजिनालये १६ निपतन्नुत्पतन्निद्रांनान्वभून्नमृतिंययौ तस्यरोगंविनेष्यंतःसंभूयकटवास
सः १७ प्रायुंजन्नाऽमयघ्नास्तेविद्यानानाविधाःपृथक् औषधानिचदत्तानिसिद्धानिस्थलकोटिषु १८ सर्वा
णितानिनष्टानिरोगेवन्हौयथातृणं व्यजृंभतोदरेतस्यभूयःशूलोमहामयः १९ धर्मसेनःप्रवृत्तस्या त्प्राणत्यागे
यथास्वयं अथदेशांतरात्केचिद्भिषजोजिनसंमताः २० आपादकेशंपिच्छाग्रैरामृशंतोजपन्मनुं द्विगुणःस
चतन्मंत्रैःसमुद्रवदवर्धत २१ निराशाश्चार्हताःसर्वेमत्वातंनिशिनिर्ययुः धर्मसेनोऽसहायस्सन्रुरोदभृश
मातुरः २२ नान्नंकिंचित्क्वचिल्लेभेपीड्यमानःक्षुधातृषा प्रत्युत्पन्नामतिस्तस्यद्वित्रैरथदिनैःस्वसा २३ रक्षांवि
धास्यतीःत्येकांतस्यैधात्रीमचोदयत् जिनालयप्रवेशोमेधात्रियुक्तोनचेत्स्वयम् २४ अत्रागतेस्वयंरक्षांकरिष्यामीतिसा

ग्रैः मनुंमंत्रं २१ निराशाइति आर्हताःजैनाः आतुरो रुग्णः २२ नेति द्वित्रैः दिनैः स्वसाज्येष्ठभगिनी रक्षांविधास्यतीति मत्वेतिशेषः धा
त्रीं उपमातरंजिनालये विहारे प्रवेशोनयुक्तइति हस्तिनाधाव्यमानोपिनगच्छेज्जैनमंदिरं इतिनिषेधादितिभावः २३ २४ २५

२६ पादयोरिति रुग्णं रोगाक्रान्तं कटं तृणमयं वस्त्रं पिंडिका कुण्डिकाधरं तन्मते तद्धारणस्य विहितत्वादिति भावः २७ २८ २९ व्यध्वेति

विधूय जैनसमयं दीनदीनस्तथातुरः स्नात्वा स पादयोः प्राप शरणं तिलकावतीम् २६ पादयोः प्रणतं रुग्णं चि
बुकश्मश्रुधारिणं कटं वसानं करयोः पिंडिकाकुंडिकाधरम् २७ महोदरं जीर्णकंठं स्वसा जात्यैव सानुजं ज्ञा
त्वा प्रसादमीशस्य स्मरंती च विसिस्मिये २८ किमेतदिति पृष्टस्तां धर्मसेनोब्रवीत्सतीं आर्ये दुष्टार्हतैरस्मि वं
चितो वेददूषकैः २९ व्यध्वभाजं जिनाश्चक्रुः मां निवर्त्यागमाध्वनः यदा मे शूलरोगो भूत्तदा ते कटवाससः ३०
रोगापनयनं कर्त्तुमशक्ता दुद्रुवुः खलाः त्वामस्मि शरणं प्राप्तः रक्ष मामात्मजं यथा ३१ नास्त्यौषधं मे रोगस्य न
प्रयांत्यसवो मम निद्रा नैव क्षुधा बव्ही भुक्तं किंचिन्न जीर्यते ३२ कुक्षौ शूलामयः सोयं हालाहल इवैधते
स्पृश त्वमुदरं किंचित्कृतार्थः स्यां न संशयः ३३ अथाह भ्रातरं साध्वी दयालुस्तिलकावती कृतस्य सहते का
ले कर्मणः फलमात्मनः ३४ अकृत्वा कोप्यविहितं न दुःखी स्यात्कदाचन प्राग्जन्मनि कृतं तावत्त्वया वेदांतदू
षणम् ३५ फलं तस्यैव पापस्य प्रवेशो जिनवर्त्मनि दूरे तथागतं दृष्ट्वा धीमाञ्चक्षुर्निमीलयेत् ३६ स दृष्टश्चेत्स
मादेन पश्यन्नर्कं शिवं स्मरेत् असंभाष्यस्य ते तस्मात्न स्पृशाम्युदरं न मे ३७ बंधुस्त्वमसि जीवन्वामृतो वापि
जिनो ह्यसि इत्युक्त्वा गंतुमिच्छंतीं स रुदन्तिलकावतीम् ३८ उच्चैःस्वरेण चुक्रोश पाहि पाहीति दीनवाक् दयाव
तीतमाहाथ निवृत्याऽऽर्त्तं जिनानुगम् ३९ यदि रक्षा विधेया ते मया तावत्तथागत जिनचिन्हानि संत्यज्य स्नाहितार्क्ष्य

व्यध्वभाजं कुमार्गगामिनं आगमाध्वनः वेदमार्गात् ३० ३१ ३२ कुक्षाविति अहं कृतार्थः स्यां इत्यन्वयः ३३ अथेति साध्वी पतिव्रता कृतस्येति जनइ

तिशेषः ३४ ३५ ३६ ३७ ३८ ३९ यदीति हेतथागतहेजिनेति धर्मसेनसंबोधनं ४० इतीति सस्नौस्नानंचकार नवांशुकं नूतनवस्त्रम् ४१ ददाविति अलिकेभाले ४२ प्रणतइति गुरुः तस्याएव तस्मैतदनुजायपंञ्चाक्षरंशैवंमंत्रं वीरदेश्वरस्य तन्नामकस्यशिवस्यसन्निधौ ४३ जठरादिति समुड्डीय उत्पत्य अगच्छत् जगामेत्यर्थः ४४ नीरोगइति निर्मुक्तोमुक्तकंचुकः पन्नगःसर्पइव ४५ ४६ ४७ अनुपदवक्ष्य

इत्युक्तःसत्तयासर्वंसंस्मृत्यार्हतलक्षणं सस्नौतार्ष्यसरिस्तोयेसाऽदात्तस्मैनवांशुकम् ४१ ददौचविमलंभस्म दधौभक्त्यालिकेचसः अथनत्वागुरुंशांतंसस्कृतंतंपुनर्व्यधात् ४२ प्रणतस्तिलकावत्यातस्मैपंचाक्षरंगुरुः उपदिश्यददौभस्मवीरदेश्वरसन्निधौ ४३ जठरात्तस्यरोगोपिकाकरूपेणनिर्गतः समुड्डीयांबरेगच्छत्सद्यः सर्वैतिविस्मिताः ४४ निरोगोबोधवानासीन्निर्मुक्तइवपन्नगः भस्मालेपनमात्रेणदिव्यरूपंपुनर्दधे ४५ रोगापनयनात्सद्यःतस्यभक्तिःशिवेभवत् नपरमन्यतेदेवंमहादेवान्महेश्वरात् ४६ स्नात्वाभस्मांकितःकुर्वन्पंचाक्षरजपंसदा व्यतनोत्तिलकावत्याशिवेकैंकर्यमुत्तमम् ४७ तदाम्लेच्छाधिपःकश्चित्सल्लवोनामभूपतिः तद्देशस्यविजित्यासीदशेषधरणीपतिः ४८ बोधवानपिकैंकर्यंशंभोरामाससप्तकं कृत्वारात्रौपुरःशंभोःस्तोत्रंकर्त्तुमनोदधे ४९ अथमहेश्वरशासनचोदितामगवतीवचसामधिदेवता व्यथितबोधवतोरसनाग्रसंस्थितिमभूत्सयतोरसनापतिः ५० इतिश्रीस्कंदोपपुराणेभक्तविलासेससप्तत्रिंशोऽध्यायः ३७ ॥ ७ ॥

माणकथासंदर्भोय अवान्तरवृत्तमुपक्षिपति तदेति तदेशस्य वीरदेशाधिष्ठितस्यअशेषधरणीपतिः आसीदित्यन्वयः४८ ४९ संप्रति शिवप्रसादे तस्यसारस्वतंप्रसादमेकेन वदन्नुपसंहरति अथेति वचसां अधिदेवतावाणीबोधवतःरसनाग्रे संस्थितिं व्यधित च

कारयतःसःरसनापतिःउत्तमकविःअभूदित्यर्थः५० इतिमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलास
प्रकाशिकायांसप्तत्रिंशोऽध्यायः ३७॥ ॥ॐ॥ अथशिवप्रसादेनप्राप्तकविख्यातिश्यःजिव्हाराजइतिनाम्नालोकेप्रसिद्धोबोधवान् प्राक्
संकल्पानुरूपंपरंशिवंतुष्टावेत्याह महादेवेति प्राप्तंसारस्वतं वाङ्मयमेवामृतं येनसः वाचएवपुष्पाणीतिरूपकदृश्यतैः १ स्तुतिप्रः

श्रीअगस्त्यउवाच महादेवप्रसादेनप्राप्तसारस्वतामृतः जिह्वाराजःस्ववाक्पुष्पैरानर्चेपरमेश्वरम् १ जि
व्हाराजउवाच तार्क्ष्योपगातटस्थायविद्रुमाद्रिनिवासिने ॥ वीक्षणध्वस्तरोगायवीरदेशायतेनमः
२ अचिकित्सामयव्यूहध्वांतविध्वंसभानवे अनाथजननाथायनमस्तेकृत्तिवाससे ३ अज्ञानरोग
वैद्यायविज्ञानामृतदायिने विश्वाधिकायविश्वादौरस्तुवेद्यायतेनमः ४ जगन्मगलमूलायजन्ममृ
त्युभयच्छिदे जटामंडलसंरुद्धजान्हवीकायतेनमः ५ दुर्मतेःसन्मतिंदत्वाविनीयचरुजंमम स्वभक्त
विदधेयोमानमस्तस्मैदयाब्धये ६ समुन्नतिंनाणुरवैतिमेरो :खद्योतपोतश्चनसूर्यतेजः गांभीर्यमब्धेर्न
तुषारलेशःतथाविभूतिंतववेत्तिनाहम् ७ मंदस्मितपुष्टपुरत्रयायमनोभवाऽऽसंभवघस्मराय महा
भयत्रस्तकृताभयायमहानुभावायनमःशिवाय ८ यन्मेप्रा गजन्मकोटौकश्चिदपिनमयापादपद्मंस्मृतंते।

कारमेवाह तार्क्ष्येति वीक्षणेन कटाक्षमात्रेण ध्वस्तानाशिताःरोगायेन २ ३ ४ जगदिति जटामाण्डले संरुद्धाजान्हवीगंगायेननद्युत
श्चेतिकप् तस्मै ५ ६ समुन्नतमिति यथेतिशेषः अणुःपरमाणुःमेरोःसमुन्नतिंयथानावैति नजानातीत्यादिः ७ मंदेति मन्द
स्मितेन ईषद्धासेनपुष्टं दग्धं पुरत्रयं येनमनोभवस्यकामस्ययः आसमंतात्संभवःप्रादुर्भावःतस्यघस्मराय नाशकायेत्यर्थः भक्ष

कोघस्मरोद्भरइत्यमरः महाभयंमरणंतस्मात् येत्रस्ताःभीताः तेभ्यः कृतंअभयंयेन इदंच मार्कण्डेयोपाख्यानेस्पष्टम् ८ यदिति जुष्टं सेवितंयत्रजिनमतेजातः उत्पन्नः अहितः आधिःशूलरोगोयस्यकिञ्च जिनतायाः जिनस्यभावो जिनता नास्तिकता तस्याः अनुन्नति रनुदयोयस्य तादृशोहंयद्यतः कारणात् त्वान्नौमि ततः भूयः ममजन्मनास्तु अपुनर्भवोभवत्वित्यर्थः मुक्तेरपिभक्तिर्गरीयसीति मतम

तेनाभूत्जन्मजुष्टंममजिनमतभाग्यत्रजाताहिताधिः भक्तायास्तेप्रसादात्स्वसुरपिजिनतानुन्नतिर्नौमि यत्वां भूयःशंभोनजन्मास्त्वथयदिवदतस्त्वत्पदेभक्तिरस्तु ९ इतिस्तुत्वामहादेवंभक्त्याप्रणतमग्रतः ब भाषेभारतीदिव्याविनातन्वातमोरिपुम् १० तमोरिपोकृतार्थोसिभक्तिमानसियन्मयि पूतोसिजिनसंघा तात्स्तुहिमांसर्वतःकृती ११ जन्मनःफलमेतद्धियन्ममस्तोत्रमुक्तिभिः दिवानिशंचजिव्हाग्रेवर्त्ततांत वभारती १२ वागीशइतितेनामदत्तंतत्प्रथतांभुवि यदास्मरसिमांतंत्वांरक्षितास्मिनसंशयः १३ इत्यु क्त्वाविरतावाणीमुमुदेथतमोरिपुः अथस्वसारमामंत्र्यवागीशस्तिलकावतीम् १४ प्रातिष्ठतसयांव त्तन्नामलोकेषुववृधे स्वभ्रातरंप्रतिष्ठासुमुवाचतिलकावती १५ निवृत्तःशूलरोगस्तेशंभोरत्रैवस न्निधौ सिद्धिक्षेत्रेत्वमत्रैवस्थित्वाकैंकर्यमीशितुः १६ स्वस्राकुर्वितिसप्रोक्तः तृणखंडनिकाधरः तत्रदे वात्वयस्थानेचक्रेदूरेतृणानिसः १७

वलंब्याह अथेति यदिजन्मभवति तर्हिवदतः त्वांस्तुवतः ममत्वत् पदे तवचरणे भक्तिरस्तुइत्यन्वयः ९ इतीति विनातन्वा शरीरेणविना भारती अशरीरा शैवी वाणी तमोरिपुं बोधवंतं १० ११ १२ १३ १४ १५ १६ १७

सायंप्रातश्चतुष्टयदाशंभुंतदासुराः वर्षंतिपुष्पवर्षाणिलोकस्तद्वीक्ष्यविस्मितः १८ आब्रह्मभवनंतस्यव
र्धेकीर्त्तिरुज्वला ब्राह्मणायतयश्चैनंयथाशंभुमपूजयन् १९ व्याकरोदौपनिषदींविद्यामेषमहामतिः प्रसादं
शंकरंतस्मिन्नथाकार्य्याहितोगणाः २० ईर्ष्यावंतोनृपद्वारंप्रापुस्तच्छासनोद्यताः दृष्ट्वःपल्लवभूपेनपूजि
ताश्चोपनिष्ठिताः २१ ईर्ष्योनिर्दग्धहृदयादुर्बुद्धिंतमबोधयन् प्रविष्टःछद्मनास्माकंधर्मसेनोमतंमहत् २२ गृ
हीतमतसर्वस्वोव्यपदिश्यमृषामयं व्याधेर्निरोधेचाशक्तिमारोप्यासासुवैदिकैः २३ दूषितास्मन्मतैःसार्द्धंशैव
पाषंडतांगतः सर्वथाशिक्षणीयोयंनचेत्स्याद्दूषितंमतम् २४ गृहीत्वाऽयांतुयोधास्तेमालयाच्छैवकिंकरं
इत्युक्तःप्रेषयामासभटानार्हतभूपतिः २५ वीरदेशालयस्थंतबबंधुर्जगृहुश्चते निबध्यनीयमानंतमा
लोक्यतिलकावती २६ शोकार्त्ताशरणंप्रापशरणंशंकरंसती नानाविधायुधैस्तत्रक्षिधिमिंधीतिवादिभिः
२७ नीतोभटैर्नृपद्वारेभस्मरुद्राक्षभूषितः तमानीतंभटैःश्रुत्वाजगादार्हतदेशिकान् २८ राजास्यदाडः
कोवेतितेचूर्णैमर्णाजगुः जिनदासःसभूपालःकुरुतैनमपिस्वकान् २९ जगादकर्णेतेचूर्णैपूर्णेचास्याप्य
सद्मनि वागीशंतंप्रणालीभिःसिषिंचुश्चूर्णमंडलम् ३० बद्धारेकाथचूर्णैवागीशस्तद्गृहेस्थितः घनकर्पूर

स्यर्थः व्याकरोत् व्याख्यातवान् २० ईर्षेति ईर्ष्यावंतःअक्षमावंतः तस्यपल्लवस्यशासनेउद्यताः उद्युक्ताः उपसमीपेनिष्ठिताः स्थिताः
२१ २२ २३ २४ २५ २६ २७ नीतइति आर्हतदेशिकान्जैनगुरून् २८ राजेति चूर्णेसुधाद्रव्यचूर्णे २९ जगा

देति प्रणालीभिः जलनिर्गममार्गैः चूर्णमंडलं सुधाचूर्णसमुदायं ३० बद्धेति बद्धं अररं कपाटं यस्य क्वथन् पचमानः चूर्णो यस्मिन् तद्गृ
हे स्थितः आत्मानं भावयामासेत्यग्रिमेणान्वयः तमेव विशिनष्टि घनेत्यादि घनः सान्द्रः कर्पूरपाटीरयोः घनसारचूर्णचंदनयोः यः पं
कः तस्य मध्ये ३१ ३२ आत्मानमिति क्वथितः पक्वः ३३ ३४ ३५ ३६ किमिति संस्थितिं मृतिहिंसासंस्थानिमीलनं इत्यमरः ३७ अ

मौलौ च चंद्रबिंबांतः स्रुतामृतरसाप्लुतं अजरामरमक्षोभ्यमाकाशमिव निश्चलम् ३२ आत्मानं भावयामास
शिवोहमिति वाक्पतिः क्वथितश्चूर्णराशिस्तं ववाधेन शिलामिव ३३ अतीते सप्तरात्रे तद्दृष्ट्वा वागीशमक्षतं
आनंदामृतकल्लोलमालाशीतलविग्रहम् ३४ अम्लानवदनांभोजं विजितक्षुत्तृषं नृपः बभूव सपरीवा
रस्त्रस्तः चित्रार्पितो यथा ३५ बभाषे चार्हतगुरून् शुष्यद्वक्त्रान् सपल्लवः मारणेषु महानेष योगो यश्चूर्णसं
हतिः ३६ किं विद्ययौषधैर्वायं न तत्र प्राप संस्थितिं अथाहुरार्हता भूयः संभूय वचनं नृपम् ३७ अस्मद्राद्धांत
शिक्षायां अत्रत्या मनवोद्धृताः अनेन तेषां महिमा यत्संस्थाप्यो न चूर्णतः ३८ संस्थास्यते यमन्नं च देयमस्मै
गरान्वितं इत्युक्तो भोजयद्भूयः पायसं गरलान्वितम् ३९ क्षुधितोसि चिरं भुंक्ष्व विद्यया त्वं महानिति आपश्च
पृथिवी चान्नमत्तारौ वन्हिमारुतौ ४० अवकाशो यमाकाशो भुज्यते किं पिनाकिना स एवायमिति ध्यायन् अन्नं

स्मदिति अस्माकं राद्धांतस्य सिद्धान्तस्य शिक्षायां मनवः मन्त्राः चूर्णतः चूर्णे सप्तम्यास्तसिः ३८ समिति अयं बोधवान् संस्थास्यते मरि
स्यनि गरेण विषेण अन्वितं युक्तं ३९ क्षुधित इति आपो जलं पृथ्वी भूश्च इदं द्वयमेव अन्नं अन्नपदवाच्यं कार्यकारणयोरभेदात् अ
त्तारौ भक्षितारौ वन्हिमारुतौ अग्निसमीरणौ अन्नपाचकत्वात्तयोरिति भावः ४० अवकाश इति आकाशः प्रसिद्धः एतेन अष्टमूर्त्तेः

शिवस्यपञ्चभूतात्मकत्वात् ममतन्नबाधकमितिभावः ४१ ४२ अथेति तेन ॥ पल्लवेनतस्यबोधवतःजिघांसया हन्तुमिच्छया प्रहितः प्रेषितः भीषाभयेन ४३ ४४ ४५ नवेतितीर्थीकृतः पवित्रीकृतः ४६ समुद्रकृतांस्तुतिमाह भिन्दंतीति शिवभक्ताइतिशे

यथाहालाहलंभुक्तंजीर्णेमासीद्द्विजोत्तमाः अथतस्महितोहस्तीचागतस्तज्जिघांसया ४२ भीषावलोकि
तस्तेनभग्नदन्तःपतन्मृतः तथागतगिराभूयोनिबद्धाश्मनितंनृपः ४३ नौभिःसंप्रापयामासवार्यगाधेमहांबु
धेः तमंबुधिर्यथारामंसंत्रस्तःशरणंगतः ४४ शिवाज्ञयाशिलासापिप्लवतेस्मतटप्रति नवरत्नैःसमभ्यर्च्च
सागरःसरितांपतिः ४५ पूतोस्मिचरणस्पर्शाद्दृतीर्थीकृतस्त्वया ४६ भिंदंतिशैलानुदधौन्पिबंतिव्यत्यास
यंतिक्षितिमंतरिक्षं तृणीकृतब्रह्मपुरंदराणांकिंदुष्करंशंकरकिंकराणाम् ४७ इतिस्तुत्वाज्ञयातस्यप्रायाद्
ब्धिर्यथागतं वीरदेश्वरमासाद्यस्वस्त्रासमुपलालितः ४८ अभितुष्टावमुदितःसुधाभिरिवसूक्तिभिः तन्मा
हात्म्यमवेक्ष्याथस्वयमागत्यपल्लवः ४९ भूपतिःप्रणनामास्यपदयोःरक्षमामिति अथतस्माद्व्यार्त्तस्यज्वरो
भूज्जिनभूपतेः ५० तत्पादस्पर्शमात्रेणप्रशशामपुनर्ज्वरः तवदास्येनधन्योस्मिकर्त्तव्यंकिंमयाधुना ५१ इति
पृष्टोब्रवीद्बोधवान्सर्वान्शिक्षयाधुना इत्युक्तःसजिनान्सर्वान्स्वदेशान्निरकासयत् ५२ देशस्थितस्यशाक्य
स्यशूलारोपोभविष्यति इतितद्घोषितंश्रुत्वासौगतास्तेपलायिताः ५३ ॥ ७ ॥ ७ ॥

ष ४७ इतीति यथागतं आगतमनतिक्रम्य प्रायात् जगामेत्यर्थः ४८ ४९ भूपतिरिति रक्षतांरक्षांकुरु भवानितिशेषः जिनभूपतेः पल्लवस्य ५० ५१ इतीति निरकासयत् निष्कासयामास ५२ देशेति शाक्यस्य जैनस्य सौगताः जैनाः ५३

पल्लवइति आर्हतानांजैनानां दुर्मतं दुष्टमतंत्यक्त्वा वैदिकंमतमास्थायशिवार्चनाद्धेतोः श्रियं ऐहिकामुष्मिकसंपत्तिं आपेत्यन्वयः ५४ इति श्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांअष्टत्रिंशोऽध्यायः ३८॥ ॥❀॥अथशिवाज्ञया वागीशपदंप्राप्तस्य जिव्हाराजस्यमध्यार्जुनादिशिवक्षेत्रेषुयात्रांवर्णयति अथेति स्थलेषुशिवक्षेत्रेषुबासेच्छया १ मध्येति मध्यार्जु

पल्लवोपिमहीपालःसंत्यक्त्वार्हतदुर्मतं वैदिकंमतमास्थायश्रियमापशिवार्चनात् ५४ इतिश्रीस्कंदोपपुराणेभक्तविलासेअष्टत्रिंशोऽध्यायः ३८॥ ॥श्रीअगस्त्यउवाच अथाज्ञयामहेशस्यस्थलवासेच्छयास्वयं शिवभक्ताग्रणीःश्रीमान्बागीशोनिर्जगामह १ मध्यार्जुनेचमायूरेकुंभकोणेधृतिस्थले छायावनेश्वेतवनेवटारण्येघनाशने २ श्रीमद्वटवनेदिव्येश्रीवाक्ष्येपिमहास्थले स्तुवन्महेश्वरंवाग्भिःतत्रत्यैश्चसमर्चितः ३ चचारसह्यजातीरेयथाघनपथेरविः अथैकस्मिन्दिनेभानौलंबमाने सवाक्पतिः ४ प्रार्थितोद्विजवर्येणह्यग्रहारंययौमुदा तत्रतद्गृहमाविश्यस्थितेतस्मिन्द्विजःसुतम् ५ अमत्रमानयेत्याहसोपिरंभावनंययौ गृहीतेसतितत्पत्रेसंदष्टोभूत्सभोगिना ६ ज्ञाततद्वैभवोविप्रः सुतंप्रच्छाद्यतंमृतं भोजयामासवागीशमिंगितैरधिगम्यतत् ७ ज्ञानदृष्ट्यास्वयंतत्रगत्वास्पृष्ट्वाचतंहृदि नीलकंठंक्षणंदध्यौउत्तस्थौचद्विजात्मजः ८ सर्वाश्चर्यमयेतस्मिन्एतच्चित्रंविदुर्जनाः श्रीकाषानगरंप्राप्य

नादीनि क्षेत्राणि वटारण्ये अघनाशनेइतिच्छेदः २ ३ चचारेति सह्यजातीरे कावेरीतटे ४ ५ अमत्रेति अमत्रंभोजनपात्रं रंभावनं कदलीवनं भोगिना सर्पेण ६ ज्ञानेति इङ्गितैः चेष्टितैः ७ ८ सर्वेति काषानगरं तन्नामकम् ९ ॥ ❀ ॥ ❀ ॥

अभ्युद्गतइति कविनातत्रस्थेन दीनारशकलं स्वर्णमुद्राखंडं १० ११ १२ १३ विभिदेइति स्वयंविदीर्णमभूत् १४ १५ मध्येइति

अभ्युद्गतोभूत्कविनापार्वतीस्तन्यपायिना ययोर्दुर्भिक्षरक्षायैदीनारशकलंहरः १० प्रायच्छदन्वहंता
भ्यां वागीशःपूजितोययौ गत्वाचिदंबरस्थानंस्तुत्वातत्रनटेश्वरम् ११ अनेकैःस्नापितोदेवैःसप्रापकमला
लयं तत्रवल्मीकनाथंचत्यागेशंचमहाप्रभुम् १२ वाग्भिरग्र्याभिरस्तौषीत्सस्थलस्थैरपूज्यत वेदारण्य
स्थलेतस्यपरीक्षार्थमुमापतेः १३ विभिदेपिहितद्वारमालयेतद्गिरास्वयं श्रीपुराणसरिन्नाम्निनगरेचेश्वर
द्विषः १४ विजित्यसौगतान्राज्ञावागीशोनिरकासयत् कांतनीलीपुरेशानंस्तोतुंगच्छन्सवाक्पतिः॥
१५ मध्येमार्गंपरिश्रांतःक्षुधार्त्तःशिवमस्मरत् तदानीमीश्वरस्तत्रवहन्पाथेयमुत्तमम् १६ आगत्यभोज
यित्वातंविप्रवेषस्तिरोदधे स्तुतनीलीपुरेशानंचास्तौषीदरुणाचले १७ सेवितंविधिविष्णुभ्यांवागीशोवृ
षकेतनं अथकांचीपुरेदेवंकामाक्षीरमणंविभुम् १८ स्तुत्वास्थलानिवागीशश्चान्यान्यपिचकोटिशः वृ
द्धाचलेवेदगिरौकालहस्तीपुरेतथा १९ महेश्वरमभिष्टूयश्रीशैलंचसवाक्पतिः मल्लिकार्जुननाथंच
सिद्धसंघनिषेवितम् २० अभिष्टूयपुरारातिततोवाराणसींययौ नित्यंगंगांभसिस्नातःविशालाक्षीपतिंवि
भुम् २१ अभिष्टुवन्वर्षमात्रमतिष्ठत्तत्रवाक्पतिः केदारेचमहाक्षेत्रेस्तुत्वादेवंत्रियंबकम् २२ अथकै
लासशैलाग्रेसोमास्कंदमवस्थितं द्रष्टुकामोययौकाष्ठामुत्तरामेकएवसः २३ पाषाणैरिवनीहारैःपिंडीभूतैरुपद्रुतः

पथिसाधुपाथेयं अन्नं १६ १७ १८ १९ २० २१ २२ अथेति उत्तरांकाष्ठां उत्तरदिशं २३ पाषाणैरिति व्यषीदत् विषण्णोभू

व्यषीदत्पथिवागीशोविशीर्णपदबंधनः २४

सोयंपाददूयेशीर्णेपाणिभ्यामपिवक्षसा गच्छन्नध्वनिनोत्कंठांविजह्नौहरदर्शने २५ यदागंतुमशक्तोभूत्तदापिपथिवाक्पतिः उच्चैस्स्वरेणचुक्रोशपाहिशंकरमामिति २६ तदातापसवेषेणभगवान्परमेश्वरः आगतोवाक्पतिंप्राहकस्त्वयासिक्तवेतितम् २७ कैलासेदृष्टमीशानंप्रस्थितोस्मीतितद्वचः श्रुत्वाप्राहहसन्दृढःतवासाध्योमनोरथः २८ भवेत्कैलासशैलस्तुदुर्दर्शोविबुधैरपि वितरणिकरैपादौनिवृत्त्यदिगच्छसि २९ नयास्यामीतितेनोक्तोमहादेवोघृणानिधिः योगिनामपिदुर्दर्शःतस्मैरूपमदर्शयत् ३० भीतःप्राणाम्यपाहीतियदोवाचसवाक्पतिः तदाजगादतंदेवःप्रविशेतिसरोजले ३१ मग्नस्तत्रोन्मम ज्जाश्रुश्रीमसंचनदीपतेः सन्निधौसह्यजातोयेविस्मयाविष्टमानसः ३२ शिवालयंविशन्नेवददर्शरजता चलं क्षीरसागरकल्लोलमालाशिखरभासुरम् ३३ सिद्धचारणगंधर्वमुनींद्रगणसेवितं कल्पद्रुमशतोद्या नंनदसिकशतोज्वलम् ३४ परितश्चाष्टदिङ्नागैःध्रियमाणंप्रयत्नतः चंद्रकोटिप्रतीकाशंजान्हवीनिर्मलोज्वलम् ३५ तत्रसर्वोन्नतेशृंगेनानारत्नप्रपंचिते दिव्यसिंहासनेदेवंसोमास्कंदमवस्थितम् ३६ चतुर्भिस्तुतमाम्नायैःचंद्रार्द्धकृतशेखरं चतुर्भुजमुदारांगंसच्चिदानंदविग्रहम् ३७ कपालमालिकाबद्धकपर्दोज्वलमस्तकम् व्याघ्रचर्मपरीधानंव्यालराजविभूषणम् ३८ विलोक्यविस्मयाविष्टःप्रणनामपुनःपुनः उस

तापसवेषेण जगाम कैलासं ९५

भिरिति आम्नायैः वेदैः ३७ कपालेति कपालमालिकया बद्धोयः कपर्दैःजटाजूटः तेनउज्वलःमस्तकोयस्यतं व्यालराजाः सर्पश्रेष्ठाःवि

भूषणानियस्यतं ३८ ३९ ४० ४१ ४२ ४३ प्रविश्येति अगस्त्यदिग्देशंदक्षिणदेशं मधुरादिषुस्थलेषु ४४ यथेति सम्यगित्यर्थः ४५
४६ द्विजेति वेदान्तार्थान् उपनिषदर्थान् जगतां जीवभूते परमेश्वरे ४७ अणिमेति अणिमामहिमेत्यादि विभूतीःयोगसिद्धीः किंपु

अवदत्प्रीतिमतुलामानंदाश्रुकलान्वितः भगवन्पाहिपाहीतिबद्धांजलिरभूत्सुरः ४० अथतस्मैमहादेवः
स्वांमूर्त्तिसुमनोहरां प्रसन्नवदनांभोजांभूषिताभूषणोत्तमैः ४१ प्रवहत्करुणासारशीतलापांगविभ्रमां चि
दानंदमयींदिव्यांदर्शयित्वाजगद्गुरुः ४२ सद्यस्तिरोदधेश्रीमानवाङ्मनसगोचरः तिरोहितेमहादेवेवागी
शश्चतदाज्ञया ४३ प्रविश्यागस्त्यदिग्देशंमधुरादिषुशंकरं स्तुत्वास्थलेष्वगाद्व्यः शरायनगरंपुनः ४४ य
थाचकारकैंकर्यमिंदुमौलेर्महात्मनः तिलकावत्यपितदाशिवकैंकर्यवैभवात् ४५ त्यक्त्वा भूतमयींमूर्त्ति
मत्वापगतिमुत्तमां अथस्वसुर्वियोगेनखिन्नंवागीशमीश्वरः ४६ द्विजरूपीसमागत्यवेदांतार्थानबोध
यत् विदितेशजगज्जीवेशिवभक्त्याचवाक्पतिः ४७ अणिमादीस्तृणीचक्रेविभूतीःकिंपुनश्रियं देवास्त
स्यपरीक्षार्थमुद्युक्तविस्मयंजगुः ४८ पदेपदेचमाणिक्यंवैडूर्यंमौक्तिकंधनं चत्वारोल्लंघ्यवागीशोदृष्ट्वा
चाप्सरसःपुरः ४९ तृणपालीतिमन्वानोनाभ्युदैक्षतशुद्धधीः ॥ शिवाकांक्षंजगत्सर्वंपश्यतस्तस्यशंकरः ५०
प्रीतःप्रादात्स्वसायुज्यंदुर्लभंयोगिनामपि ५१ इतिश्रीस्कांदेपपुराणेभक्तविलासेएकोनचत्वारिंशोऽध्यायः ३९॥ ॥

नः श्रियंलक्ष्मीमिति काव्यार्थापतिः ४८ ४९ ५० इतिश्रीमानवल्लपनामकृतसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलास
प्रकाशिकायांएकोनचत्वारिंशोऽध्यायः ३९॥ ॥❀॥एवंशिवभक्तसङ्गतिप्रभावंवर्णयित्वा सम्प्रति वेदशास्त्रपुराणानां अद्वैतब्रह्म

22 44 99 97 पञ्जी ज्ञाची (७०.

स्वरूप परमशिवपरतयास्थापनंकुर्वतामपि ज्ञानोत्पत्तिद्वारमुक्तिरवश्यंभवतीत्याह अशक्तइति स्वयं असमर्थोपिसिद्धान्तं स्थापयि तुमितिशेषः १ कालकर्मभ्यांयद्भयंमरणजननादिकं तेनउन्मुक्तःत्यक्तःकैवल्यंमोक्षं २ ३ पुराद्दक्षप्रस्तौति अस्तीति विषयांतरंदेशां तरं दक्षेणसद्दक्षस्पर्द्धीजिगीषांजुषंति सेवन्तेदक्षितादृशाः ४ रजतेति रजतादीनां आकरःखनिःतीरंयस्यास्तया ५ कांन्तेति सिंधुःसमुद्रः

वेदागमपुराणानांसिद्धांतंस्थापयत्यसौ १ विमुक्तसकलाघौघःप्रसादात्सोपिशांकरात् कालकर्मभयान्मु क्तःकैवल्यंध्रुवमश्नुते २ इतिहासमिमंपाङ्क्तरस्मिन्नर्थेमहत्तमाः यस्यश्रवणमात्रेणसद्बुद्धिरुपजायते ३ अस्तित्रैलोक्यविख्यातंविषयांतरमुत्तमं दक्षस्पर्द्धीजुषोयत्रराजानःपाञ्चवंशजाः ४ रजतस्वर्णनीला श्मवैडूर्याकारतीरया ताम्रपर्णीमहानद्याश्रीमद्दक्षिणगंगया ५ कांताधररसस्वादुस्वच्छशीतलपूरया सिंधुर्भवतिसंभिन्नोयत्रमुक्ताकरोत्तमः ६ यत्रक्रमुकहिंतालकुंदमाकंदचंदनैः निरंतरमहीभानोरा तपार्त्तिनविंदति ७ मितंपचानांगेहेपिकालागरुतरुद्भवाः सुरभीकुर्वतेकाष्ठाःपाकार्थंचेधनीकृताः८ यत्रनिश्रेणिकारूढैःआतिथेयैर्महात्मभिः पत्राणिराजरभाणांआद्रियंतेजनांतरे ९ तत्रपुष्पाकरन्नाम पुरमस्तिमहत्तरं कर्मठद्विजवेश्मस्थशुकाध्यापितबालकम् १० राजापुष्पध्वजोनामतत्राभून्निजित शत्रुकः देविकानामतस्याभून्महिषीगुणशालिनी ११ अमात्यःकुलयक्षाख्योशिवभक्ताग्रणीरभूत् क्रतुस्पर्द्धा

क्षराजाकक्षाप्रतिद्वन्द्वीजिगीषांजुषंतिसेवन्तेदक्षितादृशाः ४ रजतेति रजतादीनां आकरःखनिःतीरंयस्यास्तया ५ कांन्तेति सिंधुःसमुद्रः

संभिन्नःसंगतःसम्भेदाःसिन्धुसङ्गमाःइत्यमरः ६ ७ मितमिति मितंपचानांदरिद्राणां ८ यत्रेति निश्रेणिरेवनिश्रेणिका अधिरो हिणीतांअधिरूढैःनिश्रेणिस्त्वधिरोहिणीत्यमरः आतिथेयैः अतिथिषुसाधुभिः ९ तत्रेति कर्मठानां कर्मशूराणांद्विजानां वेश्म

स्थैःशुकैः अध्यापिताःबालकाःयस्मिन्तत् १० ११ अमात्येति अमासहतिष्ठतीति अमात्यः अमेत्यव्ययं अमासहसमीपेचेत्यमरः बु
द्धिसचिवःऋतुभिःअश्वमेधादिभिःस्पर्द्धोजुषावज्रपाणिना इन्द्रेण १२ १३ अथेति वशंवदान् स्वाधीनान् मेघान् अन्वशासत् आ

अभूद्युद्धायसन्नद्धश्चतुरंगबलान्वितः निवारितश्चागस्त्येनमुनेःशासनमन्वगात् १३ अथेन्द्रःकुपितोमे
घान्अन्वशासद्वशंवदान् पाड्यमावर्षयंस्त्वेतेतथाचक्रुर्बलाहकाः१४ अनावृष्टेप्रवृत्तायांपांड्यदेशस्थि
ताजनाः दृष्टिमत्सह्यजातीरमवापुर्वैदवित्तमाः १५ ज्वरेणेन्द्रप्रयुक्तेनसैन्यंराज्ञोविनाशितं तदारंध्रविदःशा
क्यावहवःसेनयान्विताः १६ पुष्पकेतनमागम्यवितेनुःकदनंस्वयं देशेथसौगताक्रांतेभस्मरुद्राक्षधारिणः
१७ पंचाक्षरीजपपरानब्राह्मणान्वेदवादिनः प्रणम्यदेविकादत्तैःस्वकीयैर्द्रविणैरपि १८ तत्रतत्रस्थिता
नदीनान्कुलपक्षोह्यपालयत् निरुध्यसचिवंशाक्याराज्ञीमपिचसौगताः १९ बाधंतेस्मत्वसिद्धांतप्रवेशेतो
जगद्गुरुः कुलपक्षश्चशरणंहालास्येश्वरमापसः २० स्वप्नेभगवतादिष्टमाकार्योपायमादरात् अन्येद्यु
रुषसिप्राप्तेयूयंदुष्टमताइति २१ अथभीताश्चतंप्रोचुर्वादंकुर्मोद्विजोत्तमैः जयेस्माकंमतंसत्स्यात्प्रवेशो
स्तुतथाध्वनि २२ कुलपक्षोथदूतैस्वैर्बोधवंतंसमाहूयत् सर्वोपचारैरभ्यर्च्यकदंबज्योस्तुकः २३
सर्वंविज्ञापयामासतस्मैप्रत्यक्षशंभवे सर्वमस्तुश्वदद्युक्काहालास्येश्वरमादरात् २४ ॥ ७ ॥

ज्ञापयामास १४ १५ ज्वरेणेति रंध्रंछिद्रंआक्रमणसमयमित्यर्थः विन्दन्ति लभन्ते इति ता दृशाःशाक्याःसौगताः १६ पुष्पेतिपुष्पकेत
नंनगरंकदनंकलहं १७ पञ्चेति देविकाराज्ञी तयादत्तैःस्वकीयैरपिद्रविणैःधनैः १८ १९ २० २१ २२ कुलेति कदंबराणांसौगता

नांजयेउत्सुकः उत्कंठितः २३ २४ २५ वैदिकाइति कृशाः दशपञ्चदशसंख्याकाः वैदिकाः अभीताः भयरहिताः २६ २७ पराजि
तस्येति अत्रवादेपणः द्यूतोत्सृष्टधनं २८ २९ ३० ३१ ३२ ३३ ३४ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्या

अथापरेद्युःप्रत्यूषेवैदिकाःसौगताअपि विवादायोद्यमंचक्रुर्हालास्येश्वरसंनिधौ २५ वैदिकास्तुदशा
भीताःकृशाःपंचदशाभवन् एकश्चबोधवानासीत्तेषांमध्येयथारविः २६ अथप्रसंगस्यारंभेबोधवाना
हसौगतान् षट्त्रिंशद्दशसाहस्रसंख्यातान्राजसंनिधौ २७ पराजितस्यशूलाग्रेस्थितिरत्रपणोस्त्वितः त
थेतितैरनुज्ञातेवादःप्रववृतेमहान् २८ सर्वशक्तिःपरंज्योतिर्हालास्यपतिरीश्वरः बोधवद्वदनेस्थित्वा
जिगायसकलार्हतान् २९ शूलेष्वारोपिताःसर्वेवेदबाह्याःसहानुगाः ववर्षमुदितःशक्रःसुभिक्षास्सर्वे
तोदिशः ३० अथाऽऽगताद्विजाःसर्वेवेदोक्तंकर्मचक्रिरे राजाचकुलपक्षश्चबोधवंतंमहेश्वरम् ३१ सिं
हासनंप्रदायास्मैनेमतुस्तस्यपादयोः राज्येभिषिच्यराजानंययौस्वंबोधवान्पुरम् ३२ पुष्पध्वजोयथापूर्वं
शशासवलयंभुवः कुलपक्षोमहेशानपादांबुरुहभक्तिमान् ३३ शिवप्रसादात्कालेनकैलासपदभागभूत्
३४ इतिश्रीस्कांदोपपुराणेभक्तविलासेचत्वारिंशोऽध्यायः ४०॥ ॥श्रीअगस्त्यउ॰ यस्तुपंचाक्षराचार्यपादाब्ज
ध्यानतत्परःप्रीतस्तस्मैमहादेवःप्रयच्छतिनिजंपदम् १ प्रथितात्रकथाकाचिच्छ्रूयतांवर्ण्यतेमया यस्याःश्रवणमा

ख्यायांभक्तविलासप्रकाशिकायांचत्वारिंशोऽध्यायः ४०॥ ॥ॐ॥ अथगुरुभक्त्यामहादेवःप्रसन्नोनिजपदंददातीत्याह यइति पञ्चा
क्षरस्ययआचार्यःव्याख्याकृत् तस्यपादाब्जयोः ध्यानेतत्परः आसक्तः १ इतिहासंअवतारयति प्रथितेति उत्तमा पराभक्तिः २ ॥ ७ ॥

मिथिलानगरेकश्चिद्विद्याभूराभिधोद्विजः सर्वविद्यास्वनौपम्यादिद्याभूरितिस्मृतः ३ सपर्यालोच्यसक
लान्वेदान्शास्त्राणिबुद्धिमान् विरक्तःसर्वभोगेभ्योप्रवृत्तोमुक्तिसाधने ४ अधीताश्चमयावेदाःशास्त्राणि
पठितान्यपि कलहंकंठशोषंचगर्वंचापिफलंत्यमी ५ शब्दब्रह्मार्णवेतावत्प्रगाधेचरतोमम पंचाक्षरम-
हामंत्रःसारवानितरद्वृथा ६ इंद्रजालकलेवान्यत्मिथ्याफलदमीरितं आचार्येणोपदिष्टोयंमुक्तिदःस्या
न्महामनुः ७ अन्यूनाधिकगात्रश्चदृष्टलोकपरावरः शिवभक्ताग्रणीःक्षांतःसर्वसंशयभेदनः ८ वेदोक्त
समयाचारसंपन्नोब्रह्मविद्विजः आचार्योयदिलभ्येततस्यकिंबहुसेवया ९ उदितेदिवसाधीशेदीपयत्नो
निरर्थकः यथोक्ताचरणंतस्यशिष्योनविसृजेद्यदि १० त्रयोभवंतितस्यापिदासाब्रह्महरीश्वराः तथाविधो
मेकुत्रस्यादाचार्यइतिबुद्धिमान् ११ प्रदक्षिणीकृत्यभुवंप्रतस्थेद्विजसत्तमः सब्राह्मणेषुबहुशःसंचरन्ना
त्मसंमतम् १२ नोपलेभेगुरुंकंचित्सदृशंसर्वतोगुणैः तत्रक्रमेणाभ्यगमन्नगरंकमलालयम् १३ रुद्रपाद
महातीर्थस्नात्वासागेश्वरंविभुं सेवमानस्त्रिसंध्यंचमासत्रयमवर्त्तत १४ प्रार्थयामास देवेशंसर्वलक्षणलः
क्षितःभवानिवगुरुःकश्चिद्दयादित्यन्वहंहरम् १५ अद्यार्द्धरात्रेभक्तोमेकश्चिद्यागमिष्यति संप्रार्थितस्तेन
भवितागुरुःसुंदरनामभाक् १६ वेदशूरमितिप्राहस्वप्नेत्यागेश्वरोविभुः उत्थितःसतुदेवायनत्यागादीशसं

रुषस्य बहूनांसेवयाकिंप्रयोजनं आचार्यवान्पुरुषोवेदेतिश्रुतेरितिभावः ९ तत्रदृष्टान्तमाहउदितेदृति १० ११ १२ नेति नोपलेभेनलब्धः

शतरुद्रीयमंत्रेणतुष्टावपरमेश्वरं अथाद्रिस्थेपरांबोधौनिमग्नेनागरेजने १८ संसुप्तेत्यागराजस्यधन्यमे कांतसेवया प्रेयसीशयनोल्लासवेषधारिणमागतम् १९ प्रतिबिंबमहेशस्यदिव्यलक्षणलक्षितं सुंदरं वीक्ष्यसहसाविद्याशूरोतिविस्मितः २० गृहीत्वापादयोस्तस्यप्रणामशतमातनोत् कस्त्वंकितेकुतइतिष्ट ष्टस्तेनात्मनोखिलम् २१ तस्मैनिवेद्यवृत्तांतयाचेमनुमुत्तमं प्रयांतंप्रेयसीवेश्माप्यनुज्ञाकिंचिदुत्तर म् २२ अन्वीयासुंदरधीमान्छायेवसहदेहिनं सुंदरेतगतेवेश्मबहिःकक्षांतरेस्थितः २३ दृष्टःकस्त्वंकि मत्रेतिविद्याशूरस्तदाश्रयः ऊचेसुंदरदासस्त्वंमुमुक्षुंशरणागतम् २४ तेचतस्यैवदंतिस्मतद्वृत्तांतमशेष तः सुंदरंप्राहवेश्यासाहसंतोशयनांतरे २५ कथंगुरुस्त्वंधूर्तोसिमुमुक्षोरग्रजन्मनः त्वयोपदिष्टंकिंवास्यानु क्तबंधोव्रजेन्नुसः २६ ससुंदरःप्रियामाहपरिहासोत्रनोचितः निदेशादुपदेक्ष्यामिसख्युर्मेमनुमुत्तमम् २७ नपुनर्जन्मतस्यास्तिनमेचाऽऽवांहसंतिये तेषामेवमहाघोरेसंसारेभ्रमणंभवेत् २८ इत्युक्तांस माश्लिष्यसुषापनिशिसुंदरः अथस्वप्नेसमागत्यतमाहत्यागनायकः २९ हेसुंदरसखेवाचंमदीयांश्रो तुमर्हसि भक्तश्चैवविरक्तश्चपात्रभूतोद्विजोत्तमः ३० पंचाक्षरोपदेशेनकृतार्थःक्रियतामिति॥ अथप्रातः समुत्थायगच्छंतंसुंदरंद्विजः ३१ नमस्कृत्वानुवव्राजभावयन्भवमेवतं प्रीतश्चसुंदरस्तस्मैस्नातायकमला

बहुधावर्णितं मनुमंत्रं २७ २८ २९ ३० अथेति स्वप्ने शिवनिदेशानंतरं ३१ ३२ ३३ ॥

पंञ्चाक्षरार्थमाह मलेति कायिकवाचिकमानसिकभेदेन त्रिविधं मलं तस्य नाशः अर्थो वाच्यो यस्य शिवशब्दार्थः पशुपाशनिवृत्तिप्र
योजनकः किंच पशुशब्दस्य वर्णमर्यादया कादिनवेत्यादिरीत्या पकारस्य एकत्वसंख्यार्थः पादिपंचेति वररुचिसूत्रात् शुकार
स्य पंचत्वसंख्यार्थः तथाच तयोर्मेलने अंकानां वामतो गतिरिति न्यायेन एकपंचाशद्भवति तस्य च लक्षणया द्विपंचाशदर्थः तान्
पाशान्मोचयतीत्यर्थः तदुक्तं शिवरहस्ये पंचक्लेशैर्द्विपंचाशत्पाशैर्बध्नाति यः पशून् स एव मोचकस्तेषां भक्त्या सम्यगुपा=
सितः इति पौराणिकरीत्या निष्कर्षः अथवा अणुर्भेदः कर्म्म चेति त्रयः पाशास्तत्राज्ञानमणुः तच्च चैतन्यस्वरूपे आत्मन्यात्मत्वाभा
वो देहादावनात्मन्यात्मत्वज्ञानं चेति द्विविधं द्विविधमप्येतत्संभूयाणवं मलमित्युच्यते अणुपदवाच्यत्वं चास्यापरिच्छिन्नस्याप्या

उपादिक्षन्महामन्त्रं पञ्चार्णं पापनाशनं तदर्थं बोधयामास भक्त्या प्रातः ससुंदरः ३३
मलत्रितयनाशार्थो नमःशब्दोस्य वाचकः तस्यार्थः शिवशब्दश्च पशुपाशनिवृत्तये ३४

त्मनः परिच्छेदकत्वात् तदुक्तं सौरसंहितायां आत्मनोणुत्वहेतुत्वादणुमालिन्यतो मलमिति एकस्यैवात्मनो नानात्वं तु भेदः तत्र मूलका
रणं मायाख्यं तत्वेषु षष्ठमेकं तज्जन्यं सप्तमादिषट्त्रिंशांततत्ववृन्दमपरमिति द्विविधमपि मायीयं मलमित्युच्यते विहितनिषिद्धक्रिया
जन्यं शरीरदानक्षममुद्दिष्टं तु कर्म तदपि पुण्यपापभेदेन द्विविधमपि संभूय कार्मणं मलमित्युच्यते एतेष्वणुकर्मभेदेषु उत्तरोत्तरं
पूर्वपूर्वव्याप्यं सर्वमिदमभिहितं प्रत्यभिज्ञाशास्त्रे स्वातंत्र्यहानिर्बोधस्य स्वतंत्रस्याप्यबोधता द्विधाणवं मलमिदं स्वस्वरूपाप=
हारतः भिन्नवेद्यप्रथात्मात्रमायीयं जन्मभोगदं कर्तर्यबोधे कार्म्मं तु मायाशक्त्यैव तत्त्रयमिति स्पष्टतरमुक्तं शैवसूत्रवार्त्तिके नन्वेवं
विधविश्वस्य चैतन्यं चेद्वपुस्तदा कथं बंधस्य संबंध इति शंकां व्यपोहितुं अश्लेषाश्लेषपाठाभ्यां सूत्रमाह महेश्वरः अज्ञानं बंधः अ
ज्ञानमिति तत्राद्यं चैतन्यस्फाररूपिणि आत्मन्यनात्मताज्ञानं ज्ञानं पुनरनात्मनि देहादावात्ममानित्वं द्वयमप्येतदाणवम् मलं

स्वकल्पितंस्वस्मिन्बंधःस्वेच्छाविभावितःकिमाणवमलात्मैवबंधोयत्नेत्युदीर्यते योनिर्वर्गः कलाशरीरंयोनिर्भेदप्रथाहेतुःमायाव
र्गस्तदुस्थितःकलादिक्षितिपर्यंतस्तत्वराशिस्तदात्मकःमायीयाख्यंमलंतत्तद्भिन्नवेद्यप्रथामयं कलेतिकायमालिन्यपरिच्छेदकरीनृ
णां व्यावृत्तिःपुण्यपापात्मशरीरंयस्यतत्पुनः कार्मणंमलमेतस्मिन्द्वयेबंधोनुवर्त्ततइति एवंभूतेषुत्रिषुपाशेष्वेकेनद्वाभ्यांत्रिभिरपिबंध
प्रयुक्ताजीवाअपित्रिविधाःपशुपदेनोच्यन्ते यद्यपित्रयाणांप्रस्तारेष्वेकएकस्त्रयोद्विकास्त्रयस्त्रिकएकइतिसप्तविधाजीवाःसंपद्य
न्ते तथाप्यणुकर्मभेदानामुत्तरोत्तरस्य पूर्वपूर्वव्याप्यत्वनियमात्तिस्र एवपशोर्विधाः तेचपशवोनित्याहृदये शुद्धमिश्राःशुद्धपदैर्व्य
वह्रियंते स्वच्छन्दतंत्रादौतुविज्ञानकेवलाःप्रलयाकलाःसकलाइतिव्यवहृताः तथाचोक्तम् पशवस्त्रिप्रकाराःस्युस्तेष्वेकेसक=
लामताः प्रलयाकलनामानस्तेषांकेचिन्महेश्वरि विज्ञानकेवलास्त्वन्येतेषांरूपंक्रमाच्छृणिवति तेषुत्रिभिरपिपाशैर्बद्धःसकलःत
दुक्तं अनादिमलसंछन्नोमायाकर्मावृतोविभुः शरीरेशिवतत्वज्ञोभेदैकरसिकोलघुःसर्वदाकर्मकर्त्ताचस्वकर्मफलभाजकः नि
त्यंविषयसंसक्तःसकलःपशुरुच्यते अत्रमलमायाशब्दावणुभेदपरौ एतेचसकलाख्याःपशवोमलपाकापाकाभ्यांद्विविधाः तत्रये
पक्वमलत्रयास्तेषांमध्येअष्टादशोत्तरशतसंख्याकाःसिद्धाःपरिपूर्णशिवानुग्रहवशान्मंत्रेश्वरतांआप्तावर्त्ततेतेचशतंरुद्राख्याअष्टौशतमंड
लिनो अष्टौक्रोधभट्टारकादयो वीरेश्वरःश्रीकंठश्चेतिद्वाविति अन्यानप्याचार्य्यरूपेणशिवएवानुगृह्णाति अपरिपक्वमलत्रयांस्तु=
भोगेनमलपाकायनानायोनिषुनियुंक्तेसोपिचानुग्रहएव तदुक्तं मलादीनामपाकेतुसामान्यानुग्रहोभवेत् आधिकारिकमैश्वर्यंशिवानु
ग्रहमात्रतः पशवस्त्रिप्रकारास्तुप्राप्नुयुःपरमेश्वरीति नानायोनिषुपाकायनियुंक्तेनुजिघृक्षयेति अणुकर्माख्यपाशद्वयबंधास्तुप्रलयाक
लाः तेपितयोःपरिपाकतदभावाभ्यांद्विविधाःतेष्वन्त्याःकर्मवशादुत्तमयोनिषुजायंते आद्येषुयत्रेश्वरानुग्रहस्तेभुवनेश्वराभवंति त
दुक्तंस्वच्छंदसंग्रहे मिश्राःप्रमातृरूपाःस्युः प्रलयाकलसंज्ञिकाःपुर्यष्टकशरीराश्च पृथक्कर्मवशात्प्रियेसर्वयोनिषुसंप्राप्यभोगाढ्याः

स्वस्वकर्मणा भुङ्क्ताभोगानितेषांतुकर्म्मसाम्येशिवःस्वयं सुपक्वमलकर्मणस्तान्किंचिदनुगृह्यचजलादिजडतत्वानांमध्यलोकेश्वरा स्त्रिचेति अणवोमलमात्रबद्धाविज्ञानकेवलाः तदुक्तं मलमात्रेणसंबंधःपशुर्विज्ञानकेवल :सपक्वमलविज्ञानकेवलःसस्वयंप्रियेइ ति तेपिसमाप्तकलुषाअसमाप्तकलुषाश्चेतिद्विविधाःतत्राद्याविद्येश्वराः अंत्यास्तुसप्तकोटिमहामंत्रात्मकाःनचतेषांजडत्वमिति शंकयं शब्दरूपशरीराणांजडत्वेपिशरीराणामस्माकमिवचेतनत्वोपपत्तेः अतएवमृगेंद्रसंहितायां आधानादिमलोपेतःसर्वकृत्स र्वदृक्शिवःपूर्ववत्स्थितस्याणोःपाशजालमपोहतीतिआगमिकाअप्याहुः मुक्तिंमुक्तिमथाणूनांस्वव्यापारेसमर्थानांजडवर्गस्य

मंत्रेणानेनसततंतमुपास्वमहेश्वरं तस्यैक्यसंप्रदानार्थंसंप्रदायोथएषते ३५ वर्णितस्तंकृतार्थोसिकामक्रो धोसदात्यज समुद्रःस्वविकारेषुयथासततमन्वितः ३६ तथास्यकरणंकार्यंदृश्यंभातिमहेश्वरः मंत्रोयं गुर्वभक्तानांनैवसिध्यतिकर्हिचित् ३७ गुरौमाहेश्वरीबुद्धिर्वेदबुद्धिस्तदुक्तिषु तस्यधन्यस्ययस्यास्तिक र्मणीश्वरकृत्यधीः ३८ तस्मायंमुक्तिदस्सद्योनात्रकार्याविचारणा शिववत्पूजनीयास्तेशिवभक्तास्तुसर्व तः ३९ गुरुर्यथातथापूज्याःसर्वत्रब्रह्मवादिनः दिव्यंचक्षुश्चदत्तंतेस्वैरंसंचरमाभयम् ४० ॥ ७ ॥

विधत्तेसर्वानुग्राहकः शंभुरिति अपक्वमलजीवत्वादेवमंत्राणामणुसंज्ञापि एवंषड्विधानामपिपशूनांमलपाकतारतम्यादनंताभेदाः तेषांच तत्तत्तारतम्यार्थंयोनिप्रापणैश्वर्य दानान्यपिभोगेनमलपाकार्थत्वात्पाशविमोचनरूपाण्येव तथाचपशूनामुक्तरूपाणां पा शान्मलान्विशेषेणतत्तद्योग्यतानुसारेणमोचयतीतिपशुपाशविमोचकः ३४ मन्त्रेणेति समुपास्वसम्यक्उपासनांकुरु ३५ वर्णि तइति समुद्रःस्वविकारेषुजलमयेषु यथा अन्वितःअनुस्यूतःसमुद्रस्थजलस्यैवमेघद्वारादृष्यासर्वत्रानुगमादितिभावः ३६ तथा

अस्यशिवस्यकरणंकृतिःकार्यंदृश्येजगतिभाति ३७ ३८ ३९ ४० इतीति स्तुतादिषु आदिनाजम्भादिपरिग्रहः ४१ ४२ ४३ ४४ गते इतिभवितासे भविष्यामि ४५ ४६ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायां

इत्यादिष्टःस्वगुरुणास्वपदंप्राप्यभूसुरः ध्यायन्सुंदरपादाब्जनामचास्यस्तुतादिषु ४१ वस्त्रान्नगंधपुष्पाद्यैःशिवभक्तान्समर्चयन् नित्यंह्यदशसाहस्रंजपन्पंचाक्षरीमनुम् ४२ मलत्रयविनिर्मुक्तोजीवन्मुक्तोबभूवह कदाचिद्दंजुलपुरेनिवसन्ज्ञानचक्षुषा ४३ परेद्युरपिकैलासयात्रांस्वगुरुवांछितां विज्ञायमनसाध्यौकर्त्तव्यं भूसुरोत्तमः ४४ गतेप्राणेशरीरस्यज्योतिषश्चापिचक्षुषः विज्ञानदेतिरोभूतेभवितासेतथास्तिति ४५ इतिनिश्चित्यमनसाप्राणानायम्ययोगतः कलांभूतमयींत्यक्त्वाशिवसायुज्यमासवान् ४६ इतिश्रीस्कंदोपपुराणे भक्तविलासेएकचत्वारिंशोऽध्यायः ४१॥ ॥श्रीअगस्त्यउ॰ अन्नंक्षीरंफलंवापियोदद्यात्शिवयोगिने भवानीशंकराभ्यांचपूजितोमुक्तिमेतिसः १ इतिहासोस्तिलोकेषुप्रथितःपूजितःसुरैः उच्यतेश्रवणाद्यस्यज्ञायतेभक्तिवैभवम् २ कवेरतनयापूरसदावर्द्धितसंपदि शाल्मलीवननामास्तिपुरंसुरपुरोपमम् ३ यत्रहर्म्येषुरम्येषुपूजितारत्नराशयः स्पर्द्धतेमरुणानित्यंवर्द्धमानादिनेदिने ४ तत्राभूद्धनदत्ताख्योवणिजांप्रवरोवणिक् नित्यान्नदानादुक्तानांकिंकरीकृतशंकरः ५ अनपत्यतयासर्वमपूतंस्वममन्यत उपास्तेस्मव्रतैःशंभुंअप

एकचत्वारिंशोऽध्यायः ४१॥ ॥श्री॥ अथशिवभक्तेभ्योऽन्नपानादिदातुःभवानीशंकरप्रीतिपूर्वकंमुक्तिर्भवतीत्याह अन्नमिति १ २ कवेरेति कबेरतनयाकावेरी तस्याःपूरेणप्रवाहेणवर्धिता संपत्यस्यतादृशि दक्षिणदेशेदृत्यर्थः ३ ४ ५ अनपत्येति अनपत्यतया सन्तानरा

अ·४१

स्वतीतिभावः ६ ॥

ज्ञानमानन्दमपूर्णं त्रपवित्रं त्रमन्यत्र त्रपुत्रस्यगतिर्नास्ति

तस्यशंभुप्रसादेनकन्याकाचिद्जायत यथाद्रिमवतोगंगालक्ष्मीर्दुग्धांबुधेरिव ७ वणिग्विलोक्यतांकन्यांक
लामिवकलानिधेः मुमुदेचात्मनोवंशंतयापूतममन्यत ८ तयायतःकुलंपूतंधनदत्तस्ततःपिता चक्रेपूत
वतीनामतनयांतांमहाधनः ९ सापिपित्रोर्मुदाबालावर्धेरूपशालिनी धनदत्तगृहेयद्वन्नदत्तेकल्प
वल्लरी १० आपादकेशंविविधरत्नाभरणजालकैः भूषितामोदयामासबाल्यएवनिधिश्रियम् ११ शिवभ
क्तविवीर्णेनभस्मनावणिजांपतिः दीर्घायुष्याभिवृध्यर्थमलंचक्रेसुतामपि १२ कालेसमानंनिश्चित्यरूप
द्रविणसंपदा सुतंपरमदत्ताख्यंनागपूर्वेणिजंवणिक् १३ आहूयप्रददौकन्यांधनदत्तःसबंधुमान् वणि
ग्वधूवरौयुक्तौरतिपंचशराविव १४ वितेरतुर्मनःप्रीतिंबंधूनांपश्यतांपुरः प्रार्थयित्वाथपितरौवरस्यनिज
मंदिरे १५ स्थापयामाससुतयासार्द्धंपरमदत्तकं नित्यंपरमदत्तोपिशिवभक्तसहस्रकम् १६ भोजयित्वा
स्वयंभुंक्तेपूतवत्यागृहांतरे अर्द्धंविभज्यस्वधनंजामात्रेसददौमुदा १७ निर्मायहर्म्यमपरंवणिक्परमदत्त
कं तत्रप्रवेशयामासकन्यांजामातरंतथा १८ सर्वसंपत्समृद्धंतद्दंपत्योर्मंदिरंतयोः अंतःपुरोत्तमंसिद्धलक्ष्मी
माधवयोरिव १९ त्वयान्नंशिवभक्तेभ्योदीयतामनिवारितं इतिपूतवतींभार्यांशिवभक्तःसमन्वशात् २०
आबाल्यंशिवभक्तासाभक्तानभ्यागतान्गृहे सक्षीराज्येनचान्नेनतर्पयामाससर्वदा २१ ॥ ७ ॥

धेःपद्मादेःश्रियंमोदयामास निधिभ्रान्तिमुसादयामासेत्यर्थः ११ १२ १३ १४ वितेरतुर्ददतुरित्यर्थः १५ १६ १७ १८ १९ २० २१ ॥ ॥

भक्तान्ररक्षमातेवयांछितान्नप्रदानतः बुभुजेयुवतिःकालेभोगान्शय्याश्चदुर्लभान् २१ पयःफेननिभा शय्यानवरत्नमयंगृहं अनुकूलश्चभर्त्तास्याःपपुषुर्मुदमुत्तमाम् २३ उपचारेषुभक्तानांनालस्यंक्वचिदाश्र यत् गमयामाससमयंभक्तिमूर्त्तैवशंकरी २४ अथैकस्मिन्दिनेकश्चिद्दुक्तःशंभोस्सायनं ददौपरमदत्ता यसहकारफलद्वयम् २५ एकनालंतदादायपूतवत्यै ददौवसः अथापरेद्युस्तद्देहंगिरीशोभक्तवेषधक्॥ २६ आगत्यक्षुधितोस्मीतित्वरयामासतांसती पूतवत्यर्पितंनत्वाजगादविनयान्विता २७ भवितासमयेः पाकःकिंचिदन्नमिहाधुना भुज्यतामितिसक्षीरंफलमेकंतयोरपि २८ तद्दत्वाभोजयामासतृप्तःसोपितिरो दधे सिद्धानामहिमागोप्यइतिसाहृदितद्दधे २९ प्राग्भुक्तवद्भिःस्वगृहेविहिताशीस्तपस्विभिः सायंपरमद त्तोपिभोक्तुमंतर्गृहंययौ ३० भर्त्रेपरमदत्तायहितमन्नंपयोघृतं दत्वातंभोजयामासददावाम्रफलंचतत् ३१ अमृतास्वादसरसंतत्फलंप्राश्यहृष्टधीः अन्यक्केतिमुखंतस्यावीक्षतेस्मवणिग्वरः ३२ अथसास्वकृ तंवक्तुमशक्ताभयपीडिता महानसमनुप्राप्यविधृतकरपल्लवा ३३ रक्षेतिमनसाशंभुंशरणंपूतवत्यगा त् शिवान्नयानत्सदृशंफलंतस्याःपुरोऽपतत् ३४ मुदितातद्दौभर्त्रेबुभुजेसोपितत्फलं पूर्वभुक्तफलाः स्वादुतरफलमवेत्यतत् ३५ ददंकुतःसदृत्याहभार्याकरुणयाविभोः इतिसापूतवत्याहप्रहसन्नाहतांवणिग्

३२ ३३ ३४ ३५ ३६ ० ० ० ० ० ०

३७ ३८ ३९ शिवेति यद्यस्मात्दास्यकारिणीकैङ्कर्यकर्त्री पार्वेत्यादास्यमनुचितमिति शिवद्रोहइतिभावः ४० त्यागेइति धर्मपत्नी त्यागे अहंपापः पापिष्ठोभविष्यामि त्रिषुद्रव्ये पापपुण्यसुखादिचेत्यमरः सहवासे महद्दुःखं देवतापराधसंभवादितिभावः ४१ वणि

कारुण्यंत्वयिचेच्छंभोरन्यदानीयतांफलं इत्युक्तांतप्रविश्यैषाचतुर्वर्गफलप्रदम् ३७ पूतवत्यस्मरत्तादृक्फलमन्यद्दौशिवः भर्त्रैतदपिसादत्वाप्रहर्षमतुलंययौ ३८ भीतःपरमदत्तोभूत्पूतवत्याःसवैभवात् वशीकृतोनयाशंभुःब्रह्मादीनामगोचरः ३९ शिवद्रोहोमयाप्राप्तःयदियंदास्यकारिणि पार्वतीन्नूनमेषास्यान्नोचेच्छक्तिःकथंचेदृशी ४० त्यागेतुपापोभवितासहवासेमहद्दुःखं कथंनुखलुकर्त्तव्यमितिचिंतांददौहृदि ४१ वणिज्यव्यपदेशेनगच्छाम्यहमितोन्यतः इतिनिश्चित्यमनसामहत्यानाव्यसौवणिक् ४२ वस्तून्यारोप्यविविधान्यनुद्वीपांतरंप्रति ययौपूतवतीशक्तिमद्भुतांमनसास्मरन् ४३ द्वीपांतरंगतेनाथेपूतवत्यपिसान्वहं दत्वान्नंशिवभक्तानामेकभुक्त्याव्यतिष्ठत ४४ ततःपरमदत्तोपिगृहीतधनसंग्रहः देशंसमुद्रमार्गेणप्राप्यपाड्यस्यभूभुराः ४५ अन्यांवणिग्वरसुतामुद्वाह्यन्यवसच्चिरं तस्यांकांचिदभूत्कन्यानाम्नासवणिजांवरः ४६ चक्रेपूतवतींतस्याःस्वापराधविशुद्धये धनदत्तश्चिरगतमथजामातृजनैः ४७ आप्तैःपांड्येस्थितंज्ञात्वातत्राप्रेरयदात्मजां साबंधुभिःपरिवृतापरिजनैरपि ४८ जगामभर्तुर्निकटमारूढशिबिकोत्तमा श्रुत्वापरमदत्तस्तामागतामंतिकेततः ४९ ननामपादयोस्तस्याःसहपुत्र्याचभार्यया अभिप्रायमशेषेणपूतवत्यैन्यवेदयत् ५०॥

ज्येति महत्यांनाविनोक्तायां ४२ ४३ द्वीपेति एकभुक्त्याएकवाराशनेनप्रोषितेमलिनाकृशेतिस्मरणादितिभावः ४४ ४५ ४६ ४७ ४८

५१ ५२ ५३ इतीति अंगात् निजशरीरात् सर्वमांसानियोगतः योगशक्त्यादुधावकंपयामास ५४ पैशाचमिति तेतवशिवस्यभूतपतेः सेवायैसेवार्थंभूतरूपेणैवभूतपतेःसेवासुकरेतिभावः भजेमभवंतंकं प्रकृतिमेत्यपैशाचिकींकिमित्यमर संपदः प्रमथनाथनाथा

तवापराधमुध्यर्थंकन्यांत्वन्नामचिन्हिता त्वामहंदेवताबुध्याशरणंपूतवत्यगाम् ५१ यद्यत्राप्यागता सात्वमहंगच्छामिचान्यतः इतितेनोदितासाध्वीपूतवत्याह्नायकम् ५२ त्वदर्थंरक्षितमिदंवपुर्मेना थनान्यथा यदित्वयापरित्यक्तागच्छाम्येषाशिवांतिकम् ५३ इतिसाब्राह्मणास्तत्रमेलयित्वामहाध नैःपूजयित्वादुधावंगात्सर्वमांसानियोगतः ५४ पैशाचंरूपमस्मार्षीत्सेवायैतेभवत्विति तस्यारूपंत थैवासीद्ययुर्लोकाश्चविस्मयम् ५५ तदानींप्रमथैर्नीतंविमानंचंद्रपांडुरं पूतवत्यधिरुह्यागात्कैलासाद्रे रुपत्यकाम् ५६ अयुक्तश्चरणस्पर्शःकैलासस्यतिमौलिना तपसारुह्यशैलेंद्रमागच्छंतींहरांतिकम् ५७ दृष्ट्वादेवीगिरिसुतापप्रच्छतदुदंतकं पिशाचीकेयमायातिचरंतीमौलिनांतिकम् ५८ अस्यास्तुविकृतंरू पंतपःशक्तिर्महत्तरा योजनानांचतुर्विंशत्सहस्राणिमद्दीतलात् ५९ मूर्ध्नीतीयोपरिगिरेर्यत्यासातवचांति कं अथगौरींजगादेशःस्मयमानमुखांबुजः ६० मातामेयंकल्याणीभक्तामेयोषितामया पूजनीयातवेत्युक्ता सतांगिरिजयासह ६१ प्रत्युद्गम्यजगादेशांमातस्तेकिमनामयं इतएहीत्युवाचार्यांप्रणमेतिशशासच ६२ ॥

महे इतिप्राचीन प्रयोगोपि ५५ तदानीमिति उपत्यकां समीपभूमिं उपाधिभ्यामिति त्यकन्प्रत्ययः ५६ ५७ दृष्ट्वेतितस्याः पिशाचिकायाः उदंतकं वृत्तान्तम् ५८ ५९ ६० ६१ प्रत्युद्गम्यते अनामयंकिं आरोग्यं किमिति प्रश्नः ६२ ॥

६३ ६४ ६५ ६६ ६७ ६८ सभामिति यत्रसभायां नंदीवेत्रधरः मायागुणत्रयसाम्यावस्थापन्नाप्रकृतिरेवयवनिकांशुकः तिर
स्करिणीपटः ६९ ७० चत्वारइति छंदसांवेदानांप्रसवित्रीमातागायत्रीत्यर्थः साचत्रिपदासैवकक्षात्रयंकोष्ठत्रयम् ७१ विताने

नमस्तवार्यदेवायसर्वांतर्यामिनेत्वयि गौरीमाभाष्यजरतीजगादपरमेश्वरम् ६३ कैलासशृंङ्गेगिरिजासमेतो
दृष्टोमयात्वंयऽतोसिधन्या त्वद्वांछितंकिन्नुमयेतिपृष्टातेनाहसापूतवतीमहेशम् ६४ आनंदनृत्यंभव
तोद्रष्टुकामास्मिशंकर स्ववांछितंकिंनाथेतिसम्यदास्यामिवांछितम् ६५ दर्शयिष्यवटारण्येनृत्यंतत्रैवग
म्यतां इत्युक्तानहिमेशक्तिर्गंतुमस्तीतितत्रसा ६६ पदंगृहीतुमीशस्यप्रवृत्तातर्दधेहृः अथतामाह्वयाशं
भोःहस्ताग्रेणविनायकः ६७ स्थापयामाससदसिवटाराण्येहरालये श्रांतोन्मील्यदृशौदृष्ट्वापरितस्तमवै
क्षत ६८ सभांददर्शमहतीनवरत्नविभूषितां यत्रवेत्रधरोनंदीमायायवनिकांशुकः ६९ वल्लकीवादि
नीवाणीवंशगानपरेदिरा मर्दलाघातकोविष्मुःतालहस्तश्चतुर्मुखः ७० चत्वारोदीपिकावेदाःसनका-
द्याःसदस्थिताः कक्षात्रयंभगवतीप्रसवित्रीचछंदसाम् ७१ वितानंक्षौमवलयोदर्शनान्यखिलान्यपि स
सकोटिमहामंत्राःकीर्णानिकुसुमानिच ७२ पंचाक्षरीभद्रपीठंचंद्रादित्यौचदर्पणे साक्षिणीचपराशक्तिःशां
करीपरदेवता ७३ सभापूतवतीदृष्ट्वाकैलासंलोककौतुकं संत्यज्यसहसोत्थायकिमेतदितिविस्मिता ७४
अथतस्यैमहादेवःदर्शयित्वास्वतांडवं सदेहमुक्तांतांकृत्वास्थापयामासचांतिके ७५ इतिश्रीस्कांदेपुराणे

ति वितानंउल्लोचः तस्यक्षौमवलयो गौरपट्टवस्त्रमंडलं दर्शनानिशास्त्राणि ७२ पंचेति भद्रपीठंसिंहासनंशांकरीशक्तिः उमा

७३ ७४ ७५ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांद्विचत्वारिंशोऽध्यायः॥ ४२॥ ॥शिवभक्तसेवानामकीर्त्तनपूजान्यतरेणापिमृत्युरपसरतीत्याह सेवयेत्यादि १ २ अस्तीति प्रासादैः देवानांराज्ञांवा गृहैःप्रासा

श्रीअगस्त्यउवाच सेवयाशिवभक्तानांनामसंकीर्त्तनेनच सपर्ययावास्यपुनरपमृत्योर्निवारणम् १ इति हासोमहानत्रमहद्भिःसमुदाहृतः यमाकर्ण्यनरोभक्त्यामुच्यतेमृत्युबंधनात् २ अस्तिचंद्रपुरंनामचंद्रमंडलपांडुरैः महाधनानांप्रासादैःपरितःपरिमंडितम् ३ स्वधर्मनिरतैर्वर्णैःसर्वतःसमलंकृत आभूतिचरणाख्योभूत्तत्रकश्चिद्द्विजोत्तमः ४ इष्टापूर्त्तयशोयस्यविमलीकुरुतेजगत् अग्रणीर्वेदविदुषांशिवभक्तोजितेंद्रियः ५ येनवैदिकसिद्धांतोजिनान्जित्वाप्रतिष्ठितः वागीशस्यपदेतस्यसदधौभक्तिमुत्तमाम् ६ स्वेनालयेषुसर्वत्रनिर्मितेषुपिनाकिनः वापीकूपतटाकानामंतिकेचशिलांतरे ७ धर्मःस्वकीयःसर्वोपिवागीशस्येत्यघोषयत् विलिख्यस्थापयामासप्रथासुचविशेषतः ८ वागीशोपितदाशंभोःस्थानेषुभुविपर्यटन् घर्मेकदाचिन्मध्यान्हेस्वेच्छयाप्रापतत्प्रपाम् ९ पयःसुरभिलंतत्रपीतंशीतंगतश्रमः निर्मितामुपलस्तंभेददर्शाक्षरमालिकाम् १० जितार्हतस्यधर्मोयंवागीशस्येतिनिर्मलं विस्मितःप्रीतिमानाहतस्यकृत्याधिकारिणः ११ प्रपाधर्मोत्रकस्यायमितितेप्रावदन्मुदा आभूतिचरणोनामकश्चिद्वागीश

दोदेवभूभुजामित्यमरः ३ ४ इष्टेति इष्टंयागादिकर्म पूर्तंखातादिकर्म इमेद्वेकर्मणी अग्रणीः अग्रग्रामाभ्यां नयतेर्णइतिणः ५ ६ स्वेनेति स्वेननिर्मितेष्वित्यन्वयः ७ धर्मइति प्रपासुपानीयशालासु ८ ९ १० जितेति जिताःआर्हता बौद्धायेन ११ १२ ॥

द्विजस्तेनकृतासेयंप्रपातस्तेवकावयं तेनदृष्टःसकुन्नेतितेतद्दृढमदर्शयन् १३ वागीशस्तद्दृढद्वारंख
दाप्रापद्विजोपिसः कर्त्तुमाध्यान्हिकस्नानंनिर्जगामगृहात्स्वयम् १४ नासाहतंशिरस्तस्यतदावेगेननि
र्यतः वागीशोमेशरण्यःसद्त्युवाचबहिस्थितम् १५ साक्षादिवमहादेवंगृहद्वारमुपागतं भस्मावगुं
ठिततनुंमुदितःप्रणामसः १६ दर्शनात्तेकृतार्थोस्मिदेवस्येवपिनाकिनः पादरेणुपवित्रंतेभूयादस्मद्गृहं
वरम् १७ कर्त्तुमातिथ्यमिच्छामिक्रियतांमय्यनुग्रहः इतिप्रवेशितोवेश्मकृतासनपरिग्रहः १८ नाम
किंतेद्विजब्रूहिशिवभक्त्यामहानसि इतिवागीशसंपृष्टःतदाहविहितांजलिः १९ अहंवागीशदासो
स्मिविभूतिचरणाब्धयः ऐहिकामुष्मिकंमेचसर्ववागीशधर्मतः २० इत्याकर्ण्यसतंप्राहकिमिदंक्रिय
तेत्वया दासायस्यविरिंचाद्यायएकोजगतांप्रभुः २१ यन्नामस्मरणंजंतोःमहापातकनिष्कृतिः विहाय
तंमहादेवंनामतस्यातिपावनम् २२ शाल्मलीपुष्पसंकाशंभवान्यंशरणंगतः वागीशःकुत्रवाकोयंदे
वोवाथसमानुषः २३ शिवदेवावयंक्वापिनैवभुंजामहेन्यतः चिन्हमात्रेणशैवोसिहंतभक्तिस्तवान्य
तः २४ इतितद्वाक्यमाकर्ण्यपुनस्तंप्राहभूसुरः मैवंभोवदमेवाचमिमामाकर्ण्यतामृषे २५ शंभोःस्थिरं
चरंचेतिरूपद्वयमुदीरितं असतांनिग्रहंचापिलोकेस्मिन्सदनुग्रहम् २६ ७ ७ ७

तिथेर्ज्येदृतिसाध्वर्थेभ्यः १८ १९ २० २१ २२ २३ शिवेति शिवएवदेवोयेषांते शिवदेवाः अन्यतः अन्यत्र २४ २५ २६ ७॥

स्थिरेपरोक्षोविज्ञेयःचरेप्रत्यक्षएवसः स्थिरंतुलिंगवेशादिचरंरूपंभवादृशाः २७ चरेणैवस्वरूपेणनिग्रहा
नुग्रहौबिभुः करोतिजगतांशंभुःदत्तेचनमतांफलम् २८ यथाशिवस्तथाभक्तःतयोर्भेदोनहिक्वचित् वा
गीशमूर्त्तिमास्थायजिगायकटवाससः २९ प्रतिष्ठापितवान्लोकेवैदिकाध्वानमुत्तमं सशंभुरेवयस्यास्मिन्म
र्त्यधीःसविनश्यति ३० तस्मादस्मत्कृतंसर्वंतस्यैवेतिमतिर्मम इत्युक्तेभूतिपादेनवागीशोस्मीत्युवाचतम्॥
३१ मुमुदेभूसुरेंद्रोपिनिधिंप्राप्येवनिर्धनः आतिथ्योद्योगसमयेकदलीदलहारिणं ३२ तत्पुत्रमदशत्सर्पःस
बभूवातिमूर्छितः प्रच्छाद्यमूर्छितंपुत्रंतंभोजयितुमुद्यते ३३ अभूतिचरणेप्राहवागीशोभोक्तुमुद्यतः अस्यांपं
ङ्क्तौसपुत्रेणत्वयापिस्थीयतांसुतम् ३४ भोजनायाव्हयस्येतित्वरयामासदंपती विचारंप्रापतुस्तौतु उक्तेनै
वानृतंभवेत् ३५ आतिथ्यविघ्नोभवितायथार्थवचनेपुनः इतिसंचिंत्यतौसत्यंपुत्रवृत्तांतमूचतुः ३६ माभै
ष्टमितितावुक्त्वास्वसेवानृण्यमुक्तये मृतस्यनिटिलेभस्मतत्पुत्रास्यनिधायसः नीललोहितमस्तौषीद्वागी
शःशूलधारिणम् ३७ जलधिमथनजातंयःपुराकालकूटं प्रतिभयममराणांविष्टपानांचशंभुः ॥ अपिबः
दभयदातादैवतैस्तूयमानो विकटयतुविषार्त्तिंविस्मृतश्चेतसानः ३८ इतिवागीशवाक्येनद्विजपुत्रःस
जीवितः विस्मयंपरमंजग्मुरपिदेवाःसदानवाः ३९ अथतस्यगृहेभुक्त्वावागीशःस्वेच्छयाययौ पुनरुज्जीव
नात्सूनोःमुमुदातेचदंपती ४० तमेवाभूतिचरणश्चिरंध्यायन्महेश्वरं अवापशिवसायुज्यंदुर्लभंयोगिनामपि

इतिश्रीस्कंदोपपुराणेभक्तविलासेत्रिचत्वारिंशोऽध्यायः ४३॥ ॥७॥

इतिश्रीमानवल्युपनामकन्दसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांत्रिचत्वारिंशोऽध्यायः ४३॥ ॥❀॥॥

शिवभक्तसंगादपिनरःसंसारंसुखेनतरतीत्याह संगमादिति निबर्हणात् निबर्हकात् करणेल्युट् १ २ मरुद्वृद्धेति मरुद्वृद्धाकावेरी सख्य

श्रीअगस्त्यउवाच संगमात्तशिवभक्तानांसर्वपापनिबर्हणात् दुस्तरंजन्मदुःखाब्धिंजंतुरत्येतिलीलया १ अत्रै वोदाहरंतीममितिहासंपुरातनं चरितंनीलनग्नस्यश्रूयतेयत्रपावनम् २ मरुद्वृद्धासरित्तीरेमंगलाख्यमह त्सुरं सदाधर्मरतैःसद्भिःसाग्निहोत्रैरधिष्ठितम् ३ तत्रासीन्नीलनग्नाख्योब्राह्मणोवेदपारगः ब्रह्मदृष्टिर्जितक्रो धोभक्तिमान्परमेश्वरे ४ नीलःकर्मफलंप्रोक्तंतन्नलिप्यतिनग्नवत् यतस्ततोभवल्लोकेनीलनग्नाह्वयोद्विजः ५ त्रिपदार्थविवेकांभःप्रक्षालितमलत्रयः वाजपेयादिभिर्यज्ञैराराधमहेश्वरम् ६ नीलकंठस्यदेवस्यनी लनग्नःप्रसादतः दृश्येजगतिसर्वत्रव्यधत्तशिवदर्शनम् ७ शिवध्यानेनसततंनीलनग्नस्यमानसं कृतक्ष्मोद्योगेना नाविलंसलिलंयथा ८ अथैकदासौदिवसेमहेशंफलैश्चदुग्धैर्मधुनाभिषिच्य निवेद्यचान्नद धिदुग्धपूर्णंहृष्टस्तुष्टावशिवांतिकस्थः ९ हरंस्तुवंतंभर्तारंसमयापतिदेवता तिष्ठंतीसांजलिस्तस्यभार्या सेवंतशंकरम् १० मौलौशंभोस्तदालूतानिपत्यलघुतंतुभिः घनैःप्रच्छादयामाससातूर्णंनिर्मार्जंतम् ११ ॥

योनिर्मरुद्वृद्धेत्यमरः ३ ४ नीलदिति ज्ञानस्यैवपरमात्मिकत्वेननिर्मलतयाश्वेतत्वेन तदितरस्यकर्मफलस्य नीलत्वमितिभावः ५ त्रिप दार्थेतिगायत्र्यर्थेदृत्यर्थः ६ ७ शिवध्यानेनेति कृतक्ष्मोद्योगेननिर्मलाख्यबीजचूर्णयोगेनेत्यर्थः ८ ९ हरमिति भर्तारं समयाभर्तुः समीपे अभितःपरितद्यादिनाद्वितीया पतिदेवतापतिव्रता १० शंभोरिति लूता ऊर्णनाभिः कृमिविशेषःमकरीतिलोकेप्रसिद्धा ११ ॥

लूतेति असृक्रुधिरं १२ लिलेहेति लाला वदनजलमेवौषधं यस्यास्तया जिह्वया १३ १४ १५ १६ १६ १७ १८

लूतानखक्षतेमौलौशंभोरसृगदृश्यत साध्वीभक्तिपरीक्षार्थंदर्शितेशंभुनासृजि १२ लिलेहजिह्वयाभीता सालालौषधयाद्रुतं शशामसद्योरुधिरंप्रीतश्चाभून्महेश्वरः १३ भार्यारसनयालीढंशिरःशंभोरवेक्ष्यतत् कर्णार्पितकरःशोचन्नीलनग्नोजगादताम् १४ त्वयाकृतःशिवद्रोहःत्यक्तातत्वमशिक्षिता नमेत्वयास्तिसं बंधोगच्छ क्वापियथेच्छया १५ इतिभर्त्तुर्निशम्योक्तिंसाकृतांजलिरब्रवीत् गतिस्त्वमेवमेशंभोर्नैवद्रोहःकृ तोमया १६ सर्ववेदशुभंवान्यत्सर्वसाक्षीमहेश्वरः अथतांनीलनग्नोपिकंपयन्मौलिमात्मनः १७ विधायसा हसंपूर्वंप्रच्छादयितुमिच्छसि स्त्रियोहिसाहसपराइत्युक्तास्वगृहंययौ १८ गतेभर्तरिसाध्वीसाशरणंशंक रंययौ उपोषितानयद्रात्रिंतत्रपंचाक्षरीपरा १९ नीलनग्नमथस्वप्नेप्राहवाचंमहेश्वरः मूर्खत्वंनविजानीषे तस्याभक्तिंमयिस्थिराम् २० महाभिषेकेनिहितेसम्यङ्नोमार्जनंकृतं पंचामृतकणंमौलौममलग्नंक्षुधार्दिता २१ न्यपतत्तीक्ष्णनखरावभक्षैतन्नखक्षतात् उत्पन्नंसविषंरक्तंदृष्टंत्वद्भार्ययामम २२ त्वद्भीत्याविरतानोचेत्स र्वंस्वर्णंभविष्यति यदित्यक्तात्वयासेयंत्यजामित्वामहंध्रुवम् २३ नीलनग्नमुदीर्यैवंनीलकंठस्तिरोदधे अथो त्थायदयाविष्टोनीलनग्नःशिवालयम् २४ क्षम्यतामितिभार्यांस्वामानीयनिजमंदिरं निशिस्वर्णमयंलीढंदृष्ट्वा शंभोस्सविस्मितः २५ त्वमेवगिरिशंध्यायन्नकदाचनरुष्यति तयासहनिवासेनस्वंकृतार्थममन्यत २६॥ ७॥

१९ २० २१ २२ २३ २४ २५ २६ २७ ७ ७ ७ ७ ७

अथकालेनमहतासहबोधवत्तागतान् नीलनग्नोमहाभागान्शिवभक्तान्दृढव्रतान् २७ संपूज्यवासयामा
सस्ववेश्मनिमहामतिः अथतेषुप्रयातेषुशिवस्तोत्रपरायणः २८ नीलनग्नोमहाभक्तोभार्ययासहितस्तया नि
र्धूतबंधनःप्रापगतिमावृत्तिवर्जिताम् २९ इतिश्रीस्कंदोपपुराणेभक्तविलासेचतुश्चत्वारिंशोऽध्यायः ४४॥०॥
श्रीअगस्त्यउवाच कर्मजातानिसंगृह्यपुण्यस्थलनिषेवया उपास्तेशंकरंभक्त्यासोपिमुक्तोभवेद्द्विजाः १ श्रूय
तामितिहासोत्रविश्रुतोविदुषांप्रियः अबणाद्यस्यकैंकर्येशांकरेभवितामतिः २ वागीशज्ञानसंबंधनीलनग्ना
न्रिरक्षिषुः दीनाननन्वहंप्रादात्सोपानेयत्रशंकरः ३ हेमलाभपुरंनामतदादिप्रथितंहितत् द्विजःकश्चिदभू
त्तत्रशिवभक्तगणाग्रणीः ४ अधीष्टवेदानखिलान्अन्वतिष्ठत्क्रतून्शतं तत्राग्नेर्मंडलेभानोःशिवलिंगेचदे-
शिके ५ भावयन्नित्यमीशानंभक्त्यानंदिसमोभवत् अतस्तमाहुर्विप्रेंद्रानाम्नाचनवनंदिनम् ६ सफाल्गुनोत्स
वेशंभोःपौर्णिमायांद्विजोत्तमः करिष्यन्त्यागराजस्यदीपाराधनमुत्तमम् ७ घृतग्रहणमुद्दिश्ययत्रावापणवीथिकां घृ

वागीशेति वागीशादीन्भक्तान् रिरक्षिषुः दीनानसुवर्णमुद्राः ३ नगरनाम्नःप्रवृत्तिनिमित्तमाह हेमेति ४ अधीष्टेति अधीतवान्स
तमनेकान्क्रतून्नवतिषत् अनुतष्ठौचकारेत्यर्थः उपासनास्थानानिनिर्दिशति अग्नावित्यादि ५ ६ ७ घृतेतिसौगतंबोद्धुम् ८ ९

९ १० ११ तमिति अष्टतनुः भूतपंचकं सूर्यचंद्रयजमानरूपाष्टमूर्त्तिः १२ सौगतःशंकते पृथिवीत्यादिना १३ पृथिव्यादीनां परस्परविरुद्ध स्वभावानां एकत्रसमागमोदुर्निरूपइतिभावः १४ समागमपक्षेदोषमाह शिवेति १५ १६ १७ संमेलयित्वेति कमलालयं नगरम् १८

गृह्णनिष्कदशकंदेहिमेघतमुत्तमं इत्युक्त्वाऽर्हतःप्राहघृतंतेकस्यबद्धिति ९ नवनंद्यपितंप्रीत्याप्राह देहिनवंघृतं भक्तोस्मित्यागराजस्यप्रीतेर्यत्लक्षवर्त्तिकाः १० कर्त्तव्याद्येतिक्रिंतेनेत्युक्तःशंभोरनुग्रहः फलमित्याहकः शंभुरितिपप्रच्छतंपुनः ११ तमाहविप्रोदेवानांनियंताष्टतनुःशिवः स्वयंप्रकाशस्त्यागेशस्तद्भक्त्यामुच्यतेनरः १२ ततःप्रहस्यतंप्राहवेदबाह्योमहाद्विज पृथिवीवायुराकाशश्चंद्रादित्योचपावकः १३ अंभश्चयजमानश्चेत्येताः शंभोर्हिसंगताः मूर्त्तित्वंयांस्मीकुत्रसंगच्छन्तेविरोधिनः १४ शिवाज्ञयाविरोधश्च तन्मद्विद्वेषोविधीयतां इत्युक्तःसशिवद्रोहीनसंभाष्यइतिक्रुधा १५ व्यथमानश्चतद्भक्तैस्त्यागेशंशरणंगतः हतोस्मिसौगतगिरावेदमर्मच्छिदाचिरम् १६ रक्षरक्षेतिनिश्चस्यनत्वानंदीरुदन्स्थितः जलदीपान्विधेहीति दयालुःप्राहतद्धरः १७ संमेलयित्वासकलान्कमलालयवासिनः सायंसलक्षपात्रेषुदत्वाविमलवर्त्तिकाः १८ पूरयामाससर्वत्रकमलालयवारिभिः कदाचिद्विवयात्रायांतंनीचस्पर्शंशंकितम् १९ सुप्तमुत्थापयित्वेशःकमलालयगान्जनान् दर्शयामाससकलान्नीलग्रीवांश्चतुर्भुजान् २० शिवरूपजुषःसर्वानाचंडालददर्शसः तांश्च प्रज्वालयन्दीपान्तद्दद्भुतमभून्महत् २१ महावातेपिचलतिजज्वलुस्ताःशिवाज्ञया भीताःपलायिताःसर्वेशाक्या

१९ २० शिवेति आचंडालंचंडालावधि २१ महेति शाक्याःजैनाः २२ ॥

ववर्षुरितिज्वलंतःशिखायेषांतान् द्वीपान् २३ २४ सागेशंस्तोतियस्येत्यादिना नवछिद्रेशरीरे २५ शासनादिति अंतरा वैश्वानररूपेण २६
२७ २८ फलमिति कर्मणांयागादीनांफलं स्वर्गादि यस्यशासनात् कर्त्तारमन्वेति प्राप्नोति कःकर्मप्रध्वस्तंफलतिपुरुषाराधनमृतेदृतिस्म

ववर्षुःपुष्पवर्षाणिदेवाःसर्वेचविस्मिताः आप्रभातंचतांदृष्ट्वानवनंदीज्वलच्छिखान् २३ भक्त्याप्रहृष्टहृदयस्तुः
ष्टावपरमेश्वरम् २४ श्रीनवनंदीउ॰ यस्याज्ञयानवछिद्रेस्तब्धस्तिष्ठतिमारुतः ॥ तन्नमामिमहादेवंत्यागेशंभ
क्तवत्सलम् २५ शासनात्सावकोयस्यसर्वेषामंतरास्थितः तन्नमामिमहादेवंत्यागेशंभक्तवत्सलम् २६ बडवामु
खवन्हिश्चज्वलत्यब्धौयदाज्ञया तन्नमामिमहादेवंत्यागेशंभक्तवत्सलम् २७ भूतान्यपिविरुद्धानिमिलितानियदा
ज्ञया तन्नमामिमहादेवंत्यागेशंभक्तवत्सलम् २८ फलमन्वेतिकर्त्तारंकर्मणांयस्यशासनात् तन्नमामिमहादेवंत्या
गेशंभक्तवत्सलम् २९ औषधेचमणौमंत्रेभातिशक्तिर्यदाज्ञया तन्नमामिमहादेवंत्यागेशंभक्तवत्सलम् ३० ना
स्तेतिसमयंज्योतिःसिंधुःकालश्चयद्भयात् तन्नमामिमहादेवंत्यागेशंभक्तवत्सलम् ३१ विनाधारंजगद्येनसाधार
मिवनिश्चलं तन्नमामिमहादेवंत्यागेशंभक्तवत्सलम् ३२ ब्रह्माच्युताद्यविदितंचशिरःपदंतेनासाशिलाविदित
मासमुद्दृतप्रियायाः तस्मैनमोस्तुभवतेप्रणतार्तिहंत्रेत्यागेश्वरायमयिदेहिसदावलोकम् ३३ श्रीअगस्त्यउ॰ नव
नंदीस्तुवन्नेवंत्रिसंध्यंत्यागनायकं तत्रैवतदनुज्ञातःसभार्योन्यवसच्चिरम् ३४ ० ० ० ०

रणात् २९ औषधेइति तृणलतापाषाणवर्णेष्विति भावः ३० नेतिज्योतिःसूर्यादिःयद्भयात् यस्माद्भीतेः भीषोदेतिसूर्यइत्यादिश्रुतेः ३१ ३२ ब्र
ह्मेति तवैश्वर्ययत्नादितिश्लोकेमहिम्नेकथेयंस्पष्टा आसमुद्दः निजभक्तस्यप्रियायाः नासाशिलाभ्यांह्यरोपर्यधोदाहृभ्यांविदितं ३३ उपसं

हरतिनवेति ३४ कर्मेति अखिलंकर्मसंगृह्य यत्करोषियदश्नासीत्यादिना सर्वंशिवार्पणंकृत्वाउत्तमांभक्तिंप्रागुक्तलक्षणांकुर्वते तस्मैनवनं दिनेकैवल्यंमोक्षं ३५ इतिश्रीमानवल्युपनामकस्कन्दसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांपंचचत्वारिंशो ऽ

कर्माखिलंचसंगृह्यकुर्वतेभक्तिमुत्तमां त्यागेश्वरोददौतस्मैकैवल्यंनवनंदिने ३५ इतिश्रीस्कंदोपपुराणेभक्तविः लासेपंचचत्वारिंशोऽध्यायः ४५॥ ७ ॥ ॥श्रीअगस्त्यउवाच अथवक्ष्येमुनिश्रेष्ठःकथांक्षपणविद्विषः स्तन्यामृ तप्रदानेनयस्यधात्रीहिमाद्रिजा १ कावेरीहेमसभयोरंतरास्तिपुरंमहत् किंचिद्ब्रह्मपुरंनामब्रह्मलोकइवापरः २ संवर्तसलिलाक्रांतेत्रैलोक्येयांमहेश्वरः द्रोणींविधायत्रिगुणींतत्राधायाप्यपालयत् ३ वृषध्वजपुरीब्रह्मपु रीवेणुपुरीतथा कालीपुरीमलपुरीत्युच्यतेयामुनीश्वरैः ४ यत्रोद्यानेषुमाकंदास्तदाकमलोदरे मुंचंतिमधुः विप्रेंद्राव द्भावाज्याहुतिर्यथा ५ धमिल्लोदूर्त्तनेस्त्रीणांनृत्यतांयत्रबर्हिणां बालयूथकरास्फोटोमद्रस्तालः ध्वनिर्यथा ६ शिवव्रतइतिख्यातःतत्रासीद्द्विजसत्तमः शिवभक्तोजितक्रोधस्सर्वसंपत्समृद्धिमान् ७ वि वर्त्तद्वधर्मस्यविद्यानांवासमुद्गमः शांतेरिवपरीपाकोदांतेरिवपरिक्रमः ८ उल्लासइवबोधस्यमोक्षस्येव महापथः वेदांतार्थोपदेशेनपवित्रितजगत्त्रयः ९ विनयाभरणातस्यकरुणेवशरीरिणी आसीद्भगवतीनाम धर्मपत्नीयथांबिका १० अरुंधतीवसिष्ठस्ययथास्वाहेवबर्हिषः तथाप्रतिष्ठामगनद्दातिथ्येषुद्विजन्मनाम् ११

ध्यायः ४५॥ ॥❀॥ ज्ञानसंबंधनामकभक्तकथांप्रस्तौति अथेति क्षपणान्बौद्धान् विद्वेष्टीति क्षपणविद्विट् तस्यधात्रीजननी १ २ संव र्तेति संवर्तःप्रलयः त्रिगुणींगुणत्रयमेवद्रोणीं काष्ठांबुवाहिनींविधाय यांनगरींतत्राधायस्थापयित्वाऽपालयत् ३ तस्याएवसंज्ञांतरा

एयाह दृषेति ४ ५ ६ ७ विवर्तेइति धर्मस्य विवर्त्तोरूपांतरंइति इत्वार्थेवा समुद्गमः आविर्भावः ८ ९ १० ११ यस्येति यस्यनगरस्यके
लीवनादीना श्रिता मृगी चर्वितं आर्द्रं तृणं शशलक्ष्मणश्चंद्रमसोमृगयादत्ते क्रीडाशैलस्यतानदीन्नत्यादितिभावः १२ १३ १४ १५

यस्यकेलीवनाक्रीडापर्वताग्राश्रितामृगी चर्वितार्द्रंतृणंदत्तेमृगायशशलक्ष्मणः १२ तस्यसंपत्समृद्धस्यसक्त
लत्रानुकूलतः भाग्येनस्वर्णपुष्पस्यसौरभश्रीरिवाभवत् १३ षट्कर्मनिरतस्यास्यसभार्यस्यमहात्मनः अनप
त्यतयादुःखमंतर्व्याधिरिवाभवत् १४ अथतोदंपतीखिन्नावपूरितमनोरथौ अपत्यार्थेमहादेवंतोषयामा
सतुर्व्रतैः १५ परिणोरुद्रमंत्रेणपार्वतीपरमेश्वरौ द्रोणप्रसूनैरानर्चत्रिसहस्रैर्दिनेदिने १६ क्षीराभिषेकंविद्
धेधारयालिंगमूर्धनि यावदेकादशाद्वत्तिरुद्राध्यायःसमत्रवित् १७ प्रदक्षिणशतंशंभोस्तिलाभ्यंजनवर्जितं
कुर्वेत्यलवणंभुंक्तेबिल्वानामभिषेककृत् १८ तैलंक्षीरंशिभूनांचप्रदद्यावनिवारितं एवंवर्षत्रयंतस्यभा
र्याचव्रतमादधे १९ तथापिदृश्यतेनस्मप्रसादःपरमेश्वरः अथसाचिरनिर्विण्णद्वादशाब्दमुपोषिता २० द्रो
णीपुरेश्वरस्याग्रेरुदंतीवाक्यमब्रवीत् वेदविद्याविहीनोयोब्राह्मणस्त्रीरनात्मजा २१ तावन्नगादिवत्भूमे
र्भारभूतोनसंशयः ददासिचेन्नपुत्रमेप्राणास्त्यर्पितामया २२ इतिनिश्चित्यसासाध्वीतत्रप्रायमुपाविशत्
तस्यांरात्रौहरःस्वप्नेपायसान्नेनपूरितम् २३ पात्रंहेममयंदत्वाभगवत्यैतिरोदधे अथसाकथयत्स्वप्नेहरेणा
नुग्रहकृतम् २४ भर्त्रेशिवव्रतायाभून्मुदितोधोयथादृशा ततःसागर्भचिन्हेनप्रचकाशेपतिव्रता २५॥ ७ ॥

१६ १७ १८ १९ तथापीतिपारमेश्वरःशैवःनदृश्यतेस्म नदृष्टः लट्स्मे २० द्रोणीति अनात्मजा अपुत्रा २१ तावदिति वाक्यालंकारेसाकल्पेवा न

गःपर्वतोवृक्षोवा २२ इतीति वाग्यं अनगन्नगन्नगा २३ २४ २५

अचिरेति अचिरोदितः शीतांशुर्यस्यांसा वराश्रेष्ठा माहेन्द्रीहरित् दिगिवदोहदंगर्भचिन्हं तत्संबंधिन्याव्यथया २६ २७ २८ २९ अथे ति वैजनने सूतिमासे ३० शतेति सर्वैर्लक्षणैः कांतंसुन्दरंस्वार्थेकः ३१ ३२ ३३ पाखंडानामिति वामेनचक्षुषा समस्पंदि अनिमि

अचिरोदितशीतांशुर्माहेंद्रीवहरिद्वरा दौहदव्यथयातांतंतदीयंवपुरुज्वलम् २६ अतीतहिमबाधेवशिशिरा त्ययपद्मिनी सुजातचारुसर्वांगीसर्वाभरणभूषिता २७ शिवव्रतोभगवतीददर्शहृदयंगमां विद्यामिवोत्तमांवि द्वान्जन्ममृत्युविनाशिनीम् २८ ततोलग्नेशुभेतस्याश्चक्रेपुंसवनक्रियां मासेषष्ठेचसीमंतंगर्भकर्मचसर्वतः २९ अथवैजननेप्राप्तेपंचसूच्चस्थितेषुच ग्रहेषुलग्नेशुभगेगुरुणाचेंदुनान्विते ३० शतताराख्यनक्षत्रेसाध्वीभ गवतीसुतं असूतान्यमिवस्कंदंसर्वलक्षणकांतकम् ३१ दिविदुंदुभयोनेदुःप्रसन्नानिपयांसिच अवर्षिकु सुमंदैवैरस्पन्दिमरुतासुखम् ३२ अनर्त्तिसुरकांताभिरगाय्यपिचकिंनरैः अस्रंसिगर्भैःशाक्यानामनलैर्ज ज्वलेतदा ३३ पाखंडानांसमस्पंदितदावामेनचक्षुषा शैववैदिकधुर्याणांदक्षिणेनचचक्षुषा ३४ अरिष्ट मभवत्तस्यज्योतिषापरितस्फुरत् प्रदीपास्संन्निधौतस्यमध्यान्हारोपिताइव ३५ जातकर्मविधायास्यब्रा ह्मणेभ्योददौधनं तदंकितांकासासाध्वीबभौभगवतीतदा ३६ उत्पन्नकौस्तुभमणिर्वेलाक्षीरांबुधेरिव गवांद्वादशसाहस्रंद्विजेभ्योदाच्छिवव्रतः ३७ भोजयामासविप्रौघान्द्वादशेन्हिशिवव्रतः चकारनामक रणंहरदत्तइतिद्विजः ३८ ववृधेरक्षितोबालःशैलादिरपरोयथा क्ववाक्ववेतिपाषंडान्रुदितछद्मनाशिशुः

त्तसूचकमेतत् शैवेतिशुभसूचकमेतत् ३४ अरिष्टमिति अरिष्टंसूतिकागृहं मध्यान्हारोपिताइव निस्तेजस्काइतिभावः ३५ जाते

ति तेन बालेनांकितः अंकोयस्याः ३६ ३७ ३८ ववृधे इति शैलादिर्नन्दी ३९ ४० वबंधेति आर्हतान् जैनान् कुट्टयिष्यन् मुष्टिभिर्मस्त
प्रहारं करिष्यन्निव ४१ शिवेति दृष्टिरुन्मीलिता हर्षादिति भावः अंगुष्ठेति अंगुष्ठमात्रः पुरुष इति श्रुतिप्रतिपादितस्य जगत्प्रभोः स्तोत्रं

उच्चैः संतर्जयामास वेदबाह्यां दुरात्मनः घातयिष्यन्निव रिपून् चरणावुदनीनयत् ४० बबंध मुष्टिमसकृत्कुट्टयिष्यन्निवार्हतान् यदोन्ननाममूर्द्धानं बाल्ये भगवतीसुतः ४१ शिवागमैश्च वेदांतैर्दृष्टिरुन्मीलिता तदा अंगुष्ठपुरुषस्तोत्रं तव वाग्जन्मनः फलम् ४२ इति ब्रुवन्निवांगुष्ठं समुखे विदधे सदा बहिर्निष्क्रमणं तस्य चतुर्थे मास्य रोचत ४३ दुर्मतध्वांतभेदाय भानोरिव समुद्गमः अश्नतश्चान्नमब्दार्धे व्यवर्धत दिने दिने ४४ शिवापदानमधुरैर्गीतैः समुपलालितः जनन्यास्तन्यपायी सन् वदने दत्तलोचनः ४५ अंकुरद्दशनो बालो पित्रोः प्रीतिमवर्धयत् अष्टमेङ्कुरितारेजुर्दंतास्तस्य मुखांबुजे ४६ प्ररोह इव विद्यानां विमलाः शुभजन्मनः जानुभ्यामपि बाहुभ्यां यदा संचरति स्म सः ४७ तदा प्रतिष्ठिता वेदाश्चत्वारो भुवि निर्भयाः वत्सरांते नदीस्नानं कारयित्वार्भकस्य सः ४८ ब्राह्मणान्भोजयामास बंधूनपि समागतान् ४९ मात्रा त्रिपुंड्रांकितफालदेशो पूजासु शंभोः पितुरंतिकस्थः ॥ स्निग्धां प्रतिष्ठाप्य शिलां पुरस्तादानर्च शंभुं सविडंबनेन ५० स स्नानादिषु कालेषु बभूव पितुरंतिके उरस्फुरन्व्याघ्रनखोक्वणन्नूपुरकिंकिणिः ५१ अथैकदा धनुर्मासे भानोः प्रागुदयाद्द्विजः समर्च्चयिष्यन्नीशानं प्रस्थितः स्नातुमुद्यतः ५२ ॥

४२ ४३ दुर्मतेति दुर्मतम् अवैदिकमतम् तदेव ध्वांतं तस्य भेदाय विदारणाय ४४ ४५ शिवेति शिवस्य अपदानानि कर्म्मवृत्तानि तैर्मधुरैः ४५ अंकुरदिति अंकुरन्तः प्ररोहन्तः दशना दन्ता यस्य ४६ ४७ ४८ ४९ स्निग्धेति विडम्बनेन अनुकरणेन ५० स इति उरसि स्फुर

न्तः व्याघ्रनखाः भूषणीभूता यस्य ५१ ५२

५३ अथेति अर्भकः साद्वैसंवत्सरद्वयः ५४ शिवेति उरःसमुत्थितः औरसःपुत्रः इत्याश्लिष्य एकाकीनिशिसमागतइतिशिरोजिघ्रन् कच्छाद्विनि अ·४६
र्गतपुत्रंपिताशिरसिजिघ्रतीतिस्मरणात् ५५ तीरेति वक्षोदघ्रेउरःप्रमाणेप्रमाणेहपसचदघ्रजितिप्रमाणार्थेदघ्रच्प्रत्ययः ५६ ५७ हरेतिह

ऋंतिकेनीयतांबालोनिद्राणइतिचोदिता श्रुत्वापिभर्त्तुर्वचनंनिद्राढ्याभगवत्यभूत् ५३ अथाग्रेपितरंयांतमनुद्रुस
समुत्थितः अर्भकःप्रययौतीर्थंपितायत्रनिमज्जति ५५ शिवव्रतस्तमायांतंवीक्ष्यचोरःसमुत्थितः इत्याश्लिष्यशिरोजि
घ्रन्शिवतीर्थतटंययौ ५५ तीरेशिशुमवस्थाप्यवक्षोदघ्नेजलेस्थितः मंत्रैःसंप्रोक्षणंकुर्वन्ममज्जातर्जलेसुधीः ५६
ऋंतनिरुद्धनिश्वासःसूक्तंपौरुषमस्मरत् अदृष्ट्वाजनकंबालःप्रातिष्ठतगृहंप्रति ५७ हरालयाररंध्रुन्नमदृष्ट्वा
मार्गमर्भकः परिक्रम्यतदीशानसन्निधौदीपशोभितं ५८ स्थित्वाभिमुखमीशस्यरोदनायप्रचक्रमे आकार्यसं
निधौशंभोःशिशुमर्चकवाक्यतः ५९ कबालइतिचितावान्स्नात्वोत्तीर्णःशिवव्रतः जजापज्योतिषेमंत्रंदत्वार्घ्यं
समुदेष्यते ६० अथार्भकःप्रकोष्ठननेत्रमंजनचिन्हितं प्रमृजन्नरुदद्देहीस्तन्यमंबेत्यनुक्षणम् ६१ आहूय
करुणासिंधुर्गौरीद्रोणीपुरीश्वरः अंबेत्याहूयभवतीमयंरोदितिबालकः ६२ देहिस्तन्यामृतंतस्मैतत्प्रियं
मेत्यवोचत अथमूर्त्तिमतीदेवीजगतांजननीशिवा ६३ आगत्यास्यांतिकंबालमंकेकृत्वासुविस्मिता स्त
न्यामृतरसैःपूर्णचषकंहेमनिर्मितम् ६५ ददौगृहीत्वातद्भक्षुधितःसचतत्पपौ ६५ वेदांतबोधमयमंबिक
यावितीर्णस्तन्यामृतंतदनुपीतवतोर्भकस्य उद्गारपूरइवसूक्तिसुधाप्रवाहोवक्त्रादजायतजगत्त्रयतापहारी ६६

रालयस्यशिवालयस्यअररेण कपाटेन-रुद्धंमार्गं ५८ ५९ केतिसमुदेष्यतेज्योतिषेसूर्य्यीय ६० ६१ ६२ ६३ आगत्येति चषकंपानपात्रं ६४ ६५ ६६

६७ ६८ ६९ यदेति एतत्सानपात्रंमनीषिणांविदुषांअर्थेनप्रयोजनेनहृद्यंमनोहरंसकलविद्याप्रदगौरीस्तन्याधारत्वादितिभावः ७० अ
स्माकमिति संविदृशा ज्ञानदृष्यासमिंधेदीप्यते त्रिदृग्धीदोसाविति धातोर्लिट् ७१ ७२ ७३ इतिश्रीमानवल्युपनामकनृसिंहविर

अथगौरीभगवतीरुदितस्यप्रशांतये तस्यदर्शिततांटंकासद्यएवतिरोदधे ६७ सुप्रभातंततोजज्ञेद्रोणीपुरनि
वासिनां शिवव्रतःकृतजपःजगामशिवसन्निधिम् ६८ सहेमचषकंहस्तेबालस्यालोक्यसस्मितः कस्योच्छि
ष्टमिदंदूरेत्यजेतितमतर्जयत् ६९ यदास्यहस्तदंडेनचषकंक्षेपुमागतः तदाभंकोजगादेतदर्थंहृद्यंमनीषि
णाम् ७० अस्माकमज्ञानतमःप्रणष्टसंविदृशासंस्तुतिभीतिशांत्यै पुरःप्रबोधायकृतोमृडान्याभाणिक्यताटंक
रविःसेमिंधे ७१ अहोबालोग्रहग्रस्तःनिर्गतोनिशिचत्वरे भस्मरक्षापिताकृत्वाष्टच्छत्किंचिन्निवेदितम् ७२
तदानींमिलिताःशंभोःसंनिधौनागराजनाः अमृतानीवविकिरन्नस्तौषीद्दीशमर्भकः ७३ इतिश्रीस्कांदो
पपुराणेभक्तविलासेषट्चत्वारिंशोऽध्यायः ४६ श्रीअगस्त्यउवाच गौरीसुतोहंदेवेशस्तन्यपानेननंकर क्ष
मस्त्ववाचाविहितमपराधंविभोमम १ एणीदृशालंकृतविग्रहायवाणीशमुख्यामरसेविताय वेणीजटा
बद्धसरिद्वरायद्रोणीपुरीशायनमःशिवाय २ ब्रह्मांतभेदामयभेषजाघ्रयेब्रह्मांडसृष्टिस्थितिनाशसाक्षिणे ब्रह्म
स्तुतिप्रीतिमतेदृहन्महस्ततोनमोब्रह्मपुरीश्वरायते ३ विद्यानवद्याविमलाचकीर्त्तिर्वेदागमोक्तेचविधौचि

चितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांषट्चत्वारिंशोऽध्यायः ४६ ॥ ॥ॐ॥गौरीति हेशंकरस्तन्यपानेननिमित्ते
न अहंगौरीसुतः १ स्तुतिमारभते एणीत्यादिना एणीदृशागौर्यां अलंकृतः विग्रहः कायोयस्यतस्मै अन्यत्सुगमं २ ब्रह्मेति पिपीलि

सएवामयोरोगः तस्यभेषजंऔषधरूपः अंघ्रिर्यस्यतस्मैहेबृहत् हेब्रह्मन् ३ ५ नालीकनेत्रेति नालीकनेत्रःपुण्डरीकाक्षोविस्मुरि
स्वर्थः तेनअर्चितंचारुचक्षुर्यस्मै हरिस्तेसाहस्रमित्यादिनास्पष्टं नालीकैःपद्मैःसंपूज्यपदांबुजंयस्यतस्मै केलीस्मितेन विलास मंद

विश्वासभाग्यंयदनुग्रहेणतस्मैनमोवेणुपुरीश्वराय ४ नालीकनेत्रार्चितचारुचक्षुषेनालीकसंपूज्यपदां
बुजाय केलीस्मितप्लुष्टपुरत्रयायकालीपुरेशायनमःशिवाय ५ जंभारिलोकद्रुमपुष्पमालासंभावनीयांघ्रि
सरोरुहाय अंबामहासेनसमन्वितायचंपापुरीशायनमःशिवाय ६ पंचपातकहंत्रेतेपंचब्रह्मस्वरूपिणे
पंचभूताधिपतयेपंचार्णतनवेनमः ७ त्रयीतनुतायत्रिपुरांतकायत्रिवर्गदायत्रिगुणातिगाय त्रिमूर्तयेस्तु
त्रिपुटीनियंत्रेत्रैलोक्यनाथायनमःशिवाय ८ त्वामेववाग्वदतुपश्यतुलोचनंमेत्वामेवसन्नमतुमौलिरपिश्रु
तिर्मे नित्यंश्रृणोतुचरितंतवचंद्रमौलेस्वामिन्मनःस्मरतुतावकमंघ्रिपद्मम् ९ इतिस्तुत्वामहादेवंसाद्रिंस
वत्सरद्वयः कुंचितैकपदोहस्तेननर्त्तचषकंवहन् १० नेदुर्दुंदुभयोदिव्याःनिपेतुःपुष्पवृष्टयः जगुःकलंचगं
धर्वाःजगत्तरलितंमुदा ११ शिवप्रसादमालोक्यशिशोतस्मिन्प्रकाशितं सिद्धाविस्मयमाजग्मुःप्रणेमुःसक
लाश्चतम् १२ अथगौरीपदांभोजनिर्माल्यसमलंकृतं शिबिकांबालमारोप्यनिन्युःशिवगणागृहम् १३
गौरीस्तन्यामृतामोदवासितंतदाननं जिघ्रतीजननीमेनेकरेकैवल्यसंपदम् १४ ॥ ७ ॥ ७ ॥

हासेनप्लुष्टंदग्धंपुरत्रयंयेन ५ ६ पंचेति पंचपातकानांब्रह्महत्यादीनांहंत्रे पंचब्रह्माणः सद्योजातादयःस्वरूपंयस्य पंचार्णः पंचा
क्षरीमंत्रः सएवतनुर्यस्य ७ त्रयीतिऋग्यजुस्सामरूपयातुतायत्रिवर्गोधर्मकामार्थसमुदायःतंददातीतितस्मैत्रिगुणातिगाय

स्मिन्मात्रस्वरूपिणेत्रिपुरीनियंत्रेध्यानगोचरायनमः ८ उपसंहरतिइतीति १० ११ १२ १३ १४

१५ १६ छायेति कुशीलवंगायकंनीलकंठंनामभक्तं १७ १८ संभाव्येति अंबिकासूनुर्हरदत्तः १९ २० २१ २२ २३ २४ २५

अथरात्र्यांव्यतीतायांगत्वाकोलवनेश्वरं नत्वास्तोतुंप्रवृत्तेस्मिन्नभूत्तालद्वयंकरे १५ हेमतालकरश्चक्रेतालबं
धमनोहरेः वचोभिस्तवमीशस्यतेनप्रीतोभवद्धरः १६ छायावनेशिवंस्तुत्वाप्रत्यागच्छन्निजंपुरं कुशीलवंवनीं
प्राप्तंनीलकंठेनमोदत १७ सोभूज्जात्यानिकृष्टोपिसर्वेषांमानभाजनं गायतांशिवनामानिनकर्मकुलदूषणम्
१८ संभाव्यस्तस्यदास्येननीलकंठोभवत्कृती कृतचौलोंबिकासूनुश्रीमद्व्याघ्रपुरंगतः १९ स्तुत्वाशंभुंततोः
द्राक्षीन्मुक्तयेनृत्तमीश्वरं वृद्धाचलंततोगत्वास्तुत्वातत्रमहेश्वरम् २० स्तोष्यन्हरावतारेशंनिशिश्रांतोभ
वत्पथि शिवप्रसादतःस्वप्नेप्रातःप्राप्तांसमौक्तिकाम् २१ दत्तांब्राह्मणयूथेनशिबिकांछत्रमुत्तमं चिन्हवा
द्यंचजग्राहबालव्यजनमुत्तमम् २२ राजराजस्तुतोवाग्मीतत्रस्तुत्वामहेश्वरं अथापशिबिकारूढोजन्म
धाममहाकविः २३ अथोपनीतोगुरुणाब्रह्मचर्यव्रतांचितः अद्ध्यैष्टचतुरोवेदानपठत्सकलाःकलाः २४ अ
थविद्यासुसर्वासुसारांशःकोभवेदिति विचार्यत्यक्तसर्वाशःपंचाक्षरपरोभवत् २५ वागीशंसुहृदंप्राप्यस्तुवन्स्था
नेषुशंकरं चचारपालयन्लोकान्यथाभानुर्भुवंगतः २६ दुर्निवारमपस्मारंराजपुत्र्यानिवार्यसः दृष्ट्यैवदिव्य
याथागात्स्तोतुंशोणाचलेश्वरम् २७ तत्रातिवाह्यहेमंतंसुरक्षन्निखिलाञ्जनान् पुनःकवेरजातीरंदक्षिणंप्रा
प्यसत्कविः २८ क्रमेणशंभुस्थानेषुतुष्टावस्वेच्छयागिरा एकदाग्रीष्ममध्यान्हेपरिश्रांतोमहातपैः २९ कविःस

स्मारमनसाचंद्रलेखाविभूषणं कायमानय
थास्याभूत्कणमौक्तिकनिर्मितम् ३० ॥

२६ २७ २८ २९ कविरिति कायमानं पर्णशालां ३०

३१ स्तुत्वेति गवावतारे क्षेत्रविशेषे ३२ ३३ ३४ ३५ सेति अस्मैवणिजे अहिना दष्टः पीतोमृतइतिभावः ३६ ३७ ययतुरिति श्रीपुरंकम

दृष्ट्वा देवाश्च तत्सर्वे विस्मिताः किंपुनर्नराः स्तोतुं कुंभेश्वरं प्राप्य मध्यार्जुनमनुत्तमम् ३१ स्तुत्वा शंभुं महालिंगं त्रि
रात्रं तत्र सोवसत् पित्रा गवावतारे स्वं प्रार्थितो यष्टुमिच्छता ३२ तुष्टाव तत्र श्रीकंठं सददौ धनमुत्तमं द्रव्यं पि
त्रे स तद्दत्वा यजेति समचोदयत् ३३ स्थलेषु संचचाराथ शंभोर्भूयो महाकविः अथानेकस्थले वापि कुत्रचि
द्दिवसे पथि ३४ प्रेतस्य पुरतः कांचिद्ददर्श रुदतीं सतीं परिदेवनमूलं किमित्यपृच्छत्सतां स्त्रियम् ३५ साब्र
वीत्प्रांजलिः पित्रा दत्तास्म्यस्मै वणिग्वरः दष्टोयमहिना पीतोस्म्यनाथा रक्षमामिति ३६ माभैरिति च तामुक्त्वा नी
लकंठस्तवेन सः वैश्यमुज्जीवयामास मुदितौ तौ च दंपती ३७ ययतुः स्वां पुरीं भूयः प्रणम्य शिवनंदनं ततः श्री
पुरमासाद्य नत्वा श्रीत्यागनायकम् ३८ अस्तौषीद्वचसां गुंफैः कल्हारैर्विकचैरिव वाग्मी च वाचा विवृतं श
रण्ये शालयादरम् ३९ ज्ञानसंबंधसूक्त्याथ भूयस्संजघटे तरां पांड्यदेशे जिनग्रस्ते कुलपक्षेण मंत्रिणा ४०
आहूतः संनिधौ शंभोः वादं कृत्वार्हतैः समं जित्वा जिनाष्टसाहस्रं शूलेष्वारोपयत्कविः ४१ श्रीऋषय ऊचुः
कथमारोपिताः शूले जिनाः क्षपणकद्विषा कुंभसंभव तत्सर्वं विस्तारा द्वक्तुमर्हसि ४२ श्रीअगस्त्य उ॰ मधुरा
यां पुरा कश्चिज्जयध्वजसमाहूयः पांड्यः शतक्रतुस्पर्धी जिनैरासीत्स वंचितः ४३ चोलेंद्रदुहिता तस्य सुमतिर्ना
मवल्लभा सचिवः कुलपक्षाख्यो शिवभक्तगणाग्रणीः ४४ कुलक्रमागतां शंभौ भक्तिं चोलसुतावहत् हालास्येश्व

लालयं नामक्षेत्रं ३८ ३९ ज्ञानेति कुलपक्षेण तन्नामकेन ४० ४१ कथमिति क्षपणकद्विषा हरदत्तेन ४२ ४३ ४४ ४५ ॥ ॥

निषेव्यनिर्गतंकेचिदाहुर्मायाविदःशठाःशिलायांदेवताबुद्धिस्त्वम्ढोसिमहीपते ४६ यदुपासनयादुष्टंकर्मसाक्षान्न
शाम्यति किंतस्यसेवयाभाविशल्मलीसेवयायथा ४७ यदस्माभिरुपास्यंतदैवतंफलदंपुरः परीक्षाक्रियतांराजन्
सिद्धंचेदार्हतोभव ४८ अथकौतुकनाथेनदृष्टाजैनाःकथंत्विति ग्रावाणस्त्वंगृहाणेतितंप्रोचुःसतथाकरोत् ४९
पस्पर्शकिंचित्सिक्ताग्रैःराजहस्तस्थितान्जिनः माणिक्यभावमगमन्ग्रावाणस्तेतदीक्षिताः ५० तत्सादेप्रणमन्पादौ
ऊषतुस्तेमिथोभक्तान्रक्षंतौशिवसम्मतान्॥ सु
मतेर्वैशगोरूपादासीत्सांख्योजिनोपिसन् ५२ दध्यौतदनुसारायभस्मभोगेषुसोत्सुके चिरकालेगतेमंत्रीराज्ञीस
विजनेस्थिताम् ५३ प्राहप्रह्वोत्रहेदेविदेशोस्माकंजिनैर्वृतः संत्यक्ताचपुरीसेयंशिवभक्तैर्महात्मभिः ५४ भवत्स
साद्याचमयाभक्ताःकेचित्प्रतिष्ठिताः संरक्षणीयोराजानःसहर्त्तव्यादृमेजिनाः ५५ राज्यभ्यनुज्ञायदितेनचैतन्मम
दुष्करंउपायःकोन्वितितयादृष्टःससचिवोत्तमः ५६ ज्ञानसंबंधवृत्तांतंयथाश्रुतमवर्णयत् गौरीस्तन्यामृतास्वादसं
प्राप्तपरमार्थदृक् ५७ आहूयतामित्यादिष्टोमंत्रीविप्रानचोदयत्तेचवेदविदोविप्रावेदाग्रायेचवाक्पतिम् ५८ प्राप्यगौरी
सुतंप्रोचूराज्ञीमंत्रिसमीरितं हरदत्तोथमुदितोतत्रावस्थाप्यवाक्पतिम् ५९ मौक्तिकादोलिकारूढोप्रतस्थेसोगतां त

५६ ज्ञानेति ज्ञानसंबन्धस्यहरदत्तस्य ५७ आहूयतामिति वाक्पतिं वागीशं ५८ प्राप्येति गौरीसुतंहरदत्तं ५९ ६० इतिश्रीमानवल्युपना
मकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांसप्तचत्वारिंशोऽध्यायः ४७ ॥ ॥ ❀ ॥ ४७ ॥

ततइति प्रस्थानानंतरं १ तृतीयेति गणेशस्कन्दापेक्षया २ दुर्निमित्तान्येवजैनानामाह चैत्येति ३ ४ ५ ६ ७ ८ कल्पयामासतुरि

श्रीअगस्त्यउ॰ ततोमार्गेमहेशस्यस्थानानिसुबहूनिसः निषेवमाणःशनकैर्हरदत्तोजगामह १ तृतीयेतनयेगौर्याःप्रस्थितेमधुरांप्रति आर्हतानामभावायदुर्निमित्तानिजज्ञिरे २ चैत्यप्रासादमामूलंपतितंददृशुःक्षितौ स्वप्नेचकुंडिकांध्वस्तांपाठितंचनिजंकटम् ३ कटंचंडानिलग्नस्तंपिंछाग्रंदग्धमग्निना अपश्यन्नार्हताचार्यंक्षपणाव्याघ्रभक्षितम् ४ स्त्रियश्चमुंडितादृष्टाश्चारुदन्जिनदेवताः अथदुःस्वप्नमालोक्यतंराज्ञेतेन्यवेदयन् ५ अथराजापितान्प्राहस्वप्नदग्धार्थमग्निना सभायांसचिवौदृष्ट्वामोचयंतौबभूवतुः॥ किंवाकर्त्तव्यमितितेसर्वेविमनसोभवन् ६ अथपथिधरणीसुरैःकृतार्हैरवनतमौलिरवेक्ष्ययोगिवर्यान् मणिमयशिबिकोत्तमाधिरूढोमधुरकविर्मधुरांतिकंविवेश ७ अथागतानांविप्राणांप्रेषितानांपुरास्वयं मुखादाकर्ण्यमुदितौज्ञानसंबंधमागतौ ८ कल्पयामासतूराज्ञीसचिवौचोपकारिकां ९ स्नानापदेशात्सचिवःकवींद्रंप्रत्युद्ययौतंप्रहितश्चराज्ञा मठोत्तमेवेगवतीतटांतेप्राप्यांतिकंतत्पदयोःपपात १० पृष्टःकोयमितिप्रोक्तोमंत्रीतिद्विजपुंगवैः हस्तेगृहीत्वातंप्राहमदाव्हानप्रयोजनम् ११ किंवेत्युपव्हरेपृच्छत्शिवव्रतसुतःकविः इतिपृष्टोथसचिवस्तमाहविहितांजलिः १२ वेदांतागमसिद्धांतप्रतिष्ठार्हतनाशनं फलंममेतिपदयोःप्रणनामपुनःपुनः १३ आलयंतत्कियद्दूरेमीनाक्षीसुंदरेशयोः इत्यमात्यंसपप्रच्छसोप्यदर्शयदंतिके १४ अथगोपुरमालोक्यमणिकुंभैरलंकृतं प्रणनामससाष्टांगंस्ना

ति उपकारिकांनिवेशसद्म ९ १० ११ १२ १३ १४ १५

स्नात्वावेगवतीपूरेभस्मोद्धूलितविग्रहः मुक्ताप्रवालांतरितांबिभ्रद्रुद्राक्षमालिकाम् १६ मौक्तिकांदो
लिकारूढोमौक्तिकच्छत्रभूषितः वीथीविधातुकामोगाद्रोपुराणांप्रदक्षिणम् १७ गंधतैलावसिक्ताभि
र्दीपिकाभिर्दिनास्यये उद्भासितपुरोभागःपुरींपश्यन्ययौशनैः १८ चत्वरेषुजिनाःसर्वेसंघीभूयविलो-
कयंतं आश्चर्यकृष्टमनसस्तस्थुश्चित्रार्पिताइव १९ आययौवैदिकाचार्यः आययौकविशेखरः आययौ
तनयोगौर्याइतिकाहलिकानदन् २० वंदिनोवाग्मिनोग्रेस्यपेठुश्चबिरुदावलीः जयवैदिकसिद्धांतवे
दांतस्थापनोद्यत २१ जयाद्रिकन्यकास्तन्यसुधामधुरवाङ्मय जयकौंडिन्यगोत्राब्धिवर्द्धिपूर्णसुधाकर
२२ जयदुष्टार्हतमतध्वांतध्वंसदिवाकरजयक्षपणकध्वांक्षक्षोभप्रस्तरभाषित २३ अयोघनोयंजिनकुं
डिकानांचंडानिलस्तत्पटसत्कटानां दावानलस्तत्करपिंछकानांआयातिचैत्याचलवज्रसूक्तिः २४ पला
यध्वंनिलीयध्वंरेरेचार्वाककौशिकाः ज्ञानसंबंधचंडांशुरुदितोसौप्रकाशते २५ इतितद्विरुदावल्यःपठिता
स्तत्पुरःसरैः तथागतानाकर्णेषुपेतुर्भोलयोयथा २६ अथश्रीज्ञानसंबंधःकृत्वावीथीप्रदक्षिणं वाहनादव

इति रूपकाणि चैसंजैनमंदिरं तदेवाचलः तस्य वज्ररूपासूक्तिर्यस्य २४ पलायध्वमिति रेरेइति नीचसंबोधने वाक्यादेरित्यादिना संभ्रमे द्विरुक्तिः चार्वाकाएव कौशिकाघूकाः २५ इतीति तथागतानां सौगतानां २६ २७ ॥ ॥ ॥ ॥

२८ २९ हेमेति हेमाब्जिनी सुवर्णपद्मिनी हेमाचलएवत्राकर्षितं कार्मुकंयेन ३० ३१ ३२ ३३ ३४ लीलेति लीलानांयाचतुष्षष्टिःविंशत्या

शिवाशंकरयोर्मध्येनमस्कृत्वामहाकविः लिंगंज्योतिर्मयंशंभोःदिव्यचंदनचर्चितम् २८ सूर्यकोटिप्रतीकाशं
सोमार्द्धकृतशेखरं सोपहारंप्रणम्येशंस्तोतुंसमुपचक्रमे २९ हेमाब्जिनीतीरनिकेतनायहेमाचलाकर्षितका
र्मुकाय हेरंबषडूक्रसमन्विताय हालास्यनाथायनमःशिवाय ३० पांड्याधिराजार्पितपादुकायफणाधराधी
श्वरकंकणाय पाखंडदूरायपरात्मरायहालास्यनाथायनमःशिवाय ३१ कंदर्पदर्पोर्णवबाडवायकंठस्थला
कल्पमहाविषाय कल्पांतवन्ह्यास्पदलोचनायहालास्यनाथायनमःशिवाय ३२ मंदाकिनीभूषितमस्तका
यमंदारमालांचितमस्तकाय वृंदारकाधीशमुनिस्तुतायहालास्यनाथायनमःशिवाय ३३ वेदांतविज्ञान
सुखप्रदायनादांतरूपायनटेश्वराय पूतांतरंगैःपुरुषैस्तुतायहालास्यनाथायनमःशिवाय ३४ लीलाचतुष्ष
ष्टिसुधार्णवायहेलास्मितपुष्टपुरत्रयाय मूलायवेदागमवल्लरीणांहालास्यनाथायनमःशिवाय ३५ ना
नाभवव्याधिविनाशनायदीनावनांगीकृतविग्रहाय भानात्मनेभस्मविलेपनायहालास्यनाथायनमःशिवा
य ३६ सामप्रियायसकलागमसंस्तुतायसांबायसंस्कृतिमिश्रसुदीपकाय सत्यात्मनेसकललोकविलक्षणा
यसाक्षात्कृतायशितिकंठनमःशिवाय ३७ श्रीअगस्यउ॰ इतिस्तुत्वामहादेवंमहाकविजनाग्रणीः नमस्कृत्वा
चमीनाक्षीमस्तोषीदमृतोक्तिभिः ३८ मातर्मतंगकुलवल्लभमान्यमूर्त्तेमंदस्मितद्युतिमनोज्ञमुखारविंदे मंत्रात्मिके

याः सदैकत्वइति संख्यायामेकवचनं तस्याःसुधार्णवाय ३५ ३६ ३७ ३८ ३९

कुंदस्मितेकुमुदबंधुकलावतंसेकुंभस्तनालिखितकुंकुमपंकरेखे कोणत्रयैकनिलयेकुलशैलबालेमह्यं
प्रसीदमलयध्वजपांड्यकन्ये ४० लीलाशुकार्भकमनोहरहस्तपद्मेनीलालकग्रथितनिर्मलकैतकाले हालास्य
नाथसहचारिणिहंसयानेमह्यंप्रसीदमलयध्वजपांड्यकन्ये ४१ कल्याणकल्पलतिकेकरुणाकटाक्षकल्लो
लनस्तितकवित्वकला नदीके मारावरोधसुभगेकरुणानुकंपेमह्यंप्रसीदमलयध्वजपांड्यकन्ये ४२ क
र्णावतंसितकदंबवनप्रसूनकौशेयकांतिनिजकल्पतरुप्रवाले कस्तूरिकातिलकरंजितफालदेशेमह्यंप्रसी
दमलयध्वजपांड्यकन्ये ४३ सद्यःसमुद्यदरुणद्युतिमांशुकाभेसौभाग्यदानहतकौतुकदीर्घनेत्रे संध्यानट
प्रलयतांडवसाक्षिभूतेमह्यंप्रसीदमलयध्वजपांड्यकन्ये ४४ मस्तार्पितंमणिरिवश्रुतिमालिकायांमान्यंमु
कुंदकमलासनशंकराद्यैःमंजीरशिंजितकृताभयमंघ्रिपद्मंमन्मूर्ध्निदेहिमलयध्वजराजकन्ये ४५ शिक्षा
मवापमहतीनिकटेगुरूणांजन्मांतरेषुचशिवंपरमर्चयित्वा मीनाक्षिपुण्यपरिपाकवशात्त्वदंघ्रिप्राप्तस्यकु
स्यचिदुदेतिचिदात्मबोधः ४६ इतिदेवीमपिस्तुत्वाकृतपंचाक्षरीजपः कृत्वाप्रदक्षिणान्पंचजगामस्वोप
कारिकाम् ४७ इतिश्रीस्कंदोपपुराणेभक्तविलासेत्रयश्चत्वारिंशोऽध्यायः ४८॥ ७ ॥श्रीअगस्त्यउवाच॥
कदंबरास्तुसंभूयश्रुतद्विरुदोक्तयः बभूवुर्दुरहंकारदवाग्निप्लुष्टमानसाः १ हंतश्रुत्वास्मसुहृदःकस्यापिविरुदो

भक्तविलासप्रकाशिकायांअष्टचत्वारिंशोऽध्यायः ४८ ॥ ॥ ॥ कटंबरइति कटंबराजैनाः अहंकारएवदवाग्निः तेनपुष्टदग्धंमा
नसंयेषांते १ २ अयमिति ब्रह्मबंधोः अधमस्यब्रह्मबंधुरधिक्षिसेदित्यमरः ३ ४ ५ ६ ७ ८ हरदत्तमिति शिलायांशिरोघाते हियथा

अयंस्वयंपयःपानंपीत्वातस्यामृषाब्रवीत् ब्रह्मबंधोर्वटोरस्यदोरात्म्यंपश्यतार्हताः ३ बात्मएवास्यलोको
यंमायाबादेनवंचितः उपेक्षणीयोनास्माभिरयंव्याधिरिवेधितः ४ मठेवेगवतीतीरेवर्त्ततेब्राह्मणांकुरः
भानुर्योवदुदेत्यद्यमंत्रैस्तंमारयामहे ५ दिगंबराणांसिद्धांतंविजेतुमयमागतः इतीदृक्किंवदंतीत्रमहतीप्रथ
तेतराम् ६ इतिसंमंत्र्यतेमंत्रान्निशीथेजेपुरार्हताः क्षोदिकांतरमात्रेयैःहन्यतेद्रोहिणोजिनैः ७ तत्प्रेरितो
पिमंत्राग्निर्नतंपस्पर्शदुस्सहं कृतपंचाक्षरजपपीतगोरीपयस्तनम् ८ हरदत्तमहाराणंयज्वलनकीटकोयथा
तस्मिन्प्रतिहतेमंत्रेशिलायांशिरसीवते ९ साक्षादेवददुर्वह्निंमठेस्थानेमहात्मनां हरदत्तजनास्तत्रज्वलंत
वीक्ष्यपावकम् १० तस्मैनिवेदयामासुश्चकर्षाथसोनलं समूर्त्तःप्राजलिर्भूत्वादासोस्मीतिव्यजिज्ञपत् ११ आ
र्हतग्रहितस्यास्तुस्थितिःक्वापिनयुज्यता अंबासुतंसमभ्यर्च्यप्राहसप्तार्चिषंव्रज १२ यैरिहप्रेषितोसित्वंतेषांरा
जतनुस्थितिः अथाग्निःपांड्यभूपस्यवदधेवक्षणिज्वरः १३ निबध्यपाणीपादौचप्रक्षिप्तइवपावके व्याघू
र्णमानोनिश्चेष्टोबभूवावचनोनृपः १४ मंत्रीवेद्यंतथाहूयपप्रच्छामयकारणं जिनेंद्रादृष्टनाडीकाःप्रोचूराज्ञो
चमंत्रिणम् १५ नाडीनांनैववैषम्यमस्त्यहोस्मतविभोः अर्हतोऽस्तमयोयावत्ततःप्रागेवसज्वरम् १६ ॥ ॥

शिरसएवहानिस्तथामंत्राणांहरदत्तेप्रयोगेमंत्राणामेवकार्यासाधनप्रयुक्तनिंदादिस्त्याहानिरितिभावः ९ १० ११ १२ यैरिति तेषांराज्ञः

तनीस्थितिर्यस्यतादृशः ज्वरःज्वरीभूतइत्यर्थः १३ १४ मंत्री ति ग्रामयकारणं तेगत्वेतुम् १५ १६

राज्ञःप्रशमयिष्यामःपश्यविद्याबलंमहत् इत्यार्हतानांभिषजःपिच्छिकाग्रैर्महीपतिम् १७ प्रब्रुवंतोर्हद्विद्यास्तमाः
केशपदमामृजन् आमृज्यमानेतद्गात्रेव्यवर्धतमहाज्वरः १८ निर्वासाःपरमोराजाद्दह्यमानद्वाग्निना समीपेयेस्थि
तास्तस्यचिकित्सायाविधित्सया १९ सहसातेपिनिर्जग्मुर्दूनांगास्तज्ज्वरोष्मणा आहूतादूरतःकेचिदार्हताधृतपिच्छि
काः २० अर्हन्नर्हन्निितिमनुंजपंतःप्रामृशन्मुहुः औषधैरपिमंत्रैश्चप्रायस्ताःकीर्त्तयेजिनाः २१ निराशास्ततःसर्वे
संभूयोचुरिदंवचः कश्चिन्द्विजवटुःप्राप्तोतद्दासान्नृपतेर्ज्वरः २२ इतऊद्वासनेतस्यशाम्येद्देषमहाज्वरः अथा
कार्यवचोमंत्रीप्राहतानार्हताधमान् २३ शक्तिरस्तिनयुष्माकंतस्ययोगनिवर्तने तदुत्सारणमिष्टंवस्ततोन्
नंभविष्यति २४ ज्वरोनिष्कासकस्यापियदिस्यात्तन्निवर्त्तते कःशक्नोतिनृपस्यापिदुरवस्थेयमीदृशी २५
अत्रागत्यसचेत्पश्येत्प्रशाम्येत्स्वामिनोरुजा इत्युक्तेनैवतस्यापिशक्तिरित्यूचुरार्हताः २६ मंत्रिणाथस्वयंग
त्वासमानीतोंबिकासुतः विवेशपांडुप्रासादंदृष्ट्वैकटवाससाम् २७ महांतमार्हतंशैवपाखंडःसंस्पृशेत्कथं नि
स्सार्यतांबहिरयंशमयामोप्ययंज्वरम् २८ इत्यष्टसाहस्रकटांबराणांसंघस्समाहृत्यमहीपतिंतं दिव्यैश्चमंत्रैर्म
हितोषधैश्चशशाकनैवास्यरुजंनिभर्त्तुम् २९ यदामूर्च्छालुरभवन्नृपतिःसुमतिस्तदा शरणंबोधसंबंधमापमां
गल्यवृद्धये ३० अथतांप्राहकारुण्यान्महिषीमंबिकासुतःरक्षाम्यवश्यंभर्त्तारंमाभयंतेपतिव्रते ३१ ॥ ७ ॥

२१ २२ २३ २४ २५ २६ मंत्रिणेति भयंकर्तृकटवाससांजैनानांहृत्हृदयंविवेशेत्यन्वयः २७ २८ २९ यदेति मूर्च्छालुः मूर्च्छावान्सुमतिः

३२उन्मील्येतिशैवदेशिकं शैवाचार्यं ३३ ३४ उपवेश्येति अस्यसामीप्येन महीपतेराश्वासोबभूवेत्यन्वयः ३५ ३६ ३७ ३८ ऊचुरिति अहंप्रत्ययरूपः अहंकाराश्रयात्मरूपइत्यर्थः शांकरिः गौरीस्तन्यपानकर्तृत्वात् शंकरापत्यंहरदत्तः ३९ देहमितिसःदेहः विकारितया अस्तिजा

महिमानंशिवस्यात्रपश्यंतुसकलाजिनाः इतिभस्मसमादायसच्चिक्षेपनृपालिके ३२ उन्मील्यचततदेवाक्षिस
बोधःपांड्यभूपतिःजगादप्राञ्जलिरिदंशयानःशैवदेशिकम् ३३ स्वागतंतेमहाभागरत्नपीठंहास्यतां
इतिस्वमौलेस्सविधेस्थापितेसच्चिवेनतम् ३४ उपवेश्यमहात्मानंददर्शेदुमिवोदितं तदाश्वासोबभूवास्य
सामीप्येनमहीपतेः ३५ यथामहातपात्तस्यच्छायावृक्षस्यसंश्रयात् मणिपीठेस्थितंरात्रौमौलिपार्श्वेमहाद्यु
तिम् ३६ साभ्यसूयमवैक्षंतजिनाश्चोरारविंयथा निवासःकुत्रभवतामितिपृष्टोमहीभृता ३७ पुण्यंगौ
रीसुतश्चाहस्थानंद्रोणीपुरंमहत् भक्तिःकुत्रेतिसंपृष्टःशिवइत्याहसाक्षिणि ३८ ऊचुश्चासहमानास्तंशि
वोनास्तीतिचार्हताः अहंप्रत्ययरूपोसौसर्वत्रेत्याहशांकरिः ३९ देहमूचुरथात्मानंतेविकारितयानसः इत्युवा
चांबिकासुनुःप्रत्यक्षंमानमूचिरे ४० जिनाबहिर्मुखास्तेतद्दोमानंमहात्मनां इतिश्रीज्ञानसंबंधःततस्तेबहु
भाषितम् ४१ यच्चतद्दूषितमभूद्दूतंडाजातिनिग्रहैः जिग्येजिनाष्टसाहस्रमेकेनद्विजवर्णिना ४२ ॥ ७ ॥

यतेवर्द्धतेविपरिणमते अपक्षीयतेनश्यतीतिषड्विकारवत्वात् आत्मनश्चनिर्विकारित्वाद्विकारवान् देहोनात्मेतिभावः तथाचायंप्रयो
गः देहोनात्माविकारित्वात् यन्नैवंतन्नैवंयथापटइति ४० ४१ यदितिवर्णःप्राशस्त्यंतच्च स्मरणंकीर्त्तनंकेलिःप्रेक्षणंगुह्यभाषणंसंक
ल्पोध्यवसायश्चक्रियानिर्वृत्तिरेवचेत्यष्टविधमैथुनरहित्यरूपंतदस्यास्तीतिवर्णीब्रह्मचारीत्यर्थः वर्णिनोब्रह्मचारिणइत्यमरः ४२

जयइति मुनयोजैनाः मुनींद्रःश्रीघनःशास्तामुनिरित्यमरः ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ गृहीतुकामइति अंबिकासूनुनेति

जयोस्माकमितिप्रोचुर्निर्लज्जामुनयःपुरः निवार्यवाचिकलहंतस्यतेषांचपार्थिवः ४३ येनमेशमितोरोगस्तन्म
तस्यान्महत्तरं नवाचामहिमाज्ञातुंशक्योवर्षशतैरपि ४४ इत्युवाचस्वाभिमतंतत्क्षणेसमभूज्वरः वामभागे
ज्वरोस्माभिःशाम्यतेदक्षिणेऽमुना ४५ विनीयतेचेदेषस्यात्समोद्विजवटुर्भवेत् अस्त्वित्यनुमतेराज्ञापिंछाग्रै
स्तत्रभूपतिम् ४६ ममृजुःसिषिचुर्जैनाःकर्णिकाजलबिंदुभिः विद्याविशारदैर्वैद्यैरौषधैरभिवर्धितः ४७ जि
नांतस्थापितोराज्ञःज्वलतेस्मज्वरानलः हाहतोस्मिजिनैर्दुष्टैरित्युक्तामूर्छितोनृपः ४८ यदाभीतामहिष्या
सीत्तदासंजीवितोमुना रक्षेतिज्ञानसंबंधंवदन्नंजलिमादधे ४९ भस्मामृष्टमथानेनदक्षिणांगंमहीपतेः
उल्काभममृतांभोधौनिमग्नमिवविज्वरम् ५० वामेमहाज्वराक्रांतंदक्षिणेसुखनिर्भरं हालाहलमयंक्वापि
सुधामयमिवक्वचित् ५१ आसीत्पांड्यनृपस्यांगमार्हतास्तुनिशश्वसुः जिनामास्पृशतेत्युक्तातंनृपःशरणं
गतः सतुतत्राप्यदाद्भस्मप्रशांतश्चमहाज्वरः ५२ इतःप्रभृत्यस्तसभाप्रवेशोनमेजिनानामितिमंत्रिणंनृपः
उदीर्यनिष्कास्यसमस्तसौगतान्नीरोगगात्रःशरणंतमासदत् ५३ अथपंचाक्षरीविद्यांहालास्येश्वरसंनिधौ
५४ गृहीतुकामोनिरगादंबिकासूनुनानृपः निष्कासिताजिनाःसर्वेशोचन्नार्हतमीडिरे ५५ स्वप्नेप्रपश्यन्नात्मानं
शुष्ककाष्ठाग्रसंस्थितं भयोत्थितायदातावद्दुष्प्रभातमजायत अथसंगत्यतेसर्वेनृपमूचुरिदंवचः ५६ मास्मन्मतंदूष

सहार्थेतृतीया सर्वेअशोचन् आर्हतंमतंनईडिरेनस्तुतवंतः ५५ ५६ ५७ ७ ७ ७ ७ ७

५८ कथमिति अर्हतःस्वीयदैवतात् वरंश्रेष्ठंदैवतंनास्तीत्यन्वयः ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ अ.४९

बलंत्वमस्यैवपरीक्ष्यतांनचेद्रणोभविष्यत्यचिरेणतेश्वनः५७अथाभूत्कुपितोराजामंत्रीवर्णीप्रचोदितः ५८ कथं परीक्षेतिजिनानष्टच्छन्मिलितान्बहून् तेतमूचुर्दुरात्मानोनार्हतोदैवतंवरम् ५९ इतिपत्रेविलिख्याग्नौक्षिपा मोदग्धतेनतत् यद्यस्मन्मतमेवस्त्रीक्रियतांचतथामुना ६० तथेत्यनुज्ञयाराज्ञोनिरुद्धेग्नौतदक्षिपन् ददाह पावकःपत्रंतत्तूलमिवतत्क्षणात् ६१ अथश्रीज्ञानसंबंधोनदैवंशंकरात्परं इत्यालिख्यमहावन्ह्योपत्रंचिक्षेपवर्द्धिते ६२ गृहीत्वामूर्त्तिमान्वन्हिःपत्रंतज्जयपत्रवत् ददावंबासुतकरेसप्रणम्यतदग्रहीत् ६३ अथभीतोमहाराजोमंत्रीचप्रणमन्नमुं पुष्पदृष्टिरभूद्दिव्यावैदिकाश्चमुदंदधुः ६४ अथार्हताःपुनःप्राचुस्तब्योग्निरिति संगताः सरित्प्रवाहेप्रक्षिप्तंप्रतिपूवनवद्यदि ६५ क्रियतेलिखितंपत्रंभवान्विशतुनोमतं अथमंत्र्याहतान्प्राहक्रियतामत्रकःपणः ६६ वदतायंमहान्नोचेच्छापेनध्वंसयिष्यति मूलारोपणमेवास्तुतस्ययस्यपराजयः ६७ इत्यार्हताष्टसाहस्रमवोचद्राजसन्निधौ लिखितंपूर्ववत्पत्रंक्षिप्तंवेगवतीरये ६८ सहार्हतमतेनाब्धिंप्राप्तंसत्वैश्चखंडितं अंबासुतेनयक्षिप्तंपूर्ववद्धितास्थरम् ६९ प्रवाहेसरितस्तस्यतत्पत्रंप्रतिपुपुवे दिविदुंदुभिनिर्घोषःसशंखनिनदोभवत् ७० नृपःश्रीज्ञानसंबंधंशिवंमूर्तेममन्यत उत्साद्यवस्त्राणिकटान्ध्वंसयित्वाचकुंडिकाः ७१ दग्ध्वाचपिंडिकाग्राणिचैत्यंनिर्भिद्यचद्विषैः महाजिनाष्टसाहस्रंशूलाग्रेस्थापितंतथा ७२

७३ ७४ ७५ ७६ प्रतिष्ठामिति ईजिरेइष्टवंतः ७७ ७८ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराण
व्याख्यायांभक्तविलासप्रकाशिकायांमेकोनपंचाशोऽध्यायः ४९॥ ॥❀॥संप्रति पौरमंत्रिसहितस्यराज्ञः श्रद्धातिशयेनहरदत्तस्य

शूलप्रोतेषुबौद्धेषुतत्परीवारकोटयः धृतरुद्राक्षभस्मानःकेचित्तंशरणंगताः ७३ ररक्षशरणंप्राप्तानयंपूर्वजिः
नानपि शिवस्मरणमात्रेणमत्वाविगतकल्मषान् ७४ द्वीपांतरंगताःकेचिद्देशांतरमथापरे आसीन्नष्टंजि
नकुलंतमःसूर्योदयेयथा ७५ अथपंचाक्षरींतस्माद्गृहीत्वापांड्यभूपतिः महाभिषेकविधिनाहालास्येश
मपूजयत् ७६ प्रतिष्ठांवैदिकाजग्मुरीजिरेचमखैर्हरं ७७ सपांड्यभूपोनवरत्नराशिभिःपरार्थ्यहेम्नाचकृ
ताभिषेचनं निषेवमाणःशिवमेवदैवतंययौसमृद्धिंसुरनायकोयथा ७८ इतिश्रीस्कंदोपपुराणेभक्तवि
लासेएकोनपंचाशोऽध्यायः ४९॥ ॥ ७॥श्रीअगस्त्यउवाच कुलपक्षश्चसुमतिःपांड्यराजश्चनागराः त्रि
संध्यमन्वहंनत्वाहरदत्तमपूजयन् १ सभार्येणाथपांड्येनमंत्रिणाचसमन्वितः नारायणःशंकरश्चतौयत्रै
कौतदापसः २ त्रिकूटाचलमासाद्यतत्रस्तुत्वामहेश्वरं श्रीमद्वेणुवनेशंभुंतुष्टावगिरिजापतिम् ३ अ
थरामेश्वरंगत्वारामनाथंनिषेव्यतं समागतेनहालास्येस्वपित्राचसमन्वितः ४ स्तुत्वापांड्यंसहामात्यं
सभार्यंप्राहिणोत्पुरे तेचापिदेशिकंनत्वामधुरांप्राविशन्पुरीम् ५ अथश्रीज्ञानसंबंधःपित्राबंधुभिरावृतः
जगामसह्यजातीरंनावातांचातरद्विभुः ६ सौगताधिपतिस्तत्रतस्यपंथानमारुधत् आरोपितान्स्वान्शूलाग्रे

पूजापूर्वकंतेनसहउत्तमक्षेत्रसंचारंवर्णयति कुलपक्षइति १सभार्येणेति यत्रहरिहरक्षेत्रेएकौएकीभूतौतत्क्षेत्रं २ ३ ४ ५ ६

निशम्यकुपितोबलैः ७
सौगतेति आरुधत् समंताद्रुणद्धिस्म ७

सङ्गति दंभोलिवज्रं ८ ९ १० ११ अथेति एकस्याम्रतरोर्मूलंगच्छतीतितं आम्रतरुमूलवसतेरितिपञ्चशत्यां १२ सुवर्णेति श्रीगिरिम्

सनयावद्गतस्तस्यसमीपंद्विजवर्णिनः तावत्सपातदंभोलिस्तस्यमूर्ध्निदुरात्मनः ८ अथापरेतमाजग्मुःजिना
वादसमुत्सुकाः जिगायतान्सवादेपितेचतंशरणंगताः ९ संप्रेषयित्वापितरमथब्रह्मपुरंप्रति पराचलेचशो
णाद्रेशंभुस्कंदसन्निटे १० स्तुत्वाजिनप्रयोगेणविफलास्थूलभूरुहाः प्रीतयेशिवभक्तस्यसफलानकरोद्दृ
शा ११ अथकांचीपुरेदेवमेकाम्रतरुमूलगं स्तुत्वादेवींपराशक्तिमाकाशबिलचारिणीम् १२ सुवर्णमुखरी
तीरेकालहस्तीश्वरंगिरौ प्रीणयित्वाजगामाथकेदारंश्रीगिरितथा १३ गोकर्णेचमहादेवंतेषुस्तुत्वामहाकविः
अथगोकर्णसविधेशिवभक्तांघ्रिकिंकरः १४ कश्चिन्महाधनोनामवैश्यःक्षपणकद्विषः दातुकामःस्वतनयांपु
षोषासप्तवत्सराम् १५ ततोवसंतेसंप्राप्ते पुष्पापचयकौतुकात् विचरंतींवनेसर्पोदंदशचरणांगुलौ १६ गतासुःसा
भवत्सद्यःसतामग्रेचकारसः एकस्मिन्कलशेकृत्वातदस्थीन्यवसच्चिरम् १७ ररक्षकांक्षमाणःसतदागमनमा
तुरः सचिरादागतंतत्रगुरुंक्षपणकांतकम् १८ प्रणम्यचमुहुःप्राहप्रांजलिःसहबंधुभिः इदमाकर्ण्यतांब्रह्मन
हंवैश्यकुलोद्भवः १९ भवादृशानांमहतांपादकैंकर्यतत्परः अप्रस्थितोस्म्यहंदूरेस्थितस्यापियशस्तव २० आ
कर्ण्यदातुकामोस्मिकन्यांकांचिद्पोषयं सापुष्पापचयंकर्तुंवसंतेममबालिका २१ वनंप्रविष्टासदष्टाभुजंगे
नासुभिर्विना कृत्वातदापिनांचाग्नावदहंछक्तिमुत्तमाम् २२ निश्चित्यतेस्थिनिचयःसंगृहीतश्चिरंघटे ऊर्जीवयि

श्रीशैलं १३ गोकर्णेति तेषुस्थानेषु १४ कश्चिदिति क्षपणकद्विषः हरदत्तस्य आसप्तवत्सरांसप्तवर्षो १५ १६ १७ १८ १९ २० २१ २२२३

इतितद्वचनंश्रुत्वासद्योदत्तेनभस्मना कन्यामुज्जीवयित्वातंवैश्यंप्राहमहाकविः २४ यथात्वयैषाजनितातथाद्यः
जनितामया नयुक्तोमेविवाहोस्यास्ततोन्यस्मैप्रदीयताम् २५ जहृषुश्चजनाःसर्वेकन्यावानप्यगाद्गृहं कन्या सापिव
रंनान्यंवव्रेनिर्विण्णमानसा २६ आराध्यशिवमेकाग्रंजगामगतिमुत्तमां अथारुणाचलेस्तुत्वाशिवंकृत्वाप्रदक्षिण
म् २७ द्रोणीपुरंगतस्तत्रन्यवात्सीदंबिकासुतः स्तन्यप्रदानकलयाप्रमृष्टापाणिनामया २८ दृष्टिरस्यततोनाभूद्
नुरक्तान्यतोहृता बांधवानिश्चिताद्यस्यविवाहेधृतकौतुकाः २९ महाकुलोद्भवांकन्यांतेभद्रपुरवासिनः शुभे
लग्नेमुहूर्त्तेचकवेःस्नानमकारयन् ३० निर्वर्तितव्रतस्नानःकृतकौतुकमंगलः आरूढमुक्ताशिबिकोययौभद्रपु
रींप्रति ३१ ब्राह्मणाःक्षत्रियावैश्याःशिवभक्तामहत्तराः द्रष्टुंश्रीज्ञानसंबंधविवाहोत्सवमागताः ३२ अलकृतास
भातत्रभद्रवेदीसमन्विता विश्वकर्मकृतापूर्वेशिवयोरिवमंगले ३३ तत्रसर्वेप्रविविशुर्नीलनग्नादयोद्विजाः कृ
तोपचारश्चवरोबध्वासहविभूषितः ३४ प्रविश्यवेदींहुत्वाग्निंपाणिग्रहणमाचरत् विधायलाजहोमादीनकृ
तार्णीर्वचनोद्विजैः ३५ नमश्चक्रेसपितरौसभार्योब्राह्मणानपि सबंधुवर्गपितरौप्राञ्जलिःप्राहसत्कविः ३६ पित्रो
श्चबांधवानांचकांक्षितंकिमतःपरं वदतापास्यसंकोचतदास्यसेवशंकरः ३७ इतिदृष्टास्तमूचुस्तेबंधुभाग्योत्त
मावयं सायुज्यमेवचेच्छामश्चंद्रशेखरपादयोः ३८ इतितत्स्वार्थनातुष्टःसभार्यःसेवितुंशिवं प्रायालयंगिरंगुंफैःतु

४० ४१ ४२ ४३ उपसंहरन्फलस्तुतिमाह श्रीति ४४ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांपंचाशत्तमोऽध्यायः ५०॥ ९ ॥ ॥अपीति तत्अनिर्वाच्यंकैवल्यंमोक्षरूपंकरस्थितमित्यन्वयः यथाश्रुते तस्येत्यस्यवैय्यर्थ्यादुवीरमेव १

तदुद्वाहश्रियंद्रष्टुमिच्छन्निवमहेश्वरः कोटिसूर्यप्रतीकाशस्तदाद्यग्रेसहोमया ४० शिवेनबांधितंब्रूहीत्युक्तःशंभुंजगादसः अस्तुसायुज्यमेतेषामितिसोप्यन्वमोदत ४१ पितरौनीलनग्नंचबांधवानपरानपि अग्रेप्रवेशयामासजपंन्पंचाक्षरींमनुम् ४२ सर्वेषथप्रविष्टेषुविधायत्रिःप्रदक्षिणं सभार्योज्ञानसंबंधोलिलयेज्योतिषिशंकरे ४३ श्रीज्ञानसंबंधचरित्रमेतत्पठतिश्रृणोतिचयेमहांतः शिवप्रसादेनपुनर्निवृत्तिर्भवेन्नतेषामुदितंहिसत्यम् ४४ इतिश्रीस्कंदोपपुराणेभक्तविलासेपंचाशोऽध्यायः ५०॥ ॥७॥श्रीअगस्त्यउवाच अपिप्राणात्ययेप्राप्तेयःशिवद्रोहिदर्शनं नविधत्तेभवत्यस्यकैवल्यंतत्करस्थितम् १ अत्रैवोदाहरंतीममितिहासंपुरातनं कलिकामस्यचरितं कलिकामजितोबुधाः २ भूषणंचोलदेहस्यपुरमस्तिमहत्तरं हंसनृत्तचलद्गंगामरुताशीतलंविभोः ३ तत्राभूत्कलिकामाख्यःशिवभक्तपदार्चकः यस्यदर्शनमात्रेणबिभ्यतीशद्रुहोभुवि ४ सदासक्षुरिकांधत्तेशिवद्रोहिजिघांसया श्रीकर्मकुर्वन्नास्तेस्मश्रीमत्यागेश्वरालये ५ सएकदालयद्वारिशयानोमशकव्रजैः संपीड्यमानोनिर्निद्रःशंकरंपादचारिणम् ६ दृष्ट्वाहाहेतिसरुदन्नष्टच्छ्वसाजलिर्हरं भगवन्त्रस्थितःकासिनिशीथेनंदिनाविना ७ यत्रचैकचरोलोकैश्चोरइत्यवशंक्यते दृषद्भिःकंटकैश्चापिदंतुराराजवीथयः ८ ७ ७

अत्रेति कलिकामोजयतीति तस्य २ भूषणमिति हंसानांयन्नृतंगात्रविक्षेपःतेनचलंत्यागंगायामरुतावायुनाशीतलं ३ ४ सइति श्रीकरंकर्मे

अ.५० स्कं.४ द्वि.७ वल्लिएकआत्रेयीयकचरः ऽषट्त्रिंशाधिकशततमः

९ कलिकामेति अन्यथा अन्यत्रेत्यर्थः पणलभ्या अंगना १० तदिति तथाकृत्वातामनुनीयेत्यर्थः ११ क्रोधमिति स्वामिनोदौत्येनियोजनादितिभा
वः १२ १३ हरइति तस्य कलिकामस्योदरेशूलव्यथामधादित्यर्थः १४ १५ कर्त्तुकामइति अवमतोवमानितः १६ १७ यथेति त्यागेश्वरः यथा

शरपातोयथानेत्रे तथापादार्पणंतव वदेतिपृष्टोनिर्बंधात्कलिकामंहरोवदत् ९ कलिकामान्यथानैवव
र्ण्यतामिदमुच्यते कुपिताप्रेयसीसख्युःसुंदरस्यपणांगना १० तन्नियुक्तो नुनेतुंतांतथाकृत्वास्मिचागतः
इत्युक्त्वांतर्हितेशंभौकलिकामश्चसुंदरे ११ क्रोधंमहांतंविदधेदौत्येस्वामिनियोजनात् अथप्रत्यश्रुणोदे
वंयदाद्रक्ष्यामितंरिपुम् १२ हनान्यहंतमित्युच्चै र्वीथीषुसमघोषयत् सुंदरोथतमाकर्ण्यशंकरंशरणंय
यौ १३ हरश्चप्रार्थितस्तेनशूलंतस्योदरेव्यधात् सशूलरोगव्यथितःतुष्टावत्यागनायकम् १४ स्तुतिप्रीत
स्सतंप्राहसुंदरस्त्वांस्पृशेद्यदि शूलरोगःप्रशांतःस्यान्नान्यथाभाषितंमम १५ कर्त्तुकामश्चिकित्सांतेश्वोवे
श्मैष्यतिसुंदरः आगतश्चेदवमतोवर्धेताथतवामयः १६ कलिकामेस्मररिपावेवमुक्तातिरोहिते स्ववेश्म
प्राप्यभार्यायैशिवाज्ञांतामभाषत १७ यथात्यागेश्वरोदेवःक्रियतामित्युवाचसा सखायंचहरःप्राहकलिका
मोदुरामयः १८ विनीयतांत्वयागत्वामाभैस्त्वांनहनिष्यति १९ अथप्रभातेकलिकामनामाशिवद्रुहस्पर्शसुजी
वितेन प्राणेनकिंमेभवितेतिमत्वास्वहेतिनाकुक्षिमथाप्यभांक्षीत् २० प्रियश्चशंभोर्विधिवच्चिकीर्षुराज्ञांमहेश
स्यससुंदरोपि स्मरन्हरांघ्रेरथभस्महस्तस्समाययौतत्कलिकामवेश्म २१ निर्भिन्नकुक्षिंरमणंतदीयाप्रच्छाद्य

अभाषतेत्यन्वयः १८ विनीयतामिति शिवद्रुहःस्पर्शेनसुजीवितेनेत्यर्थः १९ अथेति स्वहेतिना स्वशस्त्रेण २० २१ ॥

२२ २३ अथेति कलिकामस्य तत्स्पर्शपरिजिहीर्षया एवंकारित्वेनतदनुरोधादितिभावः यूयंदूरमागमनादूरम् बहुआयासिताइत्यर्थः यू
यमितिशेषः २४ सर्वथेति निर्भिन्नहृदयमिति भर्तृविशेषणं २५ कलिकामइति स्वकृतेस्वार्थभक्तेविषये योद्रोहः तदघस्यशुध्यर्थं २६
२७ अन्योन्येति सुंदरमित्रं आसमानर्चेतिछेदः २८ २९ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्त

दत्तासनंचार्घ्यमपिघ्रणामंव्यधत्ततस्मैहरमेवमत्वा २२ अथतामब्रवीत्साध्वीसुंदरःपूजितस्तया॥कृतेभर्त्तानि
युक्तोस्मिसुहृदादत्तभस्मना साध्विप्रशांतोभर्त्तुस्तेरोगोदर्शयमाचिरम् २३ अथसाप्राञ्जलिःप्राहशांतोनाथ
स्यमेगदः दूरादागमनाद्यदूरमायासिताइति २४ सर्वथादर्शनीयोसौकलिकामइतीरिता हेतिनिर्भिन्नहृद
यंभर्त्तारंतमदर्शयत् २५ कलिकामंमृतमत्वास्वकृतेसोपिसुंदरः भक्तेद्रोहाघशुध्यर्थंस्वकंठेरवङ्गमादधे २६
जग्राहपाणिनापाणिमाविर्भूयाथशंकरः मासाहसंविधेहीतिकलिकामश्चजीवितः २७ अन्योन्यमैत्रींचतयो
र्विधायताभ्यांमहेशोथसमर्चितांघ्रिः अंतर्दधेसुंदरमित्रमासमानर्चेभूयःकलिकामनामा २८ कलिकामःसमंतेन
तत्रैवकमलालये चिरंवसन्यसादेनशंभोःसायुज्यमासवान् २९ इतिश्रीस्कंदोपपुराणेभक्तविलासेएकपंचाशत्त
मोऽध्यायः ५१॥ ७ ॥श्रीअगस्त्यउ॰ श्रूयतेहिमहाशैलःस्मरणादघनाशनः सिद्धचारणगंधर्वमुनिकोटिनिषेवितः १ यत्र
सर्वेश्वरःश्रीमानशंभुराकाशमध्यगः स्कंदविघ्नेशसहितस्सहदेव्यासदावया २ निवसत्यजसंभूतहरिमुख्यसुरैःस्तुतः तस्यप

विलासप्रकाशिकायामेकपंचाशत्तमोऽध्यायः ५१॥७॥ ॥श्रूयतइति महाशैलः कैलासः अघंपापं १ यत्रेति आकाशोदहराकाशः त
न्मध्यस्थितइत्यर्थः २ निवसतीति पक्कणःशबरालयः ३ ७ ७ ७ ७ ७

षष्ठीति सौरभमेषामस्तीति सौरभीणि तादृशानिहल्लकानि कल्हाराणियत्रतादृशं ४ ५ अमावास्यामिति यइतिसंबध्यते ६ यमिति सिद्धेषु

षष्ट्यष्टकोटिगणपनीरंध्रशिखरश्चयः यत्रसौगंधिकंनामसरस्सौरभिहल्लकम् ४ यत्रमंदाकिनीरम्याप्रवहंतीसुदृश्यते यःशंकरजटाचंद्रकलिकाचंद्रिकोज्वलः ५ अमावास्यांनजानातिनिःशेषितसुधाकरं यदीयशिखरंदृष्ट्वापुनर्गर्भेनमज्जति ६ यन्नपश्यंतिपापिष्ठाःकामक्रोधांधचेतसः तत्रसिद्धेषुकैलासेमूलनाथइतिश्रुतः ७ परकायप्रवेशादौशक्तिमान्भक्तिमान्हरे आसीत्कश्चिदसौजातुस्थानेषुधरणीतले ८ सर्वत्रसेवितुंशंभुंप्रतस्थेव्योममार्गतः नकैलासात्परंकिंचिसुरम्यस्तिनगम्यताम् ९ सिद्धैरितिनिरुद्धोपिततःप्रस्थितएवसः केदारेचाविमुक्तेचगोकर्णेमल्लिकार्जुने १० कालहस्तिस्थलेदिव्येविस्तृतेचारुणाचले श्रीमद्वृद्धाचलेकांच्यांपुंडरीकपुरेहरम् ११ सेवमानःक्रमेणापकावेरीतीरमुत्तमं वेदारण्येपुरेलक्ष्म्याःकावेरीसिंधुसंगमे १२ छायावनेश्वेतवनेमायूरेचाघनाशने निषेव्यदेवमीशानंगवावतरमभ्यगात् १३ समाजंविहिताक्रंदमभ्याशेतस्यदृष्टवान् बाष्पायमाननयनंमूलनाथोगवांकुलम् १४ दृष्ट्वातत्सविधंगत्वाकिमेतदितिशंकितः परितःप्रेक्षमाणस्तुगोपालंमृतमैक्षत १५ कंडूविनोदैश्चतृणैश्छायाभिःसलिलैर्गवां सकुलंपोषयामासगावस्तच्छोककर्शिताः १६ यथानेष्वपवत्सेषुतृणेष्वपिगतस्पृहाः विलोक्यदययाकार्यंकथंस्यादित्यचिंतयत् १७ सयोगशक्तिमान्कुंजेदेहंविन्यस्यचक्रचित् नासिकादृष्टिमार्गेणप्राणैस्तद्पुरंविशत् १८ अथसद्यःसमुत्तस्थोगोपःसुप्तोत्थितोयथा गावोहृष्टास्तथासर्वाःपीत्वामृतमिवातुराः १९ ७ ७ ७

इतिनिर्धारणेसप्तमी ७ ८ ९ १० ११ १२ छायेति गवावतरंनामतीर्थं १३ समाजमिति अभ्याशेसमीपेविहितः आक्रंदोरोदनंयेनतादृशं १४ १५ कंडू

लिंगपुः पू १७ १८ १९

आसायमिति सायंकालमभिव्याप्येत्यर्थः वासनाभिःपूर्वाभिः वासितंवर्ष्मगोपस्यचआविशदित्यन्वयः २० २१ २२ २३ २४ २५ २६ रुदित्वे

आसायंचारयित्वागाःप्रदोषेपुरमाविशत् वासनावासितंवर्ष्मयथायोगेहंतदंगना २० क्षीरान्नैर्भोजयित्वातंनिशितच्छयनं
ययौ व्रजदूरेस्पृशन्मांहतियावदुवाचसः २१ परिहासमितिज्ञात्वासावलादालिलिंगितं गोपःशिवशिवेयुक्तानियेयौ
सहसाबहिः २२ मातर्ग्रहेणग्रस्तोसोमहानुन्मादएववा भवेदस्यशिवेयुक्तिःवैष्णवस्यश्रुताकदा २३ इतिसावि
हूलागोपीनिशिबंधूनमेलयत् निशीथेमिलिताःसर्वेकिंकिमित्यन्वयुंजत २४ अनुयुक्ताचसागोपीतद्वृत्तांतमजिज्ञ
पत् मायागोपश्चतस्यैःकिमेवधीरिहेतिते २५ नोन्मत्तोनग्रहग्रस्तोविरक्तोसीत्यभाषत अलंस्यादेवगतिरित्युः
क्त्वासर्वेगताजनाः २६ रुदित्वासाचिरंगोपीनिर्विण्णाप्राविशद्गृहं आमोदितगुरन्येद्युर्विवक्षुःस्वांतनुपुनः २७ निकुं
जेनात्मनोमूर्त्तिमूलनाथोददर्शतां प्रणिधानस्थितःसंवैनिरचैषीद्विलोक्यसः २८ वेदांतसंप्रदायस्यचध्यंर्थंपशुपा
लकः प्रवेशितःकलावस्मिन्शंभुनासर्वसाक्षिणा २९ वपुर्निकुंजेविन्यस्तमाज्ञयास्यतिरोदितं इतिगोरक्षतापासःसर्वै
र्लोकैश्चवंदितः ३० यथानियुक्तोस्मितथाकरोमीतिपिनाकिना विचचारमहायोगीपूज्यमानोमुनीश्वरैः ३१ अध्यात्मवि
द्याव्याकुर्वननयत्समयंबहु॥ गवावतारमासाद्यदेवस्याग्रेसमुन्नतम् ३२ आश्रितःपिप्पलतरुमन्वहंध्यानमास्थितः द
क्षश्चयक्रियायोगेविन्यस्तात्मामहेश्वरे ३३ क्रमेणान्मुक्ततन्मूर्त्तिःशैवेज्योतिष्यलीयत ३४ इतिश्रीस्कंदोपपुराणेभक्तवि
लासेद्विपंचाशत्तमोऽध्यायः ५२॥ ॐ ॥ ॥श्रीअगस्त्यउ॰ शिवालयतटाकादौमृत्तिकांयोहरेदिति सशिवस्यप्रसादेननपुनः

ति आमोदिताः तोषिताःगावोयेनेत्यामोदितगुः २७ निकुंजइतिप्रणिधानंसमाधिः निरचैषीत्निश्चितवान् २८ २९ ३० ३१ ३२ ३३ ३४ इतिश्री

मानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांद्विपंचाशत्तमोऽध्यायः ५२॥ ॥ ॥शिवेति मृत्तिकांह

कश्चिद्दंड इतिख्यातोभक्तोभूत्कमलालये जात्यंधःश्रवणात्तस्यशिवेभक्तिरजायत २ अंधस्यमेकथंमुक्तिःस्यादित्ये
वंविचिंतयन् कमलालयतीरस्थंब्राह्मणंशरणंगतः ३ ब्राह्मणःसोपितंप्राहचक्षुषारूपदर्शिनं देहिनःसंसृतौहेतुरि
तिनेत्रंमुनीश्वरः ४ निमीलयित्वातध्यायन्ब्रह्मज्योतिःसनातनं तदाभावात्कृतार्थस्त्वमंधोहमितिमाशुचः ५ मु
क्तिहेतुंप्रवक्ष्यामिसावधानमनाःशृणु पश्चाद्भागेमहेशस्यतीर्थमेतन्महत्कुरु ६ खातवेणुद्वयांतस्थंरज्जुमालंब्य
मृत्तिकाः दूरेकुरुष्वपंचार्णंजपन्नित्यमतंद्रितः ७ एवंचेन्मुक्तबंधस्त्वंभविष्यसिनसंशयः एवमुक्ताथपंचार्णं
तस्मैमंत्रमुपादिशत् ८ जपन्सपरमंमंत्रंखनित्रपिटकाधरः कृत्वाशिरसिमद्भारंरज्जुमालंब्यगच्छति ९ तथैवपु
नरायातिदंडेमृत्खननायसः तस्यैवंवर्त्तमानस्यययुर्वर्षास्त्रयोद्विजाः १० तत्खन्यमानंसुमहदगाधंचशनैःश
नैः तमागत्यजिनाःकेचिद्धसंतोवाक्यमब्रुवन् ११ वृथायासेनजात्यंधकिमनेनभविष्यति अस्मदालयमागत्यखा
तमृत्कुरुभित्तिकाम् १२ दास्यामोवेतनंनित्यंतेनात्मभरणंभवेत् दंडःप्राहशिवःसर्वंसर्वसाक्षीप्रदास्यति १३ श्री
कर्मकरणंतस्यप्रीतयेविदुरुत्तमाः भवंतोनैवजानंतिमहिमानंपिनाकिनः १४ प्रसन्नेसतिगौरीशेकिमसाध्यंशरी
रिणां इत्युक्तास्तेपुनःप्रोचुःपरिहासात्तथागताः १५ सत्यमांध्यनिवृत्तिंचविधास्यतितवेश्वरः दंडस्तदाविनिश्च
स्यप्राहभूयःसमागतान् १६ अनांध्यंमेतथांध्यंवावांछाचेत्सविधास्यति विकलानांपरीहासाद्भवंतिविकलाजनाः १७

रेत् निक्षिपेदित्यर्थः १ कश्चिदिति श्रवणात्पुराणादीनामितिशेषः २ ३ ब्राह्मणइति सोपिब्राह्मणःतंदंडं ४ ५ मुक्तिहेतुमिति तीर्थंऋषिजुष्टमंभः

६ ७ ८ जपन्निति पिटकामृत्तिकाधारपात्रं ९ तथेति द्विजाइतिसंबो
धनं १० ११ वृथेति खातमृत् भित्तिकांभित्तिकारूपां १२ १३ १४ प्र
न्नेइति १५ तथागताबौद्धाः १६ १७

१८ अपहृत्येति पाणिनाहस्तेनप्रहतं उदरं येनशोकादितिभावः १९ २० २१ २२ अनाशितइति अभुक्तइत्यर्थः २३ २४ २५ दत्तेंधस्येतिसं

इत्युक्ताःकुपितामूर्खाःवेणुंरज्जुंचचिच्छिदुः तेषुकश्चनदुष्टात्माखनित्रंतत्करेस्थितम् १८ अपहृत्यान्यतोयातो
शक्तस्तदनुधावने रुदन्संनिधिमभ्येत्यपाणिनाप्रहतोदरः १९ त्यागराजक्वयातोसियदिहत्वंदुरात्मनां आंध्यम
द्यैवभवतिश्रीकर्मकरणायते २० भूयादनांध्यंचममेत्युक्ताप्रत्यशृणोत्पुनः नमेस्त्यकृत्वाश्रीकर्ममुक्तिर्जैनानशि
क्षिताः २१ यावत्त्वंधाभवंत्येतेत्यागेश्वरमृषानवाक् इतिस्थितस्यदंडस्यगिरिमस्तंययौरविः २२ अनाशितश्चदं
डोपिशंभोरग्रेस्वपन्निशि स्वप्नेतमाहत्यागेशस्तवनेत्रेभविष्यतः २३ भविष्यंतिजिनाश्चाद्यराज्ञाहृतधनादयः
यत्रक्वापिगमिष्यंतिश्वःप्रातःसत्यमुच्यते २४ इतिदंडंसमाश्वास्यराजानंप्राहशंकरः जिनैरुपद्रुतोभक्तोसंनिधौ
दंडनायकः २५ श्रीकर्मधारिणस्तस्यखनित्रंयद्धृतंबलात् उपोषितस्यचैतस्यधत्तेंधस्यदृशौमया २६ मेलयित्वा
र्हतान्प्रातःपृच्छत्वंमिलितानमून् किंवोयुक्तमिदंकर्त्तुंखनित्रहरणंबलात् २७ इतिपृष्टास्त्वयामूर्खाःवक्ष्यंति
त्वांचसंगताः अथमिथ्यांवदत्यंधःकृतंवास्मासुकेनचित् २८ स्थूलःकृशोयंखर्वोवाद्राघीयानसितोरुणः वर्षी
यांस्तरुणोस्मैयोद्रुह्यतिस्मसकीदृशः २९ वदत्वसौतथाप्यस्यप्रमाणमवनंयदि प्रत्ययःक्रियतेस्माभिःपुरतोदै
वतस्यतैः ३० इतितद्वाक्यमाकर्ण्यसस्त्रीपुत्राःसहार्भकाः त्यागेशसन्निधिंप्राप्यकुरुध्वंशपथंदृशोः ३१ इत्या
चक्ष्वततःसर्वंकर्त्तव्यंक्रियतेमया नृपमाज्ञापयित्वैवंत्यागराजस्तिरोदधे ३२ नृपःसद्यःसमुत्थायभीतस्सपुलको

धिरार्षः २६ २७ २८ २९ ३० ३१ ३२ ३३

त्यागेशरक्षरक्षेतितस्याक्रोशंनिशम्यसः उत्थापयत्तमद्राक्षीद्दंडउन्मीलितेक्षणः ३४ प्रणम्यभीतःसंग्राहप्रांजलिःप
प्रयतोनृपः किंकरोस्मिविधेयस्तेकृत्येयोजयतामिति ३५ प्रणतंपादयोःग्राहदंडोलब्धविलोचनः यथानिदेशंदेव
स्यक्रियतामित्यभाषत ३६ जिनान्प्रभातेनृपतिःसमस्तान्निरुध्यशंभोर्मिलितान्पुरस्तात् किंदंडभक्तस्यकरात्ख
नित्रंबलाद्धृतंतदूदतेस्मुवाच ३७ संदर्शयत्विहागत्यजात्यंधःस्वापराधिनं मृषावादंनिशम्यात्रयुक्तनास्मन्नि
रोधनम् ३८ इत्युच्चुरार्हताग्रःपुरस्तात्सोप्यथाब्रवीत् युष्मासुचेन्नकेनापिहृतंदंडस्यहस्ततः ३९ खनित्रंतर्हि
कर्त्तव्यःशपथःस्वामिसंनिधौ सबालाःसार्द्धवसनाःनिमग्नाःकमलालये ४० शपित्वानेत्रयोःस्पृष्ट्वासुखिनस्तेस
दार्हताः दंडश्चेत्सत्यवादीस्याच्चक्षुष्मान्सभविष्यति ४१ जन्मवद्यत्रचनचेद्भवितांध्यंयथाधुना एवमस्त्वितिरा
जानमुक्तातेसकलार्हताः ४२ कंठवसानास्नानार्द्राःसस्त्रीबालामुदान्विताः प्रतिमादेवतानेतिमन्वानाप्राप्यसंनि
धिम् ४३ यदासंमिलिताःसर्वेराजागच्छत्सहानुगैः चक्षुष्मानथदंडोपितत्रैवप्रत्यदृश्यत ४४ तेनिरुद्धानृपभ
टैर्दंडमुन्मीलितेक्षणं विलोक्यभीताश्चान्योन्यंपश्यंतिस्मसुरवंजिनाः ४५ नचेद्भ्याभविष्यामइतिस्पृष्टदृशोशप
न् बभूवुःसद्यएवांधाःसस्त्रीबालाःसहानुगाः ४६ वदन्नमःशिवायेतिदंडस्तुष्टावशंकरं राज्ञागृहीतसर्वस्वास्त
स्मादेशात्पलायिताः ४७ जिनाःसर्वेसुरादृष्ट्वावर्षुःकुसुमोत्करं अलब्धशरणाःक्वापिमहाव्याधिप्रपीडिताः ४८

इति त्वयावयंवध्याभविष्यामइत्यर्थः स्पृष्टदृशोयेन ४६ वदन्निति गृहीतंसर्वस्वंयेषांजिनाःसर्वेइति पूर्वेणान्वयः ४७ ४८ ४९ ५० ७

४९ ५० ५१ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांत्रिपंचाशत्तमोऽध्यायः ५३ ॥ ॥ ययेति हीनयायीतिभावः पुष्णाति पोषयति १ संचरन्निति दुस्त्यजंसंध्योपासनादिब्राह्मणानांसर्वेषामेवब्रह्मवधाकरणादिच २

क्षुधार्त्तोविलयंजग्मुःशिवभक्तद्रुहोजिनाः चैत्यमुन्मथ्यमूर्खाणांसोपानानिमहीपतिः ४९ कमलालयतीर्थस्य कारयामासचादितः दंडभक्तोपितत्रैवकुर्वन्श्रीकर्मशांकरम् ५० चिरायत्यागराजस्यप्रसादान्मुक्तिमाप्तवान् ५१ इतिश्रीस्कंदोपपुराणेभक्तविलासेत्रिपंचाशत्तमोऽध्यायः ५३॥ ॥ श्रीअगस्त्यउ॰ ययाकयापिवावृत्याद्रविणैःस्वयमर्जितैः पुष्णातिशिवभक्तान्यःकर्मबंधात्समुच्यते १ संचरन्नपिसर्वत्रभुंजानोवायतस्ततः निषिद्धमपिकुर्वाणस्त्यजन्वाकर्मदुस्त्यजम् २ शुश्रूषयेद्वाभक्तानांदेहीपापैःप्रमुच्यते इतिहासमितिख्यातंशृणुतप्रब्रवीमिवः ३ शिवभक्तेषुभक्तिःस्यादस्यैवाकर्णनादिह क्षीरिणीनामतटिनीक्षीरप्रस्रवणोज्वला ४ सदाफलैःपुष्पवृक्षैरुभयोःकूलयोर्घना विहितावभृथस्नानैर्वैतानेषुद्विजोत्तमैः ५ तीर्थानितीर्थीकुर्वद्भिर्नित्याभिषवणादृता अस्तितस्यास्तटेकिंचिदरण्याख्यंमहत्पुरम् ६ स्वाचारनिरतैर्वर्णैश्चतुर्भिःसमनुष्ठितं दीक्षिताब्रह्मसत्रेषुयत्रवैदिकसत्तमाः ७ मुखरीकुर्वतेसौधान्नृक्सामयजुषांस्वरैः शिवभक्तार्चकोनामशूद्रोभूत्कश्चिदुत्तमः ८ सधनैःशिवभक्तानांपूरयन्नासवांछितं नास्यप्राणेतथाप्रीतिर्यथाभक्तेष्टसाधने ९ नकश्चिच्छिवभक्तेषुयस्तेनासीदनर्चितः वर्त्तमा

शुश्रूषयेदिति अभक्तानामितिच्छेदः अभक्तानित्यर्थः संबंधसामान्येषष्ठी अकारच्छेदाभावेविकल्पानुपपत्तेः ३ शिवेति क्षीरवत्प्रस्रवणेन उज्ज्वलेत्यर्थः ४ सदेति घनासान्द्रा ५ ६ ७ मुखरीति शब्दायमानान् कुर्वतइत्यर्थः उत्तमः श्रेष्ठः ८ ९ १० ॥

तस्येति सदनंगृहंदुःखातिशयंविनापरीक्षानभवतीतिभावः११ १२प्रणम्येतिमांकिंकरंहासंविधेहीत्यर्थः१३ अथेति तापसरूपी तापसच्छद्मा १४ १५ आवयोव
धीति वयःसमाप्तिपर्यंतमित्यर्थःसमवस्थाप्यतमितिशेषः१६ निर्धनस्येति मेदृतिशेषः१७ अंगानीति दृढकार्यैजनानांकर्त्तव्यंकार्यंकिमितिभावःसाध्वी

तस्यभक्तिपरीक्षायांशंभुःकौतुकवानभूत् अग्निनासदनंदग्धंगावोनष्टास्थितिर्हता ११ सर्वंनष्टंक्षणेनैवदानम
श्रोत्रियेयथा अथापरेद्युर्मध्यान्हेभस्मरुद्राक्षभूषितः ॥ अतिथिस्तापसःकश्चिदाययौगिरिशोयथा १२ तमर्चयित्वा
शिवभक्तमादरादानेनपाद्यस्यसचासनस्य ॥ प्रणम्यभक्त्यापदयोर्महामनाजगाददासोस्मिविधेहिकिंकरं १३ अ
थतापसरूपीतंभगवानाहशंकरः १४ शिवभक्तार्चकश्रीमन्भक्तार्तिष्टप्रदायिनः भवतःकीर्त्तिमाकार्यंदृष्ट्वात्वामा
गतोस्म्यहम् १५ आवयोर्वयितद्देयवस्त्रमन्नंचमेत्वया इत्युक्तःसमवस्थाप्यभक्तोभार्यामथाब्रवीत् १६ निर्धनस्य
निरन्नस्यतपस्वीगृहमागतः नास्तिछायाममस्यातुकिंविधेयंपतिव्रते १७ अंगानिममवेपंतेनेतिवक्तुंतपस्विन ज
नानामिहकर्त्तव्यंसाध्विबुद्धिर्विधीयताम् १८ अथाहभार्याभर्तारंनवाड्रेःत्युचितातव यथाकथंचिद्दातव्यमीप्सितं
स्यात्तपस्विनः १९ इतिभार्यावचस्तस्मिन्श्रुत्वांतिप्राहतापसः २० मय्याऽऽतपेतिष्ठतिभक्तवर्यकिंसुंदरीवीक्ष्यचिरंस्थि
तोसि किमस्तितेवस्तुमदीप्सितंयद्दान्यथासोहमितःप्रयास्ये २१ हंतपापंमयाप्राप्तंदंपत्यालापविघ्नतः ॥ याव
दस्येतिसमयःप्रयास्येकार्यसिद्धये तिष्ठंतित्वादृशाभक्ताःकुंभकोणेमहास्थले २२ ततस्तत्रगमिष्यामीत्युक्त्वाशंभुस्ति
रोदधे बहिर्निर्गत्यभक्तोपितमदृष्ट्वातापसम् २३ सभूतप्राणवानासीत्तमेवेशममन्यत कुंभकोणंप्रयामेतिविश्रुता

तिसंबोधनम् १८ अथेति अथोत्तपस्विनः ईप्सितंस्यात् तथाकथंचिद्दातव्यमित्यन्वयः १९ इतीति तस्मिन्शिवभक्तार्चके २० किमिति मदीप्सितं वस्तुते

अस्तिकिमित्यन्वयः २१ २२ २३ सभूतिभूतप्राणवान्भूतकालिक
प्राणसहितः इदानींनिश्चेष्टइतियावत् २४

२५ शंभुरिति विधयाप्रकारेण २६ इतीति वृत्याशयाजीवनाशया २७ २८ २९ कुंभकोणेइति पणीकृतं ग्लहेस्थापितं ३० ३१ इतिश्रीमानव ल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांचतुःपंचाशत्तमोऽध्यायः ५४ ॥ ॥ ॥पुण्येष्विति १ संपदा

तदैवकुंभकोणाख्यंप्राप्यस्थलमतंद्रितः अतिष्ठत्सन्निधौशंभोःसप्तरात्रमुपोषितः २५ शंभुःस्वप्नेथतंप्राहवसात्रैव मदाज्ञया ययाकयाचिद्विधयापुष्मन्भक्तान्समागतान् २६ इत्युक्तांतर्हितेशंभौसचभक्तःसमुत्थितः प्रापवृत्या शयावीथींनवृत्तिंकांचिदापसः २७ अथागाद्गणिकावीथिंसंवृतांद्यूतकारिभिः सद्यूतचैत्यमासाद्यधूर्त्तान्देवन लीलया २८ जिगायपणबंधेनप्रापाथविपुलंधनं॥प्रददौचापिभक्तेभ्यःशिवस्यप्रीतयेऽन्वहम् २९ कुंभकोणेमहा क्षेत्रेसंतिद्यूतपराःपुरा तेद्यूतेविजितास्तेनददुःसर्वंपणीकृतम् ३० अथान्नैर्वसनैर्भक्ष्यैस्तर्पयन्भक्तमंडलं मूर्खभ क्तइतिख्यातःतस्यमुक्तिश्चिरादभूत् ३१ इतिश्रीस्कांदोपपुराणेभक्तविलासेचतुःपंचाशोध्यायः ५४॥ ॥ ॥ श्रीअगस्त्यउवाच पुण्येषुशंभुस्थानेषुस्थितान्श्रीकर्मकारिणः येरक्षंतिधनैःस्वस्यतेपिस्युर्मुक्तिभागिनः १ संपदा करभूरस्तिचत्वरारामवासितं अंबरांबरधामश्रीशंकराख्यंमहत्पुरम् २ केशेकुटिलतायत्रकाठिन्यंकुचकुंभयोः स्त्रीजनस्याधरेरागःकामोनित्यंशिवार्चने ३ यत्रालयेषुयष्टॄणांबलभीनीडवासिनः पठंतिशारिकाःश्रौतकल्पसि द्धांतनिर्णयम् ४ तत्रप्रतिवसंतंचसोमेनपरमेश्वरं यागेनप्रीणयन्शंभुंसोमयाजीतिववृधे ४ ॥ ॥ ॥

करेति संपदांसंपत्तीनामाकरभूः आकरस्थानंनित्यलिंगत्वेनाभेदान्वयः अंबरंआकाशं अंबरंवसनंयस्यस अंबरांबरःशिवःतस्यधामस्थानं २ इदानींश्लेषेणपरिसंख्ययाचार्थिकयातस्यसाधुत्वमाह केशेइति नजनेइतिभावःरागःआरुण्यं कामोभिलाषः क्लेशौच ३ यत्रेति वलभिः

तत्रेति सोमेनयागेन ५ ६ यस्येति रजताचलशैशवं कैलासबाल्यं बालकैलासतुल्यादृतिभावः ७ अननुष्ठितमिति नास्तीतित्रिभिःसंबध्यते ८ ९
१० ११ कमलेति कमलालयया लक्ष्म्याविरचितानि ऐश्वर्यादीनि नश्वराणि नाशशीलानि अवगत्यज्ञात्वा १२ निरस्तेति शिवमेवचिंतयन्नित्य

तन्नप्रतिवसंतंचसोमेनपरमेश्वरंयागेनप्रीणयन्नंभुंसोमयाजीतिवरुधे ५ पूर्वमारट्टतिरख्यातःश्रीमान्द्विज
कुलोत्तमः नित्यमन्नैर्जलैर्वस्त्रैःपुष्पैश्रीकर्मकारिणः ६ यस्यशालाबहिर्भागेभोक्तृभीष्टान्नराशयः विडंबयंत्य
नुदिनंरजताचलशैशवम् ७ दुर्वृत्ताःसंतुसद्वृत्ताधृतरुद्राक्षभूतयः पूजितास्तेनशिवव्रत्याचारविवर्जिताः ८
अननुष्ठितमेतेननास्तिश्रौतेषुकिंचन अनधीतंचयच्छास्त्रंतदर्थीवाननिश्चितः ९ अपिमंत्रेषुबहुषुमंत्रंप
चाक्षरंवरं निश्चित्यपूजयन्नित्यंसशैवानभ्यपूजयत् १० सतुफाल्गुनयात्रायांदृष्ट्वागेशवैभवं सभार्यस्तत्र
संकल्प्यस्थातुंनिश्चयमादधे ११ कमलालयेविहितमज्जनोन्वहंकमलालयेश्वरपदार्पिताशयः कमलाल
याविरचितानिनश्वराण्यवगत्यसुंदरसखोययौगतिम् १२ निरस्तसर्वेंद्रियविभ्रमःशिवंहृदंतरेसंततमेवचिं
तयन् दुरापमन्यैर्हरिपद्मजादिभिर्जगामधामैश्वरमीडितःसुरैः १३ इतिश्रीस्कांदेपपुराणेभक्तविलासेपंच
पंचाशोऽध्यायः ५५॥ ❀ ॥ ॥श्रीअगस्त्यउ॰श्रुतंकिलमहाभागेश्चरितसोमयाजिनः तस्ययःसवनेशंभुमद्रा
क्षीत्पुरतोदृशोः १ श्रीऋषयऊचुः वेदानामपिदेवानांब्रह्मादीनामगोचरः साक्षात्कृतःकथंतेनयज्वनापर
मेश्वरः २ वदैतद्विस्तरादिदानूसर्वज्ञोसिचद्यदि त्वत्सूक्तामृतधाराभिःसंतापोनःप्रशाम्यतु ३॥ ❀ ॥

न्वयः १३ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांपंचपंचाशत्तमोऽध्यायः ५५॥ ❀ ॥ ॥

अननमिति सोमयाजिनःमारनामकस्य १ २ ३

दृतिदृष्टोमुनिवरःसादरंकुंभसंभवः रोमांचितःशिवंस्मृत्वाप्रवक्तुमुपचक्रमे ४ श्रीअगस्त्यउवाच सन्नि
धौत्यागराजस्यनिवासेकृतनिश्चयः यज्ञनांप्रवरोमारोभार्यायैव्रतमादिशत् ५ कृत्स्नममस्तुतिःशंभोस्त
वकृत्यंनिशाम्यतां यःकोपिशिवभक्तश्चेद्दोजयेनगृहागतम् ६ सभार्यामनुशास्यैवंसन्निधौनिवसन्सदा
गमयामाससमयंजपान्पंचाक्षरीमनोः ७ अनेनवपुषैवाहंकथंत्यागेश्वरंविभुं पश्येयंतत्रकोयोगइति
चिंतापरोभवत् ८ शुश्रावतत्रमहतासमवायेप्रजल्पतां यासुंदरस्यदयितातस्याभाग्यमहत्तरम् ९ सु
हृन्नियोगाद्दोत्याययथौयस्यागृहंहरः किंदुर्वृत्तिरिवान्येषांतयैवसुकृतंकृतम् १० इत्याकर्ण्यसमारोपि
तद्दास्येकृतधीरभूत् प्राहसंवत्सरेतीतेकृताशीर्वचनंद्विजम् ११ यज्ञनांप्रवरोसित्वंगणिकाहंतुविश्रुता
फलंतेकिमनुदितंदत्तपुष्पाक्षतस्यमे १२ ददास्यन्नंचवस्त्रंचभक्तानामितितेयशः निःशंकमुच्यतांब्रह्मं
नमत्तोयत्तेस्तिकांक्षितम् १३ अथतामब्रवीन्मारस्त्यागेशसुहृदःप्रियां श्रीमारउवाच आकर्णयमहाभा
गेदययातवमेखिलम् १४ दृष्टभाग्यमिहान्यूनंत्वय्यस्म्यर्थीतथाप्यहं इदंचतववाञ्छात्रंपुरुषार्थोममोत्तमः
१५ श्रोतव्यमेकदिवसेप्रियेणतवमद्वचः एतावताकृतार्थोस्मिदयामयिविधीयताम् १६ सातथेतितमाभा
ष्यप्रेषयामासमंदिरं परमारहसिप्राप्तमथसुंदरमब्रवीत् १७ हरसाक्षात्करिष्यामीत्यमोदतद्वदिद्विजः आकर्ण्ये

आवेति समवायेसमूहे ८ सुहृदिति अन्येषांदुर्वृत्तिरिव अन्येषांवेश्येव १० इतीति तस्यागणिकायादास्ये ११ १२ १३ अथेतित्यागेशसुहृ

तथेति प्राग्वंशःशालाविशेषःमाधवेवैशाखे १९ २० विधायेति अर्पचितिं पूजां २१ २२ शरणमिति परं अतिरिक्तांत्यागेशस्यतनुं तनुरूपंत्वां

तथास्त्विति सतामाहमारस्यसदनंययौ प्राग्वंशकरणोद्युक्तश्चिकीर्षुर्मोधवेमखम् १९ दृष्ट्वागृहागतंयज्वांसुंद
रंप्रीतिमानभूत् २० विधायार्पचितिंयुक्तांप्रणिपत्यकृतांजलिः यज्वनांप्रवरःप्राप्तंत्यागेश्वरसुहृत्तमम् २१ अ
द्यप्रसन्नस्त्यागेशःप्राप्तंयज्ञफलंमया सुहृद्योदेवदेवस्ययदस्मत्सदनंगतः २२ शरणंत्वांप्रपन्नोस्मित्यागेशस्य
तनुंपरां सुप्रभातंदिनमेद्ययुष्मत्पादाब्जदर्शनात् २३ तीर्णोस्मियुष्मद्दययादुस्तरंशोकसागरं महत्सदर्शनेन
ह्येनहिशोकःशरीरिणाम् २४ यज्वानमेनंविहितोपचारमाप्तःसखाप्राहपिनाकपाणेः महात्मनापूज्यतमोसि
तत्किंश्राव्यंमयातेवचनंयथोक्तम् २५ अथमारोपितंप्राहभक्त्यापादेप्रणम्यतं त्यागेशंमूर्त्तिमंतमेदर्शयास्मद्
हेसकृत् २६ निषेव्यपादौसख्युस्तेगमिष्यामिकृतार्थतां तथास्त्वितिसगत्वेशंयदित्वंमारयज्वनः २७ मत्कृते
गच्छसिगृहानप्रियाप्रीताभविष्यति रक्षसख्यंतथाकृत्वेत्यब्रवीद्भक्तवत्सलम् २८ अथाहसुंदरंशंभुःप्रियाद्द
र्शेमुदेस्तुते येनकेनापिरूपेणयदिमामागतपुरः २९ ज्ञात्वासप्रणमेद्यज्वाकेवलंतस्यसेत्स्यति इत्याकर्ण्यस
यज्वानंपुनःप्राप्याहसुंदरः ३० सावधानोभवानस्तुध्रुवमेष्यतिशंकरः इत्युक्तासुंदरंप्रायाद्यत्रसागणिकाप्रि
या ३१ शयनेसर्वमाचष्टसाचप्रीतातदाभवत् अथसोमासवामोदंदधानोमासिमाधवे ३२ पौर्णमास्यामवभृ
थंचिकीर्षुर्यज्ञउत्तमे दिदृक्षुःशंकरंसाक्षादेकादश्यांसहस्त्रिया ३३ प्राविशद्यज्ञसदनमृत्विजांसहितोगणैः विधि

२३ २४ २५ २६ २७ २८ २९ ३० ३१ शयनइतिसोमएवआसवस्तदामोदंपरिमलं ३२ पौ

एवमाप्तामिति ज्ञात्वादीक्षांतः ३३ ३४

कृतश्चसोमराजोभूद्भौपिविधिवत्कृतः चेलुश्चोपसदःसोमंस्माभिषुणवंतिऋत्विजः ३५ चमसेषुयथादेवम
गृह्णन्कलशाद्रसं सामगैरप्यथबर्हिःपवमानस्तुतोभवत् ३६ गृह्णंतिस्माश्विनंपुण्यंब्रह्मादक्षिणतःकृतः
योजितःसवनीयश्चपशुर्यूपेसलक्षणः ३७ आलंभश्चवपाच्छिद्रंगृहीत्वाग्नौचसंस्कृता उपश्रुतामंत्रपूते
राज्येरासादिताभवत् ३८ स्रुवेहिरण्मयेसंभिन्नागृहीताध्वर्युणावपा यदातदामहादेवमस्मार्षीद्विजसत्तमः
३९ अथाविरासीद्भगवानंबिकासहितोहरः सर्वस्वरूपीसर्वेशश्चांडालरूपमास्थितः ४० मृतंगोवत्समादा
यस्कंधेरक्तांतलोचनः गतिंमदभ्रस्खलितांदधानःकंपयन्शिरः ४१ दृष्टेमयिद्विजाःसर्वेपलायंतामितस्ततः
कथंविशस्तनंकुर्युरजस्यद्विजसत्तमाः ४२ कृताजमांसभक्षाणामस्त्वासचनिषेवणं मातंगेतूर्णमागच्छद्विजे
भ्योमधुदीयताम् ४३ कुंभीमांसवसापूर्णाहस्तेकुरुममाचिरात् किंचित्किंचिद्विलंबेनायांतीमातंगकन्यका
म् ४४ मदघूर्णितलोलाक्षीमत्तमातंगगामिनीं जननींजगतांगौरीमाहूयद्यौवनोज्वलाम् ४५ साचीकृतमुः
खांभोलौमधुकुंभींचबिभ्रतीं उन्नतस्तनभारार्त्तिभज्यन्मध्यवलित्रयाम् ४६ अरालालकसंछन्नादधानांश्रु
तिमेकिकां एककर्णावसक्तेनदंतपत्रेणमंडिताम् ४७ आलंबमानोदयितांचालयंतीशिशुद्वयं कुमारःसहभा ॐ
र्योसाचितिजल्पन्पदेपदे ४८ कालायसःश्रीचांडालःशालाभ्याशमुपागमत् रेनोचदूरेगच्छंतिक्षिपंतःक्षुद्रशर्कॐ

श्रुतिंश्रोत्रंविभ्रतीं ४७ ४८ कालायसइति कालःआयसः अयोमयोदंडोयस्येत्यर्थः क्षुद्रशर्कराःखर्परांशसदृशाइत्यर्थः ४९ ५० ५१ ५२ ५३ ५४

ब्राह्मणास्तत्रचांडालंनविदुःपरमेश्वरं द्रव्यंदेशश्चकालश्चवन्हिर्यज्ञश्चदक्षिणाः ५० फलंचकर्मणामाहुर्य
न्मयंतेविदुर्हरं त्यक्तयज्ञायुधाःकेचिद्दृत्विजःस्पर्शशंकिनः ५१ स्नानायप्रययुस्तीर्थंतस्यसन्निहिताश्चये अ
पश्यन्नर्कमपरेकेचिद्दुद्रुवुरन्यतः ५२ मधुमत्तमिमंशूलेकरोत्पद्यमहीपतिः निःशंकंयन्मदांधोसायज्ञशालाम
दूषयत् ५३ चांडालदुष्कृताशालामाराशुकुरुनिष्कृतिं इतिदूरेगताःकेचिद्यजमानंतमूचिरे ५४ जात्यंधतामु
पगतेषुमहीसुरेषुतत्तत्कटूक्तिशतमेवमुदीरयत्सु ब्रह्मादिदुर्लभममुष्यपदंप्रदित्सुःशालामगाहततयासह
चंद्रचूडः ५५ अव्यक्तंवचसामाद्यंपुरुषंकृष्णपिंगलं चंडालवेषप्रच्छन्नंप्रविशंतंमखालयम् ५६ अनु
ग्रहायमारस्यसभार्यातनयंविभुं प्रियायैदर्शयामाससौधाग्रेसुंदरःस्थितः ५७ सुंदरोक्तिमनुस्मृत्ययज्व
नांप्रवरस्तदा अबोधिपत्न्याचसमंतमेवपरमेश्वरम् ५८ विद्रुतेषुसमस्तेषुद्विजेषुब्रह्मवादिषु प्रत्युदस्था
न्महाबुद्धिर्भगवंतंसहाग्निभिः ५९ अर्घ्यपात्रकराभार्यातमनुप्रययौपतिं प्रसीदपाहिदेवेतिवदन्नंघ्र्योःप
पातसः ६० दत्तार्घ्यमात्मनोदासंसफलीकर्त्तुमुद्यतः स्कंधाद्भगवतोवत्संमृतंस्वांसेन्यवेशयत् ६१ सापिभाग्यवती
पत्नीमातंग्याशिरसाधृतां मधुकुंभीमुपादायमौलौतद्भरणंव्यधात् ६२ जयशंकरविश्वात्मन्जयजन्मभवादन इत्युक्ता

जात्यंधतामिति अमुष्य अमुष्मैइत्यर्थः तया भार्यया ५५ ५६ ५७ ५८ विद्रुतेष्विति प्रत्युदस्थात्प्रत्युत्थानंचकार ५९ ६० दत्तेति दासंसफलीक
र्त्तुमुद्यतः उद्युक्तस्यशतृप्रत्ययात् इणप्रकृतिकउयच्छब्दोयंभगवतःशिवस्य ६१ ६२ जयेतिजन्मभवावत्तीतिजन्मभवादनःतत्संबोधनम्

चंडालसुहृदंमारमयाज्यंमेनिरेद्विजाः यदाबाष्पांभसाच्छन्नादृष्टिर्हर्षेजन्मना ६५ विमृज्यबाष्पमद्राक्षीन्मृतंवत्सं
महावृषं कैलाससदृशाकारंककुदंतंविषाणिनम् ६५ घंटाचामरमंजीररत्नास्तरणमंडितं देवीमरकतश्या
मामातंगीसास्मदृश्यते ६६ तावेववालकावास्तांगजाननषडाननौ सविश्वमायाप्रच्छन्नःपरःशंभुरदृश्यत ६७
ववर्षुरमराःपुष्पाण्यस्तुवन्निगमाःपुरः जगुर्गंधर्वपतयोनृत्तमप्सरसोदधुः ६८ ब्रह्मविष्णूसिवेवातेजयेत्यु-
क्त्वाथपार्श्वयोः षष्यष्टकोटिगणपाविभोर्ददृशिरेभितः ६९ भीतभीताबभूवुश्चप्रणताब्राह्मणादुताः तुष्टुवुश्चा
मराःसर्वेसनकाद्यामहर्षयः ७० चराचरंजगद्यत्रदृष्टमीश्वरसन्निधौ नमस्कृत्वाथदेवायज्योतिषेसर्वसाक्षि
णे ७१ मारोदत्तहविस्साक्षाच्छ्वेषेणेयाजदेवताः यज्ञनेथसभार्यायकृतावभृथकर्मणे ७२ कैवल्यनाथःकै
वल्यंदत्वाशंभुस्तिरोदधे येपठंतीममध्यायंशृण्वंतिभुविमानवाः ७३ तेषांशंभुप्रसादेनस्यात्कैलासपदस्थितिः ७४
इतिश्रीस्कांदोपपुराणेषट्पंचाशत्तमोऽध्यायः ५६॥ ॥छ॥श्रीअगस्त्यउवाच नियमेनान्वहंशंभुंपूर्वंभुक्तेर्निषे
वते कर्मबंधोनतस्यास्तिसत्यमेवब्रवीमिते १ अत्रेतिहासंप्रथितंप्रवदंतिपुराविदः श्रीमतःशाक्यनाथस्यच
रितंयत्रवार्यते २ अस्तिशंखपुरंनामनगरंशंकरप्रियं चातुर्वर्ण्यसमाकीर्णंचत्नरारामशोभितम् ३ विचारदक्ष
नामाभूत्ततत्ररुद्रान्वयोद्भवः अष्टादशपुराणानिश्रुतवान्सद्विजाननात् ४ तेनतस्यशिवेभक्तिरचलासमजायत प्रत्यहं

तायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांषट्पंचाशत्तमोऽध्यायः ५६॥ ॥ ॥नियमेनेतिभुक्तेःपूर्वंभोजनात्पूर्वं १ २ ३ ४ तेनेति

तेनपुराणप्रकाशेन

६ ७ ८ तदिति शाक्यान् जैनान् नाथति उपतापयतीतिसः नाथृयांचोपतापैश्वर्याशीःष्विति धातुपाठे ९ १० इतीति आंतरंमानसं ११ १२

शिवएवपरंतत्वंतस्मादन्यंनदैवतं कर्ताकर्मफलंदाताप्यस्तीतीहनसंशयः ६ स्वर्गादिफलमिज्यादिकर्म
कर्त्तातुकामवान् तस्यानुरूपफलदःपरमात्मामहेश्वरः ७ तमेवाराध्यदुस्तारंतरिष्येव्यसनार्णवं इति
निश्चित्यसुमति र्जिनशास्त्रमखंडयत् ८ तच्छास्त्रमर्मविज्ञाना च्छाक्यनाथमिमंविदुः कथमाराध्यतां
शंभुर्मयेतिविचचारसः ९ शक्यतेसांगपूजातुशंभोःकर्त्तुंनकेनचित् येनकेनापिसंतुष्येद्यदिभक्तिस्थिरा
विभौ १० इतिनिश्चित्यनियममकरोत्किंचिदांतरं अनिषेव्यहरंक्वापिनभोक्तव्यंदिनेमया ११ उपहारश्च
यःकश्चिदर्पितव्योभवेद्विभोः संकल्पयित्वेत्यारभ्यततस्नातोनदीजले १२ रुद्राक्षमालांभस्मापिविभ्राणःप्र
जषन्मनुम् पंचाक्षरींदृढांभक्तिमुद्वहन्शिववद्गुरौ १३ अग्रेशंखपुरीशस्यस्थित्वादूरेप्रणाम्यतं निर्दोषमिदमे
वास्तित्वेकंपाषाणमुत्तमम् १४ ७ शिवायनमइत्युक्त्वाचिक्षेपाभिमुखंविभोः एवंदिनेदिनेकुर्वन्नसेवतम
हेश्वरम् १५ अभूत्किणशतंमौलौचंद्रमौलेःशिलाहतेः परंदधारतच्चिन्हंचंद्ररेखामिवेश्वरः १६ दिनेदिनेप्रह
रतःशिलयोपदयाहरं महानत्यगमत्कालस्तस्यप्रीतोथशंकरः १७ तस्यभक्तिपरीक्षार्थंहृदिकौतुकमादधे
अथान्येद्युरभूद्वर्षःझंझानिलदुरासदः १८ विद्युत्स्तनितनिर्घातपातघोरतरोमहान् आरभ्यार्कोदयमभू
दर्द्धरात्रंचदुर्दिनम् १९ अकृत्वातद्दिनेशंभोःसेवांभोक्तुंसमुद्यतः परिवेषितमन्नंचत्यक्ताभूत्सहसोत्थितः २०

१३ १४ १५ अभूदिति किणशतंचिन्हशतं १६ दिनेइति शिलया उपदया शिलारूपेणोत्कोचेनराजादिदेयं द्रव्यमुपदासएवोत्कोचः १७ १८ १९ २०

२१ २२ २३ २४ दत्तेति तेनसहेत्यर्थः २५ इतिश्रीमानवत्युपनामकनरसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायां सप्तपंचाशत्तमोऽध्यायः ५७॥ ❀ ॥ ॥शिवोपासनाया आभ्यन्तरबाह्यभेदेनद्वैविध्यंस्वयंस्तदनुष्ठातॄणां कैवल्यमाह मनसेति यःमनसा शंभुंपूजयन् तदुक्तान् अन्यतः बहिःपूजयन् यःदृढभक्तिर्वर्ततेतदन्वयः१ कथयामीति वैराग्येनिष्ठाभक्तिस्तया २३नेतिकर्त्तव्यनिर्णयमिस्र

धिगस्तुमांव्रतभ्रष्टमकृतेशांघ्रिदर्शनं दृश्यंवर्षैपिमहस्तिविनिर्गत्यमहेश्वरम् २१ नत्वाम्भोपायनंदत्वामनसैव मचिंतयत् हरसेवामकृत्वाद्यभोक्तुंयदहमुद्यतः २२ तत्पापनिष्कृतिर्दृष्टापाणात्यागोनचान्यतः इत्यालयमुख स्तंभेशिरोघातयितुंयदा २३ तत्रवेगेनदुद्रावतदाग्रेभून्महेश्वरः निरुध्यसाहसादुक्तंदुक्तिमुपलालयन्॥ २४ दत्तसायुज्यभाग्येनशंभुस्तेनतिरोदधे २५ इतिश्रीस्कांदोपपुराणेभक्तविलासेससप्तपंचाशोऽध्यायः ५७ ❀ श्रीअगस्त्यउवाच मनसापूजयन्शंभुंतदुक्तान्बहिरन्ततः वर्ततेदृढभक्तिर्यःसशोकंदुस्तरंत्यजेत् १ कथयामि कथामत्रब्राह्मणस्यमहात्मनः वैराग्यनिष्ठायास्यप्रसन्नःपार्वतीपतिः २ वर्द्धमानपुरंनामभूषणचोलनीवृतां पुरमस्तिमहत्तत्रकश्चिदासीद्द्विजोत्तमः ३ नतस्याविदितंकिंचि द्वेदशास्त्रादिषुक्वचित् सपर्यालोच्यसकलशा स्त्रंकर्त्तव्यनिर्णयम् ४ कृतवान्काममुक्तस्यमनसःशांकरेपदे निश्चलास्थितिरीशार्चासैवान्यत्तुविडंबनम् ५ द्रव्यपूजातुकर्त्तव्याशिवभक्तेषुधीमता नशिलाक्षालनादेवप्रीतोभवतिशंकरः ६ ॥ ❀ ॥ ❀ ॥

स्योत्तरेणान्वयः ४ कृतवानिति कामेभ्यो विषयाभिलाषेभ्योमुक्तस्य यानिश्चला आस्थितिः आस्थासैवदृशार्चा अन्यत् अव्यवस्थेत्यर्थः साविडं बनं ५ द्रव्येति शिवभक्तेषु विषये द्रव्यपूजा द्रव्यैः विभवैः पूजा एवंच यथाविभवं शिवभक्तार्चनादेव शिवप्रीतिर्नतुशिवमात्रसेवयेतिभावः ६

इतीति मानसीमीशार्चां उपांशुस्याच्छतगुणस्साहस्रोमानससम्मतइतिनिश्चित्येतिभावः शतरुद्रीयंरुद्राध्यायम् अर्थिनांप्रियः प्रार्थितप्रदात्वादितिभावः ७ आतिथ्यमिति अतिथिभावमागतेषुजनेषुप्रत्यक्षं उत्तमस्यापिवर्णस्य नीचोऽपिगृहमागतः पूजनीयोयथायोग्यं सर्वदेवमयोहिसइतिस्मरणेनातिथौशिवस्यस्थितत्वात्तत्रप्रत्यक्षं द्योतत् क्षरत् घृतंयेभ्यस्तानितैः ८ ९ १० लिंगेमनोमयाः पुष्पकोट्यइतिभावः मनोमयलिंगेतासामेवसंभ

इतिनिश्चित्यमतिमान्नीशार्चांमानसींव्यधात् अन्वहंशतरुद्रीयंप्रजपन्नर्थिनांप्रियः ७ आतिथ्यमागतेष्वीशंप्र
त्यक्षंसमपूजयत् नित्यंद्योतद्घृतैरन्नैःसोपदंशैःसषड्रसैः ८ भोजयामासकुसुमैश्चंदनैश्चनवांबरैः पितेवशि
वभक्तानांपोषणेभाग्यवानभूत् ९ नाध्वरेषुतथाप्रीतोब्रह्मादीनांमहेश्वरः पुष्पतोस्ययथाभक्तान्नदानेनसं
ततम् १० लिंगेमनोमयेतेनचार्चिताःपुष्पकोटयः निर्मात्सरेणधनेतासामशक्तागणनायकाः ११ कैलासशिख
रेशंभुंबासहितमब्रुवन् वर्धमानपुरस्थेनत्वत्सादाब्जेसमर्चिताः १२ पुष्पभारान्वयंवोढुमशक्तास्मचिरादपि
वाञ्छांपूरयतस्येतिश्रुत्वातद्गिरिशोहसत् १३ हासकारणमाचक्ष्वेसबयाभ्यर्थितःशिवः अवदद्गिरिजांदेवींत
द्भक्तिमुपलालयन् १४ अनेनमानसीपूजाकृतामयिमयाफलं तस्यानशक्यतेदातुंनकिंचित्सोपिवाञ्छति १५
तद्दर्शनात्तहर्षोयंकर्त्तुप्रीतिंमहेश्वरः आरूढवृषभोदेव्यासहतस्यांतिकंययौ १६ तस्यचित्तपरीक्षायैप्रकीर्णो
रत्नराशयः तिलोत्तमाद्यप्सरसोप्यदृश्यंतसमंततः १७ प्रेतावाहनपाषाणास्तृश्यान्मेनेमणीन्स्तान् विलंघ्यप्रेतवत्ताश्च

वात् तासांपुष्पकोटीनां ११ १२ पुष्पेति तद्वाक्यमितिशेषः १३ हासेति तद्भक्तिंब्राह्मणभक्तिंउपलालयन् प्रशंसन् १४ अनेनेति तस्याःपूजायाःसाह
स्रोमानससम्मतइतिसामान्यतोमानसकर्मणोभ्यर्हितत्वोक्तेरितिभावः १५ तदिति तस्यभक्तस्यदर्शने आरूढःप्राप्तोहर्षोयेनसःप्रीतिमित्यत्रपर

तस्तस्येतिसंबध्यते आरूढवृषभइतितृतीयाबहुव्रीहिः १६ १७ प्रेतेति प्रेतावाहनं वस्त्रादिपाषाणाश्चतद्वदस्टश्यान् १८ शार्दूलमिति येन कारणेन १९ २० इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांअष्टपंचाशत्तमोऽध्यायः

शार्दूलमिवसंदृसंकामंयेनरुरोधसः नाम्नानिरुद्धशार्दूलःसस्वयंशंभुनाकृतः १९ दुर्लभंदर्शनंतस्मेदत्वागौर्यासहेश्वरः तेनसायुज्यभाजापिसार्धमंतरधीयत २० इतिश्रीस्कांदोपपुराणेभक्तविलासेअष्टपंचाशोऽध्यायः ५८॥ ॥ श्रीअगस्त्यउवाच दुर्लभाशांकरीभक्तिःशिवभक्ताःसुदुर्लभाः दुष्करंभुविजंतूनांतन्मनोरथपूरणम् १ किंजन्मनातेनजनस्ययेननभक्तवांछापरिपूरितास्यात् शरीरमर्थास्तनयंस्त्रियंवासमर्प्यपूज्यःशिवभक्तएव २ गृहानभ्यागतेभक्तेगृहिणांकिन्नुदुस्त्यजं यदिस्याद्भक्तपूजायामनुकूलाकुटुंबिनी ३ शोकसंतरणेजंतोरुपायोन्योनविद्यते विनैकेनमहादेवभक्तेष्टविधिनाभुवि ४ साहसवाप्यकार्यवाकृत्वाभक्तेष्टदायिनां नाधयोव्याधयोजन्ममृत्युर्वादेहिनांभवेत् ५ असारेष्यत्रसंसारेसारभूतमिदंनृणां सर्वदाशिवभक्तानांदीयतेद्यर्थितंयदि ६ नाचादेहीतियोदेहीयाचितोपिमहात्मना नेत्याहवस्तुधात्रीयंतेनभारवतीभवेत् ७ उपकुर्वंतिवृक्षाश्चपत्रैःपुष्पैःफलैरपि उपकारोस्यनक्वापिवृथाजातःसनेतिवाक् ८ तस्मात्सर्वप्रयत्नेनशंभोश्चरणसेविनां संपादितंस्याद्येनेष्टंतस्यजन्मोत्तमंविदुः ९ इष्टान्नदानेनसमर्चनीयाःसर्वात्मनाचान्वहमीशभक्ताः प्रियेषुशं

५८॥ ॥ ॥ सारालंकाररीत्याशिवभक्तमनोरथपूरणमेव सर्वोत्कृष्टमित्याह दुर्लभेति १ किमिति शिवभक्तःपूज्यएवेत्यन्वयः २ ३ ४ साहसमिति आधयोमनोव्यथाः मृत्युःअकालिकइतिभावः ५ असारेइति यदीत्यस्ययदित्यर्थः ६ वाचेतियःदेहीनरःमहात्मनाशिवभक्तेनयाचितोपि व

स्तुनेत्याह तेनधात्रीभूर्भारवतीत्यन्वयः ७ उपकुर्वंतीति द्रुतिसनावाक् प्राचीनवाक् वेदवागितियावत् ८९१० प्रदोषेतिचित्रापभरणीचैत्री
तिथेर्नाम ११ १२ त्रैलोक्यस्येति विश्वंभुनक्ति अवति भुङ्क्ते प्रलयकालेउपसंहरतिवा १३ १४ १५ १६ आवासइति स्थानमित्यर्थः आम्नायो वे

प्रदोषसोमवाराद्र्याकृष्णाष्टम्ययनादयः चित्रापभरणीमासशिवरात्र्युपदर्शकाः ११ शिवप्रियकराह्येतेदिवसाःस
द्भिरीरिताः अपिवाभोजयित्वैकंभक्तंमाहेश्वरंनरः १२ त्रैलोक्यस्यान्नदानेनयत्तत्फलमवाप्नुयात् किमत्रबहु
नोक्तेनशिवःप्रीणातिविश्वभुक् १३ किंप्रसन्नेपशुपतौदुर्लभंप्राणिनोभवेत् परमापद्गताश्चापिमहेश्वरसमर्चना
त् १४ नसंतिकतिवालोकेतीर्णसंसारसिंधवः अत्राप्युदाहरंतीममितिहासपुरातनम् १५ परंज्योतिरुपाख्यानं
प्रसिद्धंभुवनत्रये अरुणाराण्यनामास्तिपुरंधामपिनाकिनः १६ आवासःशिवभक्तानामाम्नायागमवेदिना १७
नमःशिवायेतिवदंतियत्रबालाश्चकन्याःशुकसारिकाश्च श्रुतेषुचप्रस्वलितेषुदृष्टाप्रदृश्यमालापविधौमि
थश्च १८ नाभस्मरुद्राक्षधरोस्तिकश्चिद्जप्तपंचाक्षरमंत्रराजः नवाश्नुतेशानकथांपदानेयत्रापिवासक
रजातिजातः १९ क्रीडासुवालाअपियत्रभूत्वाजटाधराभस्मकृतांगरागाः शार्दूलचर्मांबरसंवृतांगाःशिवोहमस्मी
तिमिथोवदंति २० जनानांवसतांयत्रचित्तवृत्तिरकल्मषा पतिव्रतेवभर्तारमाश्लिष्यतिमहेश्वरम् २१ तत्राभूच्चोल
देशेंद्रसचिवान्वयसंभवः पारदृश्वागमांभोधेःपरंज्योतिरितिश्रुतः २२ दुर्जयान्योविनिर्जित्यचोलराजस्यविद्विषः द्वात्रिंशद्ध

दः आगमश्च आगतं शिववक्त्राच्चगतंतुगिरिजामुखे मतंसर्वमुनीनांचतस्मादागममुच्यते इत्युक्तलक्षणः १७ श्रुतेष्वितिश्रुतंसकः १८ नेति
अश्रुतं ईशानकथापदानं ईशानकथाकर्मवृत्तंयेन तादृशोनास्तीत्यर्थः १९ २० २१ तत्रेतिआगमांभोधेः पारदृश्वा पारंदृष्टवान् पारंगतइत्य

भक्ते इति जगत्त्रये विख्यातमित्यन्वयः २४ २५ स इति यतः कारणात् भवति त्वयि शिवप्रसादः अभ्यधिकः अतः मंदिरे नियोज्यतां नियोज्य त्वं अर्हसि इत्यन्वयः २६ स इति सः दभ्रभक्तः तत्र मंदिरे न्यवसत् निवासं चकार साध्वी पतिव्रता नायिका तस्येति शेषः पार्श्वे वसति स्मे त्यर्थः तया तद्द्वारा ईप्सितं इष्टं अन्नं ददातीति तादृशः सन् भक्तानां सहस्रं भोजयित्वा समयं गमयामासेत्यग्रेतनेनान्वयः २७ समयमिति ज

भक्ते माहेश्वरे यस्य ह्यभुक्तवति न स्वयं अश्नीयामिति विख्यातं व्रतं नित्यं जगत्त्रये २४ श्रीमदभ्रसभानाथ नाम स्मृतिमतस्सदा ॥ यस्याखिलैः कृतं नाम दभ्रभक्त इति श्रिये २५ स चोलराजेन शिवप्रसादो यतो भवत्यभ्यधिकस्ततस्त्वं नियोज्यतामर्हसि मंदिरे तः सुखं निषीदेति नियोजितोभूत् २६ स तत्र न्यवसत्साध्वी पार्श्वे वसति नायिका तया सहस्रं भक्तानां भोजयित्वेप्सितान्नदः २७ समयं गमयामास जन्म साफल्यमार्जयन् तस्य तस्यामभूत्पुत्रो धरित्र्यामिव शेवधिः २८ चंद्रमा इव सर्वेषां नयनानंदवर्द्धनः पैतृकात्स ऋणान्मुक्तो ब्राह्मणान्प्रीणयन्धनैः २९ सहितो बंधुभिः सर्वैर्विहिते जातकर्मणि नाम श्रीपतिरित्यस्य चान्वर्थं निजसंपदा ३० अन्नमाप्राशयच्चार्द्धवत्सरस्य प्रियात्मजं अर्द्धांकुरितदंतस्य दृष्ट्वास्य मुमुदे मुखम् ३१ अथ संवर्धितो बालो बालकल्पतरुर्यथा कृतचौलोक्षराभ्यासे नियुक्तो मंत्रिभूषितः ३२ शिक्षाशालां शिशुः प्राप्य लिपिनिर्णयवानभूत् ३३ इति श्रीस्कांदोपपु

न्मनः साफल्यं आर्जयन् संपादयन् धरित्र्यां भूमौ शेवधिरिव निधिरिव निधिर्नाशेवधिरित्यमरः २८ चंद्रमा इति पैतृकात् पितृसंबंधिनः ऋणा न्मुक्तः सन् प्रजया पशुभ्य इति श्रुतेः धनै र्ब्राह्मणान् प्रीणयन् न्यवसदिति पूर्वेणान्वयः २९ सहित इति अन्वर्थं अनुगतार्थं लक्ष्मीपतित्वेन अनुरूपार्थं वा ३० अन्नमिति अर्द्धवत्सरे षष्ठे मासि षष्ठेन्नप्राशनमिति स्मरणात् प्रियार्भकं प्रीतिपात्रं पुत्रं अन्नं आप्राशयत् ईषत्प्राश

यामाससकृन्मंत्रेणेतिसूत्रादितिभावः मुमुदेजहर्ष ३१ अथेति बालकल्पतरुर्यथानूतनकल्पवृक्षइव ३२ शिक्षेति लिपिनिर्णयवान् लिपेःलिखि
ताक्षरविन्यासस्यनिर्णयवान् लिखिताक्षरविन्यासेलिपिर्लिविरुभेस्त्रियामित्यमरः ३३ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्या
ख्यायांभक्तविलासप्रकाशिकायांएकोनषष्टितमोऽध्यायः ५९ ॥ ॥ संप्रतितस्यैवदभ्रभक्तस्यपरमशिवप्रीतिपात्रतांदर्शयितुंतदुपोद्घातभूतंपार्व
तीशिवसंवादं आदौनिबध्नाति अथेति पार्वतीकर्त्री अंकेनिजोत्संगेशयानंपरमेश्वरं कौतुकान्तरेक्रीडामध्येप्रपच्छेत्यन्वयः १ २ इतीति हैमवत्यापार्व

श्रीअगस्त्यउवाच अथकैलासशिखरेपार्वतीपरमेश्वरं अंकेशयानंपप्रच्छकदाचित्कौतुकांतरे १ नंदिप्रभृतयःसं
तिभक्तास्तवसहस्रशः तेषुकुत्रतवप्रीतिरधिकासत्यमुच्यताम् २ इतिहैमवतीपृष्टःपशूनांपतिरंबिकां स्मयमानो
जगादेदंशनैर्लोलितसत्कचः ३ नमेक्वापितथाप्रीतिर्दभ्रभक्तेयथाधिका नतद्भक्तेःफलंदातुंप्रभुरस्मिशिवेसम
म् ४ नमय्यपितथास्यात्किमित्युक्तःशिवयाहरः तद्भक्तेरग्रतःकांतेभक्तिरालोक्यतामियम् ५ इत्युत्थितोबालश
शांकमौलिरापादकेशंधृतभस्मलेपः समुन्नतोन्नद्धजटाकलापःसदभ्रभक्तंप्रतिसंप्रतस्थे ६ अथचित्रापभरणीभ
वितेतिसमुत्सुकः माहेश्वरेप्सितान्नादिपचेत्यप्रेरयत्प्रियाम् ७ भोक्तारःकतिकःपाकेविशेषःक्रियतामिति पृच्छतींदभ्रभक्तःस्वां

त्यापृष्टःपशूनांपतिःशनैः लोलितसत्कचःचालितमस्तकइतिभावः इदंवक्ष्यमाणंवचनंजगादेत्यर्थः ३ ४ पार्वतीशंकतेनेति मय्यपिदेहार्द्धधारिण्यांत्व
देकभक्तायामित्यपिशब्दार्थः तथायथादभ्रभक्तेइत्यर्थः नस्यात्किंनभवेत्किं इतिशिवयाउक्तःकथितोहरः तद्भक्तेःदभ्रभक्तभक्तेः अग्रतःपुरतः तेत्व
त्संबंधिनीभक्तिःकाकीदृशीइयंदभ्रभक्तिः आलोक्यतांत्वयेतिशेषः ५ इतीतिउक्तेतिशेषः समुन्नतः उन्नतऊर्ध्वंबद्धःजटाकलापः कपर्दोयेन स
शिवः ६ अथेति चित्रापभरणीनक्षत्रयुक्ता चैत्रीपौर्णिमेत्यर्थः भविताभविष्यति तस्याश्चबहुपुण्यप्रदत्वंस्मृतिषुस्पष्टं माहेश्वराणां शिवभक्तानां ई

प्सितंअन्नादि आदिशब्दात्शाकसूपादिसंग्रहः पचपाकंकुरु ७ ८

अधीति अयंपुरोवर्त्ती अन्हामधीश्वरःसूर्यःनभसोगगनस्यमध्यमध्यास्ते गगनमध्येतिष्ठतीत्यर्थः अधिशीङ्स्थासांकर्मेति कर्म्मत्वं अतिथिसमागमकालोयमितिभावः ९ १० आरभ्यतामिति तंअतिथिंकश्चित्यदृच्छया आगतःप्राप्तः यदिसमागतः तर्हितंसंवासयेत्सन्वयः ११ १२ ललाटमि

अध्यास्तनभसोमध्यमन्हामयमधीश्वरः नकोपिशिवभक्तस्तेगृहानतिथिरागतः ९ चित्रापभरणीह्यद्यतिथिःपुणयतमामता नकंचिदपिपश्यामिमाहेश्वरमिहोत्तमम् १० आरभ्यतांत्वयापाकःप्रार्थयित्वानयामितं संवासयप्रियेकश्चिद्यदिभक्तःसमागतः ११ इत्युक्तानिरगाद्गृहानदभ्रभक्तोगवेषयन् अथातपेनक्वथिताःसमंतात्सांस्वोभुवः १२ ललाटंतपघर्मांशुःवर्द्धेदिनयौवने अथमाहेश्वराकारमास्थितःकालकंधरः १३ आविवेशालयंतस्यसंप्रस्विन्नमुखांबुजः इहास्यहमहंभोइत्याकार्यवचनंसती १४ निर्गतासहसादृष्टादृष्टामाहेश्वरंपरम् १५ प्रणम्यदत्वासनमाहसांजलिःसुस्वागतंभक्तवरेहचास्यतां आतिथ्यमत्रास्त्वनुमंतुमर्हसीत्युक्तावितेनेविधिवत्तदर्चनम् १६ तयासंपूजितश्चैवह्नोवेषेणशंकरः वसतिंकृगृहस्वामीत्यदृच्छस्त्रणतांसतीम् १७ तंप्रयुवाचाथसतीमदीयोनाथःसमाहेश्वरपाददासः भवादृशंभक्तवरंविचिन्वन्नितोबहिर्निर्गतएष्यतीति १८ यत्रनास्तिगृहस्वामीनतत्रनिवसेत्सुधीः यत्रयुक्तास्थितिस्तत्रगच्छामीत्यालयाद्ययौ गतेमाहेश्वरेतस्मिन्दभ्रभक्तश्चसत्वरः १९ अदृष्टभक्तःस्वंवेश्मप्रविवेशस्मरन्हरं अथागतंपतिंसाध्वीसांजलिःसमभाषत २० ॥ ॥ ॥

ति ललाटंतपतीति ललाटंतपः अस्यैललाटयोरितिखश् सचासौघर्मांशुःसूर्यः दिनयौवने मध्यान्हे कालकंधरः नीलकंठःशिवः १३ आविवेशेति प्रकर्षेणस्विन्नंस्वेदयुक्तंमुखाम्बुजंयस्य १४ १५ १६ १७ १८ यत्रेति आलयात्तन्मंदिरात्ययौनिर्जगाम १९ २० २१ ॥ ॥

२१ २२ २३ तस्मिन्निति मुनितरोः अगस्त्यवृक्षस्यमात्राजगज्जनन्यापार्वत्यायस्यग्रेयोगदंडाग्रेनिहितेप्रकोष्ठेकर्पूरादधःप्रदेशेस्थापितंआननं येनतं २४ भस्मेति भस्मभस्त्रां भस्माधारवस्त्रपात्रीं अक्षमालयाजपमालया वेष्टितांकृतवंतमित्यन्वयः जरतीननुर्यस्यतं २५ लंबमानमितिससर्वतः सर्वस्मात् दृश्यात्परंपरीभूतंतमसःपरस्तादितिश्रुतेः ज्योतिः आत्मस्वरूपंध्यायन्तमित्यन्वयः २६ २७ २८ दभ्रेति प्रसादः अनुग्रहः कि

नाथमाहेश्वरःकश्चित्साक्षादिवमहेश्वरः प्राप्तोदत्तासनोयुष्मान्नपश्यन्नालयंगतः २१ तत्रगत्वामहात्मानंप्रसाद्यानीयशांकरंयुक्तंभोजयितुंदेवमाविलंबोविधीयताम् २२ सुधारससमंसाध्वादभ्रभक्तोनिशम्यतत् देवालयंययौ तत्रयत्रमाहेश्वरस्थितः २३ तस्मिन्मुनितरोर्मूलेनिरासनमधिश्रितं मात्रायस्यग्रनिहितेप्रकोष्ठेस्थापिताननम् २४ भस्मभस्त्रांचपुरतोवेष्टितामक्षमालया कृतवंतंपरिश्रांत्यामीलिताक्षंजरत्तनुम् २५ लंबमानभ्रुवंज्योतिर्ध्यायंतंसर्वतःपरं आलोक्यदभ्रभक्तोस्यनिपपातपदद्वये २६ मुमुदेदर्शनादेवनिधिंदृष्ट्वेवनिर्धनः गृहीतचरणांगुष्ठंदभ्रभक्तदयानिधिः २७ न्यास्थापयित्वानामास्यपप्रच्छपरमेश्वरः माहेश्वरपदांभोजपरमाणुरहंविभो २८ दभ्रभक्तोस्मिदासोस्मिप्रसादःक्रियतांमयि आतिथ्यंगृह्यतांस्वामिन्कुतपःसुमहानिह २९ मदीयसदनंभ्यात्पदरेणुपवित्रितं अन्नंयद्रोचतेतुभ्यंदीयतेभुज्यतामिदम् ३० इत्यावेद्यपुनर्भक्तःप्रणनामातिथिप्रियः दभ्रभक्ततः प्राहमायामाहेश्वरोहरः ३१ सएवदभ्रभक्तोसित्वंपश्यविपुलयशः मृष्टान्नदातामक्तानांभवानेवभवानिव ३२

यतां त्वेतिशेषःकुतपः दिवसस्यअष्टमोंशः कालः अंशोष्टमोन्हःकुतपोऽस्त्रियामित्यमरः अन्येतु द्वौयामौ घटिकान्यूनौद्वौयामौ घटिकापरौस कालःकुतपःप्रोक्तःस्तस्मिन्दत्तंमहाफलमितिवदन्ति सुमहान् महाफलप्रदइत्यर्थः तथाच भवादृशानांभक्तानां आतिथ्यदानोचितोयंकालइति

भावः २८ इतीतिमायामाहेश्वरःकपटेनभक्तरूपधारी ३१ सइति भवानिवइत्यनन्वयालंकारेणभवत्सदृशःअन्योदातानास्तीतिभावः

अद्येतिभुक्तान्नमेववा भुक्तमन्नंयेनतादृशंभुक्तवन्तंवेत्यर्थःपर्वविशेषेअभुक्तब्राह्मणालाभेभुक्तवंतमपिभोजयेत् तावतापिफलसिद्धिर्भवि
ष्यतीतिभावः ३३ भक्तइति दम्भेतिनाममात्रग्रहणंनामैकदेशोवा संबोधनमितिबोध्यं उक्तेसति अप्रियंभवेदित्यर्थः ३४ ३५ गंभीरमाह
क्वेति शकृतःमायाधीनः तद्विलक्षणाःअप्राकृताइत्यर्थः नप्रकृतिर्नविकृतिःपुरुषइतिस्मरणात् स्वस्यचपुरुषरूपत्वादितिभावः नरोचते

अद्यान्नभरणीचैत्रीपरमेश्वरवल्लभा भोजयेद्भाग्यभाग्भक्तान्भोज्यंभुक्तान्नमेववा ३३ भक्तोसिदम्भभक्तस्त्वं
क्षुधितश्चास्मिसांप्रतं तथापिकिंचिदुक्तव्यमस्तिदम्भाप्रियंभवेत् ३४ कथंत्वामप्रियंवक्ष्यशक्रोत्यतिथिरागतः
नवक्तव्यंमयानैवश्रोतव्यमपितत्त्वया ३५ क्वचित्प्राकृतोलोकःक्वचयंतद्विलक्षणाः अलौकिकस्यवचनंलौकि
कायनरोचते ३६ भोजयान्यान्गृहंगत्वामातेशोकोस्तुमत्कृते इत्युक्ताभूत्प्रतिष्ठासुस्तस्यमाहेश्वरोग्रतः ३७ इ
तिश्रीस्कांदेपुराणेभक्तविलासेषष्ठितमोऽध्यायः ६०॥ ॥ ॥श्रीअगस्त्यउवाच ततोजिगमिषुंकापिप
दाग्रस्तष्टपादुकं मात्रायष्टिधरंदेवंनत्वाभक्तस्तमब्रवीत् १ मामेववदवक्तव्यंप्रतिशंकास्तुमामपि कर्त्तास्मि
तद्यथावत्तेयल्लौकिकमथापरम् २ दूरेनिरस्यसंदेहंकर्त्तव्योमय्यनुग्रहः वदंतमेवंबहुधागृहीतचरणंमुहुः
३ आस्तेतिमुनिवक्षस्यमूलेमाहेश्वरोवदत् घोरमाहारनियममाकर्णयसुदुष्करम् ४ ॥ ७ ॥ ७ ॥

नस्वदन्तेविजातीयवचनंनप्रियंकरमितिभावः ३६ भोजयेतिप्रतिष्ठासुः प्रस्थातुमिच्छुस्तस्यभक्तस्यअग्रतःपुरतः ३७ इतिश्रीमानवल्यु
पनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांषष्ठितमोऽध्यायः ६०॥ ७ ॥ ॥ततइति जिगमिषुं गन्तु
मिच्छुं १ मामेति वक्तव्यं निन्दाकरं २ ३ आस्तेतिमुनिवक्षस्य अगस्त्यतरोः ४ ७ ७ ७ ७

५ नेति पचेलिमं पक्वं विरसं रसहीनं आमयो रोगः ६ उद्दिष्टमिति पंचषड्वा पंचषाः बहुव्रीहौ संख्येये इति डच् टिलोपः पंचषाः हायनावर्षा यस्य अग्रजातो ब्राह्मणः लक्षण्यो लक्षणेषु साधुः ७ विद्येति कुलतन्तुः कुलस्यैक एवेत्यर्थः ८ स्यादिति विशस्य मारयित्वा ९ पचेति अव्यस

नान्नं न दधि न क्षीरं न सर्पिर्न मधूत्तमं मनःप्रीतिकरं विद्धि दभ्रभक्तममाश्रतः ५ न कल्पकफलं वा मे स्वदते यत्पचेलिमं विरसं चामयकरमन्यच्छाकादिकं पुनः ६ उद्दिष्टं मनसान्नं तच्छ्रूयतां दभ्रभक्तमे अग्रजातश्च लक्षण्यः पुत्रः पंचषहायनः ७ विद्याविनयसंपन्नः कुलतंतुर्महामतिः मातापित्रोः प्रियतमः सर्वेषां नयनप्रियः ८ स्याच्चेत्तं मातुरुत्संगस्थापितं खड्गधारण पिता विशस्य प्रक्षाल्य नखरोमादिवर्जितम् ९ पचेति पत्न्यै दद्याच्चेत्पचेदव्यसनाच्च सा सम्यक्कुर्वीत पाकं सा तदंगैः सह भर्जितम् १० समं सैंधवमादाय दर्व्या मे दीयतां हविः एवं चेद्भविता तृप्तिरन्यद्भोज्यमरोचकम् ११ यदि शक्नोषि तत्कर्त्तुमस्तु भिक्षा त्वदालये नो चेत्तत्र गमिष्यामि दातारो यत्र चार्थिनाम् १२ अर्थं श्रावयितुं चेमं तामसंधृतसंशयः कौतूहलं चेद्यशसि पत्न्याश्च न विलंब्यताम् १३ स्मयमानस्तथेत्युक्ता दभ्रभक्तोपि धीरधीः निःशंकमेव स्वं वेश्म गत्वा भार्यांतिकं ययौ १४ अथाभिमुखमायांतीं सश्वेतवननायिकां मूर्तामिव निजश्रद्धां भक्तिं माहेश्वरीमिव १५ सर्वदा समनुष्याणां छायां सहचरीमिव शोकांबुधेरपारस्य संतारे सुतरीमिव १६

ना पुत्रशोकरहिता १० सममिति अरोचकं अतृप्तिजनकं ११ १२ अर्थमिति यशसि कौतूहलं चेत्तर्हि असंधृतसंशयः सन् इममर्थं तां श्रावयितुं न विलंब्यतां पत्न्या च त्वदाज्ञाकरणेन विलंब्यतामिति अन्वयः १३ स्मयमान इति हसन् १४ अथेति श्वेतवननायिकां तदभिधानां भक्तिमित्यत्रापि मूर्त्तामिति संबध्यते १५ सर्वदेति सुतरां शोभनां नावं १६

करुणावतीति अगस्त्यउवाचेत्यादिः कलःअव्यक्तमधुरः अलकाःकेशाःनीरजपत्रं पद्मपत्रं १७ नीरंध्रयोर्घनयोर्वक्षोजयोस्तनयोर्भरे णानतमंगं यस्यास्तादृशि नीहारवत् शीतःश्वेतोहारोयस्या सा अवतुत्वामितिशेषः १८ सुकेशीति सूनास्त्रस्यकामस्यमहापताके

करुणावतिकल्याणिकलकंठिप्रसीदमे १७ नीलालकेनिर्मलमंदहासेनीतिस्थितेनीरजपत्रनेत्रे नीरंध्रवक्षोज भरानतांगिनीहारहारेवतुनीलकंठः १८ सुधारसोक्तेबहुसूक्ष्ममध्येसुनासिकेसुंदरगात्रिसुभ्रु सुकेशिसू नास्त्रमहापताकेसुधांशुमौलिस्तवसन्निधत्ताम् १९ वीणागुणालापिनिवीतरोषेवीरुद्भुजेविश्वजनान्नदा त्रि वीरःसमाहेश्वरवीतिहोत्रोवीरासनस्थोन्नमिदार्थितंत्वाम् २० त्वयैवगुणशालिन्याभवनंममभूषितं नं दनंकल्पवल्लीवपूरितास्यागताशया अनुकूलंनयस्यास्तिकलत्रंसाध्विमंदिरे २१ अरण्यमेवतस्याहुःशर णंगृहमेधिनः पतिंप्राणान्परित्यज्यरक्षंतिहिपतिव्रताः २२ इतिगाथाःपुराणेषुसाध्विसाक्षात्कृतास्त्वया श्रु णुकर्त्तव्यमधुनाविधिनाविहितंमम २३ सर्वदाह्यतिथिःपूज्यःगृहिणेत्यनुशासनं दृष्टादृष्टानिभाग्यानिन श्वराण्येवपश्यतः २४ प्रायःकलत्रंपुत्राश्चपशवःसर्वसंपदः अतिथिभ्योर्थितादेयानचेन्नश्यंतिहिस्वयम् २५ विषयानपरित्यक्ताःस्वयंपुंसांगतायदि शोकशूलंहृदिन्यस्यगच्छंत्येवपतिव्रते॥२६ सुधियाचेत्स्वयंत्यक्तादद्युःसौख्यमनंतकं शिविर्वेपुस्त्वंश्येनायकपोतत्राणतत्परः २७ अलर्कोदात्दिजेनेत्रेव्याधायांकंकपोतकः

मौलिभृते वीरुल्लता १९ वीरइति अर्थते याचति २० नंदनमितिपूरिता अभ्यागतानामतिथीनां आशायेतिपूर्वेणान्वयः २१२२२३ सर्वदेति नश्वराणि नाशशीलानि २४ प्रायइति नचेन्नदीयंतेचेदित्यर्थः २५ विषयाणांनश्वरत्वावश्यंभावेन अत्यक्तनाशे नरस्यदुःख

त्यक्तेषु सुखमेवेति प्रतिपाद्यति सदृष्टांतंत्रिभिःविषयाइत्यादिना २६ २७ अलर्कइति द्विजेविषयेअंकमुत्संगंकथास्त्रिस्त्रइमामहा भारतादिषुप्रसिद्धाः २८ अथेति अमुष्मिन्लोकेस्वर्गलोके २९ चिकीर्षुरिति महिरुद्धमद्यस्नेहादिनात्वयानैवकार्यमितिभावः ३० इति श्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांमेकषष्टितमोऽध्यायः ६१॥ ७ ॥ ॥अथ

अथमाहेश्वरेप्राप्तेकिमदेयंभवेन्मम २८ त्वदानुकूल्येननकिंचिदस्तिलोकेदुरापंत्विहमय्यमुष्मिन् चिकीर्षु रयास्मियदत्रसाध्वीढायेवमेतद्ववीकरोति ३० इतिश्रीस्कांदोपपुराणेभविलासेएकषष्टितमोऽध्यायः ६१ ॥ श्रीअगस्त्यउवाच एवंसंबोधितातेनसाश्वेतवननायिका प्रांजलिःस्मयमानाहप्रणम्यप्राणनायकम् १ नाथसंबोधनमिदंकिमपूर्वंकृतंमयि कर्णयोर्मेसिधारेवभवच्चाटूक्तिचातुरी २ सर्वदासापराधाहंशिक्ष णीयाननुत्वया कर्त्तव्यमादिक्षिप्रंनचेत्त्रानुकूलता ३ त्यजसद्योजनमिमंशून्यभांडमिवांतरा दभ्रभक्तस्त तःप्रीतस्तदंसेहस्तमर्पयन् ४ तमाहेश्वरसंकल्पतस्याःकर्णेन्यवेदयत् साध्वीतद्वाचमाकार्यवज्रपातसमा क्षरम् ५ अपिस्मम्यथतेनैवगंगेवाश्मनिपातनात् आनयार्भकमंत्रेतिनियुक्तोनिजभार्यया ६ जपन्पंचा क्षरीमेवबालशिक्षागृहंययौ अथसःश्रीपतिःस्वप्नेचिन्हंकैतकथास्या ७ कृष्टानमःशिवायेतिचुक्रोशोच्चैःगु रोःपुरा आहूयदृष्टेगुरुणाजगादस्वप्रविस्मयम् ८ सर्वदावत्सशंमुस्त्वांदीर्घाःसंतुतवाशिषः माभैरितिमाभाष्य

र्वीवचनचातुरीमस्याकार्यकार्येस्वगुरुत्वंमन्यमानायास्तस्यावचनमवतारयति एवमित्यादि १ नाथेति पत्न्याअनुशासनीयतयानु सरणमयुक्तमित्याह कर्णयोरिति २ ३ ४ तमिति वज्रपातसमानिअक्षराणि यत्रतादृशं ५ अपीति अश्मनोनिपातनात् ६ जपन्निति

मध्येइति कलानांनिधिं चद्रं १० ११ उपास्यइति सपर्ययापूजया १२ १३ १४ उत्थाप्येति त्वयि सतामाशिषः सफलाःसंतु गौरीपतेरनवधिः प्रसादोस्तुइत्यन्वयः १५ आयुरिति दीर्घमित्यनुषज्यते १६ १७ अभिषिच्येति असूषुयत् स्वापयामास १८ आहूयामासेति तीक्ष्ण

मध्येस्थितंश्रीपतिमर्भकाणांनिधिंकलानामिवतारकाणां उमापतेस्तोत्रशतंपठंतंतत्रात्मजंभक्तवरोददर्श १० पितुर्मुखालोकनजातहर्षःजातस्मितस्तोत्रमुदाजहार सश्रीपतिर्देशिकचोदितःसन्नुच्चैस्तरांवाचयतिस्मपद्यम् ११ उपास्यएकोधिपतिःपशूनांसमर्चनीयाश्चतदीयभक्ताः प्रीतःशिवोभक्तसपर्ययास्याच्छिवप्रसादेनशुचंतरंति १२ पद्यमाकर्ण्यपुत्रोक्तंमज्जन्नानंदसागरे प्रेषणीयोगृहेबालइतितद्गुरुमाहसः १३ श्रीपतेगच्छसदनंपित्रोरानंदमावह इत्याकर्ण्योत्थितोदासःसगुरुंप्राणमत्पदे १४ उत्थाप्याघ्रायतन्मौलिंवितेनेगुरुराशिषः १५ संत्वाशिषस्त्वयिसतांसफलाःप्रसादोगौरीपतेरनवधिःसुमतेस्तुदीर्घं आयुश्चवज्रमिवतेवपुरस्त्वरोगंऐश्वर्यमक्षतमुपैतुकुलंचवृद्धिम् १६ दभ्रभक्तःसमादायगुरुणाविहिताशिषं नीत्वालयंस्वभार्यायैदत्वाहत्वर्यतामिति सुगंधिनातमभ्यज्यतैलेनतनयंसती १७ अभिषिच्यसुखोष्णेनवारिणावारिजेक्षणं भोजयित्वानिजोत्संगेलालयित्वाह्यसूषुपत् १८ आहूयामासभर्त्तारमचंचलमनाःसती सतीक्ष्णधारासिधरःसहसांतिकमाययौ १९ भूषितंसर्वगात्रेषुधृतभस्मत्रिपुड्रकं दृढंजहारकरयोःपाणिभ्यांपादयोरपि २० साध्विभैक्षंमहाभिक्षोर्माभूद्बाष्पेणदूषितं पत्युक्तेत्थंस्मरच्छंभुंसाश्वेतवननायिका २१ उदस्तदक्षोनाविंदद्दभ्रभक्तःस्व

धारंअसिंधरतीतिसः १९ २० साध्वीति भैक्षंभिक्षेत्यर्थः समूहस्यान्नासंभवात् २१ उदइति तदक्षः तन्नेत्रं उदः उदकंनाविंदत् नलेभेइ

२३ रुधिरमिति करकेकमंडलौ २४ पचेति दृयंशंभोः भक्तिपरीक्षैवेतिकृतःआशयोययया २५ पचतीति धात्रीमाता २६ २७ २८ २९
३० कांडेति कर्मकांडोपासनाकांडद्वयार्थकेत्यर्थः पादुकेमुहुःशब्दब्रह्ममयः आरावोययोस्तौशब्दब्रह्ममणिविशिष्टौनूपुरौयस्मिन्कर्मे
णितथाभूत्वा ३१ भस्मेतिभस्मनः अंगरागोयस्यतादृशः अलंअर्जुनंश्वेतंअल्लकंकौपीनंविभ्राणःडमरोः ध्वनितस्यआटोपेनमुखरीकृतानि

अथोन्नमःशिवायेतिखड्गेनाखंडयच्छिरः ततःपादौततःपाणीश्रीपतेर्विचकर्त्तच २३ रुधिरंनूतनंचापिक
रकेन्यस्यदापयत् त्वचमाच्छिद्यमुंडंचनखकेशादिवर्जितम् २४ पचेतिभार्यामवदत्साचसाध्वीतथाकरो
त् दृयंभक्तिपरीक्षैवशंभोरितिकृताशया २५ पचतिस्माशिरोधात्रीगृहीत्वाक्षिप्रमर्भकं मरीचैर्जीरिकाद्यै
श्चकृत्स्नंनिबदलैरपि २६ सद्योघृतेनबहुनाभर्जितंसमसैंधवं अर्भकांगमशेषंचपचतिस्मपतिव्रता २७
संपन्नमितिभर्त्तारमुवाचमुदितासती उपलिप्यालयंसम्यग्भैरवंप्रत्यपालयत् २८ भक्तःशिवालयंगत्वामू
लेमुनिनरोस्थितं महाभैरवमाहेदंसंपन्नंसंमितंहविः २९ श्रांतोसिसुचिरंदेवमाविलंबोविधीयतां दूतित
द्वाक्यमाकर्ण्यहरोमाहेश्वराकृतिः ३० कांडद्वयार्थकेधृत्वापादयोःपादुकेमुहुः शब्दब्रह्ममयारावनिक्वणन्म
णिमूपुरम् ३१ भस्मांगरागोविभ्राणश्चालमल्लकमर्जुनं डमरुध्वनितादोपमुखरीकृतदिङ्मुखः ३२ रटत्क
रोटिसाहस्रकंठसूत्रभयंकरः दधानःसशिखंशूलस्फुरत्फणिककुंडलः ३३ ७ ७ ७

शब्दायमानानिदिङ्मुखानियस्य ३२ रटन् शब्दवत्करोटिनांमुंडानां सहस्रमेवसाहस्रंयस्मिन्तादृशेनकंठसूत्रेणभयंकरः मुंडमालाध
रइत्यर्थः शिरोस्थिनिकरोटिस्त्रीत्यमरः सशिखंसज्वालंस्फुरंतःफणिनोययोस्ते स्फुरत्फणिककुंडलेयस्यतथा ३३

रोचनेति ललाटस्थितत्वेनरोचनातिलकश्रियंविभ्रत् तार्तीयीकं तृतीयंविलोचनंयस्यतादृशः कपालमालिकायानादोयासुतादृशीभिर्जटाभिरुत्तंभिताः कुंतलायेन ३४ अरुणेति क्रोधेन अरुणापांगकणिकयावित्रासितंजगत्त्रयंयेन तदालयंदभ्रभक्तगृहं ३५ अथेति अवनिज्य प्रक्षाल्य निजिर् शौचपोषणयोः तदीयंजलमितिशेषः ३६ सुवर्णेति अस्यपादारविंदेसुवर्णपुष्पादिभिःपूजां विधायभगवं

रोचनातिलकश्रीभृत्तार्तीयीकविलोचनः कपालमालिकानादजटोत्तंभितकुंतलः ३४ अरुणापांगकणिकावित्रासितजगत्त्रयः आलंब्यदभ्रभक्तस्यहस्तमागात्तदालयम् ३५ अथावनिज्यांघ्रिसरोरुहद्वयंतदीयमाधायसुवर्णभाजने दधारमूर्ध्नातदपःस्वभार्ययाजमादधन्योस्मिचिरादपीतिसः ३६ सुवर्णपुष्पैरपिचंदनेनविधायपूजामपिदभ्रभक्तः पादारविंदेभगवत्तमस्यप्रदक्षिणीकृत्यननामभूयः ३७ उपवेश्यासनेहैमेमायामाहेश्वरंहरं रंभापत्रद्वयंसाग्रंविदधेविपुलंतले ३८ पशुमांसोपहारंतत्पात्रेपूर्वमुपस्तृते ददौभक्तिमतीसाध्वीपश्चादन्नंघृताप्लुतम् ३९ कर्पूरवासितंहस्तेदभ्रभक्तोप्यदाज्जलं अथमाहेश्वरोमौलिंचालयन्नाहतंपुनः ४० पक्वंशीर्षंनपश्यामियन्मेप्रियतमंभवेत् तौदंपतीतथाभीतौपश्यतःस्ममुखंमिथः ४१ पशुशीर्षंततोधात्रीकृतपाकंचभर्जितं स्वामिनेप्रददौसास्मैतत्पात्रेपर्यवेषयत् ४२ उक्तास्त्वमृतमित्याहभुज्यतामितितापसं भैरवःप्राहतंभूयःत्वराकार्यानमेत्वया ४३ शृणुचैवंवचोभक्तनवेत्सिनियमंमम नाश्नीयामेकएवाहंक्वापिचंडालकर्म

तंप्रदक्षिणीकृत्य भूयोननामेत्यन्वयः ३७ ३८ पश्चिति पूर्वंउपस्तृते अभिधारिते ३९ कर्पूरेति माहेश्वरः तंपुनःआहेत्यन्वयः ४० पक्वमिति यत्शीर्षं प्रियतमं अतिशयेनप्रियंपश्यतःस्म अपश्यतामित्यर्थः लट्स्मइतिस्मयोगाद्भूतेलट् ४१ पश्चिति धात्र्यामात्राकृतःपाको

यस्यतंभर्जितंचेतिपशुशीर्षविशेषणं ४२ ४३ शृण्विति तत् असहायतया भोजनं ४४

अभ्यागतइति अतिथिरन्योवा कश्चिदाहूयतामित्यन्वयः ४५ ४६ सांजलिरिति तत् भुक्तशेषंमयिदीयतांप्रसाद बुद्ध्येतिशेषः ४७ दभ्रे
ति भवानेवभक्तः तत् तस्मात् त्वयैवस्थीयतामित्यर्थः ४८ ४९ ५० शिलेतितत् तस्मात् विलंबः कालयापनमास्त्वित्यर्थः आस्वतिष्ठ ५१ ५२ तमिति

अभ्यागतोतिथिर्वान्यःकश्चिदाहूयतामिह यावन्नायातिसाक्ष्येकोमयातावन्नभुज्यते ४५ इत्युक्तोबहिरागत्यः
विचिन्वन्परितःक्वचित् दभ्रभक्तोनवेक्ष्यान्यंभक्तंप्राप्तस्तदंतिकम् ४६ सांजलिःप्राहनैवास्तिक्वापिभक्तःप्रदृ
श्यते अनुष्णमाहुश्चाभोज्यंभुक्त्वातद्दीयतांमयि ४७ दभ्रभक्तमथोवाचदेवःपरमभैरवः भक्तोभवान्नकोप्य
न्यःस्थीयतांभोजनायतत् ४८ वधूमुखमथालोक्य दभ्रभक्तोप्युवाचतं विज्ञप्तिःश्रूयतांस्वामिन्आजन्माः
स्तिव्रतंहितत् ४९ भुक्तवत्सुमहत्स्वेवभुज्यतेनुदिनंमया शिलान्यथाचेद्भोक्तव्याकथमेवंविधीयताम् ५०
शिलाभुजावाभवताभुक्तिर्भक्तैःसहोत्तमा विलंबोमातदास्वेहनस्याच्चेदप्यपारणा ५१ पंक्तौमाहेश्वर
स्याथप्रीतयेभोक्तुमुद्यतः दभ्रभक्तःशिवंस्मृत्वाशिलाकबलमाददे ५२ तंगृहीतास्मकबलंनिरुध्याह
पुनर्हरः आस्मृतंकिंचिदधुनाविस्मृतंयत्पुराक्षुधा ५३ अस्तिहिश्रीपतिर्नामतवपंचषहायनः पुत्रःसुभो
जनेप्राप्तेकथमत्रनदृश्यते ५४ भुक्तपूर्वंचनमयासदनेपुत्रवर्जिते सर्वशास्त्रनिषिद्धंतदपुत्रगृहभोजनम्
५५ सरःसरोजेनविनाकृतंयथाविनाशशांकेननभस्थलंयथा अदृष्टसूर्यंदिवसंयथातथानिकेतनंभातिन
पुत्रवर्जितम् ५६ अलंकारोमुखस्याक्षिवेदविद्याद्विजन्मनः पातिव्रत्यंकुलीनायाः वेश्मनोभूषणंसुतः ५७ यःस्व

आः इतिस्मृतौ अव्ययम् ५३ अस्तीतिपंचहायनः पंचवार्षिकः ५४ ५५ ५६ ५७ यस्येति सहनभुंक्तेस्वेनेतिशेषः श्वभोजनंशुनकभक्षण अतःसःश्वपाको

भोजनकालेन्नंपात्रेनिहितमर्भकः नभुं
क्तेसहतस्याशुभोजनंतच्छ्वभोजनम् ५८
भवति चांडालइतिभावः ५८

५९ ६० ६१ ६२ ६३ ६४ विलोकयेति विलंबेनकृतं विलंबोनकर्त्तव्यइत्यर्थः ६५ ६६ ६७ ६८ सिद्धार्थेति सिद्धार्थाःसर्षपाः तदा दिमंगलद्रव्यगंधीनीत्यर्थः पिनाकधनुषा शिवेनैव ६९ अम्बेति निद्रालुः निद्राशीलः स्टहि गृहीत्यादिना आलुच्प्रत्ययः ७० दिवीति

आच्छिद्यहस्तौपितुरादधानोबालोघृताक्तंकवलंमुखेस्वे करोतिचेदग्रतएवमातुस्तयोर्मुदाब्रह्मसुखंनतुल्य म् ५९ मधुरंगृह्ण तःसूनोस्त्यजतःकटुभोजनं मुखचालनमालोक्यमोदेतेननुदंपती ६० अहोदयाविहीनोसि कुलततुंकुमारकं उद्युक्तोसिविहायैवभोक्तुंभक्तकथंतराम् ६१ कथंवातेदयानास्तिश्रीश्वेतवननायिके भ र्त्तुर्भोजनकालज्ञापुत्रंनाहूयसेयतः ६२ दभ्रभक्तबहिर्गत्वाबालआहूयतांद्रुतं त्वमंकणेवागोष्ठेवाक्रीडते हसतेसुतः ६३ विलोकयविलंबेनकृतमित्यन्वशात्सतौ अन्योन्यालोकितमुखौतौमाहेश्वरशासनात् ६४ यथा नियोगंतत्कर्त्तुंशासनंनिर्गतौबहिः शिक्षाशालामुखौभूत्वादंपतीव्हयतांसुतम् ६५ श्रीपतेतूर्णमायाहिभोक्तुं माहेश्वराज्ञया आनंदयकलालापैःआवामप्यमृतैरिव ६६ ताभ्यामितित्रिराहूतःश्रीपतिःशिवशासनात् वी थ्यामाविरभूद्बालःसर्वाभरणभूषितः ६७ सिद्धार्थजीरकमरीचिनवाढ्यगंधीन्यंगानिभूषणकलापविभूषितानि विभ्रत्पिनाकधनुषैवकृताभयश्रीस्सश्रीपतिःपुरतएवबभूवपित्रोः ६८ अंबनिद्रालुरंकेतेकदाहंनिर्गतो बहिः इत्यालपन्मुहुस्ताभ्यामाश्लिष्यतमुदार्भकः ६९ दिविदुंदुभयोनेदुःपुष्पवृष्टिश्चखादभूत् रोमांचितां गीगिरिजातद्भक्तिंश्लाघतेस्मसा ७० शंभुरंतरधात्सद्योमहाभैरवरूपधृक् सहैवपशुमांसेनपात्रंतदवशेषितम्

खात् आकाशात् श्लाघतेस्म शश्लाघेइत्यर्थः ७१ शंभुरिति अंतरधात् अंतर्धानंजगामेत्यर्थः ७२

अथेति बालस्य आलिंगनेन निर्वृतौ सुखितौ ७२ ताविति विस्मयेनअद्भुतेन आविष्टंप्रविष्टं हृदयंययोस्तौ विचिन्वातेस्म अन्वेषणं चक्रतुरित्यर्थः ७३ ७४ ७५ ७६ जन्मनीति अपदानं कर्मवृत्तं ७७ समागममिति उदीक्षंतौ ऊर्ध्वंपश्यन्तौ ७८ ७९ ८

अथतौदंपतीभक्त्याबालालिंगननिर्वृतौ अंतर्भोजयितुंदेवंमाहेश्वरमुपागतौ ७२ तौभैरवमपश्यंतौमांस मप्यर्पितंपशोः विस्मयाविष्टहृदयौविचिन्वातेस्मसर्वदा ७३ गतस्यलाभेनसुतस्यनेमतुर्दंपतीतथाप्रापतु रेवदंपती अदर्शनेनास्यविभोर्यथाश्रुचंमहत्तमंतापमवापतुश्चिरात् ७४ उपेक्षसेकथंशंभोभक्तावित्यश्रु वर्षिणो ७५ जन्मन्यन्यत्रपूजायांशंभोर्विघ्नःकृतोमहान् इतिसंचिंत्यसंचित्यतच्चापदानमस्यतत् ७६ समा गममुदीक्षंतौदत्तदृष्टीबभूवतुः ७७ अथाविरासीद्भगवान्दयानिधिःपुरस्तयोर्देवगणैरभिष्टुतः सहैवगो र्यागजवक्त्रशक्तिभिर्निषेव्यमाणोवृषभोपरिस्थितः ७८ जयेतिरक्षेतिविलोकयेतिदेवप्रसीदेतिपुराणवा ग्भिः अभिष्टुतश्चंद्रकलावतंसःश्रीदभ्रभक्तांतिकमाससाद ७९ संपूजितस्तेनचभक्तिपूर्वंभार्यासमेतस्य चतस्यधात्र्याः वितीर्यमुक्तिंविबुधैर्दुरापामंतर्दधेशंभुरचिंत्यभूमा ८० चरितंदभ्रभक्तस्ययेशृण्वंतिपठं तिवा पार्वतीशप्रसादेनतेतरंतिभवार्णवम् ८१॥ ॥इतिश्रीस्कांदोपपुराणेभक्तविलासेद्विषष्टितमोऽध्यायः ६२॥ ॥ ॥श्रीअगस्त्यउ॰ अनवद्येषुभोगेषुकरस्थेष्वपिनिस्पृहाः येचैतिकेवलंशंभुंतेषांमुक्तिर्नदुर्लभा १

फलस्तुतिपूर्वकमुपसंहरति वितीर्यैति वितीर्यदत्वा अचिंत्यःचिंतयितुमशक्यः भूमाबहुत्वंयस्यपादोस्य विश्वाभूतानिइतिश्रुतेः ८०८१इति श्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांद्विषष्टितमोऽध्यायः ६२॥ ॥संप्रति

सस्यामपिभोगसामग्र्यांतामुपेक्ष्य येकेवलंशिवमेवार्चयंति तेषांसुलभामुक्तिरित्याह अनवद्येष्विति १ अत्रार्थेपुरावृत्तमवतारयति इति ह्यसमिति क्षमावतः तन्नामकस्य २ पुरमिति महोदयं कुशपौत्रेण वसुनानिर्मितंनगरं वसुश्चक्रेमहोदयमितिरामायणेदर्शनात् ३ तत्रेति अपरः अन्योरामइव दाशरथिरिवेति गुणसमृद्धिकथनमुपमालंकारस्यविषयःतेनशौर्यातिशयोव्यज्यते रामःशस्त्रभृतामहमितिभगवद्गीतावचनात् ४ आहुरिति पर राष्ट्रेषु शत्रुराज्येषुवदान्योबहुप्रदः ५ आम्नायेति आम्नायाःवेदाःआगमाःशास्त्राणितेषांमर्म

इतिह्यसमिहप्राहुरार्याःशिवकथाविदः चरितंवार्ण्यतेयत्रक्षत्रियस्यक्षमावतः २ पुरंमहोदयमितिख्यातमस्तिजगत्त्रये नामांतरंचतस्याहुर्वीनोरपुरमित्यपि ३ तत्रकश्चिद्भूदाजाविक्रमोन्मूलिताहितः क्षमावानितिविख्यातःश्रीमान्नामइवापरः ४ आहुःश्रीचेरनामानंपरराष्ट्रेषुयंनृपाः सराजानीतिचतुरःवदान्योब्राह्मणप्रियः ५ आम्नायागममर्मज्ञःसर्वक्रतुषुदीक्षितः सर्वसंशयसंछेत्तासदस्पतिसंमतः ६ सदासंपूर्णकोशश्चसामात्यबलवाहनः गृहेषुतस्यपर्यंकाःनवरत्नविचित्रिताः ७ पयःफेनोपमाःशय्याःदुकूलास्तरणोज्वलाः श=तसाहस्रसंख्याताःश्यामाहेमरुचस्त्रियः ८ करदैरन्वहंदत्तंवर्द्धतेमेरुवद्धनं ससर्वेत्तणवस्पर्द्धिन्विवमेवसमर्चयत्

रहस्यंजानातीति तादृशःदीक्षितः संजातदीक्षःसदस्पतेः सभापतिनाम्नाप्रसिद्धस्यशिवस्यसंमतोभक्तः ६ सदेति सम्यक्पूर्णःकोशःधनौघोयस्यतादृशः अमासहसमीपेवा तिष्ठन्तीत्यमात्यामंत्रिणः बलानि सैन्यानि वाहनानि हस्त्यश्वादीनि तैःसहवर्तेतद्धि तथा ७ पयइति पयसोदुग्धस्य फेनः डिंडीरः उपमायासांतथाविधाःशय्याः किंचदुकूलानांश्वेतपट्टवस्त्राणांआस्तरणैरुज्ज्वलाःप्रकाशमानाःश्यामाःषोडशवार्षिक्यःहेमरुचः सुवर्णकांतयः ८ करेति करंराजग्राह्यधनंददतीतिकरदाःस्वाधीनाइत्यर्थः तथावि

विशेषविज्ञप्तिरियम् ।

द्वितीयसंस्करणे मुद्रितस्य भारतग्रन्थस्य क्षयमुपलभ्यायां संख्यायामारब्धमस्माभिस्तृतीयसंस्करणमस्य । अधुना च प्रथमसंस्करणग्राहका द्वितीयसंस्करणग्राहकाश्च तुल्यमेव भारतखण्डं प्राप्नुवन्ति । तृतीयसंस्करणे मुद्रितानां भारतस्य खण्डितखण्डानां मुद्रणात् परं द्वितीयसंस्करणमुद्रितानि सर्वाण्येव भारतस्य साम्प्रतं विद्यमानान्युत्तरखण्डानि दातव्यानि युगपदेव ग्राहकेभ्यः । प्रावृड़न्ते यदि त्रीण्येव संस्करणानि युगपत् परिसमाप्तिमागमिष्यन्तीति आशास्महे । कतिपयसंख्याश्च भारतस्याधुनापि वितरणीयाः सन्ति । पुनः संस्करणमस्य च नो भावि स्थिरमेतत् । विज्ञापयामोऽतः प्रेषवः कृपयाविलम्बयन्त्वाशु । प्रेषणव्ययादिकञ्चयथावत् ।

दातव्य भारत कार्य्यालयः

कलिकाता। श्रीप्रतापचन्द्र रायः

Printed by Kāli Dāss Sen, at the Bhārata Press,

No. 1, Rājā Gooroo Dāss' Street, Calcutta.

१० ११ १२ जानीहीति सर्वप्राणिभाषाज्ञानं तवास्त्विति वरं ददावित्यर्थः अत्रहेतुः मदनुग्रहादिति नन्वेतावताकिंजातं अतआह यद्य
दिति यद्यदस्तुवांछसि तत्तद्विधास्यामि संपादयिष्यामि तत्रसाभिप्रायमदमर्थविशेषणं सर्वंकृदिति सर्वंकरोतीति सर्वंकृत्सर्वंकर्तुः

जपन्मंत्राक्षरंनित्यंदिवसान्यतिवाहयत् सविस्रब्धाखिलान्भोगानतपसेराज्यमास्थितः १० संप्रार्थितश्चसचि
वैःप्रवेशायपुनःपुरे नानुमेनेस्वयंराज्यंशिवपूजाविघातकृत् ११ ततःशिवाज्ञयास्वप्नेक्षमावान्शासितोभवत्
अधिशाधिमहींशत्रूनजहिपालयचप्रजाः १२ जानीहिसर्वजंतूनांभाषाश्चमदनुग्रहात् यद्यद्वांछसितत्तेहं
विधास्यामिचसर्वंकृत १३ यथावच्छासनंशंभोश्चिकीर्षन्नथभूपतिः प्रविवेशपुरं भूयःसचिवैश्चाभ्यषिच्यत
१४ विधिवत्पालयामाससधेनूब्राह्मणानपि अजयद्विविधैर्यज्ञैरध्वराधिपतिहरम् १५ पूजयामासविधिवद्भ
स्मरुद्राक्षधारिणः क्वचिन्मृत्स्नाभरद्दृष्ट्वाभस्मोद्धूलितविग्रहम् १६ प्रणमन्नजकृतेनप्रणतस्तमतोषयत् अ
वंध्यसस्याभूरासीत्स्वधर्मनिरताजनाः १७ तस्मिन्सिंहासनारूढेक्षमावतिमहीपतौ सहालास्यशमाहात्म्यश्रु
त्वातस्मिन्निविष्टधीः १८ सस्मारमनसातस्यनामदिव्यंक्षुतादिषु गोपिकातनयःकश्चिद्भूणभद्रसमाह्वयः॥
१९ संनिधौसुंदरेशस्यसंजगौधनवांछया त्रिसंध्यंवीणयागायंस्तस्यलीलामनोहराः २० ७ ७ ॥

सर्ववस्तुसंपादनंनविस्मयायेतिभावः १३ यथावदिति शंभोश्शासनंयथावत्यथोपदेशं चिकीर्षन् कर्तुमिच्छन् अभ्यषिच्यत
अभिषिक्तः राज्याधिपत्यदृतिशेषः १४ १५ पूजयामासेति भस्मरुद्राक्षधारिणः शिवभक्तानित्यर्थः १६ प्रणमन्निति तेनअजके
नप्रणतः नमस्कृतस्सन् तमतोषयदितिअन्वयः १७ १८ सस्मारेति क्षुतादिषु क्षवादिषु आदिपदेनजृंभादिपरिग्रहः १९ २०

देवमानंदयामासमीनाक्षीरमणंविभुं स्वप्रेथबाणभद्रस्यददौपत्रंकरेहरः २१ देहिचेरायतद्दत्तंगृहाणद्रविणंमहत् इत्यादिश्यतिरोभूतेदेवेसभयमुस्थितः २२ बाणभद्रःकरेदृष्ट्वापत्रमाश्चर्यवानभूत् महोदयपुरंप्राप्यसतत्रंक्षमापतेः २३ दत्वाचिन्हैर्विनाराज्ञादत्तंधनमवाप्तवान् बाणभद्रोथमधुरांधनंयावदपेक्षितम् २४ गृहीत्वाप्रययौहृष्टःपथियानैर्यथानृपः २५ पूजावसानेनृदिनंपुरारेःसन्नृत्यतोनूपुरशिंजितानि आकर्ण्यय न्मोदकृताश्रुवर्षः कालंनिनायक्षणवन्महांतम् २६ सकदाचनपूजायांसमाप्तायामुपागतः अशृणवन्नूपुरवंमेनेस्वमपराधिनम् २७ दोषस्यनिष्कृतिःशंभोःप्राणत्यागइतिस्मरन् निजोदरंविनिर्भेत्तुंदधौकौक्षेयकंकरे २८ ज्यरुणत्साहसंतस्यदृषारुद्धोमहेश्वरः सुंदरस्तुतिसक्तेनविस्मृतंताडवंमया संख्यतेसुंदरेणास्तुसहितस्तेनसर्वतः २९ स्थलेषुसेवमानोमांपरांप्रीतिमुपेष्यसि आगमिष्यसिकैलासेयस्मिन्कालेससुंदरः ३० तदामदाज्ञयाकश्चिच्चतुर्दंतोमहागजः भविष्यतिसमीपेतेतमारुह्यामुनागजम् ३१ ७२

देवमानंदयामासमीनाक्षीरमणंविभुं स्वप्रेथबाणभद्रस्यददौपत्रंकरेहरः २१ देहिचेरायतद्दत्तंगृहाणद्रविणंमहत् इत्यादिश्यतिरोभूतेदेवेसभयमुस्थितः २२ बाणभद्रःकरेदृष्ट्वापत्रमाश्चर्यवानभूत् महोदयपुरंप्राप्यसतत्रंक्षमापतेः २३ दत्वाचिन्हैर्विनाराज्ञादत्तंधनमवाप्तवान् बाणभद्रोथमधुरांधनंयावदपेक्षितम् २४ गृहीत्वाप्रययौहृष्टःपथियानैर्यथानृपः २५ पूजावसानेनृदिनंपुरारेःसन्नृत्यतोनूपुरशिंजितानि आकर्ण्यय न्मोदकृताश्रुवर्षः कालंनिनायक्षणवन्महांतम् २६ सकदाचनपूजायांसमाप्तायामुपागतः अशृणवन्नूपुरवंमेनेस्वमपराधिनम् २७ दोषस्यनिष्कृतिःशंभोःप्राणत्यागइतिस्मरन् निजोदरंविनिर्भेत्तुंदधौकौक्षेयकंकरे २८ ज्यरुणत्साहसंतस्यदृषारुद्धोमहेश्वरः सुंदरस्तुतिसक्तेनविस्मृतंताडवंमया संख्यतेसुंदरेणास्तुसहितस्तेनसर्वतः २९ स्थलेषुसेवमानोमांपरांप्रीतिमुपेष्यसि आगमिष्यसिकैलासेयस्मिन्कालेससुंदरः ३० तदामदाज्ञयाकश्चिच्चतुर्दंतोमहागजः भविष्यतिसमीपेतेतमारुह्यामुनागजम् ३१ ७२

२१ देहीतिचेरायचेरापरपर्य्यायायक्षमावतेराज्ञे २२ २३ २४ २५ २६ अशृणवन्निति प्रतिदिनंजायमानस्यनूपुरवस्य अस्मिन्दिने श्रवणाभावात् आत्मापराधेनैवशिवस्तथा चकारेतिनिजापराधानुमानेनस्वमात्मानंअपराधिनंमेने २७ निजेति कौक्षेयकंखड्गं खड्ग कौक्षेयकौसमौदित्यमरः न्यरुण त्नितरांरुरोध २८ सुंदरेति सुंदरस्यप्राग्वर्णितस्यप्रधानभक्तस्य स्तुतिषु स्तवेषु सक्तेनमयाताण्डवं

उद्धतनृत्यंप्रदोषेषुप्रतिदिनंक्रियमाणं विस्मृतं मधुरोद्धतभेदेननद्वयंद्विविधंपुनः लास्यतांडवभेदेननाटकाद्युपकारकमितिदशरूपको क्तेःस्त्रीकर्तृकंनृत्यंलास्यं पुंस्कर्तृकं तांडवमितिविवेकः २९ स्थलेष्विति यस्मिन्यस्मिन्कालेसुंदरः आगमिष्यतीतिशेषः तदात्वमपितेनैव

सहागमिष्यसीतिसंबंधः ३० तदागमनकालस्यचिन्हमाह तदेति चतुर्दंतः ऐरावतकुलीनः अमुनासुंदरेणसह ३१ वपुषेति सचिवेषु मंत्रिषु आरोपितानिक्षिप्ता क्षितिःलक्षणयाभूभारोयेन ३२ ३३ ३४ महोदयइति शतमन्यवः क्रतवोयस्यसः शतमन्युरिंद्रः तस्यते जइव तेजोयस्यसः मन्युर्दैन्येक्रतौक्रुधीत्यमरः ३५ इतिश्रीमानवल्युपनामकन्नसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलास

वपुषायाहिमत्स्यानंइत्युक्तांतरधाद्धरः क्षमावानथसंतुष्टःसचिवारोपितक्षितिः ३२ पतस्थेसुंदरंद्रष्टुंसभृत्यबलवाहनः ३३ हालास्यनाथंचचिदंबरेशद्रोणीपुरेशंचनिषेव्यमार्गे संप्राप्यसश्रीकमलालयंचस्तुत्वाहरंसुहृन्मित्रमासीन ३४ ससेनसर्वत्रनिषेव्यशंभुंप्रस्थाप्यमित्रंकमलालयाय महोदयेपूर्ववदेवराज्यंशशासभूयःशतमन्युतेजाः ३५ इतिश्रीस्कांदोपपुराणेभक्तविलासेत्रिषष्ठितमोऽध्यायः ६३॥❀ ॥ ॥श्रीअग स्त्यउवाच श्रीकर्मयेप्रकुर्वतिध्यायंतःशंकरंविभुं शोकमोहविनिर्मुक्तास्तेयांतिशिवमंदिरम् १ आसीद्दो णपुरीनाथवामांगस्तन्यपायिनः दयालवासविज्ञानोगणनाथाव्हयोर्जितः २ श्रीकर्मणिनियुक्तोभूद्गुरुणा परमेष्ठिरे स्वरूपंतत्रपप्रच्छप्रणम्यपरयामुदा ३ गौरीतनयःसतस्मैतदुपादिशत् गुरुपादाब्जभजननिरतः

प्रकाशिकायांत्रिषष्ठितमोऽध्यायः ६३॥❀ ॥ ॥शिवध्यानपूर्वकंश्रीकरंकर्मकुर्वतांसर्वानर्थनिवृत्तिपूर्वकमोक्षप्राप्तिरित्याह श्री कर्मेति श्रीकरंचतत्कर्मेतिमध्यमपदलोपीसमासः श्रीशब्देनविपुलभोगसामग्रीसिद्धिः मुक्तिश्चेतिद्वयंतज्जनकंकर्मश्रीकरमि त्यनुपदमेववक्ष्यते शोकमोहाभ्यांविनिर्मुक्ताः ब्रह्मात्मैक्यभावनयारजस्तमःसंबंधाभावेनसत्वैकनिष्ठतयेतियावत् तरतिशो कमात्मवित् तत्रकोमोहःकःशोकएकत्वमनुपश्यतइतिश्रुतेः ज्ञानिनइत्यर्थः ज्ञानप्राप्तिश्चसत्वोद्रेकाधीनासत्वात्संजायते

ज्ञानमितिस्मृतेइतिवेदांतसांख्याभ्यामनुमतमेवरसिकानामपिमतेतस्यैवकादाचित्काभिव्यक्तिविषयस्यरसरूपताङ्गीकृता यदैतत्सु अ-६४
कृतंरसोवैसः रसंह्येवायंलब्ध्वानंदीभवतीतिश्रुतेः आकरेष्वपि सत्योद्रेकादखंडस्वप्रकाशानंदचिन्मयः दृत्यादिना अयमास्वाद्यते रसङ्
यंतेन भग्नावरणाचिदेवरसः यथाशरावादिनापिहितो दीपस्तन्निवृत्तौ सन्निहितान्पदार्थान्प्रकाशयति स्वयंच प्रकाशतेतथाऽ
अज्ञानसंवलितमात्मचैतन्यंविभावादिसमवधानेन तन्निवृत्यास्वयमेव स्वेनप्रकाशते अन्यत्प्रकाशयति चेतिपरेवस्तुतस्त्वस्य
ज्ञाप्यत्वमपिनेतिकारकज्ञापकाभ्यामन्यक्कचिदृष्टमितिचेन्नकचिदृष्टमित्यादिनास्पष्टमेव एतस्यसर्वस्यज्ञानस्यरूपतयाऽज्ञानस्यचज्ञाननिवर्त्य
तयातदात्मत्वंचशिवस्यैवेतिज्ञानंमहेश्वरादिच्छेदित्यादिनाप्रसिद्धमेव शिवमंदिरंयांतिमुच्यंतदृत्यर्थः १ आसीदिति द्रोणपुरीना

त्रिसंध्यमात्मलिंगार्चाभस्मरुद्राक्षधारणं स्वयंव्यक्तमहालिंगदर्शनंचप्रदक्षिणम् ५ रु
द्राध्यायजपश्चापिशिवाग्नौहविरर्पणं आतिथ्यभाग्यतात्वेचचरलिंगेशिवार्चनम् ६

थस्यशिवस्यवामांगंगौरीतस्याःस्तन्यपायिनःगौरीस्तनंधयस्यगणेशस्येत्यर्थः दयालवेनकृपालेशेनप्राप्तंविज्ञानंबहुतरशिल्पशा
स्त्रादिज्ञानंयेन तादृशः गणनाथाव्हयातन्नाम्नाऊर्जितःप्रसिद्धः २ श्रीकर्मणीति वक्ष्यमाणेकर्मणिगुरुणा नियुक्तःसन्आज्ञप्तः
सन्स्वरूपंश्रीकर्मणःस्वरूपंपप्रच्छेत्यन्वयः ३ गौरीति गौर्याः तनीयतनयःगणेशकुमाराभ्यामन्यःतथाप्रीतिपात्रमित्यर्थः सःगुरुःत
स्मैगणनाथायतत् श्रीकर्मउपादिशत उपदिदेशतस्यैवस्वरूपंप्रतिपादयति गुरुपादाब्जभजनमित्यादिना श्रीकर्मपरिकीर्त्तितमि
त्यंतेनश्लोकदशकेन ४ त्रिसंध्यमिति आत्मनः लिंगस्य नित्यपूजागोचरस्य अर्चाऽर्चनंस्वयंव्यक्तानां स्वयंभुवां महालिंगानां पा
र्थिवादीनांदर्शनं ५ रुद्रेति रुद्राध्यायस्यशतरुद्रीयस्यजपश्च सर्वपापप्रायश्चित्तमेतत् भस्मछन्नोभस्मशय्याशयानोरुद्राध्यायी

मुच्यतेसर्वपापेरितिश्रुतेः शिवाग्नौहविरर्पणमिति अन्न समय मत सिद्धांतवेदिभिःश्रीमदाचार्यशंकरभगवत्पूज्यपादैः आनन्द लहर्यांस्मरयोनिंलक्ष्मीमितिश्लोकेशिवाग्नौजुहुतःसुरभिघृतधारादृतिशतैरित्यनेनप्रपंचितं तदेव तद्दीकाकर्त्रा लोलल क्ष्मीधरेणसम्यगेवविशदीकृतं तथाहि शिवाग्नौशिवाशक्तिः त्रिकोणमितियावत् तत्रसंस्कृतोअग्निःशिवाग्निः शिवायांसं स्कृतोऽग्निःशिवाग्निरितिमध्यमपदलोपीसमासः वैन्दवस्थानेस्वाधिष्ठानाग्निमवयुज्यतत्रनिक्षिप्य पाशांकुशाभ्यांसंनिरु ध्यभुवनेश्वर्याश्चकुण्डाग्नेर्जातकर्मादिषोडशसंस्काराएतत्क्रियन्तेसशिवाग्निरितिरहस्यम् अयमाशयःत्रिकोणेवैन्दवस्था नेस्वाधिष्ठानाग्निंनिक्षिपेतियद्यपिवैन्दवस्थानंचतुष्कोणंतथापिपुरश्चरणात्मकक्रियायांसंविलक्षणेत्रिकोणमारोप्य सहस्रकम

श्रीमज्जनांबुदानंचतद्द्रव्यस्यसमर्पणं गंधकुंकुमकर्पूरगोचनादिसमर्पणम् ७ दध्याज्य क्षीरतैलाद्यैःफलैर्लिंगाभिषेचनं ॥ अखंडदीपारोपश्चपूजापात्रविशोधनं ८ ॥ ० ॥

तेवैन्दवस्थानस्थांकामेश्वरीमवरोप्यपुरश्चरणंकार्य्यमितिसमयमतरहस्यमिति आचार्य्याणामाशयः इदंचयोगीश्वरणांकर्म्म तत्रहविरर्पणंममेदमंशाख्यहोमद्रव्यत्यागःतदुक्तंगायत्रीभाष्ये भगवत्पूज्यपादैः गुहाशयब्रह्महुताशनेहंकर्त्तेदमंशाख्यहवि र्हुतंसत्विलीयतेनेदमहंभवानित्येषप्रकारस्तु विभिद्यतेत्रेति चरलिंगेशिवभक्तादिरूपेशिवार्चनंपाद्यार्घ्यादिदानेनतेषांप्रीति जननं द्द श्रीमदिति श्रीमतांलक्ष्मीवतांजनानांअम्बुदानंजलसमर्प्पणं अयमाशयःयेधनिकाः शिवाभिषेकायपिपासितेभ्यः पांथेभ्योवा द्रव्यद्वाराजलपर्य्येयंति तद्विनियोगः तस्मिन्कर्मणि नियुक्तेन अवश्यं कार्य्यद्दति गंधेत्यादिगोचना गोरोचना आदि पदेन दधि दूर्वाप्रभृति मंगल्यद्रव्य समर्प्पणम् उपलक्षितम् ७ दध्नीति अखंडदीपस्य अखंडदीपस्य आरोपः ८ ७

९ १० ११ शैवेति पद्मपुराणादिप्रसिद्धानां शिवसंबंधिनामागमानां अर्थश्रवणं गुरुमुखादितिशेषः तत्कोशानांतद्ग्रहस्यार्थप्रतिपादक कोशानांसंग्रहः १२ १३ पालनमिति गणाग्रणीःगणनाथः १४ महोत्सवेति बोधनात् अन्यदत्तैःस्वधनैश्चशिवयोः महोत्सवविधानंभूषणानिचकारयामासेत्यन्वयः १५ १६ उपसंहरति स्मरन्निति कैवल्यं विदेहमुक्तिं अवाप्तवान् अन्योपि य

निर्माल्यंपाद्यजातानांशंभोर्दीपसमर्पणं पठनंनृत्यगीतादेर्लयालेपमार्जनम् ९ नित्यंशिवपुराणानांश्रवणंश्रावणंतथा पुष्पारामविधानंचचित्रवस्त्रसमर्पणम् १० रंभादाडिमजंबीरनारिकेलादिभूरुहां उद्यानवाटीरचनंतटाकरचनंतथा ११ शैवागमार्थश्रवणंतत्कोशानांचसंग्रहः निर्माणमंडपादीनांरथवाहनकल्पनम् १२ कैंकर्यकारिणांनित्यंपोषणंदेहिनामपि अन्येषामेवमादीनांशिवप्रीतिविधायिनाम् १३ पालनंसर्वधर्माणांश्रीकर्मपरिकीर्त्तितं इत्यादिष्टःस्वगुरुणातथाचक्रेगणाग्रणीः १४ महोत्सवविधानंचशिवयोर्भूषणानिच सधनैःकारयामासचान्यदत्तैश्चबोधनात् १५ अभून्यंगमयामासयावदायुर्गणाग्रणीः देहावसानेदेवस्यप्रसादाद्गिरिजापतेः १६ स्मरन्गुरुपदांभोजंसकैवल्यमवाप्तवान् १७ इतिश्रीस्कांदोपपुराणेभक्तविलासेचतुःषष्ठितमोऽध्यायः ६४॥ ७ ॥श्रीअगस्त्यऊ· दृढभक्तिमताशंभुःसेवितोविजितारिणा प्रसन्नइहचामुत्रप्रदद्यादेववांछितम् १ पुरंपुष्करनामास्तिप्रथितंभुवनत्रये तत्रासीन्नृपतिःश्रीक्र

द्येवंकरोतिसोपिविमुच्यते इत्यभिप्रायः १७ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांचतुःषष्ठितमोऽध्यायः ६४॥❀॥ ॥संप्रतिजितेंद्रियेणदृढभक्तिमतासेवितःशिवःलोकद्वयसुखमपिअवश्यंदास्यती

त्याह दृढइति १ पुरमिति परांतकमिति परेषांशत्रूणांअंतकः अतएवतन्नाम्नाप्रसिद्धः जात्याशूद्रइत्यर्थः २ सइति स्त्रैणंस्त्रीसमूहः तृणंतृणतुल्यंधियायेनतुलितमित्यन्वयः अग्रेप्येवम् ३ अजन्मेति तस्यराज्ञः हरिध्वजंसिंहध्वजंदृष्ट्वा अरय इतिशेषः अकस्मात् अ

सधीराणांचवीराणांप्रथितोग्रेसरोभुवि स्त्रैणंतृणंधनंलोष्टंयेनासीत्तुलितंधिया ३ आजन्मसिद्धवैराग्योप्या सीत्क्षत्रियवृत्तिमान् रणेदृष्ट्वापलायंतेतस्याकस्माद्धरिध्वजम् ४ मृगराजमिवारण्येदूरेदृष्ट्वामहागजाः शत्रू न्विद्राव्यनृपतिःव्याघ्रोमेषव्रजानिव ५ स्वविक्रमार्जितंदिव्यमध्युवासनृपासनं पुण्डरीकपुरेस्थित्वासेव मानोनटेश्वरम् ६ कैंकर्यंबहुधातस्यविततानपरांतकः तत्कैंकर्येणमुदितःचिदंबरसभापतिः ७ बभूवभ क्तवात्सल्याद्वचःसामर्थ्यगोचरः स्वप्नेकदाचित्तंप्राहत्रिपुरारिःपरांतकम् ८ स्यात्किरीटाभिषेकस्तेजिताप द्रवतामही इत्यादिष्टोमहेशेनतथाकर्त्तुंमनोदधे ९ यज्वनोमेलयित्वायंपुंडरीकपुरेस्थितान् किरीटधा रिणंयूयंविधत्तेत्याहभूपतिः १० तेतमूचुर्महात्मानश्चोलवंशपुरोहिताः वयंनांत्यस्यमुकुटंदधीमइतिसं गताः ११ शंकितश्चस्वयंवोढुमभून्मौलौपरांतकः अथस्वप्नेनटेशानोमूर्ध्नितस्यमहीपतेः १२ न्यधत्तचरण द्वंद्वंतदभून्मुकुटंमहत् प्रातस्तंपूजयामासुर्यज्वानोविस्मिताशयाः १३ त्वमेवभक्तइत्युक्त्वातस्माद्विभ्युर्यथेः श्वरात् महानटपदांभोजविन्यासमुकुटोज्वलः १४ भोगान्भुक्तेहनृपतिःशिवसायुज्यमाप्तवान् १५ इतिश्रीस्कांदो

कारणादेवपलायन्ते ४ तुलयेतिमृगराजमिवेति ५ ६ ७ ८ ९ यज्वनइतिविधिनेष्टवंतःमेलयित्वायूयंमामितिशेषः किरीटधारिणंमु कुटधारिणंविधत्तकुरुतेत्यर्थः १० तेइति अंत्यस्यशूद्रस्य ११ १२ १३ त्वमिति ईश्वरात् यथाशिवादिव १४ उपसंहरति भोगानिति १५

इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांपंचषष्ठितमोऽध्यायः ६५॥ ॥ ॥

संप्रतिमाहेश्वरसूत्रघटितव्याकरणव्यवसायादपिकालमृत्युमतीत्यमुच्यन्तइत्याह शब्दब्रह्मेति शब्दब्रह्मव्याकरणंतदेव सुधांबोधिः दुग्धसागरः तत्रवल्गतः चलतः तद्व्यासक्तस्येत्यर्थः चेतोमीनस्य चेतश्चित्तंतदेवमीनः तस्यसदाशिवध्यानंकालएवबडिशः

श्रीअगस्त्यउवाच शब्दब्रह्मसुधांभोधौचेतोमीनस्यवल्गतः सदाशिवपदध्यानंस्यात्कालवडिशापहम् १ अस्तिवेदपुरंनामवेदागमविदांपदं नगरंयत्रविख्यातावाणीलक्ष्म्योःसहस्थितिः २ सत्यदासाव्हयस्तत्र द्विजानामग्रणीरभूत् शिवपादांबुजेभक्तिरासीत्तस्यैवसोदरी ३ त्रिसंध्यंपूजयंछंभुंवेदशास्त्राब्धिपारगः आरराधगिरांदेवींमंत्रेणत्र्यक्षरेणसः ४ समर्चिताद्वादशवर्षमीश्वरीगिरांप्रसंनाशरदिंदुनिर्मला सासत्यदासंतमपाययत्पयःसमागतास्वप्नदशांतरेस्वयम् ५ सद्यःसमुत्थितस्यासीदमृतासारवर्षिणी लहरीवचसांशंभोःकपर्दादिवजान्हवी ६ सगुरुंप्रातरभ्येत्यस्वप्नवृत्तंनिवेद्यच वाचाजन्मफलंकिंस्यादित्यपृच्छन्महामतिः ७ सचसंतुष्टहृदयःशिष्यंप्राहपदानतं सत्यदासकृतार्थोसिजन्मतेचरमंध्रुवम् ८ चतुर्णामपिवेदानामागमानांचनिश्चितं तात्पर्यंशिवएवेतिमुनिभिर्ब्रह्मवादिभिः ९ स्तुहितस्माद्वचोभिस्त्वंप्रसीदतुमहेश्वरः इत्याचार्येण

मीनबंधनजालंतदपहंतीतितादृशंस्यात् १ अत्रार्थेपुरावृतमवतारयति अस्तीतिवाणीलक्ष्म्योःपरस्परविरोधिन्योरपीतिभावः २ ३ त्रिसंध्यमिति त्र्यक्षरेणवाग्भवकामराजशक्तिकूटात्मकवर्णत्रयघटितेन मंत्रेणमननात्त्राणकर्त्रा बालात्रिपुरभैरवीमनुनेत्यर्थः ४ समर्चितेतिगिरामीश्वरी सरस्वतीसत्यदासं स्वप्नदशांतरेस्वयं समागतासतीपयःविद्यामयंक्षीरंअपाययत् पाययामासेत्यर्थः

५ सद्यइति समुत्थितस्यस्वप्नादितिशेषः अमृतस्यआसारोधारासंपातः तंवर्षति तच्छीला ६ ७ ८ चतुर्णामिति सर्वेषांवेदांतानाम
द्वैतेब्रह्मणितात्पर्य्यमिति शिवमद्वैतंतुरीयंमन्यंते इतिश्रुतेश्चेतिभावः ९ १० उपसंहरति आवयइति आवयोवधिचरमवयः
समाप्तिपर्यंतमित्यर्थः सायुज्यं परमशिवाद्वैतं अवाप्तवान् प्राप्तवान् ११ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोप
पुराणव्याख्यायांभक्तविलासप्रकाशिकायांषट्षष्टितमोऽध्यायः ६६॥ ॥ ॥ अधुनायःशिवभक्तःपरेषांशिवभक्तानांक

आवयोवधिगौरीशंस्तुवन्सायुज्यमाप्तवान् ११ इतिश्रीस्कांदोपपुराणेभक्तविलासेषट्षष्टितमोऽध्यायः ६६॥
श्रीअगस्त्यउ॰ यस्वयंशिवभक्तोपिशिवचिन्हभृतामपि नकदाप्यपराधःस्यादपराधेत्यजेदसून् १ राज्ञांचोलान्वय
भुवांराजधानीमहीयसी अस्त्यामोदपुरंनामतत्राभूद्धर्मकेतनः २ भोगेशक्रसमोराजात्यागेनिधिपतेःसमः योगेचक
पिलप्रख्यःयामेष्वर्चितनिर्जरः ३ सनिर्जित्यदिशःसर्वाएकवीरोमहीपतिः ईजेविश्वजितादेवंक्रतुनापरमेश्वरम् ४
स्वमातुःकुलदेवस्यश्रीगोत्रस्थलवासिनः कैंकर्यंसुमहत्कुर्वंछिवभक्तानपालयत् ५ विंध्यपर्वतसंकाशादिग्दंतिकुलं
संभवाः सदामदमुचस्तस्यद्वार्यासन्द्विरदोत्तमाः ६ तत्पादातरथाश्वीयसंख्यानंकेनवर्ण्यते एतावत्ज्ञायतेसर्वंमंदुरावि

दापिद्रोहं नकरोतिसतिकदाचिदपराधेस्वयंप्राणाँस्त्यजति सोप्यवश्यंमुच्यतइत्याह यइति १ इतिहासंप्रस्तौति राज्ञामिति राजधा
नीराजानोधीयन्ते यस्यामिति व्युत्पत्त्याप्रधाननगरी राज्ञांराजधानीति कथ्यतइतिस्मरणाच्च राज्ञःसार्वकालिकनिवासस्थानमित्य
र्थः धर्मकेतनः तन्नामकोराजा २ भोगेइतियामेषु चतुर्षुप्रहरेषु अर्चितानिर्जरसोदेवायेनसः ३ सइति एकवीरः अद्वितीयशूरः ४ स्वे
ति श्रीगोत्रः श्रीशैलः तस्यस्थलेवसतीतितच्छीलस्य ५ ६ तदिति पादातं पत्तिसमूहः अश्वीयंअश्वसमूहः मन्दुरा वाजिशाला ७

वेदमार्गरताविप्राःसायुधाःसमरेभटाः दिशोजयंश्चसर्वत्रतस्मिन्भूमिंप्रशासती ॐ कदाचित्तस्यमध्यान्हेप
यःपाययितुमहान् यंत्रानियुक्तोमत्तेभः प्रतस्थेसरितंप्रति ९ शिवदासइतिख्यातस्तदाकश्चिद्द्विजोत्तमः
अवगाह्यमहानद्यांधृतश्रीमज्जनोदकः १० धृतभस्मासरुद्राक्षःकदलीपत्रसपुटे कृत्वाबहूनिपुष्पाणि
बिभ्राणोभक्तिमान्करे ११ प्रचचालप्रतिगृहंमहिम्नस्तुतिमुच्चरन् पार्श्वेतस्थौगजंदृष्ट्वापथियंत्राप्रचोदितः
१२ गच्छन्मशृंखलानादःतदानृपतिकुंजरः कदलीदललोभेनहस्ताग्रादग्रजन्मनः १३ क्षिप्रंजहारहस्तेन
नब्राह्मणश्चपलायितः तेनोपमर्दितेपत्रेपेतुःपुष्पाणिभूतले १४ शिवायेतिवदंस्तानिद्विजोगान्निजमंदिरं
चंद्रशालास्थितःसर्वमपश्यद्धर्मकेतनः १५ प्राप्तंमत्वाशिवद्रोहंकर्तुमात्मशिवःकरे दधारवज्रंसद्योभूद्वि
वियागशरीरिणी १६ पश्यपुष्पाणितन्मौलौतानिमासाहसंकृथाः इत्याकाशेलयंप्राप्यविलोक्यहरमूर्द्धनि
१७ तानिपुष्पाणितंविप्रममन्यतहरंपरं स्वर्णपद्मसहस्रंचददौतस्यमहीपतिः १८ गृहान्क्षेत्राणिधेनूश्चदत्वा
तद्दासभागभूत् गजंचतंमहेशायनित्यंश्रीमज्जनांभसः १९ सुवर्णकलशंवोढुंप्रददौधर्मकेतनः तंनंदिकेश
मपरंप्रोचुर्भक्त्यानृपंजनाः २० क्षांतोदांतोमहावीरस्तथाजगदपालयत् तस्यैवंवर्त्तमानस्यसुमहान्समयोत्यगा
त् २१ मेदिनींराजधर्मेणरक्षतोभक्तसेविनः गिरिदुर्गाणितंकिंचिद्विजेतुंविद्विषंनिजम् २२ चोदयामाससेनाभिःसह

धर्मकेतनोराजा १५ प्राप्तमिति स्वकीयगजेनकृतंशिवद्रोहंस्वगतंमत्वेत्यर्थः अशरीरिणी दिव्यावाक् १६ १७ १८ १९ २० २१ २२ २३

२४ २५ २६ क्रमेणेतिजटान्वितंकंशिरः २७ ससर्वेविदितिअत्रापिपूर्ववत् स्वसेनापतिकृतंतापसशिरश्छेदरूपंस्वकीयंमत्वा आत्म
शीर्षत्यागेननिजशिरश्छेदेननिष्कृतिंप्रायश्चित्तं २८ २९ ३० ३१ इतिश्रीमानवत्युपनामकन्दसिंहविरचितायांस्कंदोपपुराणव्या

शिरांसिमौलिजुष्टानिसहस्रमनयद्दिषाम् आनीतशत्रुवदनंगृहीतरिपुमोजसा २४ स्वसेनापतिमायातमा
लिंगमुदान्दपः तदाभक्तपरीक्षार्थंहरःकौतुकमादधे २५ छिन्नशीर्षांतरेकंचिच्चकारजटयाचितं ततःसंद
र्शयामासछिन्नशीर्षाणिसप्रभोः २६ क्रमेणपश्यन्राजापिददृशेकंजटान्वितं २७ आःपापकिंवाविहितंत्वयेति
निर्भर्त्स्यसेनापतिमीशभक्तः ससर्वेविन्निष्कृतिमात्मशीर्षत्यागेनमेनेदुरितस्यतस्य २८ दत्वाधनानिविप्रे
भ्यःसुतंराज्येभिषिच्यच अग्नौसंवर्द्धतेराजाप्रवेष्टुंस्वयमुद्यतः २९ मौलौनिधायतच्छीर्षमग्निकुंडांतिकंय
यौ अंतर्हितंतदाशीर्षंराजाविस्मितमानसः नैवापश्यत्तदाद्राक्षीद्वृषभारूढमीश्वरम् ३० प्रणम्यप्रांजलिर्हृष्टः
तुष्टावपरमेश्वरं दत्वाकैवल्यमेतस्मैसद्यःशंभुस्तिरोदधे ३१ इतिश्रीस्कांदोपपुराणेभक्तविलासेसप्तषष्टितमो
ऽध्यायः ६७॥ ॥ श्रीअगस्त्यउ॰ पतितःक्लिष्टवोवापिभस्मांकितमुखोयदि शिवप्रसादमिच्छद्भिःसपूज्यःशंभुव
द्भवेत् १ अस्तिभाग्याकरंनामपुरंभूतलभूषणं श्रीविहारालयेयत्रनासीत्कुत्रापिकिंचनः २ प्रतापसूर्यनामाभूत्तत्रराः
जामहीपतिः यत्कुलद्वयजानांदैवतंपरमंशिवः ३ बाल्यएवजिताशेषसामंतःसर्वधर्मवित् शिवभक्तान्नदानेनधर्मपर

ण्यांभक्तविलासप्रकाशिकायांसप्तषष्टितमोऽध्यायः ६७॥ ॥ ॥संप्रतिधूर्त्तपतितादीनपिभस्मधारिणःपूजयतःशिवभ
क्तस्यशिवत्वसूज्यताभवतीत्याह पतितइति १पुराकृतंप्रस्तौतिअस्तीति अकिंचनोदरिद्रः २प्रतापेति कुलद्वयंमातापित्रोः तत्र

जानां ३ ४ ॥

व्यंजनैरिति व्यंजनैःशाकसूपादिभिः प्रतिश्रयाणां अन्नशालानांसहस्राणि ५ तत्रेति चतुःषष्टिसमाःवर्षाः ६ ७ आसंगवमिति सूर्योद्
यानंतरंषड्घटिकापर्यंतंप्रातःकालः ततोद्वादशघटिकापर्यंतंसंगवकालः तावत्पर्यंतंरसंपानकं ८ ९ १० ११ १२ द्विजइति पल्लवि

व्यंजनैःषड्रसोपेतैःशिवभक्तानभोजयत् प्रतिश्रयसहस्राणिमार्गेमार्गेचकारसः ५ तत्राधिकारिणंकृत्वापांथानाम
न्नदोभवत् वर्त्तमानस्यतस्यैवंचतुःषष्टिसमाययुः ६ एकदासीदनावृष्टिःसर्वप्राणिभयंकरा तस्यान्नदातुर्नगर
मययुःसकलाजनाः ७ आसंगवंनृपस्तेषांरसंदिव्यंयथेप्सितं ददावन्नंचसर्वेभ्योधारयामासभस्मच ८ जना
द्वादशसाहस्रसंख्याताःप्रतिवासरं आद्वादशाब्दंबुभुजुस्तद्दत्तधृतभूतयः ९ तेनप्रीतःशिवःस्वप्नेतस्यपप्रच्छ
कामितं त्वयाभोक्तव्यमागत्यपंक्तिमध्येद्विजन्मनाम् १० इतीशंयाचतेस्मायंसतथेतितिरोदधे अथसुप्तोत्थि
तोराजास्मृत्वास्वप्नस्यवैभवम् ११ दधारगात्रेरोमांचंभक्त्योपरवशोभवत् अथमासत्रयेतीतेमध्यान्हेगिरि
जापतिः १२ द्विजःपल्लविकोभूत्वातद्गृहद्वारमाययौ श्रोत्रियाणांद्विसाहस्रंतस्यपंक्तौनिवेशितम् १३
नखक्षतांकितंपार्श्वमध्येदंतक्षताधरः लाक्षाबीटिरसांकेनसहरिद्रेणवाससा १४ आवृतोगजकृत्येव
मृष्टार्द्रतिलकोलिके भस्मोद्धूलीकृतांलेखामाबिभ्राणोमुखांतरे १५ खादंस्ताम्बूलकबलमपांगैरुन्नत स्त
नीं आलोकयनजन्हुसुतांवहन्पर्युषितस्रजम् १६ पप्रच्छान्नकिमस्तीतिगिरागंभीरयाकिल प्रतापसूर्यस्त

कोविटः १३ नखेति सहरिद्रेणहरिद्रासहितेन १४ आवृत्तइति गजकृत्येवगजचर्मणेवस्थितेनेत्यर्थः अलिकेभाले मृष्टंमार्जितंअ
र्द्रतिलकंयेनमुखान्तरेमुखमध्ये १५ खादन्निति जन्हुसुतांजटास्थितांगंगामित्यर्थः पर्युषितस्रजमुपभुक्त पुष्पमालाम् १६ १७

सइति अग्रजन्मनां ब्राह्मणानांमध्येतेषामेवविशेषणं वैश्वानरंस्तुवतामिति अहंवैश्वानरोभूत्वेतिमन्त्रेणेतिभावः १८ १९
२० २१ भुज्यतामिति ईर्ष्या अक्षमातयासहितंयथातथापश्यंतीति सेर्ष्यदृशः २२ २३ २४ २५ २६ २७ २८ २९ इतिश्री

सतंप्रवेशयामासपंक्तिमध्येद्विजन्मनां मध्येवैश्वानरंदेवंस्तुवतामग्रजन्मनाम् १८ शृंगारस्येवलहरीत
स्याभूद्वैखरीगिरां अपाङ्क्तेयोयमायातइत्यपश्यन्मिथोद्विजाः १९ निवेशयित्वास्वस्थानेपादौप्रक्षाल्यभूप
तिः आनर्चचंदनैःपुष्पैःनृपतिर्धूर्तशेखरं २० राजभार्यातुतस्यान्नंसक्षीरंपर्यवेषयत् अथराजाददौहस्तेप्री
तस्तोयंसशीतलम् २१ भुज्यतामितिचोवाचद्विजास्सेर्ष्यदृशोभवन् मायाधूर्त्तोनृपंप्राहदधानश्चोदकंक
रे २२ ममप्रियतमादासीद्वारितिष्ठतिभूपते अत्रसाहूयतामस्तुतयामेसहभोजनम् २३ इत्युक्तेधिग्धिगि
त्यूचुर्जात्यंधाब्राह्मणास्तथा राजासद्यःस्मृतस्वप्नः दासीमानयितुंक्षणात् २४ सयावदगमद्द्वारंतावदीशस्तिरोद
धे द्वारेदासीमनालोक्यद्विजपङ्क्तिमुपागतः २५ दृष्ट्वातिरोहितंदेवंबभूवव्यथिताशयः विप्रानिनिंदुःस्वात्मा
नंकर्माधाद्रोहकारिणः २६ अथराजाचभार्याचप्राणत्यागकृतोद्यमौ हस्तेथदधतुःखड्गमाविरासीदथेश्व
रः २७ राजादृष्ट्वावृषारूढंसोमास्कंदगजाननं देवंपशुपतिंराजाक्षमस्वेत्यनमत्पदे २८ अथप्रीतमनाःशंभुस्मयमा
नःसहोमया मुक्तिदत्वासभार्यायतस्मैसद्यस्तिरोदधे २९ इतिश्रीस्कांदोपपुराणेभक्तविलासेऽष्टषष्टितमोऽध्यायः ६८॥

मानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांअष्टषष्टितमोऽध्यायः ६८॥ ॥संप्र
तिशिवायअनेकप्राणिसमर्पणंनियमेनकुर्वतोनीचस्यापिमुक्तिर्भविष्यतीत्याह जीवेति इन्दुकलाधरायशिवायजीवानांप्राणि

श्रीअगस्त्यउ॰ जीवोपहारंनियमेनकुर्व
न्नंतस्मरन्निंदुकलाधराय॥

नांऽपहारंसमर्पणंकुर्वन् अन्तःचित्तेशिवमितिशेषःस्मरन् जात्याहीनोपियोवसतिसकर्मबंधेनविमुक्तोभवतीत्यन्वयः १पुराहत्त
मवतारयति अस्तीति२यत्रेति तरिव्रजैः देशांतरस्थवणिगाधारनौकासमूहैः आनीताइतिभावः तत्रस्यानांरत्नपरीक्षाया मतिनिपुण
त्वात् ३ वणिगिति वणिजांकरेषुयन्मधूच्छिष्टंसिक्थकंतन्मध्येकनकरेणवःनिकषोपलनिघृष्टकनकरेखा संघट्टनेनलग्नाइतिभावः
प्राकृतलयेकार्यस्यकारणे लयनियमात् सर्वंवैकारिकंजगत् अव्यक्तेलीयतइतिसांख्यानुरोधेनोपमिनोतिप्रकृताविति ४ स्व

हीनोपिजात्यावसतीहयस्तुसकर्मबंधेनभवेद्विमुक्तः १ अस्तिनागपुरंनामकुबेरनगरोपमं विख्यातंत्रिषुलो
केषुप्रतीरेपूर्ववारिधेः २ यत्रांगणेषुवणिजांपरीक्षायैदिनेदिने राशयोनवरत्नानांप्रसार्यंतेतरिव्रजैः ३ वणि
क्करमधूच्छिष्टमध्येकनकरेणवः निलीयंतेन्वहंयत्रप्रकृतौदेहिनोयथा ४ स्वर्णानिरंजतान्यासन्निघृष्टाय
त्रपांसवः तत्रकश्चनकैवर्तःपूर्वाख्यःशफरांतकः ५ बडिशैरपिजालैश्चयत्कृत्यंमीनवेधनं कदाचित्त्याग
राजस्यप्रवृत्तेफाल्गुनोत्सवे ६ जनारथोत्सवंद्रष्टुंजग्मुर्नागपुरस्थिताः पूर्वोपिसहतैर्गत्वानिषेव्यपरमेश्वरम्
७ कमलालयसोपानमपरात्तेययौक्वचित् तत्रानचेद्विजःकश्चित्सोपानेपरमेश्वरम् ८ तदानींशफरःकः
श्चिन्निर्माल्याक्षतमंभसि जक्षतिस्मपरित्यक्तपूर्वोजग्राहतंकरे ९ ९ ९ ९ ॥

र्णनीति पांसवःपार्थिवरेणवःपृथिव्यारंभकानांरेणूनांतेजोजनकता देशमाहात्म्यादितिज्ञेयं तत्रनगरेकैवर्तो मत्स्योपजीवी शफ
रामीनाः ५ बडिशैरिति यस्यपूर्वाख्यस्यकृत्यंबडिशैःमत्स्यबंधनैर्जालैरानायैश्च मीनानांवेधनंआसीदितिशेषः ६ जनाइति रथो
त्सवं वार्षिकंपरंपराप्राप्तदिवसेक्रियमाणं ७ कमलेति कमलालयस्य तन्नामकशिवप्रासादस्यसोपानमवरोहणं ८ तदानीमिति

परित्यक्तंद्विजेनेतिशेषः ९

दृष्ट्वेति ऋषंमत्स्यं धीवरःपूवाख्यः१० किमितिस धीवरः तंद्विजं द्विजः तेनदृष्टइत्यर्थः जात्याअनयैवत्वं तदसिब्रह्मासिॐतत्सदि
तिनिर्देशोब्रह्मणस्त्रिविधःस्मृतइतिवचनात्तच्छब्दस्यब्रह्मपरत्वंस्पष्टमेव असीतिवर्त्तमानसामीप्येभविष्यसीत्यर्थः अनेनतत्वम
सीतिमहावाक्यमपिपर्य्यायेणोपदिष्टमितिवेदितव्यं दाशसंभवंस्लवंअहिंसापरमोधर्मइतिश्रुतेर्ब्रह्मज्ञानस्यद्विजाधिकारत्वेपि

दृष्ट्वागत्यद्विजस्तूर्णंमोचयामासतंऋषं त्यक्तमीनोद्विजंप्राहधीवरःसंहतांजलिः १० किंमीनमोचनफलंब्रूहीतित
मुवाचसः जात्यातत्वमसीत्युक्तेद्विजस्तंदाशसंभवम् ११ द्विजोभस्मप्रदायास्मैनधर्मोमीनवेधनं तथापिम
द्विरामीनंमुक्तवान्यदूवानतः१२ त्यागेश्वरप्रसादोस्त्वित्युक्तास्वभवनंययौ तदारभ्यपूवोनित्यंसिंधौवि
स्तार्यजालकम् १३ गृह्यमाणेषुमीनेषुशिवायेतिऋषोत्तमं परित्यजन्सजीवंतंनित्यंनियमवानभूत् १४ परि
हासायतंप्रोचुरितिभक्तत्वजालिकाः एवंनियमयुक्तस्यययुःसंवत्सरादश १५ पतंत्यनुदिनंतस्यदूरंविच
रतोर्णवे जालेप्रक्षिप्तमात्रेतुशफरौघाःसहस्रशः १६ संक्षिप्यजालकंमीनंसजीवंवरमेककं मुक्ता
यमस्तुदेवायेत्युक्त्वातिस्मऋषांतकः १७ मीनविक्रयसंपन्नंवव्धेतद्धनंबहु अतिभक्तइवाढ्योयमित्या
सीदुपमास्लवः १८ भक्तिंपरीक्षितुंतस्यशंभुःकौतुकवानभूत् अथैकस्मिन्नेवसायमेकएवास्यजालके १९

धार्मिकत्वगुणेनतदुपदेशाधिकारइतिभावः ११ द्विजइति नधर्मःनिजजातिधर्मोनभवतीत्यर्थः १२ १३ १४ परिहासायेतिजालिकाः
अन्येधीवराःतंस्लवं भक्तमितिप्रोचुरित्यन्वयः १५ पतंतीति अर्णवे दूरं विचरतइत्यन्वयः १६ संक्षिप्येति सःपूवःजालकंसंक्षिप्यस
गृह्य १७ मीनेति अयंपूवःअतिभक्तइव आढ्योपिआसीदिति भक्त्याढ्यत्वयोरुपमा आसीदितिमध्यमणिन्यायेनसंबंधः १८ १९

दिवसेइति दिवसेसर्वस्मिन्नितिभावः अलब्धमीनस्य २० २१ जालकमितिसमंयुगपदेव २२ आकर्षणइति सपूर्वः नौभिः निजांति कच्चरान् स्वसमीपचारिणः जालिकान् अन्यान् आकर्षणार्थमितिभावः आजुहावआहूतवान् २३ २४ २५ २६ स्पर्द्धमानेष्विति

दिवसेलब्धमीनस्यजालेमीनोपतन्महान् दृष्ट्वैकंधीवरोधीरःशिवायेतिमुमोचतम् २० प्रीतस्तेनाभवच्छंभुःस
र्वसाक्षीमहेश्वरः अथापरेद्युरुषसिक्षिप्तमेतेनवारिधौ २१ जालकंन्यपतत्तत्रमत्स्यानामयुतंसमं स्वर्णमी
नश्चसुमहानेकःशंकरमायया २२ आकर्षणेसजालस्यनाशक्नोद्बहुभारतः निजांतिकच्चरान्नौभिराजुहा
वसजालिकान् २३ अस्माकमर्द्धमत्स्यानामस्त्वेकंपार्वतीपतेः उक्तंपरमंतेपीयुक्तानेतुंसमागताः २४ धी
वराश्चकृषुर्जालंनिन्युःसिंधोस्तटंशनैः हि रण्यमीनमालोक्यदाशाहर्षंययुस्तदा २५ अविभक्तोगृहीत्वातं
सहजीवंमहार्णवे विसृज्यास्तुशिवायेतिनियमंपर्यपालयत् २६ स्पर्द्धमानेषुदाशेषुदेहितंनि श्चयंतिति
तेभ्यःस्वार्धंददौधीमान्धीवराणांशिरोमणिः २७ तदाप्रादुरभूत्तत्रगौर्यासहमहेश्वरः प्रणतस्यददौमुक्तिं
पुनर्भवभयापहाम् २८ इतिश्रीस्कांदोपपुराणेभक्तविलासेएकोनसप्ततितमोऽध्यायः ६९॥ ❀ ॥ ॥श्रीअग
स्त्यउवाच भस्मरुद्राक्षभाजांयेपदाभोजावनेजनं कुर्वंतिस्वयमेवेहतेषांनास्तिपुनर्भवः १ अस्त्येकंनगरंभूमो
प्रथितंकलशाव्हयं पुण्यंधामपुरारातेःपुरुषैःसद्भिराश्रितम् २ तत्रमानधनोनाममहानासीन्महीपतिः उद्वेजय

तस्यस्वर्णमीनस्यनिश्चयंमूल्यंदेहीतिस्पर्द्धमानेषुकलहायुमानेषु २७ २८ इतिश्रीमानवल्युपनामकस्कन्दसिंहविरचितायांस्कंदोप
पुराणव्याख्यायांभक्तविलासप्रकाशिकायामेकोनसप्ततितमोऽध्यायः ६९॥ ❀ ॥ ॥संप्रति शिवभक्तपादप्रक्षालनफलंप्रस्तौति ॥

भस्मेति अवनेजनं क्षालनं १ कथामुपक्रमते २ ३ ४ श्रुत्वेति श्रोतव्योमंतव्यइतिक्रमेणनिदिध्यासनांतं कृत्वेत्यर्थः पर्यवसितं स
र्वेषांवेदांतानां अद्वैतेब्रह्मणितात्पर्यमितिनिखिलजगन्निषेधाधिष्ठानतयानिश्चितं ५ त्रिकालमिति ब्रह्मण्योब्रह्मसुसाधुः ६ ७८

धर्मेणपालयामासधरणीमंडलंनृपः जन्मकोट्यर्जितैःपुण्यैस्तस्यभक्तिःशिवेभवत् ४ श्रुत्वागमपुराणार्थान् सपर्यवसितंशिवे भक्तियोगंदृढतममुवाहगिरिजापतौ ५ त्रिकालमर्चयन्शंभुब्रह्मण्योब्रह्मवित्प्रियः स्व देशस्थान्जनान्सर्वानप्यशासच्छिवार्चने ६ येजपंतिनपंचार्णरुद्राध्यायंनयेद्विजाः उद्धूलनत्रिपुंड्रवाभ्रि यंतेयेनभस्मना ७ येनविभ्रतिरुद्राक्षंतेषांनिष्कासनंभवेत् एवमुद्घोषयामासभेर्यादिक्षुससर्वतः ८ राज भीत्याजनाःसर्वेशिवेभक्तिकृतस्तदा नृपंमानधननत्वाकंपमानतनुःकलिः ९ ययौचसांजलिर्भूत्वास्थानं कचिदिहात्मनः यस्यभक्तिःशिवेनास्तिसतंतत्स्थानमादिशत् १० अलक्ष्मीःकलहःकामःक्रोधश्चाप्यनृ तंयतः तदारभ्याभवद्राजाकलिकंपाहृयःक्षितौ ११ नित्यव्रतमभूत्तस्यभक्तपादावनेजनं येसमायांतिमध्या न्हेतत्पादाम्बावनेजनम् १२ सुगंधिशीतलजलैःकृत्वाभोजयतिस्मतान् वर्त्तमानस्यतस्यैवंययुर्द्वादशवत्सराः १३ परीक्षितुमनास्तस्यभक्तिमासीन्महेश्वरः सपंचवार्षिकोभूत्वाद्विजबालोधृतव्रतः १४ मध्येराजगृहेभोक्तुमागतानां महात्मनां आतिष्ठदथमध्यान्हेभास्वद्रुमत्रिपुंड्रकः १५ दृष्टःकस्त्वंकुतश्चेतिद्विजैर्नोवाचकिंचन कर्तुंचावसरेप्राप्ते द्विजपादावनेजनम् १६ निर्ययौनृपतिःश्रीमान्भार्याचतमनुव्रता हेमपात्रकरातोयंददानातत्रसाभवत् १७ द्विजेषु

राजेतिभक्तिंकुर्वंतितेभक्तिकृतः ९ १० अलक्ष्मीरितियतःयस्मिन्देशेएतेपूर्वोक्ताःसंतितत्स्थानंतंकलिंप्रत्यादिशदितिपूर्वेणान्वयः ११

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ इतिश्रीस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांसप्ततितमोऽध्यायः ७०॥ ॥संप्रतिशिवसन्निधौ घृततैलादिदीपाराधनप्रस्तुत्यपूर्वकथामवतारयति अस्तीतिजन्मरोगस्य जन्मैवरोगइतिरूपकम् जन्मपदंमरणस्याप्युपलक्षणं तेनजन्ममरणप्रवाहरूपसंसारस्येत्यर्थोलभ्यते जातस्यहिध्रुवोमृत्युरित्यादिस्मृतेः तस्यभिषजः चिकि

इतिपृष्टोनृपतिनामायावालोवदन्नृपं राजन्मेपितरौनस्तःकुलंवेद्मिनहिक्वचित् १९ संस्कारोमेकथंकार्यःकिमे तैस्तेवचःशृणु नाहमभ्यर्थयेकन्यामन्नंमेदीयतेनवा २० एवंबालस्यवदतःपादप्रक्षालनोद्यतं हस्तेगृहीत्वाभर्ता रंन्यरुणद्राजवल्लभा २१ सद्यःप्रकुपितोराजाखड्गमादायतत्करं चिच्छेदतावद्भगवान्सहगौर्याग्रतोभवत् २२ स्तुतस्ताभ्यांवृषारूढोदत्वामुक्तिंतिरोदधे २३ इतिश्रीस्कांदोपपुराणेभक्तविलासेसप्ततितमोऽध्यायः ७० ॥ श्रीअगस्त्यउ॰ अस्त्याधिशमनंनामनगरंलोकविश्रुतं जन्मरोगस्यभिषजःप्रियंधामपिनाकिनः १ कलिनीति रितिख्यातोनाम्नाभूच्चक्रिणांप्रभुःसपुराणेषुशुश्रावदीपारोहणवैभवम् २ शंकरालयमासाद्यतत्रत्यःप्रतिवा सरं दीपान्पंचशतंतैलैर्घृतैःपंचशतंपरान् ३ कुर्वन्दिवानिशंभक्त्यासिषेवेसमहेश्वरं तैलप्रदीपामध्यान्हेतूल वर्त्तिषुजज्वलुः ४ तंतुवर्त्तिषुशुद्धासुघृतदीपास्तथानिशि दिवापंचशतंरात्रौदीपाःपंचशतंकृताः ५ तेनसंशोभया माससंनिधिंचांद्रशेखरं दीपानेवंददानस्यतस्यसप्तसमाययुः ६ शिवोभक्तिपरीक्षार्थंतस्यदारिद्र्यमादिशत् मितंपचस्स

त्सकस्यनाशकस्येत्यर्थः परमोदैव्योभिषगितिश्रुतेः पिनाकिनः शिवस्यप्रियंधामेति नगरविशेषणं १ कलीति चक्रिणांकुला लानां २ ३ ४ ५ तन्विति चांद्रशेखरं शैवंसंनिधिं प्रासादमित्यर्थः शोभयामास ६ शिवइतिमितंपचोदरिद्रः ७ ॥

तदिति अत्यवाहयत् अतिवाहयामास ८ ९ १० लब्धवानिति रोदिषि रोदनं करोषि किमर्थमितिशेषः ११ १२ हसन्निति निजास्रजास्र
रुधिरेण १३ कुर्विति तथानिजकर्णंछित्त्वा तद्रुधिरेणेत्यर्थः १४ १५ अत्रैवकथांतरमुपक्षिपति अभूदिति जघन्यजःभूद्रुः १६ १७ कर्ते

तद्द्व्येर्विविधैर्दीपान्वर्षमात्रंगतंतथा विक्रीयभार्य्याभरणंषण्मासानत्यवाहयत् ८ अक्षतंचव्रतंतस्यतादृशं
पशुविक्रयात् तपःसाधनवित्तेषुगतेषुविलयंपुरे ९ याञ्चालब्धेनतैलेनमासंव्रतमपालयत् तथैकस्मिन्दिनेका
पिनतैलंघृतमेववा १० लब्धवान्सनिधौशंभोःकलिनीतिस्तदारुदत् तदाकश्चित्खलोभूत्वाहरःपप्रच्छरोदि
षि ११ निमित्तंव्रतभंगस्यतत्रोक्त्वाकारणंपुनः उच्चैःस्वरेणचुक्रोशरक्षभग्नव्रतंत्विति १२ हसन्खलोपितंप्राहरो
दनेनात्रकिंभवेत् यदिभक्तिर्दृढाशंभौछित्वाकर्णंनिजास्रजा १३ कुरुदीपानित्युवाचमुहुर्मौलिप्रकंपयन् तदा
कार्यतथाकर्त्तुमुद्यतेस्मिन्महेश्वरः १४ आरूढवृषभःसाक्षात्सहगौर्याप्रसन्नया भक्तायतस्मैसायुज्यंप्रदायेश
स्तिरोदधे १५ अभूद्ब्रह्मपुरेकश्चिच्छक्तिनामाजघन्यजः सशिवेभक्तिमाधायशिवस्तुतिपरोभवत् १६ आसीदे
वंव्रतंतस्यदृढभक्तिमतःशिवे वेदचैदिकवेदांतशिवदूषणवादिनाम् १७ कर्त्तास्मिरसनाच्छेदमितिहेतिंदधोक
रे तद्दयान्नगरेसर्वैस्तुवंतःपरमेश्वरम् १८ बभूवुर्हतपापानःक्रोधपीतामृताइव अथशक्तिःप्रसादेनशंभोर्ब्रह्म ७१॥
पुरेशितुः १९ पुनर्भवक्लेशहरंधामशांकरमासवान् २० इतिश्रीस्कांदेपपुराणेभक्तविलासेएकसप्ततितमोऽध्यायः

ति रसनाछेदं जिह्वांछेदंकर्त्तास्मि करिष्यामि इतिनिश्चित्येतिशेषः हेतिंखड्गं १८ १९ पुनरितिपुनर्भवक्लेशहरंसंसारदुःखनाशकं शांक
रंधाम मोक्षमित्यर्थः नसपुनरावर्त्तते यद्गत्वाननिवर्त्तते इत्यादिश्रुतिस्मृतिभ्यः आसवान् प्रासवान् २० इतिश्रीमानवल्युपनामक

नृसिंहविरचितायांस्कंदपुराणवाख्यायांभक्तविलासप्रकाशिकायांएकसप्ततितमोऽध्यायः ७१॥ ॥

संप्रतिचित्तैकाग्र्येणनित्यंशिवंस्तुवतःनीचस्यापिशिवस्वरूपताभवति इतिवक्तुंइतिहासमुपक्रमते अन्विति कंपानाम्नी नदीतस्या स्तीरंतटं तस्मिन्नित्यनुकंपातीरं कांचीपुरंप्रसिद्धं तस्यपर्यंतेसमीपेया अटवीतस्याःकोटौ अग्रभूमौघोषसहस्रस्य आभीरपल्ली सहस्रस्यनायकः १ वल्लवेति वल्लवान्वये आभीरवंशेसंभूतः २ गुरोरिति करणानामिंद्रियाणां ओघं समुदायं अचालयन् जितेंद्रियःसन् ३ निधायेति आशयेचित्ते गंगाचचंद्रार्द्धंच भोगींद्राः सर्पाश्चेति दृढुः तेषांदाम्नामालया नद्धुःबद्धुःजटाभरोयस्यतं ४ भा

श्रीअगस्त्यउ॰ अनुकंपानदीतीरमस्तिकांचिपुरंकिल तत्पर्यंताटवीकोटिघोषसाहस्रनायकः १ वल्लवान्वयसंभूतो नंदगोपात्मजोयथा सिद्धेश्वरप्रसादेनलेभेपंचाक्षरींचसः २ गुरोर्निदेशादीशे सोकरणौघमचालयत् विरक्तःसर्व भोगेभ्योगोपानाराज्यमात्मजे ३ निधायशंभोःश्रीमूर्त्तिदधौसततमाशये गंगाचंद्रार्द्धभोगींद्रदामनद्धजटाभरम् ४ भास्वत्तृतीयनयनंफणिकुंडलमंडितं सोमसूर्याग्निनयनंमंदस्मितमुखांबुजम् ५ कपालमालाभरणंका लकंठंचतुर्भुजं वरशूलाभयैणांकंनागयज्ञोपवीतिनम् ६ भस्मोद्धूलितसर्वांगंभास्वद्व्याघ्राजिनांबरं शिं- जानमणिमंजीरपरिष्कृतपदांबुजम् ७ अंबालंकृतवामांकमवाङ्मनसगोचरं मनसाविषयीकुर्वन्स पंचेंद्रियवृत्तिना ऽपंचपादद्दतिप्रापप्रथांभक्तजनाग्रणीः पुंडरीकपुरेस्थित्वास्तुवन्नित्यंमहेश्वरम् ९ ८

स्वदिति भास्वत्प्रकाशमानं तृतीयनयनंयस्यतं ५ कपालेति वरश्च शूलंच अभयंच एणो हरिणश्चते क्रमेण चतुर्भुजेषु अंकाः चिन्हानि यस्यतं ६ ७ अम्बेति अम्बया उमया अलंकृतो वामांको यस्यतं अवाङ्मनसगोचरं यतोवाचद्दति श्रु तेः सपंचेंद्रियवृत्तिना चक्षुरादिपंचेंद्रियव्यापारसहितेन मनसाविषयीकुर्वन् ध्यायन्नित्यर्थः ८ ९ ८ ८ ८

नटेश्वरेति नटेश्वरस्यसभापतिसंज्ञकस्यशिवस्यप्रसादेनशिवभूयंशिवत्वं कथांतरमुपक्षिपति अस्तीति १० गणइति एतस्यगणनामक
स्य ११ १२ शिवेति दीपसाधनस्यशैलाढ्यस्यकर्पूरपर्वतस्येत्यर्थः १३ कालेइति शुष्कस्य उलपोघस्य वल्वजतृणसमुदायस्यस्तंबा

नटेश्वरप्रसादेनशिवभूयमुपागमत् अस्तिश्वेतनदीतीरेपुरंपरिमलाह्वयम् १० गणोलब्धइतिख्यातस्तत्रा
सीच्छंकरप्रियः त्रिपूरुषाअप्येतस्यशिवभक्तामहत्तराः ११ श्रुत्वाशिवपुराणेषुशिवकैंकर्यवैभवं दीपान
नुद्दिनंशंभोःस्वकीयैरकरोद्धनैः १२ शिवप्रसादान्निक्षेपमुपलभ्यमहाधनः दीपसाधनशैलाढ्यक्रयार्थं
सर्वमादिशत् १३ कालेभक्तिपरीक्षार्थंशंभुनानिर्धनीकृतः शुष्कोलपोघस्तंबानांशतेनशतदीपिकाः १४
प्रत्यहंव्यतनोदग्रेदेवस्यासीद्तृणोलवः त्रिवर्षंगमयामासतत्पुरेश्वरसंनिधौ १५ अथप्रावृषिकस्यांचिच्छु
ष्कोलपमनाप्यसः अग्निप्रज्वलितैःकेशैःस्वकीयैर्दीपमादधे १६ गौर्यासहवृषारूढःप्रादुर्भूतस्तदाहरः
प्रादायतस्मैसायुज्यंसहतेनतिरोदधे १७ श्रीअगस्त्यउ· अविकारीतिकोप्यस्तिकरकाख्येपुरेवसन् कवि
ताविद्ययाराज्ञःस्तुत्वानिशमगाद्धनम् १८ प्राकारगोपुरादीनिश्रीकर्मणिपिनाकिनः विधायतत्प्रसादेनशिवभूयं
गतोभवत् १९ श्रीअगस्त्यउ· राजापांड्योभवत्कश्चिद्भिरामइतिश्रुतः विजितारिःस्तुतयशाःसदाविद्वज्जनैरभूत्
२० तृतीयतनयंदेव्याःपूजयित्वासनादिभिः ज्ञात्वातदुपदेशेनशिवतत्वंपरासरम् २१ ममतात्ममतिंदेहेविसृज्यविमलां

नांतृणकांडानांशतेन १४ १५ १६ १७ अन्यांकथांवर्णयति अविकारीति १८ १९ कथांतरंवर्णयति राजेति २० तृतीयेति दे
व्याःतृतीयतनयं प्रागुक्तं हरदत्तनामकं भक्तविशेषं २१ २२ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्या

तरः प्रसादेनमहेशस्यशिवभूयमगात् २२ इतिश्रीस्कांदोपपुराणेहिमवत्खंडेतृतीयोऽध्यायः ७२

ख्यायांभक्तविलासप्रकाशिकायांद्विससप्ततितमोऽध्यायः ७२॥ ७२ ॥ ॥मायूरेति तन्नामकक्षेत्रे १ २ सइति अंभएवजलमेव

श्रीअगस्त्यउ·मायूरेनिर्वियानामभक्तःकोपिशिवप्रियः जघन्यवर्णजःशंभुंमनसासमपूजयत् १ संनिधोसकृदीकृ
त्याप्यालयस्याविदूरतः जपन्हृदैवपंचार्णंभस्माजिनजटाधरः २ सोन्वहंसायमेवांभःपिबन्प्रस्तसंमितं आद्यद्
शाब्दमीशेनसंसाराब्धेरमुच्यत ३ श्रीअगस्त्यउ· विशालाख्यपुरेकश्चि न्मानदोनामपादजः शूद्राणामग्रणीरा
सीत्अविकापतिभक्तिमान् ४ राज्ञःसेनापतिर्भूत्वानरसिंहाव्हयस्यसः सप्तकोटिधनंप्राप्यशिवभक्तानपालय
त् ५ गृहक्षेत्रांबराणामकन्याभूषणवाहनैः संपूज्यब्राह्मणान्शंभोर्भक्तान्मुक्तिमवापसः ६ श्रीअगस्त्यउ· अथा
टवीकानाथस्यसिंहाव्हस्यमहीपतेः वर्णयामिचरित्रंहिविचित्रंश्रृणुतद्विजाः ७ वल्लवानामधिपतिःसिंह
केोनामभक्तिमान् शिवपादाब्जयोर्नित्यंशिवभक्तजनप्रियः ८ ताराद्यवशशांकस्यभार्यास्तस्याभवन्छतं अ
नपत्योनरपतिस्ताभिःसार्द्धमुमापतेः ९ स्थलेषुविचरन्भूमौप्रख्यातेषुसुतेच्छया श्रीपुरंप्रापसिंहाव्हाय
त्रयागेश्वरोविभुः १० स्नात्वातत्रमहातीर्थेपावनेकमलालये त्यागेश्वरस्यसेवार्थंसभार्यश्चालययौ ११ न्य
स्तंजवंतिकापुष्पंसोपानेहेमनिर्मिते गृहीत्वाचालयाद्दैवात्तस्यभार्यासुगर्विता १२ जिघ्रतिस्मविलोक्यैतत्साह
सांकोद्विजोत्तमः उदस्यक्षुरिकांसद्यःतस्यानासांचकर्त्तह १३ छिन्नास्मीत्यपतद्भूमौजनाहाहेतिचुक्रुशुः छिन्नना
सासिकेनेतिदृष्टाद्विजमदर्शयत् १४ राजाभार्यांतमाहूयक्रुद्धोदृच्छन्महीपतिः त्यागेशस्यप्रियंपुष्पमाघ्रातमनया

तदपिप्रस्तसंमितंअर्द्धांजलिपरिमितंपिबन् २ कथांतरंवर्णयतिशालेति पादजःशूद्रः ४ ५ ६ कथांतरंवर्णयति अथेति ७ ८ ९

अ·७२

अतस्तत्पशुध्यर्थमयेयंकृत्तनासिका अथराजाप्रणम्येनंनालमेनदितिस्वयम् १६ खड्गमादायभार्योयागृही
तकुसुमंकरंचिच्छेदभक्तिमान्शंभोप्रसीदेत्यब्रवीन्नृपः १७ तदापुष्पाणिविबुधावरुषुश्चन्नृपोपरि छिन्नस्तः
स्याःकरःसद्यःसमजायतकांचनः १८ नासिकापियथापूर्वमाश्चर्यमगमज्जनाः विधायपूजामीशस्यनृपस्त
त्रचिरंवसन् १९ महेश्वरप्रसादेनकालेमुक्तिमवासवान् श्रीअगस्त्यउ॰ पुरंगवाकरंनामख्यातमस्तिमहीतले २०
तत्रकश्चिदभूद्राजात्यागेनिधिपतिर्यथा ददातिशिवभक्तेभ्यःसामंतैरुपढौकृतम् २१ अशेषंधनमादायविः
ख्यातोभूतिदाख्यया स्वकोशनिहितैर्द्रव्यैःचित्सभाधिपतेःसभाम् २२ यःकांचनसभांचक्रेविरक्तःसर्वभोगतः
धर्मेणतस्मिन्धरणींपरिपालयतिद्विजः २३ शिवभक्तसहस्रान्नदानार्थेविभवंमम समयाचतदेहीतिकोशचौर्या
र्थमागतः २४ तंनत्वान्नृपतिःप्रीतःतावत्क्षेत्रंधनंदधौ शिवस्यशिवभक्तानामेवकृत्वामहीपतिः २५ निर्धूतमा
नसमलःतेनसायुज्यमासवान् सिंहाकभार्यातासांचित्तपत्नीसाहसप्रिया २६ शिवद्रोहकृताशिक्षांवितन्वन्क
मलालये आद्दादशाब्दंत्यागेशमुपास्यगतबंधना २७ त्यागराजप्रसादेनशांभवंप्रापतत्पदं श्रीअगस्त्यउवाच
आसीत्कीर्तिसखोनामब्राह्मणोवेदपारगः २८ सहस्रकलशांभोभिर्धनवान्स्वयमाहृतैः कर्पूरैलालवंगाद्यैर्वहचाधिवा
सितैः २९ धारानिषेकमीशस्यकुर्वन्व्रतमपालयत् सर्वांगाणांचानुलेपंचंदनेनसुगंधिना ३० निजारामभवैःपुष्पै लिंगमाच्छाद्यशं

कारकर्पूरदीपदानंतेसिद्धेवंव्रतमहं ३१

अथेतिनिस्वःदरिद्रः ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० इतिश्रीमानवल्युपमामकन्दसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलास प्रकाशिकायांत्रिसप्ततितमोऽध्यायः ७३॥ ॥संम्प्रति शिवायधान्यार्पणफलंवक्तुंपुराऽत्तमवतारयति पुरीति धुरंवहतीतिधौरेयःवी

तस्यभक्तिपरीक्षायैहरःकौतुकवानभूत् आद्वादशाब्दमभवदनावृष्टिर्तयेयथा ३२ अथद्रव्येषुनष्टेषुनिःस्वःकौ
त्तिसखोभवत् अन्नतोयाद्यभावेनसोस्थिमात्रावशेषितः ३३ स्वयंदूरात्सरित्तोयमेककुंभाभिपूरितं अक्षतंसौव्रतंक
र्तुंददौशंभोर्दिनेदिने ३४ अथैकस्मिन्दिनेशंभोःसन्निधौसश्रमातुरः वारिपूर्णवहन्मूर्ध्निकुंभमातपपीडितः ३५ वि
व्हलाक्षश्चसोपानेपदेप्रस्खलितेसतिपपातभुविमूर्छोलुर्मनसाचास्मरच्छिवम् ३६ शिवोथसहसाभ्येत्यतस्या
पोद्यपरिश्रमं उवाचनित्यंसोपानेनिहितंकांचनंमया ३७ गृहीत्वाशिवभक्तान्त्वमात्मानंचानुपालय इत्युक्त्वा
तरधाद्देवोद्विजश्चासावबुध्यत ३८ गृहीत्वाचान्वहंदत्तहरेणवरकांचनं विक्रीयाभोजयद्विप्रान्स्वयंकौर्त्ति
सखोद्विजः ३९ शिवप्रसादेनचिराद्गमद्धामशांकरं ४० इतिस्कां॰त्रिसप्ततितमोऽध्यायः ७३॥ ॥श्रीअगस्त्यउ॰
पुरीनदकुटीनामपुण्यधाम पिनाकिनः तत्राभूद्धौरधौरेयोमहान्भूपश्चभूपतिः १ शूरव्याघ्रइतिख्यातःश्रुनासीरस
मोबले प्रवरःपद्मजातानांसुविक्रमजिताहितः २ सबभूवमहाभागोभक्तिमान्परमेश्वरे इष्टदातेशभक्तानामेधमान
धनःसदा ३ शिवालयेषुसर्वत्रधान्यराशीन्ययागिरीन् पूजार्थमादधेकोशेष्वखिलेषुमहामनाः ४ सकदाचिदरिंजे
तुंचोदितश्चोलभूभुजा प्रतिष्ठमानःस्वान्बंधूनिदमाहचमूपतिः ५ शिवार्थंकल्पिताएतेयुष्मदर्थममीपुनः धान्यको

ग्राम वैद्यनाथ धाम

णांधौरेयः अतिवीरइत्यर्थः १ शूरेति श्रुनासीरसमः इन्द्रतुल्यः सुविक्रमेणशोभनपराक्रमेणजिताःअहिताःशत्रवोयेन २ सइति महा

नभोगःशरीरंसुखंवायस्यईशभक्तानामिष्टदाता ३ ४ सइति चोलभूभुजाचोलराजेन ५ शिवार्थमितिएतेशिवार्थंश्रमोपुनःयुष्मदर्थ
मितिविभज्यप्रदर्शनम् वैद्दतिनिश्चयेन शंकरः शैवाधान्यकोशाःनस्पृश्याःनोपभोक्तव्याः ६ इतीति द्विषतांसैन्यानांबाहुल्येनआ
धिक्येनेतिकालविलंबोक्तिः ७ ८ ९ १० शैवानामितिसविधंसमीपं ११ निगूढेतिनिगूढं अंतर्मत्सरंहृदयंयस्यबहिः हृष्टइ

इत्युक्त्वाजेतुमहितान्शूरव्याघ्रोजगामह बाहुल्येनाथसैन्यानांद्विषतांचिरमावसत् ७ शूरव्याघ्रस्यबंधूनां
धान्यंकोशालयंययुः पुनःग्रासेप्रदास्यामःशिवस्येतिमनीषया ८ सर्वेगृहीत्वाधान्यानिशैवानिबुभुजुस्तदा
अथशत्रूनविनिर्जित्यशूरव्याघ्रःससैनिकः ९ पुनरासाद्यराजानंधनराशीन्समर्पयत् राज्ञावहुमतश्चासौः
स्वगृहंगंतुमुद्यतः १० शैवानांधान्यकोशानांयःपुरापालकःकृतः सतदाप्राप्यसविधंस्वस्यवक्तव्यंजिज्ञप
त् ११ निगूढहृदयःश्रुत्वाबहिर्हृष्टइवाभवत् कालियक्ष्वेलसंवीतोहृदोंतर्यामुनोयथा १२ संप्राप्यसदनंशूरः
स्वजनान्सांत्वयंगिरा गमयामासदिवसंगंगाधरपदक्रियः १३ अथरात्रौसमानीयशिवधान्यभुजोजनान्उक्त
ष्यकोशतःखड्गसमंशीर्षाणिचाच्छिनत् १४ छिन्नेष्वभेकपर्यंतंशूरव्याघ्रेणरुष्यता अवलैकाप्रजातातमाच्छा
द्यवपुषार्भकम् १५ शूरव्याघ्रमिदंप्राहदेहितंदययार्भकं अनन्नप्राशनोद्वेषनापराध्यतितेशिशुः १६

वगंभीरत्वात्द्वेषाकारं अप्रदर्शयन्नित्यर्थः उपमिनोति कालियस्यतन्नामकसर्प्पस्यक्ष्वेडेनविषेणसंवीतोव्याप्तःयामुनोयमुनासंबंधी
ह्रदइव अगाधजलराशिरिवसयथा अन्तर्विषःबहिःस्वच्छजलः तद्वदितिभावः संप्राप्येति गंगा धरपदयोः शिवचरणयोः अर्प्पिताः
क्रियायेनेत्यर्थः १३ १४ छिन्नेष्विति प्रजातानवप्रसूताएका अबलानारी १५ शूरइति अनन्नप्राशनः अप्राप्तकालत्वात्तत्संस्काररहि

तःतेनुभ्यंनापराध्यति १६ इतीतिसकरुणांदैन्यसहितांवाचमाकर्ण्यस्त्रियंप्रत्याहेत्यन्वयःस्वयंछेदनहेतुंप्रतिपादयतिशिवेति१७१८१९ २० इ

तिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांचतुःसप्ततितमोऽध्यायः ७४॥❀॥

इतिवाचंसकरुणामाकर्ण्योहसचस्त्रियं शिवधान्यभुजस्तन्वंयस्यास्तांतवामुना १७ तस्मान्निष्कृतिरेत
स्यछेदस्तुशिरसोयथा दृष्युक्तबालकशिरोयावच्चिच्छेदसाहसी १८ शंभुस्तावद्वृषारूढःसहदेव्याग्र ५
तोभवत् अपराधंक्षमस्वेतिनमतस्तस्यशंकरः १९ दयादृशासमुज्जीव्यबंधून्येनिहताःपुरा दत्वातस्मैच
सायुज्यंतिरोभूदंबयासह २० इतिश्रीस्कांदोपपुराणेचतुःसप्ततितमोऽध्यायः ७४॥❀॥ श्रीअगस्त्यउ॰॥
बहुजन्मार्जितैःपुण्यैर्जन्तोर्भक्तिमतःशिवे भवेद्पुनरावृत्तिःशिवलिंगप्रतिष्ठया १ अस्यग्रहारःसुमहा॰
न्निर्णीयाख्याद्विजाग्रयः भवेन्निःसंशयोयत्रसर्ववेदार्थनिर्णयः २ तत्रकश्चिद्द्विजवरःशंभुचित्तइतिश्रु
तः यस्यचित्तंसदाशंभौनिश्चलंभक्तिनिर्मलम् ३ पुराणमर्मधर्मज्ञःशिवलिंगप्रतिष्ठया प्रहास्यजननंकृशसा
धनंनिधनंययौ ४ अलाभाद्द्रव्यजातस्यमत्वासर्वंमनोमयं मनसैवालयंचक्रेसर्वलक्षणलक्षितम् ५ प्रा॰
कारमंडपशतप्रासादस्तंभगोपुरैः अलंकृतंमणिमयैर्नानावाहनमंडितम् ६ दासीदासायुतैर्युक्तंतस्यमध्ये
महेश्वरं लिंगमूर्त्तिंप्रतिष्ठाप्यचतुःषष्युपचारकैः ७ गिरिशंपूजयामासगलितश्चमलादभूत् अथकांचीपुरे

संप्रतिशिवलिंगप्रतिष्ठाफलंदर्शयति बहूतिशिवेभक्तिमतःजंतोःशिवलिंगप्रतिष्ठयाअपुनरावृत्तिर्मोक्षोभवेदित्यन्वयः१ इति
हासमवतारयति अस्तीति २ ३ ४ बहिर्द्रव्यालाभेपिमानसोपचारैरपितताधिकतरंपुण्यंभवतीत्याह अलाभादितिसर्वंमनोमयं॥

मनःस्वरूपंक्षयंमत्वाकामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिःअधृतिःश्रीर्ह्रीर्भीरित्येतत्सर्वंमनएवेतिश्रुतेः ५ ६ ७ गिरिशमिति मलात्पापात् एतत्कथासंबंधेनैवकथांतरंवर्णयति अथेति ८ निर्मातुमिति तद्विधेः तस्याःप्रतिष्ठायाविधेः इतिकर्त्तव्यतारूपविधान

निर्मातुमालयंशंभोःप्रतिष्ठांचमहाधनः तद्विधेरपरिज्ञानादासीदालोचनापरः ९ अथस्वप्नेमहादेवस्तमाह धरणीपतिं शंभुचित्तंगुरुंकृत्वानिर्मायग्रामवासिनम् १० कुर्वालयंप्रतिष्ठांचममेतिजगदीश्वरः सद्यःसमुत्थितस्तत्रययौयत्रसभूसुरः ११ प्रणम्यतंशिवादिष्टंतस्मैसर्वंन्यवेदयत् पंचार्णतद्विधानंचतस्मैसगुरुरादिशत् १२ नृपःप्रस्थापितस्तेनस्वपदंपुनरेयसः कृत्वालयंप्रतिष्ठांचशंभोःसपदमाप्तवान् १३ मनसेशसपर्यांसविधायद्विजपुंगवः मलत्रयविनिर्मुक्तोमहेश्वरपदंययौ १४ पांड्येषुसुकुमाराख्यभूपतिर्दुर्मतेस्थितं प्रापितंभक्तिमीशानेपित्राचोलेनसत्सुतं १५ साध्वीपद्मावतीनामपीतांबास्तन्यसेवया कारयित्वापतिंभक्तं चंद्रचूडस्यमाधुरे १६ हालास्येश्वरमाराध्यकालभीतिमतीतरत् श्रीअगस्त्यउवाच कांपिल्यनगरेकश्चिद्राजाकौर्त्तिरथोमतः १७ इष्टदःशिवभक्तानामीशपादार्चनापरः कंथाकौपीनसंव्यानतैलभोजनदानतः १८ आजातमालयंसर्वमशून्यंदिवसंनयन् प्रतिष्ठाप्यशुभांकीर्त्तिंमतेशिवपदंययौ १९ इतिपंचसप्ततितमोऽध्यायः ७५

स्य ९ अथेति शंभुचित्तंपूर्वोक्तंब्राह्मणं १० ११ १२ १३ मनसेति मलत्रयेणप्राक्प्रतिपादितेनविनिर्मुक्तः १४ कथांतरंवर्णयति पांड्येषिति तत्संज्ञकेषुदेशेषु १५ साध्विति पीतंअम्बायाःस्तन्यंयेनतादृशस्यशिवभक्तस्यसेवयामाधुरेनगरे १६ कथांतरमुपक्षिपति कांपिल्येति १७ इष्टदइति संव्यानमुत्तरीयं १८ १९ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशि

कायांपंचसप्ततितमोऽध्यायः ७५॥ ॥ अधुनापशुप्रभृतीनामपि शिवार्चनप्रभावेनमुक्तिर्ध्रुवेत्याह शिवभक्त्येति १ इतिहासमव तारयति आस्तेइति २ श्वेतेति यत्रक्षेत्रेवेदःश्वेतजंबूतरुर्भूत्वातपस्यति तस्यतरोर्मूलेजगतांमूलंजगत्कारणंयतोवाइमानिभूता निजायंते इतिश्रुतेः महेश्वरःसन्निधत्ते सन्निहितोभवतीत्यन्वयः ३ तमेवशिवंवर्णयति ज्योतिरिति तेजोलिंगाकृतिः तत्रसाभिप्रा

श्रीअगस्त्यउ॰ शिवभक्त्यैवपरयातिर्यंचोपिमहीतले कृत्वाशिवार्चनंतस्यप्रसादान्मुक्तिमाययुः १ आस्तेस्था नंमहेशस्यगजारण्यमितिक्षितौ पार्श्वयोर्यत्रकावेरीप्रवाहोमालिकायते २ श्वेतजंबूतरुर्भूत्वायत्रवेदस्तप स्यति तन्मूलेजगतांमूलंसंनिधत्तेमहेश्वरः ३ ज्योतिर्लिंगाकृतिःश्रीमान्ज्योतिषामवभासकः तमासाद्यगजो नित्यंमग्नःकावेरिकाह्रदे ४ स्वहस्तधृततोयेनाभिषिंचन्लिंगमूर्द्धनि अन्वहंपूजयामासभक्तिपूतेनचेतसा ५ तस्मिन्नेवतरौकाचिल्लूतानिजमुखोद्भवैः तंतुभिश्चातपत्राभैरुल्लोचमनुवासरम् ६ कृत्वोपास्तेस्मतः स्यापिप्रसन्नोभवदीश्वरः लूताकृतवितानानिकरिष्यन्नभिषेचनम् ७ आच्छिनत्यन्वहंदंतीतेनलूताचकुप्य ति कदाचिदभिषेकार्थंहरस्यारण्यकोद्विपः ८ आगत्योल्लोचमाच्छिद्यचाभ्यषिंचन्महेश्वरं तदानींकुपिता लूतातद्धस्तेचापतत्तनुः ९ सद्यस्तेनाप्यविज्ञाताप्रविवेशकरांतरं अवग्रहादधःस्थित्वाबभ्रामारण्यहस्तिनः १० सन्निधौपरिवृत्याथपतितस्त्यक्तजीवितः करमंतर्मुखंकृत्वात्यक्तासुर्मूर्ध्निदंतिनः ११ ॥ ॥

यविशेषणमाहज्योतिषामिति तस्यभासासर्वमिदंविभातीतिश्रुतेः यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमितिस्मृतेश्च ४ स्वेति स्वस्यहस्तेन शुण्डादण्डेन धृततोयंजलंतेन ५ तस्मिन्निति लूतातन्तुवायःकीटविशेषः उल्लोचंवितानं ६ ७ ८ ९ सद्यइति

करान्तरं शुण्डामध्यं अवग्रहात् ललाटात् अवग्रहोललाटस्यादित्यमरः १० सन्निधाविति गजइतिशेषः करंअंतर्मुखं वदनमध्ये कृ
त्वास्यक्तासुःमुक्तप्राणःपतितइत्यन्वयः ११ अलब्धेति अलब्धंअप्राप्तं निर्गमद्वारं निःसरणमार्गोययासा लूतापिप्राणान् अत्यजत् १२ ग
जमुक्तिप्रदानानंतरं लूतायाश्चत्रविधानफलंवर्णयति येतिसंम्राजः मंडलाधिपतेः जठरेगर्भोगर्भस्यजन्तुःकुक्षिभ्रूणार्भकागर्भइत्य

अलब्धनिर्गमद्वाराप्राणान्लूतापिसात्यजत् ददौमुक्तिंगजेंद्रस्यदययापरमेश्वरः १२ यालूतापिदधेनित्यंतंतु
भिश्चत्रमुन्नतं ससम्राजोबभूवांतर्जठरेगर्भरूपभृत् १३ अथवैजननेप्राप्तेसौमनस्यमहीपतेः ज्योतिर्विन्म
हिषीप्राहयदिजातोधुनासुतः १४ म्रियतेदशरात्रेसचेन्मुहूर्त्तादनंतरं जायेतसम्राड्दीर्घायुर्भवितानात्रसं
शयः १५ इत्याकर्ण्यवचोराज्ञीभूत्वास्वयमधःशिराः तुलातरौनिबध्यांघ्रीसामुहूर्त्तादनंतरम् १६ जनयामा
सतनयंदृष्ट्वातंदृश्यिलोहितं लोहिताःसंचनान्नातकृत्वावेदनयातया १७ प्राणांस्तत्याजसाराज्ञीवद्धेचद्र
वच्छिभुः वर्द्धमानंमहाबुद्धिंलोहिताक्षंमहीपतिः १८ शुभेदिनेभिषिच्यस्वेपदेवनमुपागमत् तपोवनगते
तातेलोहिताक्षःसमंत्रिभिः १९ सहितःपृथिवींसर्वांन्यायतःपर्यपालयत् भूत्वाजातिस्मरोराजागजारण्यमुपे
त्यसः २० श्रीकर्मकारयामासजंबूनाथस्यभूतिनः समुन्नतमहासालगोपुरादिपरिष्कृतम् २१ ॥ ७ ॥

मरः तद्रूपभृत्बभूवेत्यर्थः १३ अथेति वैजनने सूतिमासे सूतिमासोवैजननइत्यमरः सौमनस्यतन्नामकस्य १४ म्रियतइति सः बाल
कःमुहूर्त्तादनंतरंजायेतचेत् संम्राट् दीर्घायुश्चभविता १५ इतीति अधःशिराः तुलातरौतुलावृक्षे अंघ्रीचरणौ अर्थाद्ऊर्ध्वमित्यर्थः १६
१७ १८ १९ सहितइति मंत्रिभिरित्यनेनसंबन्धः जातिस्मरःपूर्वजन्मजातिस्मरणवान् २० श्रीकर्मेतिपूर्वोक्तंशुभवर्द्धनकर्म २१

२२ २३ उपसंहरति पालयित्वेति सागरांबरां समुद्रपर्यंतांमेदिनीं धर्मेणपालयित्वामहेशस्य प्रसादेनज्ञानेनेत्यर्थः ज्ञानंमहेश्वरा दिच्छेदितिस्मृतेः मृत्युं अविवेकलक्षणंसंसारं अत्यतरत् अतिचक्राममुक्तोभूदित्यर्थः तमेवविदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयनायेतिश्रुतेः २४ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्तविलासप्रकाशिकायांषट्सप्ततितमोऽध्यायः ७६॥ ॥ संप्रतिशिवसंनिधौभक्त्यागानंकुर्वतो वाञ्छितार्थःसिध्यतीत्याहआसीदितिकुशीलवः गायकः

निर्मायालयमीशस्यमहोत्सवमकारयत् अन्येषुशंभुस्थानेषुमहोत्सवमपिव्यधात् २२ पुंडरीकपुरंप्राप्यसंनिधौससभापतेः दृष्ट्वादशाब्दंरचयन्कैंकर्यंविविधंनृपः २३ पालयित्वाचधर्मेणमेदिनींसागरांबरां प्रसादेनमहेशस्यमृत्युमत्यतरत्त्वयम् २४ इतिश्रीस्कांदोपपुराणेभक्तविलासेषट्सप्ततितमोऽध्यायः ७६॥ ॥ श्रीअगस्त्यउ· आसीत्कुशीलवःकश्चिद्गीताकरइतिश्रुतः वीणागानेनयस्याभूत्सुप्रीतोमधुरेश्वरः १ संनिधौ द्वादशसमावीणागानंवितन्वतः भक्तसंघासनारोहंव्यतरत्तस्यवांछितम् २ संतोषयित्वात्यागेशंवीणागानामृतेनसः उत्तरद्वारमागेणगत्वातस्यप्रियोभवत् ३ गौरीस्तन्यविवर्तीनांशिवव्रतभुवोगिरा सुगुंफंगृणयामास विपंचींमंजुवादिनीम् ४ द्रोणीपुरेमहादेवंमधुवीणाभिरुक्तिभिः संतोषयित्वाप्रत्यक्षंददर्शशिवयासह ५ ॥

१ सन्निधाविति द्वादशसमाः द्वादशसंवत्सरेषुकालाध्वनोरितिद्वितीयाभक्तसंघस्य भक्तसमुदायस्यआसनारोहःपीठारोहणंयस्मिन्तादृशं वाञ्छितंव्यतरत्ददौ २ ३ गौरीति गौर्याःस्तन्यस्यक्षीरस्य विवर्तानां रूपांतराणां शिवव्रतभुवः शिवव्रतपुत्रस्य भक्तशिरोमणेः गिरांगुंफंसंदर्भं गृणयामास शब्दापयामास विपंचींससप्ततंत्रीं वीणां ४ ५ ॥ ॥ ॥ ॥ ॥

गुरुप्रसादेनेतिनिर्धूतमायामलसंबंधिनांपाशानांप्राक्प्रतिपादितानांद्विपंचाशत्संख्याकानांगंधःसंबंधोयेनतादृशःगंधोगंधकस्त्रा
मोदेलेशेसंबंधगर्वयोरितिविश्वः ६ अथप्रतिपादितकथानुक्रमंसंख्यापूर्वकमुपदिशतिभक्तादृति हेभक्ताः मुनयः विशुद्ध्याज
गदीशस्यशिवस्यभक्त्या विच्युतकर्मबंधानष्टकर्माशयाः त्रिषष्टिः त्रिषष्टिसंख्याकाःभक्ताः मयाऽदिताःयेषांभक्तानांचरितानि स्म
तानि———स्मरणविषयीकृतानिमहान्त्यघानि ब्रह्महत्यादिमहापातकानिनिघ्नंतिनाशयन्ति ७ अन्यानपिशिवप्रसादेनमुक्तान्

गुरुप्रसादेनशिवप्रसादमवाप्यगीताकरभक्तवर्यः निर्धूतमायामलपाशगंधोबंधाद्विमुक्तोह्यभवन्मुनींद्राः ६
श्रीअगस्त्यऊ· भक्तास्त्रिषष्टिर्जगदीशभक्त्याविशुद्ध्याविच्युतकर्मबंधाः मयोदितायच्चरितानिलोकेस्मृताः
निनिघ्नंतिमहांत्यघानि ७ जटिलोमिथिलोदाल्भ्यःसौरभेयोजितासनः बालखिल्यःसिद्धूःसिद्धूरयोवषड्गुःकवयोषितः
८ एतेदृशमहाभक्तामनसायूजितेश्वराः मुक्तास्तस्यप्रसादेनब्रभूवुर्लोकवंदिताः ९ शिवोपदिष्टविज्ञानलीना
विद्याघवृत्तयः ददृशुःसर्वभूतेषुस्थितंसाक्षिणमीश्वरम् १० श्रीऋषयऊ· कदाकुत्रोपदिष्टंतद्विज्ञानंत्रिपुरद्विषा तेभ्यस्तद्ब्रूह्यशेषेणयथावत्कुंभसंभव ११ श्रीअगस्त्यऊ· कैलासशिखरेदेवंसुखासीनंसहोमया प्रणम्यपादयोर्भ

दृशभक्तान्निर्दिशतिजटिलइत्यादिना ८ ९ तेषांफलमाह शिवेतिशिवेनऽपदिष्टंयद्विज्ञानंब्रह्मज्ञानंतेन लीनानष्टा अविद्यासंबंधि
नी अघवृत्तिःपापवृत्तिःयेषांतादृशास्सन्तः यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेतिभ
गवद्वचनात् सर्वभूतस्थितंसाक्षिणं द्रष्टारंईश्वरंददृशुःएकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतान्तरात्मा कर्माध्यक्षःसर्वभूता
धिवासःसाक्षीचेताकेवलोनिर्गुणश्चेतिश्रुतेः १० संप्रति विशेषकथनेन जातकौतूहलाः ऋषयः सविस्तारंपृच्छन्तिकदेति ११ ॥

तदुत्तरप्रकारमाह कैलासेति १२ १३ विलीनेदृति एकोभवान् अद्वितीयःपरमात्मा अवशिष्यते एकएवरुद्रोनद्वितीयायतस्थेदृतिश्रु
तेः दृश्यंवेदान्तावदन्त्येवतु किंत्वित्यर्थः अविरोधःअनेकरूपतयादृश्यस्यप्रपंचस्यएकरूपतयास्थितस्यात्मनश्चअविरोधःक
थंभवेदित्यर्थः १४ भिद्यते हृदयग्रन्थिरितिश्रुत्यापरमेश्वरदर्शनस्य सकलसंदेहनाशकतानिश्चिता युष्मद्दर्शनानंतरमपियदि
संदेहः तर्हिकोन्यःशरणमितिशंकते दृष्टापीति कालोमृत्युः कामोमदनः तौहंतीतितादृशंपरं अन्यंशरणंप्रयास्याम दृत्यन्वयः १५
संदेहप्रकारमेवदर्शयन्ति आसीदिति त्वयितेजोरूपेपरब्रह्मणि दृश्यंज्ञानावरकत्वेन तमोरूपंजगत्कथमासीत् विरुद्धस्वभावत्वात्

देवदेवदयासिंधोदृक्षाध्वरविभंजन श्रुताश्चसर्वेवेदांताःप्रपंचोयंनलीयते १३ विलीनेसकलेलोकेभवा
नेकोवशिष्यते वदंत्येवहिवेदांतास्त्वविरोधःकथंभवेत् १४ दृष्टापितेपदांभोजंभूयश्चेदपिसंशयः शर
णंकंप्रयास्यामःकालकामहनंपरम् १५ आसीत्त्वयिकथंदृश्यंकथंत्वय्यवलीयते वदैतद्भगवन्मेनछि
न्द्युःसर्वसंशयाः १६ श्रीमद्देश्वरउ· ज्ञानयोगंमुनिश्रेष्ठाःसविज्ञानंनिबोधत गोप्ययत्स्थूलदृष्टीनानविदुर्यै

अध्यासएवनसंभवतीतिशंकार्थःत्वय्येवकथंलीयते हेतुःपूर्ववत्येनोपदेशेन १६ एवंमहर्षिभिरुक्तांशंकांज्ञात्वा परमकारु
णिकोभगवान्परमेश्वरःतदनुजिघृक्षया ज्ञानयोगमुपदिशन् मुनीनवहितोकरोति ज्ञानयोगमिति सविज्ञानंफलीभूतविशि
ष्टज्ञानसहितंज्ञानंयोगंनिबोधत जानीतयूयंस्तुस्थूलदृष्टीनांदेहात्मबुद्धीनांगोप्यरक्षणीयंपामरेभ्योनोपदेष्टुमित्यर्थः येपामराःगु
हाशयंहृदयाकाशवर्त्तिनंपरमात्मानंनविदुःसद्गुरूपदेशादिनानजानंति १७ अद्वैतवस्तुसिद्ध्यर्थःसृष्टेःप्राक् केवलात्मनोमिथ्या
जगदुत्पत्तिंवर्णयन्ति निर्विकारेदृति अविद्यासंसर्गाभावात्सद्भावविकाररहितेनिराधारेस्वस्मैवसकलजगधिष्ठानतया आ

धारांतरनिरपेक्षेनिर्मलेप्रागुक्तमलत्रयरहितेगगनाकृतौ आकाशशरीरे ब्रह्मणिआकाशशरीरं ब्रह्मेतिश्रुतेः एवमखण्डसच्चिदानन्दस्वरूपे अद्वितीयेजीवाः स्फुलिंगरूपाःउत्पद्यन्तेविलीयंतेचतत्रोपमा वार्ध्यूर्मयोयथेति वार्द्धेःसमुद्रस्यऊर्मयोयथातरंगाद्व तरंगाणांसामुद्रत्वेपिसमुद्रस्यनतारंगत्वंयथातथैव जीवानांब्रह्मांशत्वेपि ब्रह्मणोनजीवांशत्वमितिभावः १८ पामराणांजगत्सत्यत्वभ्रांतिमपनुदति आद्यन्तयोरिति आदौसृष्टेः प्राक् अन्तेपरतश्च असद्भावात् अविद्यमानत्वात् अन्तरामध्ये अवभासितं आभासतयादृश्यमानंदृश्यंजगत् आधिष्ठानस्यब्रह्मणोअपरिज्ञानात् रज्जुज्ञानाभावात्सर्पद्वयथार्थवत् सत्यमिवभाति वस्तुतो नपरमार्थसद्रितिभावः एतेनदृश्यंमिथ्या आद्यन्तयोरसत्वेसतिभासमानत्वात् स्वप्नगजादिवत् इत्यनुमानेनजगतोमिथ्यात्वंसा

निर्विकारेनिराधारेनिर्मलेगगनाकृतौ उत्पद्यंतेविलीयंतेजीवावार्ध्यूर्मयोयथा १८ आद्यंतयोरसद्भावाद्वभासितमंतरा अधिष्ठानापरिज्ञानाद्भातिदृश्यंयथार्थवत् १९ भक्त्याजानंतिपरयामयिकर्मार्पणेनच सविज्ञानमिदंज्ञानंजायतेमदनुग्रहात् २० अनन्यकारणंकार्यंपश्यतांनिर्मलेहृदि दृश्यंविश्वंचमय्येवकश्चित्सश्यतियोगतः २१

धितमितिबोध्यं नयदिदमग्र आसनभविष्यदतोनिधनादनुमितमंतरात्वयिविभातिमृषोकरसेदित्यादिप्रमाणमनुसंधेयं अतएवदेहात्मप्रत्ययोयद्वत्प्रमाणत्वेननिश्चितः लौकिकंतद्वदेवेदंप्रमाणंस्वात्मनिश्चयादित्याकरेदृश्यते १९ संप्रति ज्ञानसाधनमुपदिशतिभक्तेति परयाउत्तमयाभक्त्याअंतरंगसाधनभूतयामयिपरमेश्वरेकर्मार्पणेन विहितकर्मसमर्पणेनच यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौन्तेयतत्कुरुष्वमदर्पणमितिभगवदुक्तेः सविज्ञानमिदमात्मज्ञानं मदनुग्रहाज्जायते अध्यवोचदधिवक्ता नान्यःपंथाविद्यतेऽयनायेत्यादिश्रुतेः २० तर्हिसर्वेकिं नजानन्ति अत्राह अनन्येति कार्यं असद्रूपंविश्वंकृत्स्नंदृश्यमिदंजगत् ॥

अनन्यकारणंनविद्यते आत्मनोऽन्यत्कारणंयस्यतादृशंनिर्मलेहृदिपश्यतां ज्ञानदृष्यावलोकयतांवाचारम्भणंविकारोनामधेयमितिश्रुतेः आत्मैवैकस्सत्यमितिनिश्चिन्वतां ज्ञानयोगसिद्धानांइत्यर्थः तेषामपिमध्येकश्चिदेवयोगीयोगतःचित्तवृत्तिनिरोधात् मय्येवपरशिवेय तामपिसिद्धानांकश्चिन्मांवेत्तितत्वतइतिस्मृतेः २१ ७ ॥ ॥त्वयिदृश्यमानस्यजगतः मिथ्यात्वेव्यवहारोपपत्तिः कथमित्याशंक्यया वदात्मसाक्षात्कारंसत्यतयाभासमानस्यकूटकार्षापणादिवत् व्यवहारोपित्तावत्सर्थंतंचलति वस्तुतोनास्तीत्याह अध्यारोपेणेति अध्यारोपेणविज्जडयोः परस्पराध्यासेनसकलंजगदाभाति अपवादेनिषेधेसतिनाभाति अध्यारोपापवादाभ्यां निष्प्रपंचंप्रपंच्य ते दृश्युक्तेःतदपिकियत्सर्यंततदाह यावदज्ञानमिति अज्ञानंज्ञानविरोधितन्निवर्त्यभावरूपंमायाख्यमित्यर्थः तद्यावदस्ति आत्मसा

अध्यारोपेणसकलमपवादेनतज्जगत् यावदज्ञानमाभातितन्नाशेमयि लीयते २२ अध्यारोपप्रकारंतद्वधा नान्निबोधत॥ ७ ॥ ७ ॥

क्षात्काराविधिमामेवयेप्रपद्यन्तेमायामेतांतरन्तितेइतिस्मृतेःतन्नाशेसति अज्ञाननाशेसतिमयिलीयते भिन्नस्वरूपानवभासेनम देकरूपतांप्रपद्यतदित्यर्थः २२संप्रति यतिपित्सुबुध्यारोहायश्रोतॄन् सावधानयति अध्यारोपेति तावदिदानीं अध्यारोपस्यअध्यासः स्यप्रकारंभेदंबंधमित्यर्थः अत्रकेचित् ग्रहक्षेत्रादि बाह्यविषयशरीरेंद्रियप्राणान्तःकरणभेदेनपंचविधाध्यासोबंधःसचअनात्मन्यात्मबु द्धिरूपःअध्यासएव अविद्यासैवचदोषरूपेणनिद्रया स्वप्नवत् कल्पितस्यापिप्रपंचस्यप्रयोजिकानित्यानित्यवस्तुविवेकः इहामुत्रा र्थफलभोगविरागः शमादिषट्कसंपत्तिःमुमुक्षुत्वंचेतिसाधनचतुष्टयसंपत्याकृतश्रवणमननिदिध्यासनस्य स्वात्मसाक्षात्काररूपवि द्योदयेन स्वप्नप्रपंचप्रबोधेनैव स्वविलासरूपप्रपंचसहिता अविद्यानश्यतितदः शुद्धबुद्धमुक्तस्वभावसच्चिदानन्दरूपःपरमात्मरूपे

णप्रकाशते तथाचश्रुतिः तरतिशोकमात्मविदिति तथैवअगस्त्यंप्रतिभगवान् हयग्रीवः नावासव्योभिलब्धत्वात् नज्ञेयोज्ञानविग्रहः नकार्योनित्यसिद्धत्वात् आत्मेत्यज्ञानसंक्षयः अविद्यानिवृत्तिर्मुक्तिरितिवदन्ति एतदपिप्रपंचस्यअज्ञानविलसितत्वनिरासेनपरमार्थत्वस्यव्यवस्थानात् अध्यासस्यवक्तुमशक्यत्वात् अन्येतुधर्मेणस्वर्गादिगमनंअधर्मेणच अधोलोकगमनंपुरुषस्यविवेकख्यात्यातापत्रयरूपदुःखत्रयनिवृत्त्या आत्मनोमोक्षःविवेकख्यातेःपूर्वंप्रकृत्याभोगात्बंधःविवेकख्यातिपर्यंतंविहितंचित्तचेष्टितमितितदेवबंधःसचत्रिविधःप्राकृतोवैकृतोदक्षताचेतितत्रआत्मबुद्ध्याप्रकृत्युपासकानांप्रकृतिकृतोबंधःप्राकृतःपुरुषबुद्ध्यामहदादिविकारोपासकानांविकारकृतोबंधोवैकृतःपुरुषतत्वानभिज्ञतया इष्टापूर्त्तकारिणांदक्षतापादकोबंधः विवेकख्यात्युत्तरंतुतत्त्वज्ञानाग्नि

आसमग्रेहमेवैकोनान्यदासीदसच्चसत् २३

नासंचितदाहे आगामिनश्चबाधे भोगेनप्रारब्धनाशेचआध्यात्मिकादिदुःखत्रयविगमरूपामुक्तिः तथाचसूत्रं त्रिविधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थइति शरीरादिप्रयुक्तमाध्यात्मिकंभूतप्रयुक्तंतुआधिभौतिकंदेवादिप्रयुक्तमाधिदैविकं दुःखत्रयस्यसर्वथानाशोमुख्यपुरुषार्थइतितदर्थः एतादृशदुःखत्रयनिवृत्तिरेवमुक्तिरितिवदन्ति अपरेतुप्राकृतकर्मनिवृत्तोऽविवेकनिमित्तोवादुःखभोक्तृत्वलक्षणसंसारोबंधःपुण्यवशात् चित्तवृत्तिनिरोधरूपयोगसाध्येनिर्विषयत्वेसतिभगवदनुकंपयाआत्मस्वरूपेअवस्थानंमनसोमुक्तिः तथोक्तंपाराशरस्मृतौमनएवमनुष्याणांकारणंबंधमोक्षयोः बंधायविषयासक्तंमुक्त्यैनिर्विषयंमनइतिसूत्रंचस्वरूपप्रतिष्ठावाचित्तिशक्तिरतएवस्वरूपेणावस्थानंमुक्तिरितिवदन्ति इतरेतुभोगायतनभोगसाधनभोग्यभेदभिन्नप्रपंचत्रयसंबंधोबंधः तस्यसंबंधविलयोमोक्षोनतुप्रपंचविलयः नकदाचिदनीश्वरंजगदितियुक्तेः नचमुक्तस्यमहासनेनिरानंदइति नहिब

दृश्येवमुक्तस्यापिजन्यानन्दःजन्यस्यविनाशनियमेनमुक्त्यवस्थायामप्यानंदनाशप्रसंगात् किंतुबंधदशायांसंसारेणाभिभूतस्यस्वाभाविकानंदस्यनिजाचरितैःनित्यादिकर्म्मभिःसंसारनाशात्महतामनसोरजस्तमोभिभवेसचोद्रेकेचसतिस्वात्मानंदाविर्भावोभवतीतिवदन्ति तत्रापि आविर्भूतानंदोमुक्तिदशायांमननभूतोऽनुभूतोवानाद्यः तादृशानंदस्य विद्यमानस्याप्यकिंचित्करत्वात् अन्येतत्करणाभावेनकथमनुभवः नचमहतोमनसःकरणत्वंशरीराद्यभावेनमनस्तदप्यकिंचित्करमेव किंचआत्मा आनंदस्वभावोनवा आद्ये संसारदशायांआनंदतिरोभावेन आत्मनोपितत्संगः अन्येआत्मनःपाषाणप्रायतापत्तिः निखिलप्रेमास्पदत्वाभावश्चेति युक्त्यनुभवविरोधेन निन्दाश्रवणेनचमनश्चांचल्यमेवेतितदेवं तांत्रिकमतभेदेन बहुधाप्रतिपादितं अध्यासभेदं अवधानात् चित्ते काग्र्यात् निबोध तनितरंजानीतसतिकुञ्जे चित्रकर्मेतिन्यायेन अधिष्ठानेसत्यारोपइति तदेवदर्शयति आसमिति अग्रेसृष्टेःप्राक् अहमेकएव अद्वि

॥ ७ ॥ पूर्णत्वात्स्वप्रकाशत्वान्महादेववदितिश्रुतःप्रकृतिर्गुणसाम्याख्योदिताअवलोकनात् २४

तीयात्मस्वरूपः आसमभूवमात्मावाइदमग्रआसीन्नान्यत्किंचनमिषत् नासदासीन्नोसदासीत्तदानीं नासीद्रजोनोव्योमेत्यादिश्रुतेः तदेवविशिनष्टिनेत्यादिना असत् कारणरूपं अव्यक्तादिकंसत् कार्यरूपं महदादिकंच नासीदात्मातिरिक्तं किमपिनासीदित्यर्थः नचकिमपिनासीदित्युक्तौत्यात्मनोऽप्यसत्वंप्रसज्येत असतीत्येवोपलब्धव्यः असन्नेवसभवति असद्ब्रह्मेतिवेदचेदित्यादिश्रुतेः नचतस्याप्यभावेकिंवाच्यमितिवाच्यं शून्यवादप्रसंगात् निरधिष्ठानारोपप्रसंगाच्चेतिभावः २३॥ ७ ॥ तथाविधस्याखंडचिदात्मनःमहादेववदितिसंज्ञानिमित्तानि दर्शयति पूर्णत्वादिति दीव्यतेःक्रीडाद्यर्थकतया मूर्त्यष्टकपरिग्रहेण सकलेजगतिपूर्णत्वात्स्वेनैवप्रकाशत्वाच्च महादेववदितिश्रुतः वेदेनप्रतिपादितइत्यर्थः तादृशस्यादितीयात्मनोऽनुग्रहरूपेण पंचमकृत्येनसृष्टिप्रवण

तांदर्शयतिप्रकृतिरितिगुणानांसत्वरजस्तमसांसाम्यंअन्यतमाधिक्याभावःआख्यायस्यास्तादृशीप्रकृतिःमूलप्रकृतिः अवलोकनात् ईक्षणात् चोदितापेरिता सृष्टाविशेषः तदैक्षतबहुस्यांप्रजायेयेतिश्रुतेः २४॥ ७ ॥अथप्रकृतिसृष्टिंवर्णयति असतेति प्रकृतिरितिशेषः गुणवैषम्यरूपंसत्त्वादितारतम्यस्वरूपंमहत्तत्त्वंअसतेत्यन्वयः तत्रमहत्तत्त्वेअन्तःकरणाख्येस त्वस्यगुणस्यविजृंभणंतुसाधिष्ठानायाःप्रकृतेःअनुबिंबितंदर्पणइवप्रतिफलितं २५ नामरूपविहीनस्यपरमार्थवस्तुनोजीवेश्वरसंज्ञे दर्शयति ईश्वरइति कारणंमूलप्रकृतिरुपाधिर्येसमायाप्रतिबिंबितचैतन्यस्यसकारणोपाधिरीश्वरः साक्षी अव्याकृतइतिशब्दैरीरितःकथितः यतरज

असतगुणवैषम्यंरूपंतत्त्वंमहच्चतत् विजृंभणंतुसत्वस्यसाधिष्ठानानुबिंबितम् २५ ईश्वरःकारणोपाधिःसाक्ष्यव्याकृतईरितः विजृंभणंयद्रजसःसाधिष्ठानानुविंवितम् २६ तज्जीवतत्त्वंभोक्त्राख्यंनश्वरेयदहंमतिः मदीक्षितस्यतमसोयदस्तिचविजृंभणम् २७ साधिष्ठानानुबिंबंचयददृश्यतदुच्यते त्रिगुणात्मकआकाश तस्मादासीत्तदीक्षितात् २८ तस्यासीत्सत्वतःश्रोत्रंरजसोवागथान्यतः शब्दोभवत्ततोवायुर्नभस्त्रिगुणात्मकः २९

सोगुणस्यसाधिष्ठानानुबिंबनं २६ तज्जीवतत्त्वंभोक्तेत्याख्यायस्यकार्योपाधिरयंजीवः कारणोपाधिरीश्वरइत्युक्तेः नश्वरेजगति अहमितिमतिर्येस्यतदहंकाराख्यंतत्त्वमभूदितिशेषः प्रकृतेर्महान्महतोहंकारइत्युक्तेः मया अहमा ईक्षितस्य तमसःगुणस्यविजृंभणंयदस्तितदाकाशदृश्याग्रेणान्वयः २७ दृश्यंचभूतसृष्ट्यारंभतात्पर्येणयददृश्यरूपरहितत्वादचाक्षुषंतत्त्रिगुणात्मकआकाशइत्यर्थः तस्माद्वातएतस्मादात्मनआकाशःसंभूतइतिश्रुतेः २८ इंद्रियसृष्टिंवर्णयति तस्येति तस्याकाशस्यसत्त्वतःसत्त्वांशात्श्रोत्रेंद्रियंरजसोगुणात्वाक्अथान्यतःतमसःशब्दःअभवदित्यन्वयःततःनभसःआकाशात्त्रिगुणात्मकोवायुरित्यर्थः आकाशाद्वायुरिति

त्वगिति तस्यवायोः सत्वतः त्वगिंद्रियंरजसोहस्तः पाणीन्द्रियं अन्यतस्तमसः स्पर्शश्चाभूदित्यन्वयः वायोः सकाशात् त्रिगुणात्मकंतेज स्तत्वमभूदितिशेषः २९ सत्वादिति अस्यतेजसःसत्वात् ईक्षणंचक्षुरिंद्रियंरजसः पादः अन्यतस्तमसोरूपंचाभूदित्यन्वयः वायोर ग्निरितिश्रुतेः तेजसःसकाशात् अपतत्वंजलतत्वंअभूदित्यन्वयः तस्यजलस्यसत्वात् रसनं इन्द्रियमजायतेत्यग्रिमेणान्वयः ३१ रसनमितिरजसोगुणात्मायुःतमसश्चरसःअभवदित्यन्वयः अग्नेरापइतिश्रुतेः तस्माज्जलात् त्रिगुणापृथ्वी अस्याःपृथिव्याःसत्वतःघ्रा णेंद्रियं अभवदितिसंबध्यते अद्भ्यःपृथिवीइतिश्रुतेः ३२ उपस्थमितिरजसः उपस्थमिंद्रियंजज्ञेगंधःतामसः तमोगुणउच्यते

त्वगासीत्सत्वतस्तस्यहस्तोभूद्रजसोन्यतः स्पर्शस्ततोभवद्वायोस्त्रिगुणात्मकमीक्षणम् २९ सत्वादस्याभवः सादोरजसोरूपमन्यतः अपसत्वंतेजसश्चाभूत्तस्यसत्वादजायत ३१ रसनंरजसःपायूरसश्चतमसोभवत् त्रि गुणापृथिवीतस्मा द्घ्राणमस्यास्तुसत्वतः ३२ उपस्थंरजसोजज्ञेगंधस्तामसउच्यते पंचानांसत्वसंघातम न्तःकरणमुच्यते ३३ प्राणःसमष्टिरजसामासंगोविषयेषुयः तमसांसमुदायोसौस्यादेवंशास्त्रनिर्णयः ३४ म दीक्षयाचतंब्राचद्विधाभूतानिभूसुराः दशद्यभूवन्पंचापिचतुर्थैकैकशःपुनः ३५ ॥ ७ ॥ ७ ॥

अन्तःकरणस्वरूपमाह पंचानामिति पंचानामाकाशादीनां सत्वसंघातःसत्वगुणसमष्टिः अन्तःकरणमुच्यतइत्यर्थः ३३ प्राणसृष्टिमाह प्राणइतिपंचानामित्यनुषज्यते रजसांसमष्टिःप्राणउच्यते यःविषयेषु आसंगःममत्वाभिमानःअहंकारइत्यर्थः असौ तमसां समुदायः समष्टिरूपःएवंप्रकारेणशास्त्रनिर्णयःस्यात् ३४ एवंभूतसृष्टिमुपदिश्य भौतिकसृष्टिमुपदिशन् तदुपोद्घातत्वायपंचीकरणप्रकारंप्रथ मंवर्णयतिमदिति ममचैतन्यरूपस्यदीक्षया अवलोकेनतन्द्रामायायाचद्विधाभूतानिपंचापिभूतानिदशसंख्याका अभूवन्भूसुराइतिसं

बोधनं पुनः एकैकशःप्रत्येकंचतुर्द्धाजातानीत्यन्वयः ३५ अविभक्ताद्इति अविभक्तात्परे अन्येभागाःपंचैवासन् पुनःतेसर्वेभागाः विभक्ताद्इत्यर्थः अविभक्तमात्मानंत्यक्त्वा अन्यं भागंअन्वियुः यथा आकाशस्यद्वौभागौ तयोरर्द्धंचतुर्द्धाजातंवाय्वादिषुचतुर्षुसमन्वितंएवं वाय्वादीनामपि तथाचस्वस्यार्द्धंअन्येषांपादार्द्धंक्रमेण अर्द्धेमिलित्वापञ्चीकृतं प्रत्येकंभूतपंचकं भौतिकसृष्टिसमर्थमभूदितिभावः ३६ तदेवदर्शयति मिलितानीति ३७ तस्येति तैःपंचीकृतैःअण्डब्रह्मांडमभूत् चतुर्विधोजरायुजस्वेदजांडजोद्भिज्जरूपः भूत

अविभक्ताःपरेभागाःपंचैवासन्यथापुनः स्वस्वाविभक्तमात्मानंस्वंसर्वेचान्यमन्वियुः ३६ मिलितानियथासम्यक्कृतानिपंचीकृतानिहि समन्वितानिपादांशैःस्वाधिक्यानामपूर्ववत् ३७ तस्यांशस्तैरभूद्ब्रह्मांडंभूतग्रामश्चतुर्विधः यथाकर्मानुसरणंपाकात्कालवृतादभूत् ३८ भोगायतनमेतस्यजीवस्यसुखदुःखयोः पंचीकृतमहाभूतसंभवंकर्मसंचितम् ३९ शरीरंस्थूलमित्याहुःकोशोन्नमयसंज्ञितः पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितम् ४० अपंचीकृतभूतोत्थंशरीरंसूक्ष्ममुच्यते अनाद्यविद्यानिर्वाच्याशरीरंकारणंभवेत् ४१ ॥ ७ ॥

ग्रामः यथाकर्मानुसरणं स्वीयपुण्यपापकर्मोपायनतिक्रम्यकालवृत्तात् पाकात्स्वीयकर्मबीजपरिपाकात् अभूत् ३८ सम्प्रति स्थूलादिशरीराणिवर्णयति भोगेति एतस्यजीवस्य सुखदुःखयोःभोगस्यसाक्षात्कारस्य स्थानंपंचीकृतेभ्यो भूतेभ्यः संभवोयस्यतादृशं कर्मसंचितं शरीरंस्थूलमित्याहेत्यग्रिमेणान्वयः ३९ तस्यैवस्थूलशरीरस्य अन्नमयकोशसंज्ञेत्याह कोशेति अथ लिंगशरीरं दर्शयति पंचेति एवं सप्तदशविकारात्मकं अपंचीकृतभूतोत्थं शरीरं सूक्ष्ममुच्यतइति सार्द्धेनान्वयः ४० कारणशरीरमाह अनादीति अनिर्वाच्या सदसद्विलक्षणत्वेननिर्वक्तुमशक्या अनाद्यविद्याकारणं शरीरं भवेत् ४१ ७ ७ ७ ७

अवस्थात्रयंवर्णयति जाग्रदिति अवस्थात्रयसाक्षिणोविश्वादीनुद्दिशति यस्येति ४२ तस्येति योगतःअवयवशक्तिवशात्चिदाभा सोविश्वः व्यावहारिकइत्यपि त्रीणिनामानिस्थूलशरीराभिमानिनोजीवस्यसंतीत्यर्थः४३ तैजसमाह कोशेति प्राणमय मनोमय बुद्धि मयकोशत्रयात्मकंनित्यंतत्वसाक्षात्कारपर्यंत स्थायिलिंगशरीरंप्रविष्टःमानसंभोज्यंवस्तुभुंजानःयोभिमन्यते तस्यनामान्यपि त्रिधेत्यन्वयः४५ तान्येववैकारिकइति वैकारिकस्तैजसःस्वप्नकल्पितश्चेतित्रिधेत्यर्थः प्राज्ञंवर्णयति स्यादिति पारमार्थिकः

अ.७७

जाग्रत्स्वप्नसुषुप्त्याख्यास्तिस्रोवस्थाःशरीरिणः यस्यान्नमयचेष्टासुममाहमितिधीर्भ्रमः ४२ तस्याभिमानिनःसंति त्रीणिनामानियोगतः चिदाभासश्चविश्वस्यव्यवहारिकइत्यपि ४३ कोशत्रयात्मकंनित्यंप्रविष्टोयोभिमन्यते भुंजा नंमानसंभोज्यंतस्यनामान्यपित्रिधा ४४ वैकारिकस्तैजसश्चतथाचस्वप्नकल्पितः स्यात्पारमार्थिकःप्रा ज्ञोह्यनच्छिन्नःसुषुप्तिगः ४५ नित्यंलिंगशरीरंतुनश्वरंस्थूलमुच्यते अंकुरंतियथावृक्षात्पत्राणिप्र तिवासरम् ४६ उत्पद्यंतेतथाभोक्तुःस्थूलदेहाःस्वकर्मभिः संसारेयावदज्ञानंभ्रममाणस्यदेहिनः ॥ ४७ ध्वंसायलिंगदेहस्यलोकोयंसंप्रकाश्यते ४८ इतिश्रीस्कांदोपपुराणेसप्तसप्ततितमोऽध्यायः ७७॥७॥

प्राज्ञःसुषुप्तिकः इतिकारणशरीरावच्छिन्नःत्रिधास्यादित्यर्थः ४५ उक्तस्यशरीरत्रयस्यमध्येजननमरणादितत्संबंधतद्भावौ क स्येत्याशंक्य विशिनष्टि नित्यमिति लिंगशरीरंतुनित्यंप्रागुक्तरीत्या स्थूलंतु नश्वरमुच्यते एतेनमरणसंबंधोदर्शितःजननसंबंधमाह अंकुरंतीति प्रतिवत्सरंवसंतादावित्यर्थः ४६ तच्च कियत्पर्यंतं तदाह संसारेइति भ्रममाणस्य कुलालचक्रवत्जननमरणप्रवाहेभ्रमतःजीवस्यसंसारेयावदज्ञानंतावत्स्थूलदेहाउत्पद्यंते इतिपूर्वेणान्वयः ४७ मुक्त्युपायंदर्शयति ध्वंसायेति लिंगदेहस्य

ध्वंसाय अयंलोकःसंप्रकाश्यतेमयेतिशेषःयावल्लोकेशरीरेंद्रियादिपाटवंपुरुषस्यतावदेवयतितव्यंनततइतिभावःमहताषुण्यपुं
जेनक्रीतेयंकायनौस्त्वयातरयावन्नभिद्येतभिन्नायांकिंततोभवेदित्युक्तेःतथाचलोकएवमुक्तिसाधनमपि तदभावे ज्ञानसाधनीभू
तगुरुशास्त्राद्यभावेनमुक्तिरपिनस्यादितिहृदयं ४८ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्त
विलासप्रकाशिकायांसप्तसप्ततितमोऽध्यायः ७७॥ ❀ ॥ संप्रतिपरमकारुणिकःपरमशिवःसाक्षान्निजपदंप्रत्युपायमुपदिशति बहूनि

श्रीअगस्त्यउ॰शिववाक्यं बहूनिप्राप्यजन्मानिजंतुरंतेचजन्मनां यथामांमत्प्रसादेनप्राप्नोत्येवंनिबोधत १ नाना
विधेषुभूतेषुभ्रमतःकर्मभिर्जनैः ब्राह्मणत्वंभवेदिष्ट्याजंतोर्ब्रह्मत्वसाधनम् २ यथाकार्कटिकीरेखापंकेताराय
तेक्वचित् तत्रदुस्संगसंत्यागात्संगतःसुलभासताम् ३ पुण्यतीर्थस्थलावासात्स्वधर्मपरिपालनात् नित्यंमत्पू
जयास्तुत्यामत्कथाश्रवणेनच ४ सेवयाममभक्तानांभूतेषुसमदर्शनात् दृष्टादृष्टेषुवैराग्यात्प्रतिषिद्धविवर्ज
नात् ५ गुरौनिर्व्याजयाभक्त्यामौनेनगुणदोषयोः अन्यैश्चनियमैर्युक्तःत्यक्ताहंधीर्विनश्वरे ६ चिराच्चित्तपरीपाकात्सर्वं
ब्रह्मेतिधीमतःकार्यप्रपंचविलयोभवेन्मय्येवकारणे ७ पंचीकृतानांभूतानामपंचीकरणेकृते स्वस्वांशेस्वांशयोगेनयथाप्रो

ति बहूनांजन्मनामन्तेज्ञानवान्मांप्रपद्यतइतिस्मृतेः १ नानेति ब्रह्मत्वसाधनंमुक्तिसाधनंब्राह्मणत्वंदिष्ट्यादैवयोगेनभवेदित्यन्वयः
२ उपमिनोतियथेति तथासतांसंगतिःसुलभेत्यर्थःसंगःसत्सुविधीयतामितिभगवत्पादैःप्रथमोपदेशविषयतया सत्संगस्यनि
र्दिष्टत्वादितिभावः ३ उपायांतराण्याह पुण्येति ४ ५ ६ ७ एवंपरमेश्वराऽनुग्रहेणसंजातचित्तपरिपाकस्य सर्वंखल्विदंब्रह्मे
तिजानतः दृश्यलयप्रकारंदर्शयति पंचीकृतानामिति प्राक्सृष्टिक्रमेपंचीकृतानांविभागपूर्वकंमिलितानांभूतानां अपंचीकृ

तेकरणेसतिस्वस्वांशेनिजनिजभागेखांशयोगेननिजभागसंबंधेनयथाप्रोक्तानिअविभागावस्थायांकथितानिपंचपंचैवभूतानिशु
द्धानिभवन्तीत्यर्थः ८ क्रमेणलयप्रकारमाह लीयतदृति यतोयदुत्पन्नंतस्मिन्तल्लीयतदृतिभावः ९ गुणेदृति एवमाकाश
पर्यंतं लयेअयमप्याकाशःतमसिगुणे लीयतदृतिभावःस्वाविद्यायाःस्व कीयाविद्याया विलयेसति सर्वसंसारमूलंमायाख्य
तंगुणंतत्रविस्मरेत् १० ननुचिरकालमनुभूतस्य विश्वस्यमिथ्याबुद्धिःकथंजायतेतत्राह मदिति ममभक्त्यैव एवकारेणदृत
व्यवच्छेदः दृश्यंमिथ्याभवेदित्यर्थः ततःदृग्रूपोयोवशिष्टःसचाहमस्मिउपसंहरति दृतीति ११ एतादृशज्ञानमपि नसर्वसुलभ

**लीयतेऽग्नियोवारिकारणेतत्रतेजसि वायोस्वकारणेचैतत्सोप्याकाशेस्वकारणे ९ गुणेतमस्ययमपिस्वावि
द्याविलयेसति सर्वसंसारमूलंतंमायाख्यंतत्रविस्मरेत् १० मदुक्त्यैवभवेन्मिथ्यायोवशिष्टःसचास्य
हं दृतिबंधस्यमोक्षस्यप्रकारःकथितोमया ११ एवंध्यात्वापुनर्जन्मशोकंतरतिकश्चन यद्वाचर्मवदा=
काशंवेष्टयेयुरिमंनराः १२ तदायंमामविज्ञायदुःखस्यांतंगमिष्यति ऋग्वेदादौविनिर्दिष्टंतथाथर्व
शिखात्यये १३ यत्तदेकमहंज्योतिरितिवेदांतनिर्णयः एवंभावयतेनित्यंयस्तिष्ठत्संगवर्जितः १४॥ ७ ॥**

मित्याह एवमिति कश्चनविरलः कश्चिन्मांवेत्तितत्वतदृतिस्मृतेः पुनर्जन्मशोकं जन्मपद मरणस्याप्युपलक्षणंजन्ममरणादिससार
दुःखमित्यर्थः तरति नसर्वोपीत्यर्थः ननुयतांसर्वेषामपि कुतोनमुक्तिरित्याह यदेति दृमंमहत्परिमाणमाकाशंचर्मवत् कृत्स्ना
जिनादिवत् वेष्टयेयुःसंकोचयेयुः१२ तदेति तस्मिन्कालेमांअविज्ञाय अज्ञात्वा दुःखस्यसंसारस्य अन्तंगमिष्यति तथाच यथाच
र्मणइव आकाशवेष्टनंदुष्करंतथाममज्ञानंविनामुक्तिरपिदुर्लभेत्यर्थः तमेवविदित्वाऽतिमृत्युमेति मामेवयेप्रपद्यन्तेमायामेतांत

रन्तिते इति श्रुतिस्मृतिबलादितिभावः॥ निजस्वरूपमेवकुत्रप्रदर्शितं तदाह ऋग्वेदादाविति १३ १४ १५ १६ एवंप्रतिपादितपुराण
स्यश्रवणपठनादिमाहात्म्यंदर्शयति शिवेति शिवभक्तेंद्राणांशेवाग्रणीनांमाहात्म्य यस्मिन् तदिदं आम्नायसंमितं वेदतुल्यं अतए
वपावनं पुराणंश्रवणात् शंभोःप्रीतिकारकमित्यर्थः १७ पुराणपाठस्यस्थाननिर्दिशति आलयेइति १८ नियममाह धृतेति १९
विधानमाह शिवेति २० अस्येति त्रिषष्टिभक्तकथानिबद्धस्य भक्तविलासाख्यस्यउपपुराणस्यशिवप्रीतिं विदधाति करो

तस्यैदृशेनमस्कृत्यमुनयःपरमेश्वरं तदंघ्रिसेवयापश्यन्पारंमिथ्यामहोदधेः१५ सूतउवाच इत्युक्त्वा
शिवभक्तानामग्रणीःकुंभसंभवः तापसैःपूजितःसर्वैःस्वाश्रमंप्रत्यपद्यत १६ शिवभक्तेन्द्रमाहात्म्यमि
दमाम्नायसंमितं पुराणंपावनंशंभोःश्रवणात्सौतिकारकम् १७ आलयेवामहेशस्यपुण्येवाथनदीतटे
समाजेचद्विजेंद्राणांपठितव्यंसमाहितैः १८ धृतत्रिपुंड्रुद्राक्षागुरुंध्यात्वाशिवंहृदि बांधवप्रसादमीश्व
रस्यनियमास्त्रयतीपठेत् १९ शिवभक्तगुरुंविप्रउपविश्योन्नतासने वाग्यतःप्रयतोभूत्वातन्त्वाशृणु
यादिमम् २० अस्यभक्तविलासस्यशिवप्रीतिविधायिनः पुस्तकानांशतंभक्त्याब्राह्मणेभ्योददातियः २१
शतरुद्रीयमन्त्रोक्तरुद्ररूपेणसर्वतः सर्वलोकाधिपोभूत्वाविहरेत्सजगत्त्रये २२ ७ ७ ७

तीतितच्छीलस्य २१ शतेति शतरुद्रीय-मन्त्रे रुद्राध्यायेउक्तायेरुद्राःसहस्राणिसहस्रशोयइति मन्त्रप्रतिपादिताः तद्रूपेण
सर्वतःसर्वप्रकारेण २२ विशेषानुष्ठानमाह एकादशेति एकादशभिरधिकंशतं ब्राह्मणान्विंशत्याद्याःसदैकत्वेइतिकोशात् श
तशब्दस्य एकवचनान्तता पाठकत्वेनपाठकर्त्तृत्वेनवृणुयात् यथाशक्तिदक्षिणादिभिः वरणंकुर्यात् शिवसायुज्यसिद्धयेइति

परमपुरुषार्थरूपमुक्तिफलप्रदर्शनं २३ एकादशेति व्रतोऽपवासव्रतवान् दशांशतः होमादि दृत्यादिपदेन तर्पणमार्जन ब्राह्म
णभोजनान्त पञ्चाङ्ग·पुरश्चरणमुक्तं पुस्तकमिति जात्येकवचनं पुस्तकानीत्यर्थः २४ वस्त्रेति आद्यपदेन शय्यान्न पानपा
त्रादि गृह्यते यथाविधि विधिमनतिक्रम्य सर्वकामानिति तत्रहेतुः शिव एवस्वयंभवेदिति शिवस्यआप्तसर्वकामत्वात्

एकादशाधिकशतंब्राह्मणान्भक्तिपूर्वकं वणुयात्पाठकत्वेनशिवसायुज्यसिद्धये २३ एकादशदिनैरेतत्पुरा
णंवाचयेद्यदी दशांशतश्चहोमादिकृत्वादत्वाचपुस्तकम् २४ वस्त्रालंकाररत्नाद्यैर्दक्षिणाभिर्यथाविधि स
र्वकामान्लभेत्सर्वशिवएवस्वयंभवेत् २५ चरित्रमेकमध्यायमेकंवाकार्यभक्तिमान सर्वपापैःप्रमुच्येतः
प्रीतस्तस्यशिवोभवेत् २६ ब्राह्मणोब्राह्मणाच्छ्रुत्वाशिवभक्तिपरायणः यंयंकामयतेकाममाप्नुयादचिरे
णतम् २७ नियमादिदमाकार्यंवंध्यापिलभतेसुतं ब्रह्मचारीशुभांकन्यांभर्त्तारंकन्यकाप्नुयात् २८
क्षत्रियोब्राह्मणाच्छ्रुत्वाध्रुवंराज्यमवाप्नुयात् वैश्योजनःपाठ्यफलंभद्रःसंपूज्यतामियात् २९ श्रुत्वासक
ज्जातश्चमुच्यतेपापसंचयैः निर्धनोधनमाप्नोतिरोगीरोगाद्विमुच्यते ३० यशस्वीस्याद्यशस्कामोनिष्का
मोमोक्षमाप्नुयात् नाध्वरैर्नतपोभिर्वानव्रतैरपिदुष्करैः ३१ तथाप्रीतिर्भवेच्छंभोर्यथास्यश्रवणाद्भवेत् श्रुत्वा
त्रिषष्टिभक्तानांचरितानिसदाशिवम् ३२ ध्यायतोहृदयांभोजेनास्तिकालभयंमहत् कलौयुगेविशेषेणपुराणभक्ति

तंयथायथोपास्ते तथैव भवतीतिभक्तस्यापि तत्फलमवश्यंभवतीति सूचयितुं सत्यमित्युक्तं २५ एकदेशश्रवणेपि सकलपाप
क्षयरूपंफलमाह चरित्रमिति २६ ब्राह्मणाच्छ्रवणे ब्राह्मणस्यविशेषफलमाह ब्राह्मणइति २७ अन्येषामपितत्तत्कामनावतां

तत्तत्फलमाह नित्यमादित्यादिना २८ २९ ३० ३१ ३२ ३३ संप्रतिसूतः स्वाहंकारपरिहारपूर्वकंमुनीन्प्रत्याह श्रोतव्यमिति य
थामति यथाज्ञानम् ३४ ३५ उपसंहरति सूतइति ३६ एवंपुराणश्रवणानन्तरं मुनीनांकृत्यमाह श्रीसूतेति ३७ संप्रति हरश
र्मामुनिर्विनयपूर्वकंविद्वज्जनादरणंनिजकृतेःप्रार्थयतेवाणीति तत्रोपमा यथेति ३८ मधुरेणसमापयेदिति न्यायेन ग्रंथांते आशी

श्रोतव्यमिदमेवात्रनान्यत्सिद्धेद्यतः क्वचित् यथामतिमयोक्तंतद्युष्माभिश्चश्रुतंयतः ३४ तस्माद्यूयंवः
यंचापिनूनंधन्यतमास्मृताः जन्ममृत्युहरःश्रीमानप्रसीदतुमहेश्वरः ३५ सूतएवंमुनीनुक्त्वाशुद्धएवग
तेनसः कैलासशिखरस्थायशिवायविदधेनमः ३६ श्रीसूतवक्त्राब्जमधुप्रवाहंपुराणसारंपुरुषार्थहेतुम्
निशम्यहृष्टामुनयश्चसर्वेतंसत्रयागंविधिवद्वितेनुः ३७ वाणीमदीयापिगुणेनहीनामहेश्वरस्तोत्रपठेति
सद्भिः श्लाघ्याभवत्येवयथार्कपुष्पस्रग्गंधशून्यागिरिशप्रियैव ३८ वाणीवरप्रसादेनस्तुतिःशंभोर्विजृंभ
तां प्रसीदतुमहादेवःशिवायगुरवेनमः ३९ इतिश्रीस्कांदोपपुराणेभक्तविलासेऽष्टसप्ततितमोऽध्यायः
७८॥ ❀ ॥ सुदर्शनीलकंठश्चवैभ्योथसुमतिर्मतः जयोमारश्चसत्यार्थोवीरभिंदःपदोद्भवः १ द्विजश्चामर
नीसाख्योदारकोभक्तशेखरः अनपायनयोराजाशूरणादिनामकः २ निषादश्चकलानाथोमानविक्र
मभूपतिः गोनाथोमूर्त्तिनाथश्चस्कंदनाथोद्विजोत्तमः ३ द्विजःपशुपतिर्नंदीनीचश्चसविचारवान् ॥ ७ ॥

नेमस्क्रियादिरूपंमंगलमुपनिबध्नाति वाणीति ३९ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराणव्याख्यायांभक्त
विलासप्रकाशिकायांऽष्टसप्ततितमोऽध्यायः ७८॥ ❀ ॥ संप्रति आदितःपुराणप्रतिपादितत्रिषष्टिशिवभक्तनामानियथाक्र

चंडेशोरसनाराजस्तत्त्वसातिलकावती ४ कुलपक्षःपांड्यमंत्रीविद्याभूरोद्विजोत्तमः सापूतवत्यभूति श्चनीलनग्नःकवीश्वरः ५ नवनदीक्षपणकध्वसीचकलिकामजित् श्रीमूलनाथःसिद्धश्चदंडस्यागे श्वरांघ्रिभाक् ६ शिवभक्तोचेकःभूद्वासोमयाजीशिवप्रियः शाक्यनाथोमुक्तसंवारूढ शार्दूलनामः कः ७ दंभभक्तश्चेरभूपगणनाथोद्विजोत्तमः परांतकन्नृपःसत्यदासनामाद्विजोत्तमः ८ धर्मकेतुः प्रतापाख्योऽतिभक्तोधीवरोत्तमः चक्रीमानधनोराजाशक्तिगोपगणोलवः ९ अविकार्यभिरामश्च निरुक्तिस्तापसोत्तमः सिद्धद्विजःकीर्त्तिसहःशूरव्याघश्चभूपतिः १० पद्मावतीशंभुचित्तःगजलूतेचवि श्रुते गीताकरोवेणकश्चभक्ताःषष्तित्रयःस्मृताः ११ येप्रोक्तास्तेषुविज्ञेयःसुंदरःसहिसत्तमः ग्राहग्रस्तोद्विजसुतोयेनानीयतलीलया १२ श्रीऋषयऊचुः कथंद्विजसुतःकुत्रग्राहग्रस्तोमहामुने संमोचितः कथंतेनसुंदरेणमहात्मना १३ श्रीअगस्त्यउ· अविनाशीतिजगतीप्रथितंपदमैश्वरं तत्राग्रहारस्समहा नशिवभक्तैरलंकृतः १४ सुहृदौतत्रचास्तांद्वौद्विजौसन्निहितालयौ तयोस्सुतावजायेतांमास्येकस्मिन्महा त्मनोः १५ बाल्येतयोरभूत्सख्यंरामलक्ष्मणयोरिव कृतचौलोचतोकालेसंचरंतावितस्ततः १६ कदाचिका लगत्यैतौनिकटेसरसीगतौ गृहीतुमुत्पलंकश्चित्बाल्याद्वारिण्यवातरत् १७ कश्चित्स्थितस्तटेभीतोजले ग्राहस्तमग्रहीत् सरुदन्मातुरागत्यतटस्थोमित्रमंभसि १८ मग्नंजगादसापित्रोरथसर्वेचसंगताः॥ ० ॥

शंयति येऽति १२ एवंप्राशस्त्यवर्णनेनपुनरपिऋषीणांऋतृसतयाअगस्त्यंप्रति तन्माहात्म्यजिज्ञासांतावदाह कथमिति १३ तदाक

र्ण्ये कुम्भसम्भवः तेषां बुद्ध्यारोहाय पुनरेकामाख्यायिकामाह अविनाशीति १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ सुंदरंमेनिरेधिकमिति तृतीयाध्याये सुंदरायदद्दौ सर्वास्वशक्तिंसुन्दरेश्वरइति परमशिवप्रतिबिंबतयाचिदाभासरूपस्य तदेवानुप्राविशदिति श्रुत्याप्रवेशितसर्वशक्तिकस्यसुन्दरस्य आधिक्यमुपक्रान्तं तदेवपुनरुपसंहारे प्रदर्श्य उपक्रमापेक्षया उपसंहारस्य प्राबल्यं दर्शयितुं दृयमुक्तिः उपक्रमोपसंहारयोः कस्यप्राबल्यमितिविचारे श्रीकंठविद्याचार्ये श्रीमदप्पय्य

अवतीर्यजलेबालमन्विष्यासायमाकुलाः १९ अदृष्ट्वाशोकसंतप्ताःप्रागुर्वेश्मानिनागराः तन्मातापितरौखिन्ना वेकपुत्रौशुचातुरौ २० गमयामासतुःकालंसार्द्धंसंवत्सरद्वयं एतस्मिन्समयेश्रीमान्सुंदरःसूक्तिसुंदरः २१ गीतांताश्रुतिसाराख्यांपठन्त्यागेश्वराज्ञया तत्रतत्रपदेशेवेक्रमात्तत्क्षेत्रमाविशत् २२ तदाययौमृतसुहृदुपनीतोद्विजार्भकः ननामनक्रग्रस्तस्यमातरंमातरंयथा २३ तन्मित्रमनुसंचिंत्यस्वपुत्रंतुल्यवार्षिकं रुरोदोपनयोऽस्यस्याद्यदिमेनमृतःसुतः २४ इतितस्यारुदत्यांतुसुंदरःपरमेश्वरं नत्वास्तुत्वाद्विजैःसार्द्धंप्रदक्षिणकृदाययौ २५ शुश्रावरुदितं तस्यामृतमातुस्थितःक्षणं किमेतदितिपप्रच्छजनास्तद्वृत्तमूचिरे २६ निवार्यरुदितंतस्यास्तुष्टावपरमेश्वरं अथाज्ञयामहेशस्यग्राहस्तंद्विजनंदनम् २७

दीक्षितैःउपक्रमपराक्रमेप्रतिपादितं तथाहि आकाशस्तल्लिंगादित्यधिकरणे भूताकाशपरत्वेनपूर्वपक्षमुत्थाप्य सर्वकारणत्वादिलिंगेनब्रह्मपरतयाउपसंहारःकृतः तल्लिंगादित्येकवचनस्वारस्येनभूयस्त्वानपेक्षेण केनचिदेवलिंगेनश्रुतेरन्यथानयनंविवक्षितमिति प्रतीतेश्चनचोपसंहारगतस्यापि सर्वकारणत्वादेरन्यथा सिद्धत्वंप्राबल्येहेतुः आकाशाद्वायुरित्यादिश्रुत्यन्तरसिद्धभूताका

शगतवाय्वादिसर्वभूतकारणत्वाभिप्रायेणसर्वकारणत्वव्यपदेशः अग्रिमसंदर्भोपिवायावितरभूतलयस्थानत्वंतदपेक्ष्यज्यायस्त्वा
दिविषयइतिसर्वेषामन्यथानेतुंशक्यत्वात् नचाकाशादेवसमुत्पद्यन्तइतिसावधारणंकारणत्वंभूताकाशेनसंभवतितस्यतेजः
प्रभृतिकारणत्वे वाय्वादिकारणान्तरसापेक्षत्वादितिशंकनीयं ब्रह्मणोवैषम्यनैर्घृण्येनसापेक्षत्वादितिन्यायेन जगत्सृष्टौ
कालादृष्टादिसापेक्षत्वेनसाम्यात् कथंचिदवधारणसमर्थनस्य भूताकाशेपिसंभवात् तस्मात्प्रकारांतरासंम्भवादुपसंहार
गतमेवलिङ्गस्यप्राबल्ये हेतुरितिसिद्धमुपसंहारप्राबल्यापेक्षणमित्युपस्थाप्य समाप्तावपिसिद्धान्तितं तद्यथा एवंच सक

सभूषणगणंसांगमुद्ववाममुखात्स्वकात् ॥ सर्वेतुवि
स्मयाविष्टाः सुंदरंमेनिरेऽधिकम् २८ ॥ ७ ॥

लमीमांसाव्यवहारविरुद्धोनयसरणिग्रंथानभिज्ञैरर्वाचीनैः स्वमतस्यपरमतवैलक्षण्यप्रकटनायकल्पितोयमुपक्रमोपसंहार
बलाबलव्यत्ययोयवनगुरूपदिष्टशौचमुखक्षालनयोर्वापर्यव्यत्यवदुपेक्षणीयःप्रामाणिकैरितिसिद्धमित्यंतेन तथाच उपक्रमेप
रमशिवप्रसादेन सुंदरस्याधिक्यमुपक्रम्य समाप्तावपि तस्यैवाधिक्यवर्णनेनपरब्रह्मणस्तेजोघनस्य विस्फुलिंगाकारजीव
स्य निजरूपप्राप्त्यामुक्तस्वरूपमाधिक्यमिवनिजप्रतिबिम्बरूपस्य सुंदरस्य पुनर्निजतदात्म्य सम्पादनरूपकैवल्यमुक्तिरेवस

कलाधिक्यमितिदर्शितं इयंचकथास्कंदपुराणेनवमांशे संक्षेपेणदर्शिता तामवलंब्य परमकारुणिकेन हरशर्म्मे नाम्नामुनिना लो
कानुजिघृक्षया उत्तमभक्तान्तरकथाश्रपि संगृह्य कुम्भसम्भव शौनकादिसंवादमुखेन दर्शितेतिसंक्षेपः २९ तारण जेष्ठ पूर्वा

इतिश्रीस्कंदोपपुराणेभक्तविलासेसुंदराधिक्यवर्णनंनामएकोनाशीतितमोऽध्यायः ७९

आदित्यान्वयशेखरस्त्रिभुवन प्रख्यातकीर्त्ति
व्रजो दोर्दण्डाञ्चितखड्गखण्डितरिपु र्विश्रा
णानस्वस्तरुः॥ श्रीमन्माधवसिंहनामनृपति
र्योविश्रुतोदोमुदा मन्नालालबुधेनकाशिन
गरे तस्यान्नयामुद्रितम् ॥ ॥ ❀ ॥ ७ ॥

र्धद्वितीयास्थिरवासरे ॥ मानवल्लीनृसिंहेन कृतिरेषासमापिता ॥ इतिश्रीमानवल्युपनामकनृसिंहविरचितायांस्कंदोपपुराण
व्याख्यायांभक्तविलासप्रकाशिकायामेकोनाशीतितमोऽध्यायः ७९ ॥ ॥ ७ ॥ ❀ ॥ ❀ ॥ ❀ ❀ ॥



2229 4

BINDING SLOT: NOVEC

BL
1135
P778A22

Puranas. Skandapurana.
Sivabhaktavilasa
Skandopapuraniya siva-
bhakta vilasah

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 13 07 17 05 004 1